प्रतिताळप्रयोगोऽपि रागा नट्टा निगद्यते ।
शृङ्गारो विप्रलम्भाख्यो रस उत्तमनायकः ॥
दूतीसंवादकथनं नायिकायामिहेष्यते ।
एतत्स्याल्लक्षणं यत्र प्रबन्धस्सनिगद्यते ।
हरिहारताळराजीजलधरविलासितः ॥

कुम्भः

हर्षः

हास्यवस्तूपलब्धेस्तु मनसो यस्तुल्लासकः ।
विकारो जायते हर्षः स उक्तो हासकारणम् ॥

भावविवेकः

—चित्ताभिनयः

मनोरथस्य लाभेन सिद्धियोग्यस्य वस्तुनः ।
मित्रसङ्गाच्च दवादिप्रसादेन च कल्पितः ॥

मनः प्रसादो हर्षः स्यात् ।

ऊर्ध्वभागे पताकन्तु देवतानां निरूपणे ।
अञ्जलिं हस्तकं बध्वा देवतानां निरूपणे ॥
पताकार्धस्य संयोगं चालयेत्तदनन्तरम् ।
पुरोभागे कीलकं च पार्श्वे तु शिखरं तथा ॥
प्रियसङ्ग इति प्रोक्तं तत्तच्चिह्नानुसारतः ।
हृदये मुकुलं बध्वा चतुरे चतुरं तथा ।
वस्तुनीष्टे दर्शयन्ति करटीका विशारदाः ॥

विनायकः

—व्यभिचारिभावः

हर्षोनाम मनोरथलाभेष्टजनसमागमनमनःपरितोषदेव गुरुराजभर्तृप्रसादभोजनाच्छादनलाभोपभोगादिभिर्विभावैरुत्पद्यते । नयनवदनप्रसादप्रियभाषणालिङ्गनकण्टकितपुलकिताश्रुस्वेदादिभिरभिनयेत् ।

भरतः

अभिरूपोपभोगाच्च बन्धुतृप्तेरसुभोजनात् ।
अचिन्त्येष्टार्थसम्पत्तेः जायते सर्वदा नृणाम् ॥
हर्षः
मनःप्रसादो हर्षः । नरसिंहः

सर्वाङ्गीणः प्रमोदस्य व्यापारो हर्ष उच्यते ।
अभिप्रेतोत्सवादिभ्यः तस्य जन्मोपलभ्यते ।
तस्मिन्नेवोपजायन्ते सस्वेदा गद्गदा गिरः ॥

सर्वेश्वरः

हर्षकम्—कण्ठभूषणम्

समुद्गकं सर्पादिरूपतया प्रसिद्धम् ।

अभिनवः

हर्षपुरी—रागः

दूराद्धसति धैवतध्वनिविहीना पुनस्सप्तमे,
तारोदीरितमध्यमा च पदवी गान्धारकोद्दीपिता ।
न्यासांशग्रहसम्प्रहातविलसत्षड्जाभिरम्या मनो
हर्षं हर्षपुरी न कस्य कुरुते श्रोतुर्जगद्वर्णिता ॥

नान्यः

धैवतरहिता भवतिगमपतारसमुज्ज्वलात्तु हर्षपुरी ।
षड्जस्वरगमकयुता षड्जन्यासग्रहांशका भवति ॥

कश्यपः

षड्जांशा षड्जबहुला षड्जन्यासेन शोभिता ।
नादाद्याश्च निरालम्बा ख्याता हर्षपुरी वरा ॥

सोमेश्वरः

यद्यस्य मूर्छनामध्या तदा हर्षपुरी भवेत् ।
अस्येति मालवश्रीः ।

हरिः

मूर्छना शुद्धमध्या चेत् सव हर्षपुरी मता ।
शृङ्गारे विनियोगस्स्यादमयोरुभयोरपि ॥

जगदेकः

सेति मालवश्रीः । उभयोरिति मालवश्रीहर्षपुर्योः ।

—(देशीया) रागः

अधैवता हर्षपुरी तारमध्यमपञ्चमा ।
मालवकैशिकोत्पन्ना मन्द्रषड्जविभूषिता ॥

मोक्षः

हर्षपुरीरागध्यानम्

निपात्य तल्पे सुदृढानुरागा
कान्तं रते सुप्तमवेत्य मुग्धा ।
प्रौढाङ्गना पौरुषमाचरन्ती
मनोहरा हर्षपुरी प्रविष्टा ॥

संगीतसरणिः

हर्षवर्धनम्—नृत्तकरणम्

नन्द्यावर्ते स्थितिरिंसहमुखश्चैवालपल्लवः ।
द्रुता दृष्टिश्शिरस्तत्र सकम्पपरिवाहितम् ।
नन्द्यावर्तसमुद्भूता चारी तद्धर्षवर्धनम् ॥

नन्दी

अत्र, नन्द्यावर्तं स्थानं । सिंहमुखो हस्तः । नन्द्यावर्ता गतिः । सिंहमुखो यथा, मध्यमानामिकाभ्यां अङ्गुष्ठमेलनं, शिष्टाङ्गुष्ठस्य प्रसारणम् ।

नन्द्यावर्ता गतिः—दक्षिणोंऽघ्रिः समः वामस्य तिर्यग्गमनम् ।

हर्षवर्धनः—प्रबन्धः

इष्टाभ्यां रागतालाभ्यां पदैस्सबिरुदैः स्वरैः ।
पादैरेवं क्रमैर्यस्य भवेद्बन्धस्य कल्पना ।
सपञ्चाङ्गप्रबन्धः स्यात्प्रशस्तो हर्षवर्धनः ॥

पण्डितमण्डली

पदश्च बिरुदैस्तेनस्स्वरैः पाटैश्च संयुतः ।
चित्रतालाश्रित इति ख्यापितो हर्षवर्धनः ॥

हरिपालः

यः पदैर्बिरुदैस्सर्वैस्स्वरैः पाटैश्च संयुतः ।
ताभ्यां चित्रगुतालाभ्यां विज्ञेयो हर्षवर्धनः ॥

जगधालः

पदैस्सबिरुदैर्हर्षवर्धनस्स्वरपाटकैः ।

श्रीकण्ठः

हर्षः—दृष्टिः

हर्षे निश्चलतारत्वं । शारदातनयः

हलायुधः—देशीतालः

हलायुधे दलौपः स्यात् ।
० । ऽ लक्ष्मणः

हल्लीसकम्

मण्डलेन तु यन्नृत्तं हल्लीसकमितिस्मृतम् ।
एकस्तत्र तु नेता स्याद्गोपस्त्रीणां यथा हरिः ॥
अत्र प्रविश्य नर्तक्यः चर्चर्यामिव युग्मशः ।
गोपाङ्गना यथैकेन माधवेन समन्विताः ॥
तद्वदेकेन सहिता नायकेन सविभ्रमम् ।
महोत्सवेषु नृत्यन्ति मण्डलाकारलीलया ॥
हल्लीसकं तदाचष्ट वीरनारायणो नृपः ।
तदेव कैश्चिच्चतुरैरुक्तं मण्डलरासकम् ॥ वेमः

—नृत्तरूपकम्

हल्लीसकं तु सप्ताष्टदशस्त्रीजनसुङ्कुलम् ।
संप्रयोज्यैकपुरुषं कैशिकीवृत्तिभूषितम् ॥

एकाङ्कं स्यादुद्धतोक्तिबहुताललयात्मकम् ।
निदर्शनं भवेदस्य केलिरैवतकं मतम् ॥

अमृतानन्दी

अथ हल्लीसकं सप्त नवाष्टदशनायिकम् ।
सानुद्धतोक्ति चैकाङ्कं कैशिकीवृत्तिभूषितम् ॥
एकाङ्कं वा भवेद्व्यङ्कं विमर्शमुखसन्धिमत् ।
सगेयलास्यं यतिमत्खण्डताललयान्वितम् ।
एकत्रिश्रामसहितं यथा स्यात्केलिरैवतम् ॥

शारदातनयः

हस्तपाटाः

नागबन्धः स्वस्तिकश्चालगश्शुद्धिस्तथैव च ।
समस्खलित इत्येते हस्तपाटास्तु पञ्च च ॥
सद्यो जाताद्वामदेवात्तथाऽघोराभिधादपि ।
ततस्तत्पुरुषात्तथाच ततश्चैशानसंज्ञितान् ॥
एभ्यो मुखेभ्यः पञ्चभ्यो जाता गौरीपतेः क्रमात् ।
ब्रह्मविष्णुमहेशार्कचन्द्रास्तेषां च देवताः ॥
एते च सर्वपाटानां मुख्यत्वेन प्रकाशिताः ।
नागबन्धे नागबन्धः पत्तनश्च ततःपरम् ॥
एकश्चैव सरश्चैव ततो दूसरसंज्ञिणः ।
सञ्चारश्चाय विज्ञेय इति सप्तभिदा मताः ॥
अथ स्वस्तिकभेदास्तु स्वस्तिको यलिकोहलः ।
तथा च फुल्लविक्षेपः सञ्चारविलिखो ततः ॥
कुण्डली विक्षेपकश्च पूरकाख्यस्ततःपरम् ।
खण्डपूर्वो नागबन्ध इति सप्त स्मृताः क्रमात् ॥
अलगश्च तथाऽऽसारो विश्रामाख्यस्तथैव च ।
ततःपरं स्याद्विषमखिलीस्फुरणकस्तथा ॥
सरिः स्फुटा च सप्तस्युरलगस्य भिदा इमाः ।
शुद्धस्वरः स्फुरणकश्चाङ्गुलिर्वलितकाभिधः ॥
ततोऽवघटसंज्ञश्च तकाराख्यस्ततःपरम् ।
माणिक्यवल्लीका चेति सप्त शुद्धभिधा मताः ॥
समस्खलितसंज्ञश्च विघटस्सदशस्तथा ।
खली चाङ्गुखलीचैवानुत्फुल्लो खुत्तसंज्ञकः ॥
समस्खलितकस्येते सप्तभेदाः प्रकीर्तिताः ।
पञ्चत्रिंशदमी पाटास्तलपाटा इति स्मृताः ॥
विषमोऽर्धसमः कोणाहतस्संभ्रान्त इत्यपि ।
हस्तपाटास्तु चत्वारो नन्दिकेश्वरसम्मताः ।
उत्फुल्लः कलकश्चैव पाण्यन्तरनिकुट्टकः ॥

दण्डहस्तः पिण्डहस्तो युग्महस्तोऽर्धहस्तकः ।
स्थूलहस्तोऽर्धार्धहस्तः पार्श्वपाणिस्ततःपरम् ॥
समपाणिश्च विषमपाणिश्चैवार्धपाणिकः ।
पाणिहस्तः कर्तरी च क्रमश्च समकर्तरी ॥
विषमाख्या कर्तरी च नागबन्धस्तथैव च ।
ततोऽवघटसंज्ञश्च स्वस्तिकश्च समग्रहः ॥
पटहादिष्वमी हस्तपाटा इत्येकविंशतिः ।
उल्लोदश्चैव निर्घोषः ततः स्यात्खण्डकर्तरी ॥
पाटान्तरो दण्डहस्तः तथा समनखाभिधः ।
बिन्दुर्यमलहस्तश्च रेचितो भ्रमरस्तथा ॥
विद्युद्विलासो लम्बाख्यस्ततस्स्यादर्धकर्तरी ।
रेफश्च समपाणिश्च परिवृत्तस्तथेत्यमी ॥
पटहादौ हुडुक्कायामपि षोडश कीर्तिताः ।
तलप्रहारसंज्ञश्च प्रहारो खिलितस्तथा ॥
अर्धसञ्चलितसञ्चश्च तथैव गुरुगुञ्जितः ।
विषमोऽभ्यस्त इत्यष्टौ पाटास्तु विषमा मताः ॥
त एव वाद्यतत्त्वज्ञैरपाटा इति कीर्तिताः ।
सञ्चो विच्छुरितश्चेमौ स्यातामलगपाटकौ ॥
भ्रमरः कुञ्चितश्चैव चित्रपाटौ प्रकीर्तितौ ।
अष्टाशीतिरिमे हस्तपाटास्सर्वे तु मिश्रतः ।
एषामुत्पादका हस्ताः लक्षणीयास्तु लोकतः ॥

वेमः

हस्ताः

पताकस्त्रिपताकश्च तथैव कर्तरीमुखः ।
अर्धचन्द्रो ह्यरालश्च शुकतुण्डस्तथैव च ॥
मुष्टिश्च शिखराख्यश्च कपित्थः खटकामुखः ।
सूच्याख्यः पद्मकोशः सर्पशिरा मृगशीर्षकः ॥
काङ्गूलकोऽलपद्मश्च चतुरो भ्रमरस्तथा ।
हंसास्यो हंसपक्षश्च सन्दंशो मुकुलस्तदा ॥
ऊर्णनाभस्ताम्रचूडश्चतुर्विंशतिरीरिताः ।
असंयतास्संयुताश्च गदतो मे निबोधत ॥
अञ्जलिश्च कपोतश्च कर्कटस्स्वस्तिकस्तथा ।
खटकावर्धमानश्च ह्युत्सङ्गो निषधस्तथा ॥
दोलःपुष्पपुटश्चैव तथा मकर एव च ।
गजदन्तोऽवहित्थश्च वर्धमानस्तथैव च ॥
एते तु संयुता हस्ता मया प्रोक्तास्त्रयोदश ।
नृत्तहस्तानतश्चोर्ध्वं गदतो मे निबोधत ॥

चतुरश्रौ तथोद्वृत्तौ तथा तलमुखौ स्मृतौ ।
स्वस्तिकौ विप्रकीर्णौ चाप्यरालः खटकामुखौ ॥
आविद्धवक्त्रौ सूच्यास्यौ रेचितावर्धरेचितौ ।
उत्तानवञ्चितौ चैव पल्लवौ च तथा करौ ॥
नितम्बावपि विज्ञेयौ केशबन्धौ तथैव च ।
लताख्यौ च तथा प्रोक्तौ करिहस्तस्तथैव च ॥
पक्षवञ्चितकौ चैव पक्षप्रद्योतकौ तथा ।
ज्ञेयौ गरुडपक्षा च दण्डपक्षावतःपरम् ॥
ऊर्ध्वमण्डलिनौ चैव पार्श्वमण्डलिनौ तथा ।
उरोमण्डलिनौ चैव उरः पार्श्वार्धमण्डलौ ॥
मुष्टिकस्वस्तिकौ चापि नलिनीपद्मकोशकौ ।
अलपल्लवोल्बणौ च ललितौ वलितौ तथा ॥
चतुष्षष्टिकराश्चैते नामतोऽभिहिता मया ।

भरतः

हरिपालस्तु, अर्धपताक, मयूर, बाण, सिंहमुख, अपवेष्टित, उद्वेष्टित, व्यावृत्त, परिवृत्त, डमरु, वर्तनैरसंयुतहस्तैः कर्तरी-स्वस्तिक, चतुरस्स्वस्तिक, पताकस्वस्तिक, कलश, उत्सङ्ग, तिलक, नागबन्ध, वेष्णवैः, संयुतहस्तैः, दण्डहस्ताख्यनृत्तहस्तेन चाधिकतया, केषांचिदप्रसिद्धहस्तानां त्यागेन च हस्तानां सप्ततिरिति प्राह ।

विप्रदास कुम्भौ तु, उपधान, सिंहमुख, कदम्ब, निकुञ्चकै-रसंयुतैर्योगप्रद, आलिङ्गन, द्विशिखर, कलापक, किरीट, चषक, लेखनैस्संयुतहस्तैश्च, वरदाभयेन नृत्तहस्तेन च, क्रमादशीति-रेव स्युः सर्वे संभूयहस्तका इत्यूचतुः । सोमेश्वरस्तु चतुर्विंशतिर-संयुतान्, त्रयोदश संयुतान्, सप्तविंशतिनृत्तहस्तान्, संभूय चतुष्षष्टिकरान् लक्षितवान् । स च भरतस्य ललितवलिताभिध-नृत्तहस्तद्वयं मुक्त्वा चतुष्षष्टिकरानाह । ललितवलिताभिधौ पताकस्य नामान्तरेण निर्दिष्टौविति मन्यते ।

शार्ङ्गदेवस्तु अलपल्लवावुल्बणौ इति भरतोद्देशं पठित्वा ललितवलिताभ्यां मिलित्वा सप्तषष्टिकरान् वक्ति ।

ज्यायनः

"यद्येवं मिलितास्सर्वे षट्षष्टिर्मित्रधा अपि ।
"चतुष्षष्टिकराश्चैते नामतोऽभिहिता मया" ॥
इत्युक्तं ब्रह्मपुत्रेण भरतेनापि तत्कथम् ।
अयुक्तेषु च सूच्यास्यः स्वस्तिकस्संयुतेष्वपि ॥

तावेवात्र समानाख्यौ नृत्तहस्तौ प्रकीर्तितौ ।
यत्तु नामत इत्याह मुनिस्सत्यं न चान्यथा ॥

पल्लवावेव कलितौ लताख्यौ वलिताविति ।
निश्चित्य नृत्यहस्तेषु हित्वा तद्द्वितयं पुनः ।

सोमेश्वरादयः केचित्सप्तविंशतिमूचिरे ॥

स्वस्तिकौ विप्रकीर्णौ च रेचितावर्धरेचितौ ।
नामभेदान्मिथो भिन्नौ तद्वदत्रापि मन्यताम् ॥

स्यातां येषां मते भिन्नावुल्बणावलपल्लवौ ।
मण्डलानां च सामान्यमण्डलत्वमिति ध्रुवम् ॥

सन्त्यज्य त्रितयं तेषु नृत्तविद्याविशारदैः ।
एवं चेन्न पृथक् स्यातां रेचितावर्धरेचितौ ॥

उल्बणावलपद्मौ च भिन्नौ यदि मुनेर्मते ।
बहुत्वं प्राप्नुतश्चेतावलपद्मोल्बणाविति ॥

अञ्जल्यादेः करद्वन्द्वप्रयोज्यस्य कथं मुनिः ।
उक्त्वैकवचनं नृत्तहस्ते द्विवचनं व्यधात् ॥

संयुक्तयोस्तयोस्सिद्धिः हस्तत्वे सतत भवेत् ।
नृत्तहस्तेषु हस्ताभ्यां हस्तेनैकेन वा भवेत् ।
हस्तत्वसिद्धिरित्यस्मात्कारणे उभयोरपि " ॥

ताम्रचूडाद्वर्धमानाल्ललिताख्यात्परे कराः ।
ये प्रोक्तास्त्रिविधास्तेभ्यः पूर्वं ये कथिताः कराः ॥

तेष्वर्धचतुरश्राख्यं विहाय मिलिताः किल ।
चतुष्षष्टिर्भवन्तीति केचिदूचुर्विपश्चितः ॥

सप्तषष्टिर्भवन्तीति रत्नाकरकृदभ्यधात् ।
चतुष्षष्टित्वमेतेषां शास्त्रयुक्तिबहिष्कृतम् ॥

सप्तषष्टित्वमाश्रित्य चतुष्षष्टित्वसिद्धये ।
उपपत्तिमवोचद्यां निश्शङ्कस्सापि निष्कला ॥

पल्लवाख्यावुल्बणयोस्स्वस्तिकौ विप्रकीर्णयोः ।
पार्श्वमण्डलिनोर्हस्तौ उरोमण्डलिनौ तथा ॥

स्यातां विशेषणं तेन न भिन्नाः पल्लवादयः ।
विशेषणविशेष्ये हि न स्यातां भिन्नगामिनी ॥

नीलमुत्पलमित्यत्र न हीष्टं पङ्कजाविति ।
यथा लोके देवदत्तदण्डौ सिद्धौ पृथक्त्वतः ॥

पृथक् प्रतीतो भजतो विशेषणविशेष्यताम् ।
दण्डः पुरुषवानेषः पुरुषो दण्डवानिति ॥

तथैते विप्रकीर्णाद्याः स्वस्तिकाद्यास्त्रयस्तथा ।
पृथक्सिद्धाः पृथक्ज्ञाताः कर्मबुद्धिव्यपेक्षया ॥

विशेषणविशेष्यत्वे प्राप्नुवन्ति परस्परम् ।
विप्रकीर्णस्वस्तिकाख्यावन्याबुल्बणपल्लवौ ॥

एवमन्यत्तृतीयोऽपि विपर्यस्तविशेषणः ।
एवमेते त्रयो हस्ताः तदुक्तैश्च जह त्रिभिः ॥

एवं सति षडन्ये स्युः विशिष्टा हस्तकाः क्रमात् ।
रूपभेदप्रसिद्धोयमविशिष्टविशिष्टयोः ॥

वैशिष्ट्योऽपि पुनस्सप्तषष्टित्वे पर्यवस्यति ।
विशेषणविशेष्यत्वे कृतमैक्यं न युज्यते ॥

हस्तेष्वतिप्रसङ्गस्स्यात्तथा सति दुरुत्तरः ।
सप्तषष्टित्वसंख्याऽपि नेयमैकान्तिकी मता ॥

आनन्त्यादभिधेयानां न च लोकानुसारतः ।
उत्पन्ना अनयारीत्याप्येतच्छास्त्रेण कथ्यते ॥

आचार्यैश्च तथैवेत उद्दिष्टा लक्षिताः पृथक् ।
तस्मादस्माभिरुक्तैव संख्यास्तु ज्यायसी सताम् ॥

....

अञ्जनश्चन्द्रकान्तोऽथ जयन्तश्चेति हस्तकाः ।
त्रयोऽन्ये दर्शितास्ते च प्रदर्श्यन्ते क्रमादिह ॥

नृत्तहस्तेषु नैतेषां संभवो दृश्यते यतः ।
तस्मादेतान्विप्रदासो हस्तकाननुमुन्यते ॥

विप्रदासः

हहोरी—मेलरागः (नटभैरवीमेलजन्यः)

(आ) स रि ग रि म प ध नि ध स .

(अव) स नि ध म ग रि स .

मञ्ज

हसितम् – हास्यरसभेदः

हास्यशब्दे द्रष्टव्यम् ।

हसितः—वर्णालङ्कारः

सप्तस्वरसमारोहे यत्रैकद्व्यादिवृद्धितः ।
भवेत्समेन हसितः सोऽलङ्कारः प्रकीर्तितः ॥

जगदेकः

एकोत्तरप्रवृत्ताभिरावृत्तिभिरुदीरितैः ।
स्वरैरारोहणं यत्र हसितं तं प्रचक्षते ॥

सरिरि गागागा मामामामा पापापापापा धधधधधध निनि-
निनिनिनिनि ।

—वर्णालङ्कारः (अवरोहि)

नीनीनीनीनीनीनीमा धाधाधाधाधाधा पापापापापा मामामामा गागागा रीरी स ।

पण्डितमण्डली

हस्तः—(हस्तःपाणिपादाकृतिः)

हस्तश्चैस्य पताकस्यादूर्ध्वं चलितरूपकः ।

शृङ्गारः

—पाटवाद्यम्

द्वे वा चत्वारि खण्डानि यत्राष्टौ षोडशाथवा ।
देंकारादीनि वाद्यन्ते स हस्तः स्याच्चतुर्विधः ।
चतुरश्रत्र्यश्रमिश्रखण्डतालैः प्रकीर्तितः ॥

वेमः

हस्तकरणानि

आवेष्टिताभिधं पूर्वमुद्वेष्टितमतः परम् ।
व्यावर्तितं तदा ज्ञेयं परिवर्तितमित्यपि ।
चतुर्धैवं तदाख्यातं तल्लक्ष्म व्याहरे क्रमात् ॥

अशोकः

हस्तकर्माणि

मोक्षणं रक्षणं क्षेपो निग्रहश्च परिग्रहः ।
धूननं श्लेषणं स्फोटो विश्लेषो मोटनं तथा ॥
तोलनं ताडनं छेदोत्कृष्टाकृष्टिविकृष्टयः ।
विसर्जनं तथाह्वानं तर्जनं भेद इत्यपि ।
संज्ञया ज्ञातलक्ष्माणि करकर्माणि विंशतिः ॥

अशोकः

हस्तक्षेत्राणि

शिरो ललाटं श्रवणं स्कन्धोरःकटिशीर्षकम् ।
नाभीपार्श्वद्वयं तस्मादूर्ध्वं चाधः पुरस्ततः ।
ऊरुद्वयं च हस्तानां क्षेत्राणीति त्रयोदश ॥

अशोकः

हस्तनेरिः—देशीनृत्तम्

चतुर्विंशतिहस्तैश्च संयुतैस्संहतादिभिः ।
दशभिस्स्थानकैश्चापि षट्कण च विनिर्मिता ॥
हस्तनेत्रशिरोभेदचमत्कारेण योजिता ।
विलम्बादादितालेन विक्त्यकाभिमुखा गतिः ।
हस्तनेरिरियं प्रोक्ता भरतादिमुनीश्वरैः ॥

वेदः

चतुर्विंशति हस्ताः असंयुता भरतोक्ताः । दशस्थानानि—संहतं मण्डलं, स्वस्तिकं, चतुरश्रं कुञ्चितं वैशाखं समपादं अश्वक्रान्तं वैष्णवं उत्कटं—इति । षट्चार्यः—स्तम्भक्रीडनिका, अर्ध्यर्धिका, अञ्चिता, ऊरुस्खलितिका, पुराटी, करिहस्ता इति ।

हस्तपत्रम्—अङ्गुलिभूषणम्

हस्तपाटः

ये पाटाः पटहे प्रोक्ताः तेषां त्रिविधगुम्भनात् ।
हस्तोद्भवाः पाटभेदाः हस्तपाटाः प्रकीर्तिताः ॥

शार्ङ्गदेवः

हस्तप्रचाराः

उत्तानोऽधोमुखः पार्श्वगतः पाणिरिति त्रिधा ।
प्रचारं भरतो मेने पञ्चधात्वपरे जगुः ॥
अग्रगोऽधस्तलश्चेति द्वौ त्रयश्च पुरामताः ।
तत्रत्वग्रगमुत्तानेऽधोमुखेऽधस्तलं करम् ॥
अन्तर्भूतं वदन् भट्टस्त्रित्वमेव समादधे ।
उत्तानोऽधस्तलः पार्श्वतलो हस्तोऽग्रतस्तलः ॥
स्वसम्मुखतलश्चोर्ध्वमुखोऽधोवदनस्तथा ।
पराङ्मुखस्संमुखश्च हस्तोन्यः पार्श्वतो मुखः ॥
ऊर्ध्वगोऽधोगतः पार्श्वगतो हस्तोऽग्रगोऽपरः ।
सम्मुखे गत इत्येतान् प्रचारान् दश पञ्च च ॥
लाक्ष्यलक्षणतत्त्वज्ञः शार्ङ्गदेवोऽभ्यभाषत ।
उत्तानोऽधः पार्श्वतलौ त्रिप्रकारा इमे कराः ॥
परे तदोर्ध्वपार्श्वाधोमुखा इति करास्तु षट् ।
अन्ये त्वग्रतलाद्या ये ऊर्ध्वगाधोगतादयः ॥
उत्तानादिप्रचारेषु भवन्त्यन्तर्गता इति ।
निर्णीय विप्रदासेन प्रचाराष्षडुदीरिताः ॥

भट्ट इत्यभिनवगुप्ताचार्यः स तु नाट्यशास्त्रव्याख्याने नवमेध्याये उत्तानशब्दार्थक्रियायां त्रैविध्यं वक्ति ।

विप्रदासः

हस्तप्राणाः

प्रसारणं कुञ्चितं च रेचितं चापि पुङ्खितम् ।
अपवेष्टितकं चापि प्रेरितोद्वेष्टिते अपि ॥
व्यावृत्तः परिवृत्तश्च सङ्केतस्तदनन्तरम् ।
चिह्नं पदार्थटीकेति प्राणा द्वादश हस्तजाः ॥

शृङ्गारः

हस्तमुक्तावली

शुभङ्करकृता। हस्तमुक्तावलीसमुद्धृतिका इति काचन व्याख्यापि नेपालेषु लभ्यते। काल: 1520.

हस्तमुक्तावलीसारसमुद्धृतिका

घनश्यामकृता अयं ग्रन्थ: शुभङ्करकृतहस्तमुक्तावलीव्याख्यारूप: अतिविपुल:। काल: क्रै. प. 1618.

हस्तली—बाहुभूषणम्

हस्ताभिनय:

पताकहस्तस्थापाङ्गुलीनां वैरल्येन कर्तव्य:।

महाराष्ट्र

हस्तिनीहस्त:

हस्तिन्यामधश्चतुरो रेचितौ ह्यपवेष्टितः।
गान्धाराख्यस्वरश्चापि हस्तिनी स्वर इष्यते॥

शृङ्गार:

ललाटस्याग्रभागेऽपि स्वांसदेशेऽपि वक्षसे।
नाभौ च मृगशीर्षाख्यो ह्यलपल्लववेष्टित:॥

पद्मिन्यामपि चित्रिण्यां हस्तिन्यां च विशेषत:।
शङ्खिन्यां च क्रमेणैव संयोज्यास्तु नृत्तिक्रमे॥

एतन्नन्दीश्वरमतम्

कुचिमारस्तु,

ललाटेंसेह्युरस्सीम्नि कुक्षेरग्रेच निश्चल:।
हस्तिन्यामपि शङ्खिन्यां चित्रिण्यां च नृत्तिक्रमे॥
पद्मिन्यां च क्रमेण स्यात् मृगशीर्षोमिध: कर:॥

हस्तिन्या अभिनय:

अलपल्लवमृगशीर्षयोरुर:स्थलधारणेन कर्तव्य:।

महाराष्ट्र

हस्तिशीला—स्त्री

महाहनुललाटाच मांसलोपचयान्विता।
पिङ्गाक्षी रोमशाङ्गी च गन्धमाल्यासवप्रिया॥
कोपनास्थिरसत्त्वा च जलोद्यानवनप्रिया।
मधुरामिरता चैव हस्तिसत्वा प्रकीर्तिता॥

भरत:

हाटकवराली—मेलराग: (हरिकाम्भोजीमेलजन्य:)

(आ) स रि म प ध स.
(अव) स नि ध प म ग रि ग स.

गान

हाटकाभरणम्—मेलराग: (कीरवाणीमेलजन्य:)

(आ) स रि ग म प ध नि स.
(अव) स नि प म रि म ग स.

गान

हाटकाम्बरी—मेलकर्ता (राग:)

स रि ० ० ग म ० प ० ० ध नि स.

गान

हार:—व्यालम्बिमुक्तालता

वक्षोभूषणम्।

हारदामविलास:—चालक:

अंसमध्यगतौ चारुलुठदङ्गुलिपल्लवौ।
पततो युगपद्यत्र हस्तौ विभ्रमशालिनौ।
हारदामविलासाख्य: रसे चालक उच्यते॥

वेम:

हाव:—अनुभाव:

अङ्गजोऽनुभाव:। भावहेलाशब्दौ पश्यत।
भावात्समुत्थितो हावो हावाद्धेला समुत्थिता॥
भावस्याधिकृतं सत्त्वं व्यतिरिक्तं च योनिषु।
नैकावस्थान्तरकृतं हावं तमिह निर्दिशेत्॥

भरत:

बहुविकारात्मा भ्रूतारकचिबुकग्रीवादेर्धर्म: स्वचित्तवृत्तिं परत्र जुह्वतीं ददतीं कुमारीं हावयातीति हाव:। सा चाद्यापि स्वयं रते: प्रबोधं न मन्यते। केवलं तत्संस्कारबलात्तथा विकारान्करोति। यैर्द्रष्टा तथा कल्पयति। स्मितं किञ्चिन्मुग्धमित्याद्युदाहरणम्।

अभिनव:

सबाष्पगद्गदालाप: सस्मितापाङ्गवीक्षितम्।
प्रेमदाक्षिण्यवृत्तिश्च तरुण्या हाव इष्यते॥

पद्मश्री:

स्मिताक्षिभ्रूविकारो य: शृङ्गाराकारसूचक:।
मन्मथावेशको ज्ञेयो हावश्चित्तसमुत्थित:॥

शारदा:

प्रान्तेषु शृङ्गाररसमाश्रयेषु तन्व्यास्तु कामाङ्कुरचिह्नभूतम् ।
उत्पद्यते यस्स्मितवीक्षितं च यदोपवक्त्रं कथितस्स हावः ॥

शिङ्गभूपालः

हरविलोचनानलज्वलितमदनतापनिर्वापणसुधासारसोदरस्मितं, प्रतिपदभङ्गिविदग्धवचनं, अपाङ्गगमागमिकलोकितं, स्नेहनिष्पन्दिप्रेमानुबन्धिकुलपालिकाचरणसुचिदाक्षिण्यानुवर्तिबाष्पभररुद्धकण्ठकुटीदुःखनिर्वापबाष्पगद्गदमालपितं यत्तरुण्याः स हावः ।

सागरः

हासः—स्थायिभावः

हासो नाम परचेष्टानुकरणकुहकासंबद्धप्रलापपौरोभाग्यमौर्ख्यादिभिरुत्पद्यते । तमभिनयेत्पूर्वोक्तैर्हसितादिभिरनुभावैः । पूर्वोक्तैः हास्यरसोक्तैरनुभावैरित्यर्थः ।

भरतः

हास्यः—रसः

हास्यो नाम रसो हास्यस्थायिभावात्मको भवेत् ।
वचनालङ्कारगात्रैर्विकृतैः स्वपराश्रितैः ॥
नटेनानुकृतैरेषविभावैरुपजायते ।
अनुभावा भवन्त्यस्य स्पन्दो नासाकपोलयोः ॥
तथौष्ठचलनं स्वेदो दृष्टिव्याकोशकुञ्चने ।
मुखरागः पार्श्वपीडेत्याद्यास्तैरभिनीयते ॥
अवहित्थालस्यतन्द्रानिद्राग्लान्यादयः स्मृताः ।
सञ्चारिणो द्विधा चायं स्वपराश्रयतो भवेत् ॥
स्त्रीनीचप्रकृतावेष भूयिष्ठो दृश्यते रसः ।
षड्भेदाश्चास्य विज्ञेयाः त्रिविधां प्रकृतिं श्रिताः ॥
स्मितं च हसितं च स्यादुत्तमप्रकृतौ नरे ।
भवेद्विहसितं चोपहसितं मध्यमे नरे ॥
नीचेऽपहसितं चातिहसितं च प्रवर्तते ।
ईषद्विहसितैर्गण्डैः कटाक्षैरप्यनुल्बणैः ॥
अलक्षितद्विजं धीरं स्मितमित्युच्यते बुधैः ।
उत्फुल्लाननेत्रं यद्गण्डैर्विकसितैर्युतम् ॥
किञ्चिल्लक्षितदन्तं च हसितं तत्प्रकीर्तितम् ।
आकुञ्चिताक्षिगण्डं यत्सस्वनं मधुरं तथा ॥
कालागतं सास्यरागं तद्वै विहसितं स्मृतम् ।
निकुञ्चितांसशीर्षं यज्जिह्मदृष्टिनिरीक्षणम् ॥
उत्फुल्लनासिकं यत्स्यात्सोपहसितं तु तत् ।
अस्थानप्रभवं साश्रुनेत्रमुत्कम्पितांसकम् ॥
शिरः कम्पयुतं यच्च तच्चापहसितं स्मृतम् ।
संरब्धसाश्रुनयनं विक्रुष्टस्वरमुद्धतम् ॥
करोपगूढपार्श्वं यत्तच्चातिहसितं भवेत् ।
वाङ्नेपथ्याङ्गिकात्मायं शृङ्गारश्च त्रिधा स्मृतः ॥
यद्यत्प्रहसनं वाक्यं सहासो वाचिकः स्मृतः ।
विपर्यासेन विक्षेपो माल्याभरणवाससाम् ॥
यस्सनेपथ्यजो हास्य इति निर्णीयते बुधैः ।
विकटाभिनयत्वं च यदाङ्गानां विलोक्यते ।
स्वभावाद्वाऽथ कपटात्स हास्यस्त्वाङ्गिको भवेत् ॥

विप्रदासः

सावहित्थैस्सविकृतैर्नेपथ्यैर्व्यङ्ग्यदर्शनैः ।
असंबद्धैस्तथालापैर्हासः स्यात्कुहकादिभिः ।
स्वप्नावहित्थालस्याः स्युस्तन्द्राद्या व्यभिचारिणः ॥

सागरः

हास्यरसो हासप्रभवः । तस्य विकृताकृतिविशेषादयो विभावाः । गण्डोल्लसननयनविकासदर्शनप्रकाशा अनुभावाः । निद्रालस्य श्रमादयो व्यभिचारिणः । द्विविधश्चायं आत्मस्थः-परस्थश्च । यथा—स्वयं हसति तदात्मस्थः । यदा तु परं हासयति तदा-परस्थः । आत्मस्थो यथा—पाणौ कङ्कणमुत्फणः पशुपतेर्हासोद्गमः पातु वः ; इति । परस्थो यथा—भिक्षो मांसनिषेवणमित्यादि । स्मितादयो भेदाः षट् । एषां च स्वपरस्थविभावभेदाद्द्वादश भेदाः । उत्तममध्यमाधमभेदात्पुनस्त्रिधा ।

रसविवेकः

अप्प्रत्ययान्तश्शब्दोऽयं हास इत्यभिधीयते ।
घञन्तो हासशब्दस्तु द्वयोः प्रत्यययोरपि ॥
विकृताङ्गवयोरूपभाषालङ्कारकर्मभिः ।
जनान्हासयतीत्येवं तस्माद्धास्यः प्रकीर्तितः ॥

शारदातनयः

हास्यम्

हास्यानि तेन वस्तूनि यद्दृष्ट्वा दुःखितोऽपि तत् ।
सहसा हसति स्पष्टसुखीत्वं विगतज्वरः ॥

भावविवेकः

हास्यकरणम्—नृत्तकरणम्

स्थानकन्त्वेकजान्वाख्यं मस्तकन्तु प्रकम्पितम् ।
अवहित्थकरौ हास्यदृष्टिश्चाप्यपि हास्यकृत् ।
यत्रैवं क्रियते नृत्तं तद्धास्यकरणं मतम् ॥

हास्यचारीलक्षणम् ।

विकटा हास्यहेतुश्च विदूषककृता यथा ।
हास्या गतिरिति ख्याता तदङ्गोपाङ्गसङ्गता ॥

हास्यरसः

सोऽयं हास्यो रसो नाम परिहासनिमित्ततः ।
यत्किञ्चिच्चेष्टयत्येव पुरुषानपि धीमतः ॥

भावविवेकः

हास्या—दृष्टिः

क्रमशः कुञ्चितपुटा विभ्रान्ता स्वल्पतारका ।
हास्या दृष्टिः प्रयोक्तव्या कुहके हास्यकर्मणि ॥

सोमेश्वरः

किञ्चिदभ्यन्तरालीनं विचित्रभ्रमणोज्ज्वलम् ।
दधती तारकायुग्ममाकुञ्चितपुटद्वयम् ॥
लोकानुसारतो मन्दमध्यतीव्रतयान्वितम् ।
मनो विनोदिनी दृष्टिर्हास्या हास्ये प्रशस्यते ॥

वेमः

हास्या दृष्टिरसावुक्ता सद्भिर्विस्मापने मता ।

अशोकः

अव्यक्तसञ्चारवती दृष्टिर्हास्या प्रकीर्तिता ।

शारदातनयः

हिन्दुघण्ठारवः—मेलरागः (नटभैरवीमेलजन्यः)

(आ) स रि म प ध नि ध स .

(अव) स नि ध नि प ध म ग रि ग स .

मध

हिन्दोलः—मेलरागः

हिन्दोलेऽथ रिपौ त्याज्यौ कोमलो धैवतो भवेत् ।

अहोबिलः

द्वितीयप्रहरोत्तरगेयः ।

—रागः

हिन्दोलको रिधत्यक्तः सग्रयो गदितो बुधैः ।
मूर्छना शुद्धमध्या स्यादौडवः काकलीयुतः ॥

दामोदरः

स्वरनामप्रसिद्धासु सप्तजातिषु धैवतीम् ।
आर्षभीं च परित्यज्य हीन्दोलो नाम जायते ॥

धैवतर्षभसंत्यक्तः षड्जन्यासग्रहांशकः ।
आद्यालङ्कारवर्णोऽसौ शुद्धमध्यममूर्छनः ॥
काकलीसङ्गसुभगो हिन्दोलो लक्षितस्ततः ।
मार्गहिन्दोलजातोऽथ हिन्दोलस्तारमध्यमः ॥
षड्जन्यासग्रहांशश्च षड्जपञ्चमकम्पितः ।
अयमेव वसन्तस्स्यादेशीहिन्दोल एव च ॥

हरिः

न्यासांशग्रहसध्वनिश्च सुरभोगश्शुद्धमध्यान्वितः
शृङ्गारे स्फुटकोकिलप्रियलसत्तानस्स्मरैकाधिपः ।
धैवत्यार्षभिकान्यजातिरहितस्सर्वस्वजातिष्वसौ
हिन्दोलो रिधवर्जितश्च हृदयस्यान्दोलिताज्जायते ॥

नान्यः

षड्जन्यासांशसंभूतो धैवतर्षभवर्जितः ।
आर्षभीधैवतीवर्जैः हिन्दोलस्सर्वजातिजः ॥

कश्यपः

—रागः (औडुवः)

षड्जन्यासग्रहांशोयं हिन्दोलो रिधवर्जितः ।
अधैवत्यार्षभाज्जातो वीरशृङ्गारयोस्सदा ॥

धैवतीमार्षभीं विना अन्यजात्युत्पन्नोऽयमित्यर्थः ।

नारायणः

—रागः

धैवत्यार्षभिकावर्जं शुद्धजातिसमुद्भवः ।
षड्जन्यासग्रहांशस्स्यात् हिन्दोलो रिधवर्जितः ॥
निमन्द्रः काकलीयुक्तो वसन्ते गीयते बुधैः ।
सांशत्वं मध्यमाषाड्जानिषादिन्या निमन्द्रता ।
पञ्चम्या काकलीत्वं च गान्धार्या रिधहीनता ॥

मोक्षः

—मेलरागः (नटभैरवीमेलजन्यः)

(आ) स ग म ध नि स .

(अव) स नि ध म ग स .

मध

—रागः

देशी वसन्तसदृशो हिन्दोलो रागजो मतः ।

मदनः

हिन्दोलकः—रागः
रिषभेण निषादेन समष्षड्जो त्रिराजितः ।
अन्दोलितो निजस्थाने मध्यमादौ विजृम्भितः ॥
पञ्चमे मध्यमे चैव नित्यं भवति नान्यतः ।
एष पूर्णः स्वरैस्सर्वैः ख्यातो हीन्दोलको वरः ॥
सोमेश्वरः

हिन्दोलवसन्तः—मेलरागः (नटभैरवीमेलजन्यः)
(आ) स ग म ध नि स.
(अव) स नि ध प म ध म ग रि ग स.
मख

हिन्दोलरागध्यानम्
नितम्बिनी मन्दतरङ्गितासु डोलासु खेलासुखमादधानः ।
खर्वःकपोतद्युतिकामयुक्तो हिन्दोलरागः कथितो मुनीन्द्रैः ॥
सङ्गीतसरणिः

न्यग्रोधाग्रजटाप्रबद्धकनकप्रग्रोतडोलाञ्चने
श्रीकृष्णे कमलैश्च पूजनपरां भक्तिप्रयुक्तात्मकाम् ।
गौराङ्गीं मणिभूषणां मुरलिकागानप्रियां मे मनो
हिन्दोलां वरचित्रवस्त्रलसितां तुङ्गस्तनीं ध्यायति ॥
रागसागरः

हिन्दोली—हस्तः
हिन्दोल्यामर्धचतुरम् ।
शृङ्गारः

हिमक्रिया—रागः
सन्नमकांशन्यासा धैवतषड्जेन सर्वथा त्यक्ता ।
गापन्यासगतारा हिमक्रतिरत्रोदिता कविभिः ॥
नान्यः

निषादांशग्रहन्यासा षड्जधैवतवर्जिता ।
गापन्यासा गतारा च सदा हिमकृतिर्मता ॥
मतङ्गः

हिमजः—मेलरागः (शुभपन्तुवरालीमेलजन्यः)
(आ) स रि ग म ध म प ध नि स.
(अव) स नि ध प म रि ग रि स.
मख

हिमवर्षिणी—मेलरागः (हनुमत्तोडीमेलजन्यः)
(आ) स रि म प नि स.
(अव) स नि ध प म ध म ग रि स.
मख

हिमवन्तिकः—मेलरागः (गमनश्रममेलजन्यः)
(आ) स रि ग प ध नि स.
(अव) स नि ध प म प ग रि स.
मख

हिरण्यक्रिया—मेलरागः (मायामालवगौलमेलजन्यः)
(आ) स म ग म प ध स.
(अव) स नि ध प म ग म स.
मख

हिरण्यलता—मेलरागः (हनुमत्तोडीमेलजन्यः)
(आ) स रि ग रि म प ध नि स.
(अव) स ध प म ग रि स.
मख

हुङ्कारः—वर्णालङ्कारः (सञ्चारी)
गतप्रत्यागतत्वेन समन्द्रा द्विस्वरा कला ।
अन्यास्त्वेकैकवृद्धाः स्युर्हुङ्कारे षट्कलाः स्मृताः ॥
जगदेकः

स्वरमेकैकमारुह्य प्रत्यागच्छेत्पुनः पुनः ।
विदधीत कलाच्छेदं हुङ्कारे प्रथमे स्वरे ॥

सरिसा, सरिगरिसा, सरिगमगरिसा, सरिगमपमगरिसा
सरिगमपधपमगरिसा, सरिगमपधनिधपमगरिसा ।
मोक्षदेवः

हुडुक्का—अवनद्धम्
एकहस्ता हुडुक्का स्यान्मध्येऽष्टाङ्गुलसम्मता ।
सप्ताङ्गुलापि मुखयोः पिण्डे त्वेकाङ्गुला मता ॥
सपादाङ्गुलिनेन वलीवलयनिर्मितम् ।
षट्छिद्रवेष्टितं सूत्रैः तत्र स्यात्कुण्डलीद्वयम् ॥
प्रान्ते तिस्रोऽर्गला ...... एतास्तु कलशा मताः ।
गर्भे च रज्जुमध्यस्थां कुर्यादुदरपट्टिकाम् ॥

विस्तारे त्र्यङ्गुला तस्यां वामतस्तन्तु निक्षिपेत् ।
रज्वा समञ्चिते पक्षद्वयेप्युत्कक्षयोस्तयोः ॥
योजनार्थं विधातव्या द्विगुणा स्कन्धपट्टिका ।
हुडुक्कायाश्चतुर्थांशे छिद्रं पादाङ्गुलं मतम् ॥

कुर्यान्नादार्थमेतस्याश्चाक्षराणि प्रचक्ष्महे ।
टवर्गश्च तवर्गश्च कवर्गः पञ्चमं विना ॥
रकारश्च हकारश्च प्रोक्तान्येतानि षोडश ।
सर्वेषामक्षराणां तु क्षकारोऽत्र प्रशस्यते ॥

सोमराजः

चतुर्विंशाङ्गुलायामाष्टात्रिंशति वेष्टना ।
पिण्डेऽङ्गुलमिता सा स्यादष्टाङ्गुलमितान्तरा ॥
एकादशाङ्गुले कार्ये वल्लीमण्डलिके शुभे ।
उद्दलीपिहिते कार्ये षड्रन्ध्रे सूत्रगुम्भिते ॥
अर्गलानि पुरस्त्रीणि द्वे पार्श्वे कलशानि च ।
पश्चादऽथ विधातव्ये तद्वत्कलशसंयुते ।
मध्ये सूत्रान्तराले च भवेदुदरपट्टिका ॥
तदन्तर्वादनकाले तु वामहस्तं विनिक्षिपेत् ।
रज्वा समं ...... पक्षद्वयेप्युत्कक्षकौ तयोः ॥
तद्योजनाय द्विगुणा कर्तव्या स्कन्धपट्टिका ।
अङ्गुलस्य चतुर्भागं छिद्रमेकं प्रकल्पयेत् ॥
कृतं भूलोकमल्लेन स्कन्धवाद्यस्य लक्षणम् ।
झेङ्कारोऽत्र हुडुक्कायां प्रधानः परिकीर्तितः ॥

सोमेश्वरः

लक्ष्यते हरिपालेन वाद्यं स्कन्धावजाभिधम् ।
लेयामो हस्तमात्रः स्यान्मध्योऽष्टाङ्गुलसम्मितः ॥
पिण्डोऽङ्गुलमितः कार्यो मुखं सप्ताङ्गुलं मितम् ।
पादाङ्गुलप्रमाणेन कल्पयेद्वलयद्वयम् ॥
सूत्रवेष्टनमात्रेषु रन्ध्रषट्कं च कारयेत् ।
पूर्वोक्तेन प्रकारेण कल्पनीया तथोद्दली ॥
द्वे द्वे सकलशे कार्ये पार्श्वयोर्वलयद्वयोः ।
मध्यरज्वन्तरालेच कुर्यादुदरपट्टिकाम् ॥
पट्टिकायां करं वामं वादनावसरे क्षिपेत् ।
हुडुक्कायां चतुर्थांशे नादहेतोश्च वादकः ॥
अङ्गुलस्य चतुर्भागं छिद्रमत्र तु कारयेत् ।
अमुष्यरुचिरां श्लक्ष्णां कुर्वीत स्कन्धपट्टिकाम् ॥
स्कन्धायुजस्य वाद्यस्य वामहस्तस्त्रिधा भवेत् ।
स्कन्धश्च कूर्परः पश्चान्मणिबन्धनमित्यपि ॥
सूचीपूर्वीकर्तरी च तथा डमरुकर्तरी ।
बोल्लवणी वर्णकश्च वाद्या दक्षिणहस्तकः ॥

हरिपालः

—वादः
प्रोच्यतेऽथ हुडुक्काया लक्षणं सूरिसम्मतम् ।
वितस्तियुगदैर्घ्येऽष्टाविंशत्यङ्गुलका पुनः ॥
परिणाहेऽङ्गुलं मात्रा पिण्डे सप्ताङ्गुले मुखे ।
वल्लीनिर्मितकुण्डल्यावेकादशाङ्गुलके मते ॥
सपादाङ्गुलकाः स्थौल्ये उद्दलीकृतबन्धने ।
मुखाभ्यां भवतो रन्ध्रे द्विगुणैस्त्रिभिरन्वितैः ॥
कर्तव्यं तत्र कलशमग्रभागेऽर्गलात्रयम् ।
अर्गलायुगलं पृष्ठे बन्धरज्वन्तरे ततः ॥
अङ्गुलत्रयविस्तारां सुशुक्लोदरपट्टिकाम् ।
बध्वा पक्षद्वये गाढं तत्र चोत्कक्षकावुभौ ॥
तयोर्द्विगुणितां स्कन्धपट्टिकां सुदृढां न्यसेत् ।
छिद्रमङ्गुलतुर्यांशसम्मितं नादबोधकम् ॥
भवेदस्यां हुडुक्का सा प्रोच्यते वाद्यवेदिभिः ।
वामं वादनकाले च करं स्यात्पट्टिकान्तरे ॥
क्षिप्त्वा स्कन्धे तदा स्कन्दपट्टिकां दक्षिणेन तु ।
पाणिना वादनं कुर्याद्वादको नियतस्सुधीः ॥
देङ्कारवर्जितान्वर्णान्भवन्ति पटहानिह ।
झेङ्कारश्च हुडुक्कायां तद्वर्णैर्मुख्यतया मतः ।
इमां स्कन्धावजं केचिल्लक्ष्म ज्ञात्वावजं जगुः ॥

मोक्षदेवः

हुदामतिः—मेलरागः (धीरशङ्कराभरणमेलजन्यः)
(आ) स रि म प ध स.
(अव) स नि ध प म ध म ग स.

मज

हुरुमयीध्वाडः—देशीनृत्तम्
सूल्पूर्वं वामपादं कुट्टनादुत्प्लुतिर्यदा ।
संलग्नो दक्षपादस्य जानुमूर्ध्नि पदेतरः ॥
तिर्यक्प्रसारितो दक्षो वलनाद्वामपादगः ।
उक्ता हुरुमयी सद्भिर्ध्वाडविधा विशारदैः ॥

वेदः

हुल्लकम्—देशीनृत्तम् (उडुपाङ्गम्)

स्थानके चतुरश्रे च शिखरद्वितयं हृदि ।
कुर्याल्लताकरौ तत्रोत्तानौ नम्रतया पपुः ॥
अलातां चारिकां कृत्वा चतुरश्रं समाश्रयेत् ।
एवमङ्गान्तरं कृत्वा पुनः पार्श्वद्वये तथा ॥
अलाता दक्षिणे द्विःस्याद्वामपार्श्वे तथैव च ।
हृदि स्यात्सव्यशिखरो वामपार्श्वे प्रसारितः ॥
दक्षपार्श्वमुखो भूत्वा गारुडं स्थानके चरेत् ।
पुनःप्रसारणं वामपताकस्य समाचरेत् ॥
दक्षिणः प्रसृतः पार्श्वे भ्रमरीं वामतश्चरेत् ।
एवमेव विधातव्यं वामदक्षिणयोर्नटैः ॥
सम्मुखं गारुडं प्रोक्तं यथापूर्वं पुरातनैः ।
वामवर्तेन तिरिपं ततश्चरणकुट्टनम् ॥
पुरोऽलपद्मद्वितयं पर्यायेण व्रजेदधः ।
हृदये वामशिखरो दक्षः पार्श्वे प्रसारितः ॥
तत्कारलक्षणं प्राहुः सङ्गीतज्ञविचक्षणाः ।
लघुशेखरतालेन हुल्लोडुपमुदीरितम् ॥

वेदः

हुसेनी—मेलरागः (खरहरप्रियामेलजन्यः)

(आ) स रि ग म प नि ध नि स.
(अव) स नि ध म प म ग रि ग स.

मञ्ज

हृच्छिका—रागः (षाडवः)

आन्दोलितसपा धान्तग्रहा मध्यमवर्जिता ।
गेया यामद्वयादूर्ध्वं शृङ्गारे हृच्छिका बुधैः ॥

नारायणः

हृदयोन्मूलिनी—श्रुतिः

धैवतस्य तृतीया श्रुतिः ।

हृष्टा—दृष्टिः

हासगर्भा विशत्तारा चञ्चला च निमेषिणी ।
किञ्चिदाकुञ्चिता दृष्टिर्हृष्टा हासे नियुज्यते ॥

सोमेश्वरः

स्मिताकृतिर्विशत्तारा फलगलयुगाञ्चला ।
मनागाकुञ्चितप्रान्ता दृष्टिर्या च निमेषिणी ।
सा हृष्टा दृष्टिराविष्टा हासे नृत्तविचक्षणैः ॥

अशोकः

हृष्टयका—मूर्छना (मध्यमग्रामे सप्तमी)

(आ) प ध नि स रि ग म.
(अव) म ग रि स नि ध प.

पण्डितमण्डली

हृष्यका—मूर्छना

हृष्यन्त्यप्सरसश्चास्यां गान्धर्वाश्चैव सा यतः ।
मूर्छना पञ्चमस्येयं हृष्यका चार्कदेवता ॥

नान्यः

ऋषिकाशब्दे द्रष्टव्यम् ।

हेज्जुज्जि—मेलरागः (गायनप्रियमेलजन्यः)

(आ) स रि ग रि म ग म प नि ध स.
(अव) स नि ध प म रि स.

मञ्ज

हेणावली—मेलरागः (खरहरप्रियामेलजन्यः)

(आ) स रि ग म ध स.
(अव) स नि प म ग रि ग स.

मञ्ज

हेतुः—लक्षणम्

यत्प्रयोजनसामर्थ्याद्वाक्यमिष्टार्थसाधनम् ।
समासोक्तं मनोग्राहि स हेतुरिति संज्ञितः ॥

भरतः

फलसाधनशक्तियुक्तं मितशब्दार्थं विचित्रमङ्गार्थकं वचनं हेतुः । यथा—तापसवत्सराजे-षष्ठेऽङ्के कृतमरणनिश्चयां वासवदत्तां परिबोधयन्यौगन्धरायण आह । आसृष्टः प्रतिपार्थिव-मित्यादि । अत्र देव्या यत्कृतं तदिष्टार्थसाधनमेव । अचिरेणैव शुभफलमनुभवसीति ।

हेतुचिन्तनम्—सन्ध्यङ्गम्

मातृगुप्तमते मुखसन्ध्यङ्गम् (द्वितीयं)

प्रार्थनाविषये कार्यकारणविचारः ।
गालवराजसंवादो मायामदालसनाटके ।

सागरनन्दी

हेत्ववधारणम्—सन्ध्यन्तरम्

निश्चयो हेतुनार्थस्य मतं हेत्ववधारणम् । यथा—शाकुन्तले स्त्रीणामशिक्षितेत्यादि दुष्यन्तवाक्यम् । अत्र परभृतनिदर्शनोपबृंहितेन स्त्रीत्वहेतुना मृषाभाषणस्यार्थस्य निश्चयो हेत्ववधारणम् ।

सिंगः

हेतोर्मिथ्याकल्पना हेत्ववधारणम्। सागरः

यथा— मुद्राराक्षसे— राक्षस भोः दृश्यते जागर्ति खलु कौटिल्यः-इति चाणक्यवाक्यां राक्षसप्रयुक्ते हेतौ अवधारणम्। भोजः

हेमक्रिया—मेलरागः (नटभैरवीमेलजन्यः)

(आ) स रि ग म प ध नि स.

(अव) स ध प म रि ग म रि स.

मङ्ग

हेमक्री—उपाङ्गरागः

धैवताङ्गं तु हेमक्री पग्रहन्यासमन्द्रगा।

भट्टमाधवः

हेममन्दारः—मेलरागः (हरिकाम्भोजीमेलजन्यः)

(आ) नि ध नि स रि म ध म प ध नि.

(अव) स प म ग म रि स नि ध स.

मङ्ग

हेमवती—मेलकर्ता (रागः)

स रि ग ० ० ० म प ० ० ० ध नि स.

मङ्ग

हेमसारङ्गः—मेलरागः (हरिकाम्भोजीमेलजन्यः)

(आ) स रि ग म प ध नि प ध प स.

(अव) स प म ग रि स.

मङ्ग

हेमार्णवः—मेलरागः (कामवर्धिनीमेलजन्यः)

(आ) स ग म प ध नि स.

(अव) स नि ध म ग रि स.

मङ्ग

हेमा—मूर्छना (जीमूतग्रामे चतुर्थी मूर्छना)

मूर्छना मध्यमस्यैव हेमा नाम प्रजायते।
प्रातस्संकीर्तिता सा तु नूनं वित्तप्रदा भवेत्॥

नादिमत्तः

हेलप्रभातं—मेलरागः (धीरशङ्कराभरणमेलजन्यः)

(आ) स रि ग म प ध नि ध स.

(अव) स नि ध प म रि ग रि स.

मङ्ग

हेला—भङ्गतालः

लचतुष्कं गुरुद्वयं पुनर्लचतुष्कं गुरुद्वयम्।
।।।। ऽ ऽ ।।।। ऽ ऽ तुम्बुरु नाट्यम्

—अनुभावः (अङ्गजो विकारः)

य एव हावास्सर्वेषां शृङ्गाररससंभवाः।
समाख्याता बुधैर्हेला ललिताभिनयात्मिका॥

भक्तः

यदा तु रतिवासनाप्रबोधात्तां प्रबुद्धा रतिमभिमन्यते केवलं समुचितविभावोपग्रहविरहान्निर्विषयतया स्फुटीभावं न प्रपद्यते तदा तज्जनितबहुतराङ्गविकारात्मा हेला हावस्य संबन्धिनी क्रिया प्रसरत्वावेगवाहित्वमित्यर्थः। वेगेन हि गच्छन् हेलतीत्युच्यते लोके। एवं चोद्भिन्नोद्भिद्य विश्राम्यन् हावः। स एव प्रसरणैकस्वभावो हेला। यथा—कुरङ्गीवाङ्गानीत्यादि। अत्र अनन्तरोक्त-रतिप्रबोधमात्रमुक्तं, न स्वाभिलाषशृङ्गार इति मन्तव्यम्। भाव-हावहेलात्रितयं ब्राह्मणस्योपनयनमिव भविष्यत्पुरुषार्थसत्पीठ-बन्धत्वेन योषितामामनन्ति।

अभिनवः

शृङ्गाररसप्रवृद्धौ या रत्यभिनिवेशनिष्ठा सा हेला।

सागरः

प्रौढेच्छा याभिरूढानां नारीणां सुरतोत्सवे।
शृङ्गारशास्त्रतत्त्वज्ञैः हेला सा परिकीर्तिता॥

पद्मश्रीः

स एव हावः कार्यरूपेण हेलाकारेण परिणमते। सुकुमार-शृङ्गारचेष्टात्मिका मनोगता नानाप्रकारेणाभिव्यक्तशृङ्गाररसं सूचयन्ती हेला।

नरसिंहः

हैरण्यगर्भकपालगानम्

हैरण्यगर्भे तार्तीयं शुद्धपञ्चमरागजः।
त्रिपुरयुवतीत्यादि गानम्।

कुम्भः

हैरम्बम्—करणम्

पादौ चापगतिर्यत्र पार्श्वमण्डलिनौ करौ।
वामदक्षिणयोश्शीर्षं देहं तदनुगं भवेत्।
एतद्धैरम्बकरणं प्रोक्तं हरिमदीभुजा॥

हरिपालः

होन्मुः

वीणातन्त्री प्रहारेषु चमत्कारः ।
तन्त्रीचमत्कारशब्दे द्रष्टव्यम् ॥

होयलहुरुमयी—स्वल्लागनृत्तम्

होयलं प्रथमं कृत्वा ततो हुरुमयी भवेत् ।
तिर्यगूर्ध्वं पदा यत्र कुट्टनेन विना यदा ।
होयलाख्या हुरुमयी तण्डुना प्रतिपादिता ॥ वेदः

होयलोड्डुपम्—देशीनृत्तम्

ऊर्ध्वसञ्चे मण्डले स्याद्वामोर्ध्वं च प्रसारितः ।
पताको दक्षिणं तत्र लताहस्तं च कारयेत् ॥
उत्थाप्य दक्षिणं पादं वामाङ्के नम्रतां चरेत् ।
जान्वन्तिकं वामपार्श्वे शिखरं स्थाप्य हृदम्बुजे ॥
शिखरद्वन्द्वमास्थाय दक्षिणावर्ततस्ततः ।
कृत्वा भ्रमरिकां चारीं भवेत्प्राङ्मुखो नटः ॥
पताकयोः प्रसरणं पार्श्वयोः कारयेत्तदा ।
उत्थाप्य वामजानु च सव्यवद्धृदये तथा ॥
शिखरद्वितयं कृत्वा दक्षिणावर्ततस्ततः ।
पूर्ववत्सम्मुखो भूत्वा वलनद्वितयात्मकाम् ॥
मण्डिभ्रमरिकां कुर्यादेवमङ्गान्तरेण तु ।
वामदक्षिणयोः पार्श्वे पूर्ववत्सर्वमाचरेत् ॥
वामपार्श्वेमुखं दक्षपताकस्य प्रसारणम् ।
दक्षपार्श्वे विधायाशु तमेव शिखरं हृदि ॥
कृत्वा पश्चान्मुखो भूत्वा गारुडं स्थानमाचरेत् ।
प्रसारितपुरस्तत्र दक्षिणस्तु पताककः ॥
तथैवाङ्गान्तरेणापि पश्चाद्वक्रस्तु नर्तकः ।
सम्मुखे चतुरश्रेऽत्र प्रसारितपताककः ॥
दक्षपार्श्वे दक्षिणस्तु वामं शिखरमाचरेत् ।
हृदये दक्षिणावर्तभ्रमरीं द्रुतमानतः ॥
वलनद्वितयं चान्ते मूर्धं कृत्वा तकारणम् ।
क्रियते यत्र तत्प्रोक्तं द्वादशं होयलोड्डुपम् ॥ वेदः

ह्लादः—करणधातुः

अष्टौ प्राग्लघवो यत्र नवमेऽन्ते गुरुर्भवेत् ।
तन्त्र्यामाहन्यमानायां स धातुर्ह्लादसंज्ञकः ॥ नान्यः

ह्लादोऽष्टलघुरन्तगः । शार्ङ्ग

ह्लादमानः—वर्णालङ्कारः (सञ्चारी)

मन्द्रात्तृतीयकं गच्छेद्द्वितीयं पुनराविमम् ।
तद्वदेकैकहीनाच ह्लादमाने कलाः पराः ॥
सगरिसा रिमगरी गपमगा मधपमा पनिधपा
मोक्षदेवः

ह्रीः—सन्ध्यन्तरम्

यथा—तापसवत्सराजे पद्मावती लज्जावनतमुखी स्मितं करोति । पुंसोऽपि ह्रीः—पार्थविजये चित्रसेनबद्धं दुर्योधनं प्रति अर्जुनवाक्यम् । यथा—स्वैरित्यादि तच्छ्रुत्वा दुर्योधनः । अन्ये धीं इति ह्रियं पठन्ति । भोजः

ह्लादि—दर्शनम्

ह्लादि तद्दृष्टमात्रे यच्छोकादिव्यपनोदनम् ।
शारदातनयः

ह्लादिनी—श्रुतिः

गान्धारस्य प्रथमा श्रुतिः ।

हंसः—तानः (षड्जग्रामे नारदीयतानः)

ग म प ध नि स रि ? नान्यः

—देशीतालः

हंसे सविरती लघू । ।ऽ कुम्भः

—मेलरागः

गनिभ्यां वर्जितो हंसो रिधकोमलसंयुतः ।
द्वितीयप्रहरोत्तरगेयः । अहोबिलः

हंसकलासः

हस्तौ विधाय हंसास्यौ यत्र हंसीव नर्तकी ।
अतिरम्याङ्घ्रिविन्यासैः नानागतिमनोहरम् ।
यदा नृत्यति हंसाद्यः कलासस्स तदोदितः ॥
अशोकः

ललितैश्चरणन्यासैः यत्र हंसीव हस्तकौ ।
हंसास्यौ संविधायाथ विचित्रगतिपेशलम् ।
यत्र नृत्यति स प्रोक्तः कलासो हंससंज्ञकः ॥
कुम्भः

—(प्रथमः)

मकरं वक्ष पार्श्वस्थं पताकं वामहस्तकम् ।
पुरतो यत्र हंसीव यायाद्भेदस्स आदिमः ॥

कुम्भः

—(द्वितीयः)

मुकुलं हस्तमारभ्य पादाभ्यां पृष्ठतो व्रजेत् ।
विचित्रलास्य भेदज्ञा हंसीवासौ द्वितीयकः ॥

कुम्भः

—(तृतीयः)

हस्तं हंसास्यमाधाय पार्श्वयोर्ललितां गतिम् ।
आलापवर्णतालानां क्रमतो यत्र नृत्यति ।
हंसीवासौ तृतीयोऽयं भेदः प्रोक्तः पुरातनैः ॥

कुम्भः

हंसध्वनिः—मेलरागः (धीरशङ्कराभरण मेलजन्यः)

(आ) स रि ग प नि स .

(अव) स नि प ग रि स .

मज

हंसनादः—देशीतालः

हंसनादे लपौ द्रौदौ प्लुतश्चान्ते प्रकीर्तितः ।
। ऽ ० ० ऽ

वेमः

समारिगाधपमा ।

जगदेकः

तत्तकट धिकटथहिं थहिं कधुगततधिद्धिद्रैं गणगणटैं ।

सुधाकलशः

हंसपक्षः—हस्तः

यदि किञ्चिन्नमन्मूलं तर्जन्यावङ्गुलित्रयम् ।
पताकस्य तदाहस्तं हंसपक्षं प्रचक्षते ॥
अयमाचमने कार्यश्चन्दनाद्यनुलेपने ।
हनुदेशगतस्तु स्याद्‌द्रःखजे हनुधारणे ॥
मण्डलीकृतबाहू तौ महास्तम्भप्रदर्शने ।
आलिङ्गने च प्रत्यक्षे परोक्षे स्वस्तिकीकृतौ ॥
रोमाञ्चाद्यनुभावैस्तु रसेष्वेव यथारसम् ।
अनुभावा रसवशात्कार्या हस्तान्तरेष्वपि ॥

शार्ङ्गः

हंसपदः—प्रबन्धः

उद्ग्राहो देवभाषाभिः ध्रुवो मानुषभाषया ।
आभोगश्च तयोऽप्येते सानुप्रासमनोहराः ॥

यत्र हंसपदस्स स्यादत्र तालो यथेप्सितः ।

पण्डितमण्डली

हंसपदी—देशीतालः

ततो हंसपदी भवेत् । सविरामैश्चतुर्मिलैरन्त्यनिःशब्दसंयुतैः ।
। । । ॊ

लक्ष्मणः

हंसपादः—तालाक्षरम्

तालाक्षरशब्दे द्रष्टव्यम् ।

हंसमञ्जरी—मेलरागः (मायामालवगौलमेलजन्यः)

(आ) स रि ग प ध स .

(अव) स नि प म रि स .

मज

हंसमुखः—देशीतालः

मगणो भगणश्चैव गुरुश्चाथ प्लुतत्रयम् ।
सगणश्च प्लुतश्चेति ताले हंसमुखाह्वये ॥

२४ मात्राः ।

तालप्रस्तारः

हंसलीलः—देशीतालः

हंसलीले तु संप्रोक्तं सविरामं लघुद्वयम् ।

वेमः

स रि ग रि

जगदेकः

—प्रबन्धः

पदैः पाटैश्च रचिता यस्योद्ग्राहादयः परम् ।
हंसलीलेन गीयन्ते हंसलीलस्स उच्यते ॥
हंसलीलेनेति । हंसलीलाख्यतालेनेत्यर्थः ।

पण्डितमण्डली

हंसलीला—गतिः

हंसस्येवगतिर्मन्दा मन्दव्यावर्तनान्तरा ।
हंसलीलागतिस्सा प्रोच्यते नटैः ॥

देवेन्द्रः

—नृत्ते बन्धः

आद्यपङ्क्तौ द्वितीयेऽस्मिन्स्थित्वा स्थाने तु नर्तकी ।
स्वपदाचालिता गच्छेत्तत्पङ्क्तेः प्रथमं पदम् ॥

प्रथमा च द्वितीयं च तृतीयास्यात्पदक्रमात् ।
तृतीया स्यात्तृतीयं च चतुर्थं च व्रजेत्पदम् ॥

तुर्यपङ्क्तेस्तुरीयं च तृतीयं च द्वितीयकम् ।
प्रथमं च पदं प्राप्य तृतीयः स्यात्तथादिमम् ॥

द्वितीया च द्वितीयं स्यात्तृतीयं च चतुर्थकम् ।
क्रमात्प्राप्य यदाद्यायाः चतुर्थस्य तृतीयकम् ॥

व्रजेदन्या तु तत्पङ्क्तेः तृतीयं स्थानमाश्रिता ।
चरेत्तत्प्रातिलोम्येन चञ्चच्चरणविभ्रमाः ।
यत्रासौ हंसलीलाख्यो बन्धो बन्धुरविभ्रमः ॥

वेमः

हंसवक्त्रः—हस्तः

लग्नाश्लेताग्निसंस्थानास्तर्जन्यङ्गुष्ठमध्यमाः ।
शेषे यत्रोर्ध्वे विरले हंसास्यः सोभिधीयते ॥

अयं मृदुनि निस्सारे श्लक्ष्णेऽल्पे शिथिले लघौ ।
मर्दितं मथितं क्षिप्तं दधदर्भं विधूनितम् ।
औचित्याच्युतयुक्तं तु कुसुमावचयादिषु ॥

शार्ङ्गः

हंसवधूः—प्राकृतगाथा

त्रिपञ्चाशल्लघवः द्वौ गुरू ।

विरहाङ्कः

हंसवारिधिः—मेलरागः (मायामालवगौलमेलजन्यः)

(आ) स रि म प ध स .
(अव) स नि ध प म रि स .

मञ्ज

हंससूनुः—देशीतालः

हंससूनुर्गपुद्रौपुः ।
ऽ ऽ ० ० ऽ

मदनः

पुरिति प्लुतो मदनपालपन्थे ।

हंसास्यम्—ध्रुवावृत्तम्

दशमं सप्तमं यत्र चतुर्थकमथ षष्ठम् ।
तृतीयं निधनं गुरु कथितं मर्कुटं जगतीगतम् ॥

णलिनी पत्तमज्झे परिहिंडिदघमणा आसखिण्णभमरावली ।
नलिनी पत्रमध्ये परिहिंडितगमनायासखिन्ना भ्रमरावली ।

भरतः

हंसास्यस्वस्तिकहस्तः

करद्वयेन हंसास्यौ श्लिष्टौ स्यातां तथा पुनः ।
तर्जनी वक्रितास्याच्चेद्धंसास्यस्वस्तिको भवेत् ॥

पुरोभागेत्वयं हस्तः रमायां नासिकार्थके ।

विनायकः

हंसिनी—मालावृत्तम्

र य ल ग

विरहाङ्कः

हंसी—गतिः

परावृत्ततनूपार्श्वं वितस्यनतरितं शनैः ।
एकैकं तत्पदं न्यस्य कपित्थं करयोर्वहन् ।
हंसवद्गमनं यत्तु सा हंसीगतिरीरिता ॥

नाट्यदर्पणे

—प्राकृते मात्रावृत्तम्'

चतुर्मात्रिकः एकः पञ्चमात्रिक एकः ।
चतुर्मात्रिकः पञ्चमात्रिकः गः ।

विरहाङ्कः

परिशिष्टम्

अ

अक्षराडम्बराः

श्रोतसां वेगवत्कम्पो यत्स्वरेषु वहस्तु सः ।
यत्राक्षराणां दृश्येत स्फूर्तिराडम्बराकृतिः ।
मुख्यास्ते परिविज्ञेया अक्षराडम्बरोद्भवाः ॥

कुम्भः

अक्लेशकेशवकुञ्जरतिलकप्रबन्धः

गीतो भैरवरागेण तालो वर्णयती तथा ।
आभोगान्तस्थितैः पाटैः सर्वैः पद्यांचितस्ततः ।
अक्लेशकेशवादिमकुञ्जरात्तिलकभिदः ॥

कुम्भः

अगुरुवाद्यलक्षणम्

समभूमौ परिस्थाप्य ताम्रं कुम्भाधरे मुखम् ।
अङ्गुलीभिः समुद्राभिः कुर्यादगुरुवादनम् ॥

सोमराजदेवः

अङ्गविधिः

स्थितं प्रवृत्तं च तथा माहाजनिकमेव च ।
त्र्यङ्गोऽन्तः स्यादथ व्यङ्गो माहाजनिकवर्धितः ॥
एकाङ्गोऽपि विधातव्यो माहाजनिकसंयुतः ।
एवं व्याससमासाभ्यां बहुधाङ्गविधिः स्मृतः ॥

नाट्यशास्त्रे

अङ्गहारः

अङ्गहारान् सविष्कम्भांश्चैव चात्र प्रयोजयेत् ।
केवलं पौरुषैर्भावैर्वाक्यं नाट्यायितं तत् ॥

नाट्यशास्त्रे

अङ्गहारविनियोगः

अङ्गेषु पूर्वरङ्गस्य त्रिलीकुत्थापनादिषु ।
वर्धमानासारितेषु मद्रकाद्यासु गीतिषु ॥
पणवैककुभिर्भासैर्भेरीपटहडिण्डिमैः ।
मृदङ्गैर्गोमुखैश्च वाद्यैस्तालल्लयानुगैः ।
अङ्गहाराः प्रयोक्तव्याः परं कल्याणमीप्सुभिः ॥

शिप्रदासः

अङ्कुरः

भूतवाक्यार्थमाश्रित्य चित्तवृत्त्यर्पणक्षमाः ।
दृष्टिप्रधानव्यापाराः कथ्यन्तेऽङ्कुरसंज्ञया ॥
मूच्याः स्युरङ्कुरा एव भाविवाक्यार्थसूचनात् ।
आरभट्यां स्थिता शाखा सात्त्वत्यामङ्कुरः स्थितः ॥
कैशिक्यां वर्तते नृत्तं त्रयोऽप्येते तिसृष्वपि ।
वर्तते तत्त्वतो भेदो भावकैरेव भाव्यते ॥
देशकालवयोऽवस्थावेषभूषणशक्तितः ।
आङ्गिकोऽभिनयो वृत्तित्रयवाचिकसंश्रितः ॥

शिप्रदासः

अङ्कुराभिनयः

सूचेव केवलैरङ्गैर्वचनैर्हृदयस्थितैः ।
भूतार्थस्यानुसारेण कृतश्चेदङ्कुरो भवेत् ॥

वेमः

अङ्कचारिणीलक्षणं तद्भेदाश्च

वाञ्छितेनैव तालेन विविधैर्विरुदैर्युता ।
स्यादङ्कचारिणी सा तु षट्प्रकाराः प्रकीर्तिताः ॥
वासवी कलिका चैव वृन्ता वारावती तथा ।
वेदोत्तरा जातिमती विज्ञेया मिश्रलक्षणा ॥
वसुचन्द्रकला वन्तैर्वीरैर्जलधिवेन्दुभिः ।
विरुदैः पञ्चभिस्तालैरेकादैश्च यथाक्रमम् ॥
जातिमत्यां न नियमस्तालेषु विरुदेषु च ।
पदान्तरैः स्यादाभोगो न्यासस्तालद्विनामकम् ॥

सोमराजदेवः

अङ्गभ्रमरी

वितस्त्यन्तरितौ पादौ कृत्वाङ्गभ्रमणं तथा ।
तिष्ठेद्यदि भवेदङ्गभ्रमरी भरतोदिता ॥

अशोकः

अन्तर्भ्रमरी

अस्या एव विपर्यासादन्तर्भ्रमरिका भवेत् ।

कुम्भः

अङ्गरचना

देशं कालं च जातिं च भूमेकदेशमेव च ।
समवेक्ष्याङ्गरचनां प्रयुञ्जीत यथोचिताम् ॥
देवाश्चाप्सरसो गौरवर्णाहार्ये निरूपिताः ।
सोमः समुद्रो हिमवान् शिवः शक्रो बृहस्पतिः ॥
वरुणो नारदश्चैव बलभद्रः सरस्वती ।
गङ्गा च श्वेतवर्णास्तु श्यामौ नारायणार्जुनौ ॥

वासुकिः पर्वतश्चैव दैत्यदानवराक्षसाः ।
कृतान्तश्च पिशाचाद्या मेचकाः परिकीर्तिताः ॥
विद्याधरा मातरश्च गन्धर्वा गुह्यकास्तथा ।
नानावर्णा विधातव्या नाट्ये नाट्यविचक्षणैः ॥
ब्राह्मणाः क्षत्रियाश्चैव कार्या गौरास्तु वर्णतः ।
नाट्ये वैश्याश्च शूद्राश्च श्यामाः कार्याः प्रयोक्तृभिः ।
किरातजर्जराद्यास्तु म्लेच्छाः कृष्णप्रभा मताः ॥

वेमः

अङ्गरचनालक्षणम्—(आर्याभिनयः)

सा भवेदङ्गरचना यदङ्गे रङ्गवर्तनम् ।
ते च वर्णाः सितश्यामरक्तपीतस्वभावजाः ।
एतेषां सङ्करादभेदा जायन्ते बहुशः पुनः ॥

नृत्तरत्नावली

अङ्गलक्षणम्

शोभा सर्वैव नित्यं स्यात् सौष्ठवं समुपाश्रिता ।
नैव सौष्ठवहीनाङ्गं शोभते नाट्यनृत्तयोः ॥

कुम्भः

अङ्गहाराः

अङ्गप्रयोगयोगेन ये हारा हरिनिर्मिताः ।
मध्यस्थपदलोपेन तेऽङ्गहाराः स्मृता बुधैः ॥

कुम्भः

अङ्गानामुचिते देशे प्रापता सर्वलासनम् ।
करणोत्करसंपाद्यमङ्गहारोऽभिधीयते ॥
हरेतारचिताहाराः प्रयोगपदलोपनात् ।
अर्चाप्रयोगा ये हाराः तेऽङ्गहारा इति स्मृताः ।
यद्वा हारोरङ्गस्यायं प्रयोगोऽङ्गैरिति स्मृताः ॥

सङ्गीतनारायणे

अङ्गानामुचिते देशे प्रापणं सविलासकम् ।
मातृकोत्करसम्पाद्यमङ्गहारोऽभिधीयते ॥

हम्मीरः

अङ्गहारकरणं

औचित्यान्मेलनेऽङ्गानां प्रयोगः क्रमपेशलः ।
करणं कीर्त्यते तज्ज्ञैस्तद्द्वयं मातृका स्मृता ॥
त्रिभिः कलापकश्चैव चतुर्भिः खण्डको मतः ।
सङ्घातः पञ्चमश्चैव संज्ञाभेदा इतीरिताः ॥

तत्समूहविशेषाश्चाङ्गहारस्तत्परः स्मृतः ।
तिसृभिः पञ्चभिर्वा स्यान्नवभिर्वा यथोदितम् ।
अङ्गहारो मातृकाभिरेकः स्यान्मुनिनोदितात् ॥

कुम्भः

अङ्गहारप्रयोजनम्

त्रिभिः कलापकरणैः चतुर्भिः खण्डकैरिति ।
संघातः पञ्चभिस्तस्य संख्याभेदान्तरे जगुः ॥
करणन्यूनताधिक्यं न दोषायेह जायते ।
द्वाभ्यां त्रिभिश्चतुर्भिर्वा नवभिर्वेति कीर्तनात् ॥

दामोदरस्तु—

षडादि दशपर्यन्तैरङ्गहारास्तु ते भवेत् ।
तत्रादौ षोडशोच्यन्ते अङ्गहारा हरिप्रियाः ॥

सङ्गीतनारायणे

अङ्गहारलक्षणम्

अथाङ्गहारान् वक्ष्यामि दृष्टादृष्टफलाप्तये ।
पूर्वरङ्गे प्रयोगार्हान् चित्रे मुनिसमाश्रयान् ॥
अङ्गानां सविलासं यत्प्रदेशमुचितं प्रति ।
प्रापणं करणोत्पन्नमङ्गहारः स उच्यते ॥
शाकप्रियादिपाठाद्वा प्रयोगपदलोपनात् ।
हरस्याङ्गप्रयोगायैतेऽङ्गहारा इति स्मृताः ॥
उभाभ्यां करणाभ्यां स्यान्मातृका करणैस्त्रिभिः ।
कलापः स्याच्चतुर्भिस्यात्खण्डकः पञ्चभिः पुनः ॥
सङ्घात इति सङ्घातसंज्ञाभेदान् परे जगुः ।
तिसृभिर्मातृकाभिः स्यात्पञ्चभिर्वा प्रवर्तते ॥
एकाङ्गहारः करणं न्यूनाधिक्यं मुनिः स्वयम् ।
अमन्यताङ्गहारेषु नवभिर्वेति कीर्तनात् ॥
करणोऽन्यत्समानत्वधर्मसामान्ययोगतः ।
सर्वेऽप्येते कलापाद्या अङ्गहाराः प्रकीर्तिताः ॥

कविदासः

अङ्गहारभेदः

मल्लिका कथिता ताभ्यां कलापः करणैस्त्रिभिः ।
चतुर्भिः करणैः खण्डं सङ्घातं पञ्चभिस्तथा ॥
षड्भिः सप्तभिरष्टाभिर्नवभिर्वा यथारुचि ।
करणैरङ्गहारः स्यात्तल्लक्षणमथोच्यते ॥

हम्मीरः

अङ्गहाराः

सारसा केकिहंसौ च स्थलानन्यांश्च पक्षिणः ।
रेचकैरंगहारैश्च निर्दिशेन्नाट्यकोविदः ॥

अश्वेभोष्ट्रखरव्याघ्रसिंहांश्च महिषादिकान् ।
अंगगतिप्रकारैश्चाभिनयेन्निपुणो नटः ॥

ये यक्षा राक्षसा दैत्याः पिशाचाद्यास्तथापरे ।
परोक्षास्तेऽभिनेतव्या अङ्गहारैः प्रयोक्तृभिः ॥

अशोकः

अङ्गानि

घर्घरी विषमं गीतं कवित्वाक्षस्तथैव च ।
भावाश्रयश्च व्याचष्टे पञ्चाङ्गानि नृपोत्तमः ॥

कुम्भः

अङ्गुलिगुणाः

प्रयुक्तरन्ध्रयुक्तश्च युक्तिश्चेत्यङ्गुलेर्गुणाः ।

सङ्गीतनारायणः

अङ्गोपाङ्गानां पादानुगामित्वम्

हस्तः पादोऽथवा यत्रायं प्राधान्येऽन्ववर्तते ।
स भवेत्प्रथमं पश्चादन्यस्तदनुगो भवेत् ॥

(अत्र पौर्वापर्यं एकक्षणस्पन्दनाद्भिप्रायेण द्रष्टव्यं न तु क्रियान्तव्यवधानेन)

प्रथमं पश्चादन्यस्तदनुगो भवेत् ।

तथान्यमुभयोर्यत्र तत्र स्यात्समकालता ।
पादं यतस्ततो हस्तो यत्र हस्तस्ततस्त्रिकम् ।
तस्मात्पादानुगान्याहुरङ्गोपाङ्गानि तद्विदः ॥

वेमः

आञ्चितवाडिता

पादौ स्वस्तिकमावर्त्य तिर्यगूर्ध्वं यदोत्क्षिपेत् ।
यत्र प्रसारितावङ्घ्री प्लुतं कृत्वा परस्परम् ।
गगने ताडितौ चेत्तद्भवेत्त्वाञ्चितताडिता ॥

कुम्भः

अञ्चितलक्षणम्

स्थानके समपादे तु संस्थितोत्पतनमुत्प्लुतम् ।
क्रियते यत्र करणं तद्भवेदञ्चिताह्वयम् ॥

हम्मीरः

अञ्जनः

अञ्जनश्चन्द्रकान्तश्च जयन्तश्चेति नामभिः ।
ललितं वक्षसः क्षेत्रे कपोते कर्णदेशगम् ।
सन्दंशविधिनैव स्यादञ्जनो नाम हस्तकः ॥

कुम्भः

अञ्जनादित्रयहस्तकाः—तलाञ्जनलक्षणम्

अञ्जनश्चन्द्रकान्तोऽथ जयन्तश्चेति हस्तकाः ।
त्रयोऽन्ये दर्शितास्ते च प्रदर्श्यन्ते क्रमादिह ॥
स्तनयोर्ललितं वक्षो देशे चेद्वलितं करम् ।
कपोतं कर्णयोर्नेत्रक्षेत्रे सन्दंशनामकम् ।
रचितं जगदुः केचिदञ्जनं नाम हस्तकम् ॥

विप्रदासः

अटतालः—तालः

लघुद्वन्द्वं द्रुतद्वन्द्वं मात्रा द्वादश यत्र सः ।
चतुरश्रोऽटतालः स्यादिति तालविदो विदुः ॥

भरतकल्पलतामञ्जरी

अट्टहासः

असंवृतमुखं हास्यं लल्जिह्वानिरीक्षितम् ।
प्रचण्डात्त्रवं भूयानट्टहास उदाहृतः ॥

जगद्धरः

अड्डस्खलतिका

अड्डस्खलितिका तिर्यक् स्खलिते चरणे भवेत् ।

कुम्भः

अड्डिता

शृङ्गाररससम्भूता तद्गतगुणशालिनी ।
सापेक्षभावा ह्या या सा भवेदड्डिता ध्रुवा ॥

अणुविषये मुनिमतम्

द्रुतार्धमणुरेवं स्यात्प्रमाणं मुनिसंमतम् ।

कुम्भः

अतिक्रान्ता

पादं कुञ्चितमुत्क्षिप्य गुल्मक्षेत्रे द्वितीयके।
प्रसार्य पुरतः किंचित् पात्रप्रकृतिभेदतः॥

अतिक्रान्तस्य लक्षणम्

यत्र चारीमतिक्रान्तां प्रयोगानुगतौ करौ।
कुर्वीत तदतिक्रान्तां प्रयोगानुगतौ करौ।
हस्तौ गरुडपक्षाख्यौ भट्टतण्डुरिहाब्रवीत्॥

अर्थक्रिया

लोकेषु स्थावराणां च जङ्गमानां तथैव च।
नामजन्मोक्तनक्षत्रा हस्तैरर्थक्रिया भवेत्।
एवं काव्यस्य च गुरोः सम्मतिः पूर्वसंमता॥

शृङ्गारशेखरः

अद्भुतद्रुतम्

अद्भुतालेन तालेन यदोद्ग्राहादिधातुषु।
गीयमानेषु नृत्तेषु विलम्बितलयाश्रयैः॥
गीयमाने ध्रुवे कैश्चित्करैरतिमनोहरैः।
तदा द्रुताख्यनृत्तं स्यात्सामाजिकमनोहरम्॥

अद्भुतरसः

काञ्चनच्छविरधीरलोचनो सुन्दरो हि परमेष्ठिदैवतः।
पञ्चविंशतिकहायना सृतो वैश्यवंशज इहाद्भुतो रसः॥

जगद्धरः

सुदुर्घटपदार्थानां दर्शनश्रवणादिभिः।
स्तम्भसंभ्रमरोमाञ्चजडतागदितादिभिः॥
अभिव्यक्तगतैर्भावैरेभिर्ये व्यभिचारिभिः।
चित्तविस्ताररूपोऽयं चर्वणीयत्वमागतः।
विस्मयस्थायिभावोऽसौ तज्ज्ञैरुक्तोऽद्भुतो रसः॥

हम्मीरः

अधमनायिकालक्षणम्

अकस्मात्कुप्यति रूपं प्रार्थितापि न मुञ्चति।
सुरूपं वा विरूपं वा गुणवन्तमथागुणम्॥
स्थविरं तरुणं वापि या वा कामयते द्रुतम्।
ईर्ष्याकोपविषादेषु नियता साधमा मता॥

भरतकल्पलतामञ्जरी

अनवधानकः

स्थायिस्वरादीं त्यक्त्वा यो गायेत्सोऽनवधानकः।

भरतकल्पलतामञ्जरी

अनाशी स्वरः

पञ्चमं मध्यमग्रामे षड्जग्रामे तु धैवतम्।
अनाशिनं विजानीयात् सर्वत्रैव तु मध्यमम्॥

दत्तिलः

अनाहतः—नादः

आकाशसंभवो नादो यः सोऽनाहतसंज्ञितः।
तस्मिन्ननाहते नादे विरामं प्राप्य देवताः॥
योगिनोऽपि महात्मानः सदानाहतसंज्ञके।
मनो निक्षिप्य संयान्ति मुक्तिं प्रयतमानसाः॥

सङ्गीतमकरन्दे

अनिर्युक्तम्

वस्तुमात्रमनिर्युक्तमिदानीं विधिरुच्यते।

दत्तिलः

अनिष्टम्

उद्वेष्टितपरावृत्त्या करयोर्जिह्मया दृशा।
नतेन शिरसाऽस्पर्शमनिष्टं दर्शयेद्बुधः॥
पताकेन तु हस्तेन तिरोधाय निजं मुखम्।
पयःपांसुपतङ्गानां भ्रमिभ्रमणतेजसः।
उष्णस्य पवनस्यापि वारणं संप्रदर्शयेत्॥

वेमः

अनिष्टाक्षरपदम्

अनिष्टाक्षरपदं गान्धारीजातिमाश्रितम्।
चचत्पुटेन योक्तव्यं त्रिमूढं द्विकलेन तु॥

नाट्यशास्त्रे

अनुकूलः—नायकः

एकस्यामेव रमते सदा त्यक्तपराङ्गनः।
सीतायां रामवत्सोऽयमनुकूलः स्मृतो यथा॥

शुभङ्करः

अनुनासिकः

गायेद्यो नासिकायां तु सोऽयं स्यादनुनासिकः।

भरतकल्पलतामञ्जरी

अनुबन्धा — ध्रुवा

यतिं लयं वाद्यगतिं पदं वर्णमथाक्षरं ।
विभावांश्चानुभावांश्च भावांश्च व्यभिचारिणः ॥
गीते रसे च नियतमनुबध्नाति या क्रमात् ।
सा ध्रुवा चानुबन्धाख्या नाट्यविद्भिर्निरूपिता ॥

वेमः

अनुभावः

भावानां यानि कर्माणि नाट्यन्ते कुशलैर्नटैः ।
तेऽनुभावा हेतवस्ते स्वहेत्वनुभवे यतः ॥

हम्मीरः

विरमृतां बोधयन्त्येवमनुभावाः प्रकीर्तिताः ।
रसतां गच्छति स्थायी कार्यं यदुपलभ्यते ।
अनुभावः स विज्ञेयो भावसंस्थानसूचकः ॥

अनुभावलक्षणम्

काव्येषु कविभिर्नाट्ये नटैः साक्षादिवार्पिताः ।
अनुभावा इति प्रोक्ता भावानामनुभावनात् ॥

विप्रदासः

नटनलीलां विलोक्य सभापतिसामाजिकैः
कम्पनतश्चमनुभावः । शृङ्गारशेखरः

अनुभावसारस्यम्

श्रव्यं श्रवणयोगेन दृश्यं दृष्टिविचालनैः ।
आत्मस्थं वा मध्यस्थं हि मध्यस्थं च विनिर्दिशेत् ॥
एवमन्येष्वपि तथा नानाकार्यार्थदर्शनात् ।
विभावो वानुभावो वा विज्ञेयोऽर्थवशाद्बुधैः ॥

कुम्भः

अनुमन्द्रजाः

एकैकरागमेलोक्ता वीणावादनतत्परैः ।
ऊर्ध्वं मञ्जुलवीणायां लोहतन्त्रीचतुष्टयम् ॥
दक्षिणेऽधश्चयं तन्त्र्या बध्नीयाल्लक्ष्यवेदिभिः ।
ऊर्ध्वतन्त्रीषु या वामे ते तस्यामनुमन्द्रकं ॥
पञ्चमां वानुमन्द्राख्यां द्वितीयायां निवेशयेत् ।
मन्द्रषड्जं तृतीयायां चतुर्थ्यां मन्द्रमध्यमम् ॥
प्रथमाधस्थतन्त्रीषु मध्यमेन समश्रुतिः ।
मन्द्रसेन द्वितीयापि तृतीया मन्द्रसेन च ॥
कर्तव्यास्ताः पुनर्नाम्ना निगद्याः श्रुतयो बुधैः ।
सारीनिवेशनं युक्त्या क्रमतः प्रतिपाद्यते ॥
अनुमन्द्रसतामाद्या शुद्धो रिः स्याद्यथा तथा ।
निवेश्या प्रथमा सारी तया तन्त्र्या द्वितीयका ॥
शुद्धगान्धारसिध्यर्थं तया तन्त्र्या तृतीयिका ।
साधारणाख्यगान्धारसिद्धये क्रमशस्ततः ॥
तया तन्त्र्येव तुर्यापि च्युतमध्यमहेतवे ।
शुद्धमध्यमसिध्यर्थं सारिका पञ्चमी तया ॥
तन्त्र्या तया पुनः षष्ठी पतपञ्चमसिद्धये ।
शेषाभिश्चिन्नतन्त्रीभिरुक्ताः सारीषु ये स्वराः ॥
वर्ण्यन्ते ते क्रमेणैव गुरुणा मे यथोदिताः ।
पञ्चमेनानुमन्द्रेण या तन्त्री समुपाश्रिता ॥
तया द्वितीयया तन्त्र्या जायते शुद्धधैवतः ।
ततःशुद्धो निषाधाख्यो निषाधः कैशिकी पुनः ॥
तत्पुरस्तात्पतः षड्जः शुद्धषड्जस्ततःपरं ।
ततःस्यादृषभः शुद्धः षडेते गदिताः स्वराः ॥
जातौ द्वितीयया तन्त्र्या विशुद्धौ सो सरिस्वरौ ।
स्थाप्यौ नैकप्रयोगे तौ यतस्तन्त्र्या तृतीयया ॥
जायेते तौ पुनर्मन्द्रौ शुद्धौ वीणाविनोदिनौ ।
एतेऽनुमन्द्रजाः प्रोक्ताः कथ्यन्ते मन्द्रजाः क्रमात् ॥

कुम्भः

अनुराधा — नक्षत्रहस्तः

पूर्वोक्तौ मुष्टिहस्तौ तु तर्जन्यौ ... प्रसारितौ ।
मुष्टिसूचिरथ प्रोक्तोऽप्यनुराधानिरूपणे ॥

शृङ्गारशेखरः

अनुलोमविलोमे

चाराश्रिकोणचाराये अनुलोमविलोमगा ।
स्वस्थाने स्थापितपदा ततस्तत्रापि कुट्टिता ।
तदा निगदितासद्भिरनुलोमविलोमाका ॥

विप्रदासः

अनुवृत्तदृष्टिः

ऊर्ध्वाधो वीक्षणं वेगादनुवृत्तनिरीक्षणम् ।

भरतकल्पलतामञ्जरी

अनुश्रवणिका — पाटः

पुनःपुनर्यदा पाटः श्रूयते वा तदक्षरम् ।
अनुश्रवणिका नाम तदा वाद्ये निगद्यते ॥ कुम्भः

अनङ्गाङ्गमोटनम्

यदा मण्डलतो हस्तो लुठित्वा स्कन्धदेशयोः ।
तद्वद्धत्वशिरःक्षेत्रे नयनानन्ददायकैः ।
लोडितौ तदनङ्गाङ्गमोटनं कीर्तितं तदा ॥

विप्रदासः

अनङ्गोद्दीपनम्

विलोक्योरः स्थले हस्तौ क्रमादावृत्तमण्डलौ ।
विलासेनांसपर्यन्तं गत्वाभ्यन्तरभागगौ ॥
उद्वेष्टितक्रियापूर्वं यत्राधोसदनौ यदा ।
विद्वद्भिस्तत्समादिष्टमनङ्गोद्दीपनं तथा ॥

विप्रदासः

अन्तःकरणम्

बाह्यवस्तुविशेषाभिमुख्यापेक्षा विना कृतम् ।
इत्यादिरूपसापेक्षमन्तःकरणमुच्यते ॥ कुम्भः

अन्तःप्राणाः—पातस्य

जवस्थिरत्वं रेखा च भ्रमरी दृष्टिरश्रमः ।
मेघा श्रद्धा व चोरीतिरन्तःप्राणा दश स्मृताः ॥

भरतकल्पलतामञ्जरी

अन्तरधातुः

आभोगः पूर्वकाले स्यात्संगीतान्ते निगद्यते ।
ध्रुवाभोगान्तरे जातः धातुरन्योऽन्तराह्वयः ।
तस्यान्तरं मध्यस्थतयेत्याहुरपरेबुधाः ॥

सङ्गीतसूर्योदयः

अन्तरमार्गः

स्वराणां तान वैचित्र्यात्कारुण्यां शान्तिसङ्गतौ ।
स स्यादन्घ्रिरहीनत्वादीषत्स्पर्शैर्नियोगतः ॥
यदारोहावरोहिभ्यां शक्तियुक्तो भवेद्यदि ।
स एवान्तरमार्गः स्यात् विकृतास्वेव जातिषु ॥

सङ्गीतसूर्योदये

अन्तरा—ध्रुवा

प्रयोगगतदोषाणां प्रच्छादनपटीयसी ।
विच्छेदे वान्तरालस्य तत्सन्धानविधायिनी ।
मध्ये मध्ये प्रयोज्या या सा विज्ञेयान्तरा ध्रुवा ॥

वेमः

अन्तरा ध्रुवा

विषण्णे मूर्छिते भ्रान्ते वस्त्राभरणसंयमे ।
दोषप्रच्छादना या च गीयते सान्तरा ध्रुवा ॥

नाट्यशास्त्रे

अन्तराक्रीडः—तालः

विरामान्ता द्रुतत्रया । स भवत्यन्तराक्रीडः ।
० ० ०

कुम्भः

अन्तविधिः

त्र्यङ्गमेकाङ्गमपि वा स्थितं कार्यं समासतः ।
तत्र युग्मं भवेद्व्याङ्गं त्र्यश्रमेकाङ्गमेव च ॥
प्रवृत्तमपि विज्ञेयं त्र्यङ्गमेकाङ्गमेव वा ।
माहाजनिकमेकाङ्गं त्र्यङ्गं संहरणं स्मृतम् ।
सितादिकः प्रवृत्तान्तः एवमन्तविधिर्बुधैः ॥

नाट्यशास्त्रे

अन्तश्छाया—करणम्

प्रसारितस्तदा प्रोक्तमन्तश्छायाभिधं बुधैः ।

सङ्गीतमुक्तावली देवेन्द्रकृता

अन्तरन्तरः

ध्रुवकाभोगयोरन्तरन्तरः परिगीयते ।

कुम्भः

अन्यकाकुः

रागे रागान्तरच्छाया काकुः स्यादन्यरागजा ।

कुम्भः

अपकृष्टा—(ध्रुवा)

नातिदीर्घैर्युता वृत्तैर्विलम्बितलयान्विता ।
अपकृष्टाक्षरा ज्ञेयाऽपकृष्टा करुणाश्रया ॥

वेमः

अपक्षेपा

ऊरुपृष्ठे स्पृशेदङ्घ्रिर्बाह्यपार्ष्णिन यत्सदा ।
अन्यो नितम्बनिकटमपक्षेपा तदा स्मृता ॥

कुम्भः

अपत्याभिनयः

हस्तेन हंसपक्षेण शिरसोद्वाहितेन च ।
अपत्याभिनयं कुर्यादुच्छादुच्चं यथोचितम् ॥

उद्वाह्य वामतो हस्तमरालं मूर्धदेशतः ।
श्रान्तं गतं निवृत्तं च व्यस्तं चाभिनयेद्बुधः ॥

वेमः

अपभ्रंशः

संयुक्तायुक्तयो दीर्घह्रस्वयोर्वैपरीत्यतः ।
उच्चारभङ्गिर्वर्णानामपभ्रंश उदाहृतः ॥

शुभङ्करः

अपविद्धम्

लुठनं मण्डलाकारं नाभिकण्ठप्रदेशयोः ।
वामदक्षिणतो यत्स्यादपविद्धमितीरितम् ॥

अपवेष्टितः—हस्तप्राणः

अधस्तान्नमनं यस्य हस्तो नाम्नापवेष्टितः ।

भरतकल्पलतामञ्जरी

अपवेष्टितम्—हस्तप्राणः

अधस्तान्नमनं यत्तु हस्तानामपवेष्टितम् ।

शृङ्गारशेखरः

अपस्थानम्

स्थानं तदपस्थानमेतद्गुणविपर्ययात् ।
तद्यत्र विद्यते छायास्तेऽपस्थानसंमताः ॥

कुम्भः

अपस्मारः—व्यभिचारिभावः

मृतावेशादिकृतचेतनानाशोऽपस्मारः ।

शुभङ्करः

अपस्वरः

गानकाले स्वरैर्हीन अपस्वर इति स्मृतः ।

भरतः

अपस्वराभासाः

प्रसन्नमृदुरित्युक्तो रागेष्टः स तु कथ्यते ।
रागेष्टः स्वरपूर्त्यर्थं यः स्थायो गेयकर्मणि ।
स स्यादपस्वराभासो योऽपस्वरवदीक्ष्यते ॥

कुम्भः

अपाङ्गिकः

अपाङ्गिकस्तु विज्ञेयः स्वराणामथ सङ्करात् ।

नाट्यशास्त्रे

अपाटाख्यहस्तपाटाः

तलप्रहारः प्रथमः प्रहारो वलितस्तथा ।
गुरुगुम्फितसंज्ञश्चाधसङ्क्षिप्तसंचकः ।
विषमोऽभ्यस्त इत्यष्टात्रपाटा हस्तपाटकाः ॥

कुम्भः

अपार्थस्वरलक्षणम्

अर्थहीनमपार्थं च गतिक्रम इतीरितः ।

भरतः

अपेक्षितः

स्थायं स्थायेन पूर्वेण पूर्त्यर्थं योऽभिकांक्षति ।
अपेक्षितस्तु स ज्ञेयः .... ॥

कुम्भः

अभिनयलक्षणम्

अभिपूर्वान्निधातोरचि कर्तरि योजिते ।
प्रयोगमाभिमुख्यं यन्नयत्यभिनयस्ततः ॥
शाखोपाङ्गैरुपाङ्गैश्च प्रयोगेण विभावयन् ।
अर्थान् बहुविधान् प्रापयत्येवाभिनयो मतः ॥

नृत्तरत्नावली

नातिद्रुतं नातिमन्दं भ्रमरीप्रचुरं तथा ।
अङ्गहारोऽङ्गविक्षेपः सूत्र्योऽर्थोऽभिनयः स्मृतः ॥

हम्मीरः

अभिनयाः

वक्ष्यन्तेऽभिनयानादौ वर्णयामि सविस्तरम् ।
लघूपायानभिज्ञेन शक्यो ध्येयात्रधारणा ॥
रत्यादिकानभिव्यक्तिं नयन्ते वासनामयान् ।
रसावसाना व्यापाराः कथ्यन्तेऽभिनया इति ॥

विप्रदासः

अभिनेयः

स्तम्भेन गात्रस्य मुखशोषैरुरः कम्पेन च रोमहर्षैः ।
संस्वेदहृन्मीलनदुर्विलापैः स्वभावजोऽयं कृतिनाभिनेयः ॥

जगद्धरः

अभिनयभेदाः

आङ्गिको वाचिकाहार्यौ सात्त्विकश्चेत्यसौ पुनः ।
चतुर्धा कलितो यत्र सर्वं नाट्यप्रतिष्ठितम् ॥

नृत्तरत्नावली

अभिनवगुप्ताचार्यमतम्

अथाभिनवगुप्तार्यभङ्गीनामप्युदीर्यते ।
विभावैरनुभावैश्च सात्त्विकैर्व्यभिचारिभिः ॥

स्वीयान्यदीयसंबन्धविशेषप्रविहाणतः ।
साधारणैरभिव्यक्तो वासनात्मतया स्थितः ॥

रत्यादिकः स्थायिभावो वेद्यान्तरविनाकृतः ।
वाङ्मनोगोचरानेकविद्वत्साधारणीकृतः ॥

स्वीयाकार इहाभिन्नसभ्यैः स्वविषयीकृतः ।
विभावादिविभाव्यत्वात्तद्भवावधिजीवितः ॥

चर्व्यमानाः पानकवदन्यत्सर्वं विलुप्य च ।
मानसैक्यमिवागच्छत्सर्वाङ्गीणां भवत्स्वयम् ॥

अलौकिकचमत्कारकारी कोऽपि रसः स्मृतः ।
सा कापि परिहारेणालौकिको ज्ञाप्यकार्ययोः ॥

व्यञ्जितश्च विभावाद्यैश्चर्वणीयैः स्मृतो बुधैः
लोकोत्तरस्वसंवेद्यः प्रत्ययोऽप्युपपद्यते ॥

उपचारिककार्यत्वमादृशस्तस्य भूषणम् ।
लोको वेदस्तथाध्यात्मं प्रमाणं त्रिविधं स्मृतम् ॥

प्राक् द्वयापेक्षयात्तस्यादनुमानप्रमाणता ।
दृष्टश्रुतार्थावगतस्यार्थस्य प्रतिपादनात् ॥

धर्मार्थसाधकत्वेन रसभावोपदेशिनम् ।
यथा कवीनां हृदये याऽभूद्रामादिवासना ॥

तद्वासितान्तःकरणान्नर्तकाद्भावदर्शनम् ।
तत्काव्यार्थगम्यमानरसादेर्भाजनं जनाः ॥

सामाजिका यथा रामः सुखी दुःखी तथा पुनः ।
रामावस्थां भावयन् सोऽहमस्मीति नर्तकः ॥

अनुभावी भवन् भावो भवति प्रेक्षकान् प्रति ।
तद्वासनावासितान्तःकरणं नर्तकस्य तौ ॥
दृष्ट्वा स राम एवायमनुभावविभावनात् ।
तद्भावभावितस्वान्तःस्यू रसास्वादभाजनम् ।
अनुमेयो रसो जात इत्याचार्यमते स्फुटम् ॥

कुम्भः

अभिसारिका—नायिका

उद्दाममन्मथमहाज्वरवेपमाना
रोमाञ्चकण्टकितलोकतलं वहन्ती ।
निःशङ्किनी व्रजति या प्रियसंगमोत्का
सा कामिनी किल भवेदभिसारिकेति ॥ शुभङ्करः

अभिसारिकाद्वैविध्यम्

शुक्लपक्षे कृष्णपक्षे द्विधा स्यादभिसारिका ।
मल्लिकामाल्यधारिण्यः सर्वाङ्गेणार्द्रचन्दनाः ॥

क्षौमवत्यो न लक्ष्यन्तेऽस्तमये समभिसारिका ।
कालागुरुविलिप्ताङ्गी नीलरागरदान्विता ।
चन्द्रोदयपरिभ्रष्टा कृष्णपक्षाभिसारिका ॥

शुभङ्करः

अभ्यस्तः—पाटः

ज्ञायतेऽभ्यस्तसंज्ञोऽत्र पाटः पाणिनिवर्तनात् ।
यथा– गणगिणणं गिथागगिणणंगि तडिहिकि धिकिस ।

कुम्भः

अभ्यासः

अल्पत्वमेव शक्तेर्ऽस्मिन्नभ्यास इति कीर्तितः ।
तदाल्पतरता...वलंघनंचेति कथ्यते ॥

पूर्णत्वादिव्यवस्थानां जातीनां यदि संभवेत् ।
पोडवोक्त समोक्तेत्यनभ्यासलंघने (?) ।
क्रमात्स्यातां पञ्चमी स्यादभ्यस्याः परितोषिताः ॥

सङ्गीतसूर्योदयः

अमर्षः—व्यभिचारिभावः

अधिक्षेपावमानजनिताभिनिवेशोऽमर्षः ।

शुभङ्करः

अयुतहस्तभेदाः

पताको मध्यमा मूलरुमाङ्गुष्ठो निकुञ्चकः ।
स स्वल्पाभिनये वेदाध्यायने च प्रयुज्यते ॥

हम्मीरः

अयोगविप्रलंभशृङ्गारः

प्रागसन्ततयोर्यूनोरनुरागेऽपि जाग्रति ।
अयोगः पारतन्त्र्याद्यविप्रलम्भोऽभिलाषजः ॥

प्रवेशनिर्गमौ तूष्णीं तद्दृष्टिपथगामिता ।
रागप्रकाशनपरा चेष्टा स्वात्मप्रकाशनम् ॥

व्याजोक्तयश्च विजने स्थितिरित्यादयोऽपि च ।
तत्र सञ्चारिणो ग्लानिः शंकासूयाश्रमो भयम् ॥

निर्वेदौत्सुक्यदैन्यानि चिन्तानिद्रे प्रबुद्धता ।
विषादजडतोन्मादा मोहो मरणमेव च ॥

तत्तत्सञ्चारिभावानामुचितापि दशा भवेत् ।
प्रायेण प्राप्तनैरस्यदशावस्थास्समागतः ।
प्रोक्तास्तदनुसारेण भरतेन महात्मना ॥

भरतकल्पलतामञ्जरी

अरालखटकामुखयोर्लक्षणम्

पताकं स्वस्तिकं कृत्वा व्यावृत्तपरिवर्तितौ ।
ऊर्ध्वस्थौ पद्मकोशौ च व्यावृत्तपरिवर्तितौ ॥

क्रमात्कृत्वा यत्र नाममुत्तानारालमाचरेत् ।
खटकामुखमन्यं वाधोमुखं चतुरस्रतः ॥

स्वस्तिकनाथ वा यद्वा कृतारालौ करौ कृतौ ।
खटकामुखसंज्ञौ तावरालखटकामुखौ ॥

वणिजां सविवादानां वितर्केऽसौ प्रयुज्यते ।
अन्ये त्वाहुः सरोमस्थः पाङ्मुखः खटकामुखः (?) ॥

आरालप्रोन्नतामोऽन्यस्तिर्यगीपत्प्रसारितः ।
पार्श्वव्यत्ययतो यद्वा स्वपार्श्वे च करौ स्थितौ ।
तालान्तरौ यदा स्यातामरालखटकामुखौ ॥

हम्मीरः

अर्जुनभाणाभिधरूपम्

दक्षिणे चैककरे तालो अष्टवारं समागतः ।
वामे करे चतुर्वारं तदर्धं द्विपरित्यजेत् ॥
षड्द्रुता दक्षिणेऽङ्कौ च हत्वा वारद्वयं भवेत् ।
चतुर्दिशः द्रुतान् हत्वा वामेऽङ्के एकवारतः ॥
एकेनैव हि तालेन चैवं रूपेण नर्तकः ।
नृत्यतस्स्थानसंचारी भेदेन लयभेदतः ॥

सङ्गीतमुक्तावली देवेन्द्रकृता

अर्धकर्तरी—पाटः

मात्रार्धकर्तरी प्रोक्ता यत्रानामिकया सह ।
प्रदेशिनी मध्यमा च घ्नन्ति मध्यपुटं लघु ॥
दा खुं खु र । खुं खुं थें द हडे हें गि ढों टें ।

कुम्भः

—हौडुक्कपाटः

यत्रार्धकर्तरी प्रोक्ता यत्रानामिकया सह ।
प्रदेशिनी मध्यमा च घ्नन्तिमध्यपुटं लघु ॥

कुम्भः

अर्धनिगृहीतम्—मृदङ्गप्रहारभेदः

सार्धनिगृहीतं तु करस्यैकस्य मोक्षणम् ।

सङ्गीतनारायणे

अर्धपाणिः—हस्तपाटः

व्यस्त्रेणैकस्य हस्तस्य घातात्स्यादर्धपाणिकः ।
दग दहगड धरगड दरगड ।

कुम्भः

अर्धपार्श्वमण्डली—हस्तः

एकं वक्षस्तले स्थाप्य अन्यःपार्श्वे प्रसारितः ।
व्यावर्तितं चालपद्मम् अर्धमण्डलिकामिधः ।
नारिकेले चूतफले कृष्णे पर्वतधारणे ॥

भरतकल्पलतामञ्जरी

अर्धपुराटिका

उद्वृत्तस्यैकपादस्य चरणेन निकुट्टनम् ।
उद्वृत्तेन निकुट्टेन सा स्यादर्धपुराटिका ॥

कुम्भः

अर्धमण्डलिका

पादौ यदा बहिर्नीतौ भूमिघर्षणतः शनैः ।
आवर्त्येते तदा प्राहुरर्धमण्डलिकां बुधाः ॥

कुम्भः

अर्धमागधी—गीतिः

अर्धकालनिवृत्तैस्तु वर्णाद्या त्वार्धमागधी ।

दत्तिलः

अर्धमुष्टिः—हस्तः

निपीड्याङ्गुष्ठमध्यान्तं मध्यपर्वद्वयेन तु ।
प्रदेशिनी मध्यमयोरर्धमुष्टिः करोत्तमः ।
दोहने स्यान्महिष्योष्ट्र्यां शङ्खचापापकर्मणे ॥

सङ्गीतनारायणे

अर्धरेचितलक्षणम्

एकेन चतुरस्रेण तौ स्यातामर्धरेचितौ ।

हम्मीरः

अर्धसञ्चः—पाटः

दक्षिणानामिकाङ्गुष्ठवलनाभ्यसनक्रमात् ।
तथा रामकरोल्लासाज्जायते गुरुगुम्फितः ॥

—अपाटः

नितम्बचलनाद्वामचरणस्य प्रकम्पनात् ।
तथा पाणितलोच्छ्वासादर्धसञ्चः प्रजायते ॥
यथा— खें दें दरि खें खें दरि खें खें ट खें ट

कुम्भः

अर्धसमः

पूर्वलक्ष्मविपर्यासाद्भवेदर्धसमो यथा।
दधगिदगगिरिगिद्ध दहगि देधां गियों गिद।

कुम्भः

अर्धस्वस्तिकलक्षणम्

चरणौ स्वस्तिकौ हस्तः करिणो यत्र दक्षिणः।
अपरो वक्षसःस्थाने तदर्धस्वस्तिकं विदुः॥

नृत्तरत्नावली

अर्धार्धपाणिः—हस्तपाटः

यत्र प्रहन्यते वाद्यमर्धार्धं हस्तयोर्द्वयोः।
अर्धार्धपाणिमाचष्ट दिगष्टस्पष्टजैत्रवान्॥
खुं दां २

कुम्भः

अलङ्कृतम्

स्वस्थानसम्भवं यत्स्यात्तद्विज्ञेयमलङ्कृतम्।
व्यक्तं ज्ञेयमभिव्यक्तैः प्रकृतिप्रत्ययाक्षरैः।
प्रसन्नं कर्कटार्थं स्याद्विदर्भीरीति संस्मृतम्॥

कुम्भः

अलगपाटौ

सङ्को विच्छुरितश्चेति पाटावलगसंज्ञकौ।
अर्धाङ्गुल्यप्रघातेन तत्र सङ्कः प्रजायते॥
शुद्धेन करसङ्केन घातनाङ्गप्रहेतुना।
क्रमादुत्पद्यते पाटोऽलगो विच्छुरिताभिधः॥

कुम्भः

अलगभ्रमरी

वैष्णवस्थानकं कृत्वा तिष्ठेत्सव्याङ्घ्रिणा ततः।
देहं भ्रामयते तिर्यगलगभ्रमरी भवेत्॥

कुम्भः

अवकृष्टा

बद्धे निरुद्धे पतिते व्याधिते मूर्छिते मृते।
अवकृष्टा ध्रुवा कार्या भावे च करुणाश्रये॥

नाट्यशास्त्रे

अलगभ्रमरीलक्षणम्

वैष्णवं स्थानमास्थाय कुर्याद्वामाङ्घ्रिणा यदि।
तिर्यग् देहपरिभ्रान्तिरलगभ्रमरी तदा॥

हम्मीरः

अलगवाहः

क्रमेण पादयोर्द्वयोर्भ्रमि कोमलं यत्प्रकम्पते।
स ह्यलगवाहः स्यादित्युक्तं नृत्यकोविदैः॥

कुम्भः

अलग्नः—पाटः

अस्पृष्टाकुण्डली कोणघातेनालग्नको भवेत्।

कुम्भः

—हौडुक्किकपाटः

तमलग्नं जगुर्यत्र कुण्डाभ्यां जायते करः।
अलग्नन् सन् ....॥

कुम्भः

अलपद्मः—हस्तः

वक्रान्तकेऽलपद्मोयं स एवोर्ध्वं प्रचालितः।
उत्साहप्रभुशक्त्यर्थे युज्यते नाट्यमर्मगैः॥

भरतकल्पलतामञ्जरी

अलातचक्राख्यम्

कश्चिदन्तर्बहीभ्रमचरो हस्तः पराङ्मुखः।
अन्यो विडम्बनां धत्तेऽलातचक्रस्य चेत्तदा।
अलातचक्रमाख्यातं सद्भिरन्वर्थनामकम्॥

अलङ्कारः

यथा रात्रिश्चन्द्रहीना यथा स्त्री त्यक्तभूषणा।
अलङ्कारैर्विरहिता तथा गीतिर्न शोभते॥
एकान्तरैस्स्वरैर्यत्र स्यादारोहः क्रमाच्च तैः।
अभ्युच्चयमलङ्कारं मेनिरे ते पुराविदः॥

अवकुञ्चिता

क्रमतोऽङ्घ्रिभ्यां कुञ्चिताभ्यां तु पृष्ठतः।
गत्यावकुञ्चिता ज्ञेया।

कुम्भः

अवघटः

दुष्करोऽवघटो मतः।

कुम्भः

—हस्तपाटः

पुटमेकैकपाणिश्चेत् साङ्गुलीभिः क्रमाद्यदा।

तलेन हत्वा प्रहरेत् पाटः सोऽवपटो मतः ॥
नन गिड गिडदगिटनगिन गिन तिन नगि

कुम्भः

अवतरगलक्षणम्

ततोऽवतरणं तत्र गायकानां निवेशनम् ।
रङ्गस्योत्तरदिग्भागे गायकाः स्युरधाङ्मुखाः ॥
ततो यवनिका धार्या मध्ये रङ्गमनोहरा ।
अष्टहस्तायतहस्तैः पञ्चपड्भिश्च विस्तृता ॥
मध्ये महेश्वरं तस्य पार्श्वयोर्ब्रह्मकेशवौ ।
त्रयाणां पार्श्वयोश्चन्द्रः सूर्यो दक्षिणसव्ययोः ॥
परितः कालिकं चक्रं देवीः कोणेषु लेखयेत् ।
सरस्वतीं वायुकोणाग्नेये तारकामथ ॥
ऐशाने भैरवीं चैव नैर्ऋते कामगामिनीं ।
गोरक्षं दक्षिणे भागे सिद्धनाथं तु पश्चिमे ॥
मीननाथं पूर्वभागे चतुरङ्गं तथोत्तरे ।
पूर्वयोः पूजयेद्देवाः स्थानेष्वेतेषु देवताः ।
तृतीयस्यां यथा स्थानमेता मूर्तीः प्रपूजयेत् ॥

विप्रदासः

अवधानच्छायाः

चित्तलीनाप्रभावेन प्राप्तास्तेऽवधानजाः ।

कुम्भः

अवनद्धवाद्यभेदाः

तत्रादौ पटहः प्रोक्तो हुडुक्का मुरजस्ततः ।
करटापटवाद्यं च भेरी त्रिवलिदर्दुरी ॥
डक्कुली डमरुर्डक्का ढक्का धमस एव च ।
निस्वानस्तांम्रकीरुञ्जा कडुवालश्च सेलुका ।
उच्यते च प्रसिद्धानां लक्षणं क्रियतामपि ॥

सोमराजदेवः

अवन्तीदेशाः

प्रोक्ता प्रवृत्तिर्याऽवन्ती बुधैर्नाट्यप्रयोक्तृभिः ।
सौराष्ट्रा यवनाश्चैव शकावेदिशिकास्तथा ॥
आनर्ता माळवाश्चैव सौवीरा अपि सैन्धवाः ।
दशार्णास्त्रैपुरास्तद्वदाबुधेया अवन्तयः ॥
एते चान्ये च ये देशा अवन्तीमाश्रितास्तु ते ।
सात्त्वत्याश्च [illegible] वा या प्रयोगं स्वल्पमाश्रिता ॥

वेमः

अवन्त्यादीनां प्रवेशवर्णनम्

अवन्त्या दाक्षिणात्यायाः प्रदक्षिणपरिक्रमः ।
प्रवेशोऽपि तयोर्नाट्यमुत्तरद्वारतो भवेत् ॥
पाञ्चाल्यामौढ्मागध्याः प्रचारः स्यादक्षिणः ।
प्रकीर्तितः प्रवेशोऽपि दक्षिणद्वारतो भवेत् ॥

वेमः

अवपातः

भयहर्षसमुत्थानो विनिपातससम्भ्रमः ।
प्रवेशनिर्गमोपेतः सोऽवपात इति स्मृतः ॥

कुम्भः

--प्रकीर्णम्

अवपातस्तु सम्भ्रान्तविद्रुतानेत्रभूषणः (?) ।
क्षिप्रप्रवेशनिष्क्रामो भयहर्षसमुद्भवः ॥

वेमः

अवमृष्टम्

कनिष्ठाङ्गुष्ठकाभ्यां तु दक्षिणाभ्यामधोमुखम् ।
तन्त्रीषु त्रिप्रकारं चाप्यवमृष्टं प्रकीर्तितम् ॥

नान्यभूपालः

अवरोहिणः

विधूतश्च विवर्णस्य तथोद्वाहित एव च ।
सङ्गीतश्च तथा वेणुर्विज्ञेया ह्यवरोहिणः ॥

नान्यभूपालः

अवरोही

अवरोहन्ति स्वरा यत्रैकेनैव क्रमेण तु ।
स चावरोही शब्दे तु समनन्तरगः स्वरः ॥

मतङ्गः

—स्वरः

यत्र चैवावरोहन्ति सोऽवरोहीति भाष्यते ।

नान्यभूपालः

अवस्खलितः

यो मन्द्रादप्यधो याति योऽवस्खलित उच्यते ।

कुम्भः

अवहित्था—व्यभिचारिभावः

विकारगोपनादन्यविक्रि [illegible]वहित्था । शुभङ्करः

अव्यक्तः
गद्गदध्वनिना युक्तः सोऽव्यक्त इति कथ्यते ।
भरतकल्पलतामञ्जरी

अव्यवस्थितः
अव्यवस्थित इत्युक्तः स्थानकैरव्यवस्थितः ।
भरतकल्पलतामञ्जरी

अष्टौ ध्रुवाः
जयन्तश्च तथोत्साहो नन्दनश्चन्द्रशेखरः ।
कामदो विजयाख्यश्च कन्दर्पजयमङ्गलौ ।
अष्टौ ध्रुवाः समाख्याता राजयोग्या सदा बुधैः ॥
गान्धर्ववेदे

अष्टबन्धविहाराख्यम्
वामदक्षिणपार्श्वा ... ... त्परोदेशेषु सर्वदः ।
मण्डलस्वस्तिकौ यत्वा... ...क्रमो स विलासकौ ॥
आज्ञास्वष्टासु चे......लुठितौ यत्र यत्तदा ।
अष्टबन्धविहाराख्यमादिष्टं नृत्तकोविदैः ॥

असमः—तालः
असमे लोगुरुद्वन्द्वं । कुम्भः
। ऽ ऽ

असंयुतहस्ताः
लिङ्गाद्यामोदरेणोक्ता अमी हस्ता असंयुताः ।
असंयुता अर्थवशादेते स्युः संयुता अपि ॥
सङ्गीतनारायणे

अहृद्यं वस्तु
दृष्ट्याकेकरया ह्यन्यदुपरिष्टाद्विलोकयन् ।
कम्पश्च तयोद्वेगान्मुखस्य च विकूणनात् ।
अहृद्यमभिनेतव्यं वस्तु नाट्यविचक्षणैः ॥
वेमः

अंशलक्षणम्
रागश्च यस्मिन् वसति यस्माच्चैव प्रवर्तते ।
मन्द्रतारविषण्णा च पञ्चस्वरपरागतिः ॥
अनेकस्वरसंयोगे योऽत्यर्थमुपलभ्यते ।
अन्यश्च बलिनो यस्य संवादी चानुवाद्यपि ॥

न्यासापन्यासविन्यासन्याससंन्यासगोचरः ।
परिचार्य स्थितो यस्तु सोंऽशः स्याद्दशलक्षणः ॥
नाट्यशास्त्रे

आ

आक्रमणः
आक्रमणस्य ते ज्ञेया ये गीतं गायनैः सदा ।
कुम्भः

आक्षिप्तिकिका
सूत्रधृन्नर्तकी यद्वत्सूत्रधारस्य चार्चयेत् ।
तदाक्षिप्तिकिका ज्ञेया ध्रुवामात्र यथा भवेत् ॥
कुण्डलमण्डितगण्डयुगं भूधरकन्दरकृतवसतिम् ।
सुन्दरचन्द्रकलाकलितं शम्भुमहं प्रणमामि विभुम् ॥
कुम्भः

आक्षेपिकी
वृत्तान्योजकृतानि स्युर्दुःखे यानि भवन्ति हि ।
तानि द्रुतासु योज्यानि लघुयुग्मकृतानि तु ॥
यानि चाल्पाक्षराणि स्युरल्पच्छन्दः कृतानि तु ।
तानि स्थिताकृष्टासु कार्याण्याक्षेपिकीषु च ॥
गुर्वादिस्तु गुरुः कार्यो लघ्वादिश्च लघुस्तथा ।
ये त्वोजच्छन्दसां युक्ता ज्ञेयास्त्वाक्षेपिकी तथा ॥
यान्योजयुग्म छन्दांसि ज्ञेयान्याक्षेपिकी तथा ।
लघुयुग्मकृता या स्यात्स्थिता साक्षेपिकी भवेत् ॥
विषमांशाक्षराणि स्युः पदैरर्थवशानुगाः ।
शक्या तालेन ता योज्या वर्णनाकर्षितेन तु ॥
क्रममुल्लङ्घ्य विधिज्ञैः क्रियते या द्रुतलयेन नाट्यविधौ ।
आक्षेपिकी ध्रुवाऽसौ द्रुता स्थिता वापि विज्ञेया ॥
नाट्यशास्त्रे

आङ्गिकनृत्यक्रमः
वेणीकृतास्तथा मुक्ताबद्धास्तेष्वक्रमताः (?) ।
मीटको जूटको वीरमन्थर्द्धिफलकस्तथा ॥
नारङ्गी चैव धम्मिल्लकुन्तलः सक्तिवृत्तकः ।
यावमन्थी कुसुमन्थी लक्ष्मग्रन्थीश्च गुम्फिताः ॥
मूलग्रन्थीस्तदा मध्यप्रान्तग्रन्थीस्तथैव च ।
इत्याद्यनेकशश्चैव ज्ञातव्याः संयुताः कचाः ॥
इति वेणीधम्मिल्लपरिपूर्ण इत्याङ्गिकनृत्यक्रमः । कुम्भः

आङ्गिकसात्त्विकः

संस्तो सत्यशब्देनाङ्गिकोऽप्यत्राभिधीयते ।
लक्षणावृत्तिमाश्रित्य नाट्यशब्दोऽपि वर्तते ॥

कुम्भः

आङ्गिकादीनामभिनयानां लक्षणानि

अङ्गैः शिरःप्रभृतिभिर्निर्वृत्त्या आङ्गिका मताः ।
वाग्भिर्ये रचिता गीतप्रबन्धाद्यास्तु वाचिकाः ॥

आहार्यं भूषणादि स्यादाहार्यास्तत्प्रदर्शिताः ।
सत्त्वं मनोभाविताः स्युस्तेन ये सात्त्विकास्तु ते ॥

यद्यप्यलङ्कार्यशेषा अलङ्कारास्तथाप्यमी ।
प्राधान्येन विभावादीनानयन्ति यदा तदा ।
विवक्षितप्रधानत्वाद्भवन्त्यभिनयाभिधाः ॥

विप्रदासः

आङ्गिकाभिनयः

अर्थप्रतीत्युपायत्वाद्वाचिकोऽपि न मुख्यता ।
वाचिकोपकृतस्तस्मादाङ्गिको मुख्य उच्यते ॥

आङ्गिकोऽपि पुनस्त्रेधा शाखानृत्ताङ्कुरैर्भवेत् ।
करप्रधानो व्यापारस्तेषु शाखेति कीर्त्यते ॥

स्थानकाद्यैरुपक्रान्तं हस्तकैः प्रवर्तितम् ।
करणैरङ्गहारैश्च निष्पन्नं नृत्तमुच्यते ॥

विप्रदासः

आङ्गिकलक्षणम्—अभिनयः

तत्राङ्गिको भवेदङ्गैर्निर्वर्त्यः स पुनस्त्रिधा ।
शारीरो मुखसञ्जातश्चेष्टया च विनिर्मितः ॥

शाखा याङ्गैरुपाङ्गैश्च प्रत्यङ्गैश्च प्रदर्शितः ।
शारीरस्तत्र मुखजः केवलो वाङ्गनिर्मितः ॥

चेष्टाकृतस्तु चेष्टाभिः सासासनगतादिभिः (?) ।
शाखा याङ्गैरुपाङ्गैश्च रचितः परिकल्पितः ॥

नृत्तरत्नावली

आचार्यलक्षणम्

आचार्यः श्रुतिकोविदः पटुमतिर्वाक्ये सुवेदी रसे
ज्ञाता लक्षणलक्ष्यतत्त्वविषयो तूर्यत्रये पण्डितः ।
हास्यज्ञो नृपसंसदि प्रगुणधीरास्योद्भवे वादने
नानादेशविचित्रकाकुरचनाप्रावीण्यविद्याध्वगः ॥

कुम्भः

तौर्यत्रितये लक्ष्यविद्याचार्यः प्रकीर्तितः ।
वाग्मी स्वरूपवेत्तासौ सरसः श्रुतिकोविदः ।
सभासु परिहासज्ञो भवेद्वदनवाद्य वित् ॥

गम्भीरः

आतोद्यम्

ततं चैवावनद्धं च घनं सुषिरमेव च
चतुर्विधं तु विज्ञेयमातोद्यं लक्षणान्वितम् ।
ततं तन्त्रीकृतं ज्ञेयमवनद्धं तु पौष्करम् ।
घनं तालस्तु विज्ञेयः सुषिरो वंश एव च ॥

नाट्यशास्त्रे

आत्मार्थः

आत्मानुभावयोग्यार्थ आत्मार्थ इति कथ्यते ।

वेमः

आत्मोपक्षेपकम्

शृङ्गारस्थापकं हास्यं बहुलं करुणाश्रितम् ।
आत्मोपक्षेपकं नर्म विप्रलम्भरसोज्ज्वलम् ॥

कुम्भः

आदिकूर्मावताराख्यम्

वामदक्षिणयोर्मूर्ध्नी युगपत्क्रमतोऽथवा ।
ऊर्ध्वाधोमण्डलभ्रान्तौ करौ स्वस्तिकतां गतौ ।
वर्तनास्वस्तिकापार्श्वयुग्मे मण्डलघूर्णितौ ॥

वहन्मण्डलघूर्णौ चेत्पुरोविलुठतस्तदा ।
आदिकूर्मावताराख्यं भणितं पूर्वसूरिभिः ॥

कुम्भः

आनन्दवर्धनी लहरी

उद्ग्राहध्रुवकौ प्राग्वत् ध्रुवार्धं पश्चिमं ततः ।
आभोगध्रुवकोद्ग्राहाः सकृदानन्दवर्धनी ॥

मोक्षदेवः

आन्दोलितः

पर्वतारोहणे वनरान्दोलितः (?) ।

कुम्भः

आपडः

भूमेर्निकुट्टने पातालाश्चापडयो (?) भवेत् ।

कुम्भः

अमन्दमुकुन्दमकरन्दप्रबन्धः

नट्टो रागस्तृतीयाख्यः तालो मध्यलयः क्वचित् ।
पदानां शोभयालापगुम्फनं गानहेतुकम् ॥
अन्ते पाटाः स्वरास्तेनास्तदन्ते पद्यगुम्फनम् ।
एषोऽमन्दमुकुन्दाख्यमकरन्दाभिधानवान् ॥

कुम्भः

आभीरीभाषा

पञ्चमांशग्रहन्यासा शुद्धमध्यमसंभवा ।
प्रचुरैर्यमधैर्युक्ता गान्धारर्षभवर्जिता ॥
सङ्ग्रामे विनियोक्तव्याभीरी वीररसावहा ।
संपूर्णाप्यस्ति भाषेयं याष्टिकाचार्यसंमता ॥
न तु नौडुवतानेषु गान्धारर्षभयोः क्वचित् ।
लोपो विधीयते सद्भिरिह किं तत्र नोदना ॥
उच्यते नैष दोषोऽस्ति भाषात्वादिह भाषणात् ।
आचार्यैस्तु तदुक्तेर्यत् प्रामाण्यमुररीकृतम् ॥

कुम्भः

आभोगः

आभोगः सम्भवेद्येन प्रबन्धपरिपूर्णता ।

सोमराजदेवः

आभ्यन्तरनाट्यलक्षणम्

आभ्यन्तरं बाह्यमिति नाट्यमेतद्द्विधा मतम् ।
सुकुमाराङ्गविन्यासमसम्भ्रान्तविचेष्टितम् ॥
परिस्फुटपदालापं युक्तं वाद्यैरनुद्धवैः ।
असम्प्रदायशिक्षावन्नाट्याचार्यप्रयोजितम् ॥
लयतालकलापातप्रमाणनियमान्वितम् ।
हस्तसञ्चारललिताभिनयं लक्षणान्वितम् ।
रसभावसमायुक्तं नाट्यमाभ्यन्तरं स्मृतम् ॥

वेमः

आयतम्

स्वरा मन्द्रादिके स्थाने पृथग्व्याप्ताः पुनः पुनः ।
आयतं चैवमाख्यातम् भरतकल्पलतामञ्जरी

आरभटीवृत्तिः

आरं स्यात्सछात्रवं तस्य योगाद्योधा भटाः स्मृताः ।
सद्वृत्तिरिव या वृत्तिर्भवेदारभटी तु सा ॥

कुम्भः

आरं शस्त्रसमूहोऽस्मोद्योगाः पुरुषा भटाः ।
तेषां वृत्तिसमां वृत्तिं विदुरारभटीं बुधाः ॥

विप्रदासः

आरम्भः

ततः स्वल्पेष्ववहितेष्वक्रमारम्भसंज्ञितम् ।
तद्यथा गायकाः साक्षात्मप्रस्वरपरिग्रहम् ॥
कृत्वा कुर्युस्तालयुक्तं गीतं तत्तद्ध्रुवा पुनः ।
सप्तस्वरोद्भवास्ताः स्युः सङ्गतिश्च सुगन्धिनी ॥
रौद्री पाञ्चजनी नद्यत्पाञ्चालिन्यथ दैवती ।
अभिनीति क्रमादाभिग्रहणं स्यात्प्रसादनम् ॥
चतुरश्राभिधास्तिस्रस्सुगत्याद्यासु तत्पराः ।
तिस्रस्त्र्यश्राभिधास्वेवं दैतिनी (दैवती) वविद्याभिनी ।
एतद्गाथाभिरातोद्यवादनं राजशिक्षया ॥

कुम्भः

दीर्घाण्याद्यावष्टौ द्वादश च लघूनि नैधनं चैव ।
चत्वारि गुरूणि तथा ह्रस्वान्यष्टौ च दीर्घं च ॥
लघुसंज्ञानि चतुर्धानिधने द्विगुणीकृतानि दीर्घे द्वे ।
अष्टौ लघूनि नैधनमित्यारम्भेऽक्षरविधानम् ॥

नाट्यशास्त्रे

आरम्भादयः

वस्तूत्थाप्यसम्फोटौ संक्षिप्तकावपातकौ ।
एते भेदास्तु चत्वार आरभाट्याः प्रकीर्तिताः ॥

कुम्भः

आरोहिणः

निष्कम्पोऽभ्युच्छ्रयश्चैव हसितो बिन्दुरेव च ।
प्रेङ्खोलितस्तथाक्षिप्तो विस्तीर्णो ललितस्तथा ॥
ह्रादमानः संप्रदानः सन्धिः प्रच्छादनस्तथा ।
प्रसन्नादिः प्रसन्नान्त इति चारोहिणः स्मृताः ॥

नाट्यशास्त्रे

आरोही—स्वरः

आरोहन्ति स्वरा यत्र आरोही स तु संज्ञितः ।

नाट्यशास्त्रे

आलयणी

नवमुष्टिर्वेणुदण्डस्तत्राङ्गुलद्वयविस्तरः ।
अङ्गुलद्वयविस्तारः ककुभो वक्र उन्मुखः ॥

मेषान्त्रनिर्मिता तन्त्री सूक्ष्मा श्लक्ष्णा समा दृढा ।
अष्टादशाङ्गुलानाह तुम्बं वेदाङ्गुलाननम् ॥

दन्तनाभिसमायुक्ता दोरीबन्धनवर्जिता ।
पत्रिकाकर्परहीना भवेदालवणी शुभा ॥

निष्कलस्य प्रकारेण वाद्यालावणिका सदा ।
बिन्दुनादसमोपेता तुम्बेर्निक्षिप्य वक्षसि ॥

आलप्तिः

गायेदसौ रूपकमञ्जनीति प्रोक्ता पदालप्तिरियं पुराणैः ।
वर्णैरलङ्कारगुणैः सुपूर्णा स्थायाश्च नानागमकैर्विचित्रा ।
आलप्तिरुक्ता मुनिभिः पुराणैश्चित्राद्यभङ्गी प्रगुणा मनोज्ञा ॥

कुम्भः

आलप्तिलक्षणम्

रागालपनमालप्तिः प्रकटीकरणं मतम् ।
सा द्विधा गदिता रागरूपकाभ्यां विशेषणात् ॥

रागालप्तिस्तु सा या स्यादनपेक्ष्य च रूपकम् ।
स्वस्थानैः सा चतुर्भिः स्यादिति गीतविदो विदुः ॥

यत्रोपवेश्यते रागः स्वरे स्थायी स कथ्यते ।
आद्यस्वरद्वयं वालो मुख्यत्वादुपजायते ॥

स्वस्थानं प्रथमं ख्यातं नारदेन मनीषिणा ।
चतुर्भिस्तु द्वितीयं स्यादर्धस्थं तत्प्रकीर्तितम् ॥

स्वरैश्चतुर्भिर्द्वाभ्यां वा यद्भवेत्तत्तृतीयकम् ।
चतुर्भिर्द्विगुणैः प्रोक्तं चतुर्थं स्थानकं बुधैः ॥

लोकस्तोकैः सदा स्थायैर्विचित्रैर्बहुभङ्गिभिः ।
जीवस्वरव्याप्तिमुख्यै रागस्य स्थापना भवेत् ॥

एभिश्चतुर्भिः स्वस्थानै रागालप्तिर्मता सताम् ।
वक्ष्यते रूपकालप्तिः सर्वशास्त्रेषु संमता ॥

रूपकस्थेन रागेण तालेन च विधीयते ।
या सोक्ता रूपकालप्तिः सा पुनर्द्विविधा भवेत् ॥

प्रतिग्रहणिकैकान्या भञ्जनीत्यभिधीयते ।
विधाय स्थायमालप्तिं रूपकावयवो यदि ॥

प्रतिगृह्यते चान्यथा गायेदसौ रूपकभञ्जनी ।
वर्णालङ्कारसंयुक्ता गमकस्थायचित्रता ।
आलप्तिरुच्यते तज्ज्ञैर्भूरिभङ्गिमनोहरा ॥

मोक्षदेव:

स्थाय्यादिवर्णादाह नानालङ्कारधारिणी ।
स्वस्थाननयनाप्रौढिनिर्गुह्राजनरञ्जनी ॥

रक्तिगम्भीदाने वीणी संयुता गमकान्विता(?) ।
समस्तगीतवस्तूनामालप्तिः प्रथमं मता ॥

सोमराजदेवः

आलम्बनभावः

मण्डलादिवाद्यघोषाश्च यवनिकान्तरे बहुरूपमादाय
स्थितिश्च आगामिरूपकशङ्काशब्दप्रकटनं चालम्बनभावः ।

शृङ्गारशेखरः

आलातलक्षणम्

दक्षिणेनाङ्घ्रिणालातां कुर्वंस्तेनैव पाणिना ।
नितम्बं चतुरश्रं च विधाय क्रमशः करम् ॥

वामेन चरणेनोर्ध्वजानुचारीं प्रकल्पयेत् ।
वामाङ्गेनापि कुर्वीत भूयोऽलातादिदिक्क्रमम् ॥

यस्मिन्निदमलाताख्यं ललिते नृत्य इष्यते ।
हित्वा नितम्बमत्राह डोलं कीर्तिधरः करम् ॥

नृत्तरत्नावली

आलापचारिका

करोति स्वेष्टरागेण शुष्कालापं तु गायकः ।
नर्तकीनृत्तकाले तु सा प्रोक्तालापचारिका ॥

भरतकल्पलतामञ्जरी

✓आलापिनीलक्षणम्

आलापिनीगतं लक्ष्म वक्ष्ये लक्ष्मविदां मतम् ।
नवमुष्टिमितो दैर्घ्ये वैणवः सुषिरोऽन्तरः ॥

अङ्गुलद्वन्द्वपरिधिः प्राग्ग्रन्थ्यादिवर्जितः ।
श्लक्ष्णः समो वृत्तश्च दण्डः स्यात्ककुभं दधत् ॥

अङ्गुलद्वयविस्तारमङ्गुलार्धायतं तथा ।
तदर्धपिण्डसंयुक्तमुन्मुखं पत्रिकाऽभिधम् ॥

एकदण्डमधो भागे शङ्कुना च विराजितम् ।
चतुरङ्गुलदैर्घ्येण बहिर्मध्योन्नतेन च ॥

हम्मीरः

✓आलापिनीभेदाः

आलापिन्यामने दण्डः शुषिरो वेणुसम्भवः (?) ।
त्र्यङ्गुलपरिधौ वृत्तो भवेदानवमुष्टिकः (? ॥

स्यादस्यास्तु प्रमाणेन प्रोन्नतः ककुभः शुभः ।
बध्नीयाच्चुम्बकं दन्तचारुचुम्बिकयान्वितम् ।।
तेषां त्रिसूत्रिता तन्त्री कम्पामपधनिस्वराः ।
अमीषामेव भेदेन वाद्यन्ते रसिका अपि ।।

सोमराजदेवः

आलिङ्गनोद्भवः

किञ्चित्श्लिष्टभुजावेव पताकौ स्वस्तिकीकृतौ ।
आलिङ्गनोद्भवो हस्त आलिङ्गनविधौ मतः ।।

कुम्भः

आलिप्ता

आलिप्ता द्विविधा ज्ञेया स्वरसंयोजने तथा ।
रागलिप्ता रूपलिप्ता द्विविधा परिकीर्तिता ।।

भरतकल्पलतामञ्जरी

आलेखनः

चलत्सन्दंशहस्तश्चेत्करस्यालेखनस्तदा ।
लेखने विनियोज्योऽयं नृत्याभिनयगोऽपि च ।।

कुम्भः

आवजलक्षणम्

या हस्तसम्मिता दैर्घ्येऽष्टाविंशत्यङ्गुला पुनः ।
परिघोऽर्धाङ्गुलमिता पिण्डे सप्ताङ्गुले मुखे ।
मण्डल्यौ वक्त्रयोर्वल्लीमष्टावेकदशाङ्गुले ।।

हम्मीरः

आवापः—कलामानम्

आवापसंज्ञकं ज्ञेयमुत्तानाङ्गुलिकुञ्चनम् ।

दत्तिलः

आविद्धः—धातुः

क्षेपः प्लुतोऽतिपातोऽतिकीर्णमनुबन्धसंज्ञितश्चैव ।
आविद्धो विज्ञेयो धातुर्वै पञ्चविध एव ।।
द्वित्रिचतुष्कनवकैः प्रहारैः क्रमशः कृतैः ।
आविद्धधातुर्विज्ञेयः सानुबन्धविभूषितः ।।

नाट्यशास्त्रे

आविद्धवक्रलक्षणम्

भुजाग्रयोः कूर्परयोरंसयोः सविलासयोः ।
सतोः पताकौ व्यावृत्तिं विधाय भवतोऽद्भुतम् ।।
अधस्तलौ चेदाविद्धवक्रौ हस्तौ तदोदितौ ।
विक्षेपवलने प्राहुः प्रयोगं कृतिनस्तयोः ।।

हम्मीरः

आवेगः—व्यभिचारिभावः

वातवेगाग्निकुञ्जरोद्भ्रमर्णाप्रयाप्रियश्रवणव्यसनाभिघातादि-जनितसम्भ्रम आवेगः ।

शुभङ्करः

आवेद्यम्—भूषा

आवेद्यं भूषणं तत्स्यात् श्रवणाभरणादि यत् ।
अन्नादिशब्देन तथा नानाभरणमुच्यते ।।

वेमः

आश्रावणलक्षणम्

एवमातोद्य विन्यासं सारम्भं विनियुज्यतु ।
आश्रावणादीन्यङ्गानि प्रयुञ्जीत यथाक्रमम् ।।
ईषदादौ क्रियमाणं मृदङ्गपरिमार्जनम् ।
फणित्रयक्रमादेतदाश्रावणमिति स्मृतम् ।।
अस्याक्षराणां विन्यासो विप्रदासेन भण्यते ।
आदौ गुरुद्वयं पश्चाल्लघ्वष्टकमथो गुरुः ।।
लघुद्वयं गुरुद्वन्द्वं लघ्वष्टकमथो गुरुः ।
एवमाद्यो भवेत्खण्डो द्वितीयोऽप्येवमिष्यते ।।
तृतीये तु तृतीयः स्याद्गुरुर्लघुचतुष्टयम् ।
अष्टमोऽथ गुरुः पश्चाल्लघुषट्कं ततो गुरुः ।।
एवं खण्डत्रयात्मेयं त्रिषष्ट्यक्षरनिर्मिता ।।

विप्रदासः

आश्लिष्टा—चारी

पार्ष्णिविद्धस्य यौ पादौ चेद्विश्लिष्योपसर्पतः ।
यदापसर्पतः प्रोक्ता साश्लिष्टा गतिरुद्धते ।।

सङ्गीतमुक्तावली देवेन्द्रकृता

आसारिता

आपूर्वात्सरतेर्धातो रूपे पाताः पुरोदिताः ।
आसार्यन्त इति प्रोक्ता बुधैरासारिताभिधाः ।।

कुम्भः

आसारिताङ्गानि

मुखं प्रतिमुखं चैव देहं संहरणं तथा ।
अङ्गान्येतानि चत्वारि सर्वेष्वासारितेषु च ।।

उपोहनं मुखं तेषां युग्मं प्रतिमुखं भवेत् ।
ओजःशरीरसंहारावयमङ्गविधिः क्रमः ॥
इत्येवं चतुरङ्गानि ज्ञेयान्यासारितानि तु ।
चतुरासारितैर्बद्धं विज्ञेयं वर्धमानकम् ॥

नाट्यशास्त्रे

आहतः—नादः
सोऽप्याहतः पञ्चविधो नादस्तु परिकीर्तितः ।
नखवायुजचर्माणि लोहशारीरजास्तथा ॥
नखं वीणादयः प्रोक्ताः वंशाद्या वायुपूरकाः ।
चर्माणि च मृदङ्गाद्या लोहास्तालादयस्तथा ।
देहनादेन ते युक्ता नादाः पञ्चविधाः स्मृताः ॥

सङ्गीतमकरन्दे

आहार्याभिनयः
नेपथ्यस्य निधानं स्यादाहार्यः सचतुर्भुजः ।
पुस्तभूषाङ्गरचनासजीवः परिकल्पितः ॥

नृत्तरत्नावली

आहार्याभिनयो नाम नैपथ्यविधिरुच्यते ।
तत्र नित्यं प्रयत्नस्तु कार्यो नाट्यप्रयोक्तृभिः ॥
नाट्यप्रयोगः सर्वोऽपि यतस्तस्मिन् प्रतिष्ठितः ।
नाट्यस्य योग्यालंकारो नैपथ्यमिति कथ्यते ॥
नानावर्णाः प्रकृतयः पूर्वमाहार्यसूचिताः ।
आङ्गिकाद्यैरभिनयैर्व्यज्यन्ते तदनन्तरम् ॥
आहार्याभिनयस्तस्माच्चतुर्धा परिकीर्तितः ।
हस्तो भाषाङ्गरचना सञ्जीवश्चेत्यनुक्रमात् ॥

वेमः

इ

इष्टवस्तु
परावृत्य च शिरसो नाम्रा नेत्रनिकुञ्चनात् ।
अदर्शनादपि स्पष्टमिष्टं वस्तु निर्दिशेत् ॥

वेमः

ई

ईहामृगः—रूपकम्
ईहामृगस्तु विज्ञेयश्चतुरङ्कस्त्रिसन्धिकः ।
बलात्कारांशशाली च नरदिव्याधराश्रयः ॥
दिव्यस्त्रीकारणायत्र संग्रामः कैशिकीयतः ।
नायकैः षड्भिः सङ्ख्यातो विख्यातपुरुषान्वितः ॥
शान्तशृङ्गारहास्यैस्तु वर्जितो हृदयङ्गमः ।
वधप्राप्तस्य कुर्वीत वधं तैरसाहयतः ॥
संरम्भं परमानीय युद्धव्याजान्निवारयेत् ।
अनन्यां नायिकामस्मिन्नायको मृगवदीहते ।
एष ईहामृगोऽयं तन्मुनीन्द्रभरतोदितः ॥
देवानामर......जार्थचरितो चौरक्रियाद्यन्वितो
दैत्यादिः प्रतिनायको न च वधः प्राप्तस्तथातोरणे ।
सात्त्वत्यारभटी च यत्र सकला वृत्तिर्विना कैशिकी-
गर्वामर्षविहीन एष कथितो वेदाङ्क ईहामृगः ॥

शुभङ्करः

उ

उक्तप्रत्युक्तकलक्षणम्—लासः
साधिक्षेपैः पदैर्युक्तं चित्रगीतार्थयोजितम् ।
कोपप्रसादजनितमुक्तप्रत्युक्तकं विदुः ॥

नृत्तरत्नावली

उग्रता—व्यभिचारिभावः
क्रोधान्निर्दयचित्तत्वमुग्रता । शुभङ्करः

उग्रम्
मध्यमादिस्वरा भक्तमुग्रं च परिकीर्तितम् ।

भरतकल्पलतामञ्जरी

उचितः
...............तदेवोचितसंज्ञकः ।
योग्यतामापितो गीते गीतज्ञेन विपश्चिता ॥

कुम्भः

उचितभ्रमरी
देहस्य तिर्यग्भ्रमणात्समपादादनन्तरम् ।
उचितभ्रमरी नाम ब्रूते शङ्करकिङ्करः ॥

कुम्भः

उचितभ्रमरीलक्षणम्
समपादानन्तरं चेत्तिरश्ची भ्रामयेत्तनुम् ।
क्रियते यत्र तामाहुरुचितभ्रमरीमिह ॥

हम्मीरः

उच्छ्वासः

उच्छ्वास आघ्राणे कुसुमादिनः ।

कुम्भः

उद्वृत्तः—पाटः

उद्वृत्तस्तु सकोणेन ललितेन प्रवादनात् ।
तलहस्तेन वामेन पाणिना दक्षिणेन तु ॥

कुम्भः

उत्कटम्

समौ पादावासनं च समस्पृष्टन्तु भूतलम् ।
स्थानं तदुत्कटं योगध्यानसन्ध्याजपादिषु ॥

कुम्भः

वैष्णवं स्थानकं यत्र समुन्नतमुरस्थलम् ।
कटिनाभिपरौ हस्तौ युगपत्क्रमशोऽथवा ॥
चतुरश्रमिदं प्रोक्तं अङ्गं नेत्रसुखावहम् ।
अंसैर्युद्धे यथान्याय्या धनुषःकरणे तथा ॥
परिमार्जनमादानं ...... मुत्कटमुदाहृतम् ।
देवादितर्पणे सन्ध्या जपहोमादिषु स्मृतम् ॥

उयायनः

उत्कण्ठिता—नायिका

नैवागतः समुचितेष्वपि वासरेषु
प्राणेश्वरोऽतिगुरुकार्यवशेन यस्याः ।
दुर्वारमन्मथमहाज्वरवेपिताङ्गी-
मुत्कण्ठितां वदति तां भरतः कवीन्द्रः ॥

शुभङ्करः

उत्क्षेपः

पादमाकुञ्चितं पृष्ठपुरतो वाक्षिपेद्यदि ।
जानुपर्यन्तमुत्क्षेपस्तदा चारी प्रकीर्तिता ॥

कुम्भः

उत्प्रविष्टः

उत्प्रविष्टः स विज्ञेयो यत्रारोहे स्वरो घनः ।

कुम्भः

उत्प्लवनकर्तरी

उत्प्लुत्य पार्श्वयुगलं कटिदेशे तु विन्यसेत् ।
बध्वा कराभ्यां शिखरे अलंगोत्प्लवनं भवेत् ॥
उत्प्लुत्य प्रपदैः सम्यक्पादस्यैकस्य पृष्ठतः ।
कर्तरीविन्यसेदेषा स्यादुत्प्लवनकर्तरी ॥

अशोकः

उत्प्लुतभ्रमरी

स्थित्वा समाभ्यां पादाभ्यां उत्प्लुत्य भ्रामयेद्यदि ।
सर्वांगमन्तर......स्यात् उत्प्लुतभ्रमरीत्यसौ ॥

अशोकः

उत्प्लुतिभेदाः

अञ्चितं चैककरणाञ्चितं स्यान्द्विरवाञ्चितम् ।
दण्डप्रमाणाञ्चितं च कर्तर्यञ्चितमेव च ॥
तिर्यगञ्चितकं तद्वत्समपादाञ्चितं तथा ।
भ्रान्तपादाञ्चितं च करणं स्यात्ततः परम् ॥
अलगं कूर्मालगं चोर्ध्वालगं चान्तरालगं ।
लोहडी च तथा चान्यैकपादलोहडी तथा ॥
कर्तरी लोहडी चैव स्यादुर्पसरणं तथा ।
जलादिशयनं नागबन्धं कपालचूर्णनम् ॥
नतपृष्ठं तथा मत्स्यकरणं च प्रकीर्तितम् ।
करस्पर्शनसंज्ञं च तथा चैणप्लुतं मतम् ॥
तिर्यक्करणसंज्ञं च तिर्यक्स्वस्तिकमेव च ।
स्कन्धभ्रान्तं खण्डसूचि समस्तं च ततःपरम् ॥
ततो विषमसूचीति बाह्यभ्रमरिका ततः ।
अन्तर्भ्रमरिका चैवचोर्ध्वभ्रमरिका तथा ॥
तिरिपभ्रमरी चाथाल्पभ्रमरिकेति च ।
चक्रभ्रमरिका नामोचितभ्रमरिका तथा ॥
शिरोभ्रमरिका चैव तथा दिग्भ्रमरीति च ।
एषामुत्प्लुतिपूर्वाणि षट्त्रिंशत् संहितानि च ॥

कुम्भः

उत्फुल्लः—हस्तपाटः

अलपद्मेन हस्तेन स्यादुत्फुल्लो नखाहतेः ।

कुम्भः

उत्तमनायिकालक्षणम्

विदधत्यप्रियं पत्यौ प्रियमाचरति स्वयम् ।
वल्लभे सापराधेऽपि तूष्णीं तिष्ठति सोत्तमा ॥

भरतकल्पलतामञ्जरी

उत्तमपाठ्यलक्षणम्

गुणैरोजःप्रसादाद्यैर्विविधैरुपशोभितम् ।
अनुप्रासोपमाद्यैश्च शब्दार्थोभयसंश्रयैः ।
अलङ्कृतमलङ्कारैः पाठ्यमुत्तममुच्यते ॥

वेमः

उत्तमपात्रम्

पात्रं स्यान्नर्तनाधारो नर्त्तं स्यात्सैव वर्णका ।
ललितैर्गात्रविक्षेपैः लयतालसमन्वितैः ॥
गीतवाद्यगतान् वर्णान् समुद्गिरदिव स्फुटम् ।
गीतवाद्यध्वनिं श्राव्यमपि चातोषतां नयेत् ॥
अङ्गैश्च रसनं पूर्णैर्मनोधर्मोपबृंहितैः ।
यन्नृत्यति मनोहारि ज्ञेयं तत्पात्रमुत्तमम् ॥

वेमः

उत्तमोत्तमकलक्षणम्—लास:

विचित्रश्लोकबन्धं यन्नानारससमाश्रयम् ।
उत्तमोत्तमकं तत्स्याल्लीलाहावमनोहरम् ॥

नृत्तरत्नावली

उत्तमोत्तमकम्

मुखप्रतिमुखोपेतं तथा चाचपुटाश्रयम् ।
यथाक्षरैः सन्निपातैस्तथा द्वादशभिर्युतम् ॥
नैकयुक्तिविचित्रार्थं पौरुषं भावमाश्रितम् ।
एकाङ्गं शीर्षकं गत्वा द्विमूढं परिकीर्तितम् ॥
उत्तमोत्तमकेत्वादौ नर्कुटं संप्रयोजयेत् ।
श्लोकं विचित्रार्थपदं तथा चैवोपपादयेत् ॥
ततस्तु वस्तुकं कार्यमपरान्तकशाखया ।
यथाक्षरेण कार्यं तु शीर्षकं पञ्चपाणिना ।
उत्तमोत्तमकं प्रोक्तं हेलानृत्तविभूषितम् ॥

नाट्यशास्त्रे

उत्तरा—नक्षत्रहस्तः

उत्तरायां च शिखरः किञ्चिद्वलितरूपकः ।

शृङ्गारशेखरः

उत्तानः

उत्तानो वामहस्तश्चेत्पताकस्तदुपर्यपि ।

कुम्भः

उत्तानवञ्चितलक्षणम्

कपोलांसललाटानां क्षेत्रे ह्यन्यतमे स्थितौ ।
त्रिपताकौ करौ किञ्चित्तिर्यञ्चौ संमुखौ मिथः ॥
अंसकूर्परयोः किञ्चिच्चलतोरूर्ध्वतस्तलौ ।
क्षणं भूत्वा प्रचलितौ ज्ञेयावुत्तानवञ्चितौ ।
अंसकूर्परयोः किञ्चित्प्लवनं मन्वते परे ॥

हम्मीरः

उत्सवः—तालः

लप्लुतावुत्सवे प्रोक्तौ ।
। ऽ

कुम्भः

उद्ग्राहः

अनेनोद्ग्राह्यते गीतमित्युद्ग्राहः प्रकीर्तितः ।

सङ्गीतसूर्योदयः

उद्ग्राहः प्रथमे पादे भवेत्पूर्वं पदद्वयम् ।
पल्लवस्य त्रयं पश्चादेवं पञ्चविधानि हि ॥
एवमेव द्वितीयेऽपि तृतीये पल्लवं विना ।
पदद्वयं भवेत्तस्मादुद्ग्राहे द्वादश स्फुटम् ॥
ध्रुवे त्रीणि तथा भोगे पदमेकं प्रकीर्तितम् ।
एवमेलाप्रबन्धे स्युः पदानां षोडश क्रमात् ॥

कुम्भः

गीतमुद्ग्राह्यते पूर्वं येनोद्ग्राहः स उच्यते ।

सोमराजदेवः

उद्धतजातयः

पङ्क्तिस्त्रिष्टुप्सजगती तथातिजगती पुनः ।
शक्वरी चेति निर्दिष्टा उद्धतानां तु जातयः ॥

नाट्यशास्त्रे

उद्घृष्टः

उद्घृष्टो विरसो घोषात् ज्ञानतो गायनः स्मृतः ।

कुम्भः

उद्घृष्टः—गायकः

उद्घृष्टो विरहाद्रुष्टो गायेद्घोररसं च यः ।

भरतकल्पलतामञ्जरी

उद्दली

बाह्यं शरीरजं चर्म कवलं परिकीर्तितम् ।
आन्तरं जाठरं चर्म नाम्नः स्यादियमुद्दली ॥

सोमेश्वरः

उद्दीपनभावलक्षणम्

यवनिकामपनीय तत्तद्रसोचिताङ्गचेष्टाप्रकटनत्वम् ।

शृङ्गारशेखरः

उद्धतयोर्लक्षणम्

पराङ्मुखौ हंसपक्षौ व्यावृत्तपरिवर्तितौ ।
जयशब्दे प्रयोक्तव्यावुद्धतौ मेनिरेऽपरे ॥

हम्मीरः

उद्धृष्टम्

प्रहारो वामतर्जन्या उद्धृष्टमिति संज्ञितम् ।

नाट्यशास्त्रे

उद्वाहितम्

कूर्पराधिष्ठितश्रोणिस्कन्धान्यस्थशिरस्तदा ।
सुप्तमुद्वाहितं प्रोक्तं प्रभोर्लीलाव्यवस्थितौ ॥

कुम्भः

उद्वेष्टनम्

उद्वेष्टनं वेष्टयित्वा पृष्ठतोऽङ्घ्री प्रसारिते ।

कुम्भः

उपधानः—हस्तः

पताकखण्डविन्यासादुपधान इतीरितः ।
निद्रायामथ चिन्तायामुपधाने प्रयुज्यते ॥

सङ्गीतनारायणे

उपधानहस्तकः

पताकगण्डविन्यासादुपधानकरो भवेत् ।
निद्रायामथ चिन्तायामुपधानो विवर्तते ॥

विप्रदासः

उपनायकाः

नायकस्य गुणोत्कर्षकथका उपनायकाः ।
वचोभङ्गीषु चतुराः सखायः कार्यसाधने ।
पीठमर्दो विटश्चैव विदूषक इति त्रिधा ॥

शुभङ्करः

उपपत्तिलक्षणम्

प्रलोभ्यान्यवधूं भुङ्क्ते उपायैर्विविधैरपि ।
स तूपपत्तिरित्युक्तः विद्वद्भिरिह शास्त्रतः ॥

भरतकल्पलतामञ्जरी

उपविष्टस्थानानि

स्थानानि चोपविष्टस्य तानीदानीं प्रचक्षते ।
स्वस्थं विष्कम्भितं क्रान्तं मुकुटं च मदालसम् ।
श्रस्तालसं जानुगतं मुक्तजानुनि मुक्तकम् ॥

सङ्गीतनारायणे

उपहसितम्

दन्तानामवलोकनं प्रचलिता गात्रे विकाशो दृशोः
प्राफुल्लोऽपि च नासिकाय जठरः खेलः सकम्पो भवेत् ।
वक्रं स्याद्विकृतं शिरः प्रचलितं तद्वत्स्तनौ पीनता
तत्पूर्वं कथितं पुरोपहसितं लिङ्गं मतङ्गादिना ॥

अगद्धरः

उपाङ्गलक्षणम्

कविच्छायानुकारित्वादुपाङ्गमिति कथ्यते ।

सङ्गीतदर्पणः

उपाङ्गेषु अपस्थानवराटी

अपस्थानवराटी स्यान्मनिधैर्मन्द्रभूषिता ।
षड्जांशन्याससंयुक्ता गीयते शुचिहासयोः ॥

मोक्षदेवः

उपाध्यायः

रूपवान्नृत्यतत्त्वज्ञो वाद्यवादनवेदिता ।
वाद्यप्रबन्धनिर्माणकुशलो लयतालयोः ॥
कोविदो मुख्यवाद्येषु शिष्यलक्षणदक्षिणः ।
प्रतिष्ठापयिता गीतनृत्यवाद्यव्यवस्थितः ।
रञ्जकः स्यादुपाध्यायो नृत्यदोषविधानवित् ॥

सङ्गीतनारायणे

उपाध्यायस्वरूपम्

भूयस्त्वं निजसंप्रदायधिषणो मोहप्रहर्षैः कृतै-
र्मेधावान् ध्वनितत्त्ववित्सु निपुणस्ताले लये कोविदः ।
शिष्यं शिक्षयितुं नवीनरचना वाद्यप्रबन्धे सुधी-
रुद्वेत्ताखिलनृत्तभङ्गिभणितैर्नाट्यागमे पारगः ॥

स्थामानामधिको नतो सुकुशलो माधुर्यविस्सुर्ध्वनो
वाद्येऽधोमुखवाद्यजे निपुणधीः स्यान्नृत्यगीतादिनः।
साक्षात्स्थापयता स्थितौ जनमनोहारी स्वयं रञ्जकः
पात्रस्यापि हृदेव रूपकविधौ निर्माणकर्मोद्धुरः ॥

नृत्यस्याखिलनृत्यविस्समभुवप्रायामणीरमणीः
दोषाणामपिधानविस्वयमसौस्यान्नृत्यगीतादितः।
प्राप्तप्रौढिसुशस्तवाक्यविधुरो धीरो गुणोद्भासको
नाट्ये शुद्धगुणार्णवो निगदितस्तज्ज्ञैरुपाध्यायकः ॥

कुम्भ·

उपोहनानां वर्णसङ्ग्रहः

यान्यक्षराणि तान्यत्र वक्ष्यन्ते गणकृत्तये।
लघवः षोडशाद्ये स्युर्भानुसङ्ख्या द्वितीयके ॥
लघवोऽष्टौ तृतीयस्य चतुर्थे वेदसम्मिताः।
उपोहने क्रमादेषामादावन्ते च विन्यसेत् ॥
आदौ दिग्गे युगं प्रान्ते झण्ठमित्यक्षरद्वयम्।
दिग्गझण्ठान विन्यासः कलामानानुसारतः।
उपोहनाना पञ्चानामित्युक्तो वर्णसङ्ग्रहः ॥

विप्रदासः

उमातिलकः—तालः

उमातिलकताले तु द्रुतौ लघुगुरू स्मृतौ।
वाराख्यस्त्वष्टतालः स्याद्विद्वद्भिस्तेन गीयते ॥

गान्धर्ववेदे

उरःपार्श्वमण्डली—हस्तः

पद्मकोशाभिधौ हस्तावुरोदेशसमाश्रितौ।
व्यावृत्तचलिताकारावुरः पार्श्वे इति स्मृतः ॥
नाले च पद्मयुगले मर्मोक्त्यां च विशेषतः।
मुखनाट्यानुयोगेऽपि युज्यते पूर्वसूरिभिः ॥

भरतकल्पलतामञ्जरी

उरःपार्श्वार्धमण्डलिलक्षणम्

एकशोऽरःस्थितोत्तानेऽन्यस्मिन् पार्श्वप्रसारितौ।
व्यावर्तिततालपद्मीकृत्योरस्थो यदा करः ॥
तदेवारालतां प्राप्य यत् पुरा मण्डलाकृतिः।
स्वपार्श्वे नीयतेऽन्यस्तूद्वेष्टितक्रियया गतिः।
अन्येऽप्येवं करो न्यासादुरःपार्श्वार्धमण्डलौ ॥

हम्मीरः

उरभ्रमसंबाधम्

स्वस्तिकाकृतितां नीत्वा निभ्रन्तौ बहिरेव तत्।
करौ निवृत्तौ वेगेन मिथस्तांमुख्यधारिणौ।
यत्रोरोभ्रमसंबाधचालयं तत्तुदीरितम् ॥

उरुलः

विंशत्यङ्गुलदीर्घा स्यात्सप्ताङ्गुलमिता मुखे।
मुष्टिप्रविष्टमध्यासा त्रिवलीलोहमण्डली ॥
कवचानद्धवदना सप्तरन्ध्रैः सुयन्त्रता।
मध्ये च वेष्टिता रज्वा सूत्रनिर्मितया दृढः ॥
कच्छास्कन्धे विधायैषा सव्यदक्षिणपाणिना।
तदाह्लादाक्षरैः पाटैर्वादनीया विचक्षणैः ॥
मधुपानप्रमत्तानां योषितां लास्यनर्तने।
वादनीया विशेषेण उरुलोः ध्वनिसंयुता ॥

सोमेश्वरः

उल्बणौ—करौ

उल्बणौ तु करौ कृत्वा नन्द्यावर्तकुलीरकौ।
वलितावलपद्मौचेदुल्बणौ कथितौ तदा ॥

सङ्गीतमुक्तावली देवेन्द्रकृत।

उल्लालः

क्रमेणोल्लालयेद्यत्र चरणौ गगने नटः।
उल्लालः स तु विज्ञेयः चारिका मूर्धसंस्थितः ॥

कुम्भः

उल्लासितः

यः कन्दुकवदु................ह्यते।
प्रतिगृह्योल्लासितोऽसौ स्याय उक्तो मनीषिभिः ॥
प्रतिगृह्याविलम्बेन क्रियते यो विलम्बितः।
गीततत्त्वविदा यत्र स्यादालम्बविलम्बकः।
प्रसृताकुञ्चितः स स्याद्यः प्रसार्यावकुञ्चितः ॥
वेगेनोर्ध्वं स्वरा यत्र प्रेर्यन्ते गीतकोविदैः।
उल्लासितो भवेत्स्थायस्तत्र संप्रतिपत्तितः ॥
घ्राणेन मन्दमापीतो मरुदुल्लासितो मतः।
हृद्यगन्धे च सन्दिग्धेष्वर्थपूक्तो विचक्षणैः ॥

कुम्भः

उद्भ्रान्ता

स्थानीया याः स्थितस्तासां संप्रवक्ष्याम्यहं गतिम् ।
कृत्वावहित्थं स्थानं तु वामं बाह्यं कटीतटे ॥
आद्यं चारात्समुत्तानं कुर्यान्नाभिस्तनान्तरे ।
न निषण्णं न च स्तब्धं न चापि परिवाहितम् ॥
कृत्वा गात्रं ततो गच्छेत्तेनैवेह क्रमेण तु ।
प्रेष्याणामपि कर्तव्या गतिरुद्भ्रान्तगामिनी ॥
किंचिदुन्नमितैर्गात्रैराविद्धभुजविक्रमा ।
स्थानं कृत्वावहित्थं चा वामं चाधोमुखं भुजम् ॥
नाभिप्रदेशे विन्यस्य सव्यं च खटकामुखम् ।
अर्धनारीगतिः कार्या स्त्रीपुंसाभ्यां विमिश्रिता ॥

भरतः

उल्लोलः—हौडुक्किकपाटः

दक्षिणः प्रतिलोमेन व्यवस्थेन युतो यदि ।
अङ्गुष्ठेन तदा वामः सोच्छ्वासो यत्र कर्मणि ॥
करस्थं पाटमाचख्युरुल्लोलं पाटवेदिनः ।
दक्षिणोल्लोलहस्तेन सान्तराङ्गुष्ठयोगिना ॥
सोल्लासेन तु वामेन केचिदुल्लोलमूचिरे ।
मध्ये पुटं परे प्राहुर्दक्षिणाङ्गुष्ठघाततः ॥

कुम्भः

ऊ

ऊरुताडिता

एकपादे स्थिरे स्थाने स्थितो भूम्यांङ्घ्रिणा तु चेत् ।
ऊरू ताडयति प्रोक्ता तदोरुताडिता बुधैः ॥

कुम्भः

ऊरुवेणी

पार्श्वाभ्यां यत्र चरणावूरुभ्यां स्वस्तिकाकृती ।
क्षितिं संघर्षतश्चारीमूरुवेणीं तदादिशत् ॥

कुम्भः

ऊरूद्वृत्ता—चारी

यद्वास्य पादपार्ष्णिस्तु तलसञ्चारसंज्ञितः ।
अङ्घ्रेः पार्ष्ण्युन्मुखी सञ्चार्यूरूद्वृत्तेति कथ्यते ॥

वेमः

ऊर्ध्वजानुः—चारी

कुञ्चितोत्क्षिप्तपादस्य जानुस्तनसमं यदा ।
न्यस्तस्तत्स्थीकृतोऽन्योंघ्रिरूर्ध्वजानुस्तदा भवेत् ॥

सङ्गीतमुक्तावली देवेन्द्रकृता

ऊर्ध्वमण्डली—हस्तः

अरालाख्यकरौ चोर्ध्वभागे चेत्प्रसृतौ च तौ ।
ऊर्ध्वमण्डलिकाहस्तः प्रोच्यते भरतादिभिः ॥

भरतकल्पलतामञ्जरी

ऊर्ध्वमण्डलिनौ

अरालौ हंसपक्षौ च ललाटं प्राप्य वक्षसः ।
तत्रस्थावेव तौ भालपार्श्वदेशमुपागतौ ॥
मण्डलावृत्तिविततावूर्ध्वमण्डलिनौ करौ ।
नाभिं प्राप्यात्र विततभ्रान्ताविलपरे जगुः ।
चक्रवर्तनिकेत्येतौ नृत्तज्ञाः संप्रचक्षते ॥

विप्रदासः

ऊर्ध्वमण्डलिलक्षणम्

भालस्थलपुरोदेशात्प्राप्य तत्पार्श्वमागतौ ।
मण्डलभ्रान्तिविततावूर्ध्वमण्डलिनौ करौ ॥
ललाटप्राप्तिपर्यन्तमन्ये लक्ष्मानयोर्जगुः ।
चक्रवर्तनिकेत्येतौ प्रसिद्धौ नृत्तवेदिनः ॥

हम्मीरः

ऊर्ध्वहस्तः—हस्तपाटः

यदोर्ध्वघातः क्रियते दक्षिणेन तलेन हि ।
तदोर्ध्वघातो विज्ञेयो दां त्रयेण गिडद्वयात् ॥

गिड गिड दां दां दां

ऊर्ध्वालगम्

तिर्यग्यत्र क्रमादेतत्समपादाञ्चितं विदुः ।
दक्षिणाङ्घ्रिं भ्रामयित्वा तदीयतलपृष्ठतः ॥
वामाङ्घ्रिजङ्घामध्यं चेदवष्टभ्याञ्चितं ततः ।
कृत्वा धरित्रीस्कन्धाभ्यामधिष्ठाय विवर्तनम् ॥
विधायोल्लालयेत्पादौ भ्रान्तपादाञ्चितं तदा ।
उत्प्लुत्याधोमुखोऽग्रे च पतित्वा मर्कटासनम् ॥
यत्र बध्नाति तत्प्रोक्तमलगं करणोत्तमम् ।
यदि स्यादलगे कूर्मासनं कूर्मालगं भवेत् ॥

कुम्भः

ऋ

ऋतुः

यद्यस्य चिह्नं वेषो वा कर्म वा रूपमेव वा ।
निर्देश्यः स ऋतुस्तेन त्विष्टानिष्टार्थदर्शनात् ॥

कुम्भः

ऋषभः

नर्दन्ति ऋषभा यस्मात् तस्मादृषभ उच्यते ।

संगीतसारः

ऋषभासनम्

जानुनी भूमिसंलग्ने संयुते वियुते तथा ।
सोष्ठवाधिष्ठिताङ्गं तदा स्यादृषभासनम् ॥

कुम्भः

ए

एकचरणाश्रितम्

एकपादाश्रितं तथा । यदेकपादेन निर्मितम् ।

कुम्भः

एकजानुनतम्

समपादाग्रतः किञ्चिदपरश्चरणो यदा ।
बाह्यपार्श्वगतस्तिर्यक् स्यादेकपार्श्वगतं तदा ॥
समग्य चरणस्यान्यश्चतुरङ्गुलमानतः ।
तिर्यकुञ्चितजानुः स्यादेकजानुनतं भवेत् ॥

कुम्भः

एकतालः—तालः

लघुरेकश्चतुर्मात्रश्चतुरश्रस्तथैव च ।
यत्रैकतालः

भरतकल्पलतामञ्जरी

एकताली—तालः

एकताली द्रुतकेन । ०

कुम्भः

एकपदकुट्टिता

कुट्टितश्च स्वपार्श्वे च स्थापितोऽङ्गुलिपृष्ठतः ।
पुनर्निकुट्टितस्थाने सा चैकपदकुट्टिता ॥

कुम्भः,

एकपादम्

समस्यैकस्य पादस्य जानुमूर्ध्नि यदीतरः ।
बाह्यपार्श्वेन लग्ने हि बाह्यपार्श्वे तदादिशन् ।
एकपादं मुनिश्रेष्ठः स्थानकं स्थानवित्तमः ॥

कुम्भः

एकपादाश्चितकर्तव्यलक्षणम्

तदेवैकाङ्घ्ररचितमेकपादाश्चितं मतम् ।
अञ्चितं स्वस्तिकाङ्घ्रिभ्यां कर्तव्याञ्चितमुच्यते ॥

हम्मीरः

एकमौलिका

बाह्वोःपताकौ सम्यस्य भ्रमणादेकमौलिका ।
शिरः पल्लविका चाथ द्वितीया कथ्यतेऽधुना ॥

कुम्भः

एकांशः

सदृशांशो यथा नट्टावराल्योः शुद्धयोर्मिथः ।
परस्परसदृशयोरेकांशः परिवर्तते ॥

कुम्भः

एकोनः

अर्थहीने तु यो गायेदेकोन इति कथ्यते ।

भरतकल्पलतामञ्जरी

एणप्लुतम्

कृत्वोत्प्लवनं सूचीमन्यतरां स्वे विधाय चेद्व्रजते ।
भूमावूर्ध्वस्थाने यदोत्कटासनं तदाप्लुतं चैणवम् ॥

कुम्भः

एलाः

तदा जयन्तस्य रसे च ताले ध्रुवः पदं वाधिकमक्षरेषु ।
दृष्टं तदा स्यात्स जयन्त एलः प्रोक्तोऽत्र हम्मीरनरेश्वरेण ॥
स्याद्वर्णनियमः सर्वखण्डे खण्डद्वये तथा ।
तदा खण्डानि चान्यानि भवन्ति नियमं विना ॥
पदद्वये यदा वर्णनियमः क्रियते बुधैः ।
तदा पदानि चान्यानि भवन्ति नियमं विना ॥
अन्येऽपि चैव ध्रुवकाः स्युरत्र यथोक्ततालेषु रसेषु सर्वे ।
दूष्यानते सूरिभिरक्षराणां दोषादिभिः प्राह नरेन्द्रवर्यः ॥

हम्मीरः

एलागणः

पृथ्वी यत्र गुरुत्रयादिलघवस्त्वापो नलो मध्यलो ।
वातः प्रीतगुरुः नभोऽन्तलघुभृत्प्रद्योतनो मध्यगुः ॥
चन्द्रश्चादिगुरुः पुरन्दरपुरी सर्वत्र ला सर्वतो ।
यत्कयेलागणसंहतिं हतरिपुः श्रीसोमराजो विभुः ॥

सोमराजदेवः

एलानां संख्या

हंसावत्यादियुग्मस्य विकारा एवमेव तु ।
सर्वे त्रिनवतीभेदा एलात्रयसमुद्भवाः ॥

मोक्षदेवः

एलापदानां नामानि

कामी च मघवान् शान्तिजितोमत्रो विकारवान् ।
मांधाता सुमतिः शोभी सुशोभी गतिकोऽच्युतः ॥
विचित्रो वासवोमृदुः सुचित्र इति षोडश ।
नानान्येलापदाना स्युः षोडशानामनुक्रमात् ॥

मोक्षदेवः

एलावर्णेषु देवताः

अकारे देवता विष्णुरिकारे मकरध्वजः ।
लकारे लक्ष्यते लक्ष्मीरेलावर्णेषु देवताः ॥

मोक्षदेवः

ओ

ओता

उद्ग्राहो द्विस्ततःखण्डं यस्यां द्विर्भूरिवाद्यकम् ।
ततः किञ्चिदधिकं वारे द्वितीयेऽथ तृतीयकम् ॥
कियद्दीर्घं सकृत्तच्च वैश्चित्रपाटैर्विमिश्रितम् ।
प्रयोक्तव्यं ततो दीर्घखण्डं वर्णस्वरात्मकम् ॥
ततोऽल्पं बहुपाटाद्यं ततोऽन्ते छण्डणो भवेत् ।
उद्धतो ध्वनिरत्रस्यात्प्रायोमानं विलम्बितम् ।
ओता सोक्ता परे प्राहुः खण्डचालिं मनोहरम् ॥

कुम्भः

औ

औडवरागग्रहस्वराः

धन्यासी औडवः प्रोक्तः सावेरी धविवर्जितः ।
औडवो गुर्जरी प्रोक्तः सादिर्वर्ज्यौ रिधौ तथा ॥
रिधौ वर्ज्यौ मध्यमादिरौडवा मधुमाधवी ।
मेघरञ्जी मध्यमादि धनिवर्ज्यौ तथौडवः ॥
वेलावल्यौडवः स्यात्तु मादिर्वर्ज्यौ सरीस्वरौ ।
रामकृत्यौडवः स्यात्तु गादिर्वर्ज्यौ रिधौ स्वरौ ॥
नारायणी निषादादिरौडवो धपवर्जितः ।
पालिरौडवः षड्जादिवर्ज्यौ मध्यमपञ्चमौ ॥

सङ्गीतमकरन्दे

अर्द्धमागधी

प्रयोगं यादृशं प्राप्ता प्रवृत्तिश्चार्द्धमागधी ।
अङ्गा वङ्गाः कालिङ्गाश्च गौला उड्राश्च मागधाः ॥
पौण्ड्राः प्लवङ्गमास्तद्वदन्तर्बहिर्गिरास्ततः ।
परं च नेपालवत्सप्राग्ज्योतिषास्तथा ॥
कामरूपाः पुलिन्दाश्च वैदेहास्तात्रलिप्तकाः ।
ये चान्ये किल ये प्राच्यास्ते भजन्त्यौर्द्धमागधीं ॥
एतासां तु प्रवृत्तीनां रङ्गपीठपरिक्रमा ।
साव्यापसव्यरूपेण विज्ञेया विविधा क्रिया ॥

वेमः

औदार्यम्—पौरुषः

औदार्यं सुमहद्दानं प्रियभाषणपूर्वकम् ।

वेमः

औडुवशब्दनिष्पत्तिः

उडवो यान्ति गच्छन्ति तस्मिन् तदुडवं नभः ।
भूतसंख्यामितं निष्ठा भूतानां पञ्चमं हितम् ॥
औडवीपञ्चसंख्यासा येषां ते औडवा स्वराः ।
तस्मात्पञ्चस्वरात्मानस्तानाद्या औडवाः स्मृताः ॥

अं

अंशः

नेता च तारमन्द्राणां योऽत्यर्थमुपलभ्यते ।
ग्रहापन्यासविन्याससंन्यासन्यासगोचरः ।
अनुवृत्तश्च यश्चेह सोऽशः स्यादंशलक्षणः ॥

मतङ्गः

अंशच्छाया

. शेषवंशो दृश्यते स्थायास्तेंशस्य परकीर्तिताः ।

कुम्भः

अंशभेदाः

रागान्तरस्य यो रागेऽवयवोंऽशस्य उच्यते ।
स सप्तधा करणांशः कार्योंऽशोंश एव च ॥
सजातीयांशको मध्यस्थांशकोऽसदृशांशकः ।
सदृशांशश्च यो रागे कार्यांशः करणोद्भवः ।
कारणांशो यथा रामकृतौ कोलाहलांशकः ॥ कुम्भः

अंशांशः

अंशांशः स तु यत्रांऽशोंशान्तरः सञ्चरेदिह । कुम्भः

अंसपर्यायनिर्गतम्

बध्वातु स्वस्तिकं पूर्वं कलासमये यदा ।
निर्गतावंसदेशाश्च पर्यायात्कटिदेशगौ ।
करौ यत्र तदोक्तं तदंसपर्यायनिर्गतम् ॥

अंसवर्तनिकम्

मणिबन्धप्रकोष्ठां सवर्तनाञ्चलितोद्धृतौ ।
किंचित्साभिनतं शीर्षं विधायोपविलोडनैः ॥
परागाधोमुखत्वेन लुठितैरुरसः पुरः ।
ततश्चवलितैः पाण्योः कुटिलैः पार्श्वयोर्द्वयोः ॥
युगपत्क्रमतो यद्वा भूयते यत्र तत्तदा ।
अंसवर्तनिकं प्रोक्तं.........लक्ष्यविशारदैः ॥

क

कक्ष्याविभागः

भरतोक्तप्रकारेण रचिते नाट्यमण्डपे ।
नगरार्णवशैलादेः स्वर्गादेर्भुवनस्य च ॥
नानाविधानां देशानां मनुष्याणां दिवौकसां ।
सिद्धकिन्नरगान्धर्वयक्षपन्नगरक्षसां ॥
स्थानप्रवेशयोरेषां व्यवस्थापरिकल्पनम् ।
यस्मात्मे क्रियते कक्ष्याविभागः सोऽभिधीयते ।
अस्य प्रमाणो विज्ञेयो भरतोक्तेन वर्त्मना ॥ वेमः

कटिरेचकः

भ्रमणमिह करोति सर्वदिक्कं
यदिह कटिकटिरेचकं तमाहुः ।
प्रसृतिविरलिताङ्गुले स्थिरश्च
भ्रमणलयेन गलस्य शीघ्रा ॥ कुम्भः

कटिरेचकम्

भ्रमणं सर्वतः कट्याः प्रोच्यते कटिरेचकः । मोक्षदेवः

कटीसमलक्षणम्

यत्राक्षिप्तापक्रान्तां चारीं कुर्वन् क्रमात्ततः ।
स्वस्तिकीभूय विश्लिष्टौ करौ नाभिकटीचरौ ॥
खटकाख्यार्धचन्द्राख्यौ समुन्नतनते क्रमात् ।
पार्श्वंवैष्णवमादध्युस्तथावेवं पुनर्विधिः ॥
भवेदङ्गान्तरेणापि कीर्तितं तत्कटीसमं ।
सूत्रधारप्रयोक्तव्यो जर्जरस्याभिसंभ्रमः ॥ नृत्तरत्नावली

कट्टरिः

वाद्याक्षरं निर्मितं च नृत्यं तद्धतमानतः ।
पुनःपिल्लमुरूपश्चान्नृत्तं च विधिपूर्वकम् ॥
पुनःशब्दाक्षरैर्नृत्यं सूलयेन यथोचितम् ।
रचयेदथशब्देन द्विरावृत्तपदेन च ॥
विधाय नर्तनं चारु शब्दे न्यासं समाचरेत् ।
एवं कट्टरिनृत्यं स्याद्यथायोगं समाचरेत् ।
नियमात्कट्टरि ज्ञेया रसिकानां सुखप्रदा ॥ सोमेश्वरः

कडकडु—नाट्याङ्गम्

प्रायेण श्लिष्टवर्णश्च दीं दकादि समन्वितः ।
आदिमध्यावसानेषु तवर्णोन्ते च बन्धकः ॥ भरतकल्पलतामञ्जरी

कण्ठगुणाः

माधुर्यं श्रावकत्वं च स्निग्धत्वं घनता तथा ।
त्रिस्थानशोभा पञ्चैते प्रोक्ताः कण्ठगुणा बुधैः ॥ सोमराजदेवः

कण्ठगुणानां लक्षणानि

मनःप्रह्लादकं कुर्यान्माधुर्यमिति सूरयः ।
श्रावणं च ध्वनिर्दूराच्छ्रावकत्वं प्रकीर्तितम् ॥
तारल्यरूक्षता यस्या स्निग्धता साभिधीयते ।
घनता तु तथा प्रोक्ता सुस्वरा ध्वनिसान्द्रता ॥

शिरस्युरसि कण्ठे च त्रिषु चेन्मधुरो ध्वनिः ।
त्रिस्थानशोभा कथिता तदा गीतविशारदैः ॥
सोमराजदेवः

कण्ठरेचकः

अथवा स्यादसौ पाणेर्विरलप्रसृताङ्गुलेः ।
तिर्यग्भ्रान्तिरथो यस्मात्कण्ठस्य विधुतभ्रमः ।
स कण्ठरेचकः प्रोक्तः कण्ठरेचककोविदैः ॥
अशोकः

कण्डुकः—तालः

चारोऽष्टादशवर्णाढ्यः शोहर्षप्रदो ध्रुवः ।
फणिभाषायुते वीरे रसे कन्दुकतालुके ।
लघुद्वयं विरामान्त ताले कण्डुकसंज्ञके ॥
गान्धर्ववेदे

कदम्बः

संहिताङ्गुलयो यत्र सन्त्यो वर्तुलतात्मताम् ।
कदम्बोऽसौ रसास्वादे हस्तके विनियुज्यते ॥
कुम्भः

संहतानामङ्गुलीनां वर्तुलाकारमेलनम् ।
कदम्बहस्तकं प्राहु रसास्वादेष्वसौ भवेत् ॥
विप्रदासः

कनिष्ठासारितविधिः

स्फुटं रक्तं विभक्तं च समं शुद्धप्रहारजम् ।
नृत्यानुगं वर्धमाने वाद्यवादनमिष्यते ॥
कनिष्ठासारितन्यायविधिरुक्तः सविस्तरः ।
अन्येष्वासारितेष्वेष विज्ञातव्यो विधिर्बुधैः ॥
कुम्भः

कपालगीतम्

महाकल्पविभेदेन नामान्तरजुषो विधेः ।
कपालैरष्टभिर्गीतं प्रथमामित्यगात्ततः ॥
कुम्भः

कपालघूर्णितम्

समपादस्थितो भूमौ शीर्षस्पृश्य च भूतलम् ।
नागवृत्ति वितनुते कपालघूर्णितं हि तत् ॥
कुम्भः

कपिलः

न्यूनाधिकश्रुतिर्गायन् स्वरान् कपिल ईरितः ।
कुम्भः

—गायकः

कपिलस्वरसन्दर्भक्रमान्न्यूनाधिको भवेत् ।
भरतकल्पलतामञ्जरी

कमलः—मण्ठकः

लघुद्वयं गुरुश्चैकस्तालोऽयं दर्पणः स्मृतः ।
यस्मिन्ताले रसः शान्तः कमलो मण्ठको भवेत् ॥
दर्पणतालः ॥ ऽ
गान्धर्ववेदे

कम्पताललक्षणम्

कम्पताले विरामान्तं द्रुतद्वन्द्वं लघुस्ततः ।
० ० ।
सोमराजदेवः

कम्पितः

कम्पितस्तु सुरते ।
कुम्भः

—गायकः

त्वरया गानकाले तु कम्पनात्कम्पितो मतः ।
भरतकल्पलतामञ्जरी

कम्पितम्

त्रिस्थानेषु स्वराश्चैव वेगोक्ताः कम्पितं विदुः ।
भरतकल्पलतामञ्जरी

कम्बलनागगीतम्

यत्कम्बलाख्यनागेन प्रीतये पार्वतीपतेः ।
गीतं स्वरपदैर्युक्तं प्रदेशे कुण्डलस्य च ॥
स्थितेन पञ्चमीजातिमुपजीव्य लयान्वितम् ।
तद्गानं कम्बलं नाम प्रसिद्धं मार्गवर्त्मनि ॥
पञ्चमांशग्रहं षड्जन्यासं बहुलमीश्वरम् ।
अल्पमध्यमगान्धारं धमपन्यास पञ्चमम् ॥
स्वराणां बह ...... धैरल्पता बहुतावशात् ।
अन्वितं कम्बलं गानमीरितं मार्गवेदिभिः ॥
कर्णोपान्तनिविष्टेन कम्बलेनेदमीरितम् ।
श्रुत्वा कम्बलनागाय वरं प्रादान्महेश्वरः ॥

प्रीणयिष्यति यो नित्यं गीतेनानेन भक्तितः ।
सम्पूज्य तेन कृतं मे तोषणं कल्पकोटिभिः ॥
नन्द्यादिभ्योऽधिको मे स इत्याह भगवान् शिवः ।
इति कम्बलनागस्य गीतं सम्यगुदीरितम् ।
प्रत्यर्थिवनितादत्तवैधव्येन महीभृता ॥

कुम्भः

करकर्माणि

विंशतिः करकर्माणि न तु लक्ष्माणि लक्ष्यते ।
धूननं श्लेषविश्लेषौ चाक्षेपो क्षणमोक्षणे ॥
परिमर्दो निग्रहो उत्कृष्टयाकृष्टिनिकृष्टयः ।
ताडनं तोलनं छेदभेदौ स्फोटनमोटने ।
विसर्जनमथाह्वानं तर्जनं चेति विंशतिः ॥

कुम्भः

करचारणा—पाटः

केवलैर्हस्तपाटैर्या वाद्या स करचारणा ।

कुम्भः

करटालक्षणम्

एकत्रिंशत्यङ्गुला या दैर्घ्ये हस्तमिताथवा ।
सार्धहस्तमितं मानं चतुरङ्गुलकाभिधम् ॥
परिधौ दधती वक्त्रे द्वादशाङ्गुलकेऽथवा ।
चतुर्दशाङ्गुले चर्मबन्धनैस्तत्र वेष्टिते ॥
मण्डल्यौ लोहजौ चैव दधती परिधौ पुनः ।
तौ च तौ च समौ श्लक्ष्णा द्वाचत्वारिंशदङ्गुलौ ॥
तत्रश्चतुर्दशच्छिद्रं वलयद्वितयं तथा ।
मुखयोः कवलव्याप्तं तन्त्रीत्रितययुक्तयोः ॥
निक्षिपेद्विम्बिकास्तत्र रन्ध्रेष्वेकान्तरक्रमात् ।
द्वाभ्यां द्वाभ्यां ततस्तासां विम्बिकाभ्यां यथाक्रमम् ॥
मत्स्याकृतं दृढं स्कन्धं कृत्वा कच्छामकल्पयेत् ।
प्रान्तयोः संयुतप्रान्तं स्कन्धे वापि कटीतटी ॥
धृत्वा तां वादयेन् विद्वान् कोणाभ्यां बीजवृक्षजाम् ।
खदिरद्रुमजं वापि चर्चिकाद्वयदेवताम् ॥
करटेति पटुप्रायं पाटवर्णविराजितम् ।
द्धिकरीपि कटीतीति पाटद्वन्द्वं यदुक्तिगम् ॥

कुम्भः

करटा

झेंकारस्तत्र मुख्यस्स्याद्देवता स्तोभहेतवे ।
अन्ये पाटाः प्रयोक्तव्याः पटहे ये प्रकीर्तिताः ॥
वितस्तिमात्रकर्तव्यः सोऽष्टाङ्गुलमुखद्वयः ।
त्रिवली चर्मनाकक्षा मध्यो डमरुको भवेत् ॥
मुखयोश्चर्मणो नद्धो मण्डलिद्वयमण्डितः ।
बद्धः सूत्रगणैर्गाढं मध्ये चैव निपीडितम् ॥
अष्टाङ्गुलायतावन्यौ कार्यौ वचनगोळकौ ।
मध्येविदार्य हस्ताभ्यां वाद्यो डवडवाक्षरैः ॥
चत्वारिंशाङ्गुलावेष्टा एकविंशाङ्गुलायता ।
द्वादशाङ्गुलवक्त्राच बीजवृक्षोद्भवा समा ॥
वलयेन च कर्तव्यो लोहजे सूत्रवेष्टिते ।
तयोर्वेष्टनमुद्दिष्टं त्रिचत्वारिंशदङ्गुलम् ॥
करटास्यत्रिधातव्या तिस्रस्त्र्यंशसमावृता ।
वलये कवलच्छन्ने मुखयोरुभयोर्न्यसेत् ॥
रन्ध्राणि तत्र कुर्वीत समभागैश्चतुर्दश ।
यष्टिके तत्र संयोज्ये रन्ध्रेष्वेकान्तरेषु च ॥
सम्मुखे तेन बध्नीयान्मध्ये मत्स्याकृतिर्भवेत् ।
कच्छया वेष्टयेत्प्रान्तं शेषं स्कन्धिकयैर्न्यसेत् ॥
करटास्याविनिर्दिष्टा वक्त्रद्वयनिनादिनी ।
ककारश्च टकारश्च रिकारो रेफमस्तकः ॥
उत्सवे च विवाहे च यात्रायां नृपमन्दिरे ।
इत्यादिसर्वकार्येषु करटा विनियुज्यते ॥

सोमेश्वरः

करणः—धातुः

रिभितोभयनीरिभितो ह्रादस्तु तथानुबन्धः स्यात् ।
पञ्चविधो विज्ञेयो वीणावाद्ये करणधातुः ॥

नाट्यशास्त्रे

करणमातृका

स्थानानां नृत्तहस्तानां चारीणां यः समागमः ।
उचितानां समाख्यातं सेयं करणमातृका ॥

नृत्तरत्नावली

करणनृत्तम्

मुहुःप्रसारिताविद्धबाहू तदनुसारिणी ।
चरणावादितालेन प्रसरन् मध्यमानतः ॥

उत्पत्स्यादौ यथानृत्येत्करणैस्तालसंमितैः।
तदोत्पत्याद्यकरणं नृत्तं नृत्तविदो विदुः ॥

करणानि

स्वराणां पाटपूर्वं च बन्धाणं पदपूर्वकम्।
तेनाथं बिरुदानां च चित्राणां मिश्रकं तथा।
इत्यष्टधा स्यात्करणं लक्ष्माणं ब्रूमहेऽधुना॥

मोक्षदेवः

करणनेरिः

करणैः पञ्चदशभिर्युक्तः करणनेरिकः।
सिंहाकर्षितमादौ स्यात्ततस्तललिलासितम् ॥
वृश्चिकं च ततः प्रोक्तमन्यद्वृश्चिककुट्टितम्।
लतावृश्चिकसंज्ञं स्याद्दण्डरेचितकं ततः॥
दन्तपक्षं चोर्ध्वजानु तलसंस्फोटिताभिधम्।
विद्युत्भ्रान्तं दण्डपादं ललाटतिलकाभिधम्।
एतानि द्वादशोक्तानि पूर्वेषां मततो यथा॥

सङ्गीतमुक्तावली देवेन्द्रकृता

करणेषु क्रमः

प्रायोपक्षःस्थितः कार्यो वामस्तु करणे करः।
दक्षिणस्तु करस्तत्र करणस्यानुगः स्मृतः॥
तलपुष्पपुटस्यादौ प्रयोगात् ज्ञायते किल।
पुष्पैः स्याद्देवतापूजा मङ्गलार्थतयेति च॥
गङ्गावतरणस्यान्ते कीर्तनाम्मङ्गलं ततः।
सर्वकार्येषु विज्ञेयः सोऽवदद्भरतो मुनिः॥

कुम्भः

करणोपसंहारः

वामः करोऽत्र करणः प्रायो वक्षःस्थितो भवेत्।
दक्षिणस्तु करस्तत्र करस्यानुगतः स्मृतः॥
तलपुष्पपुटस्यादौ करणस्य प्रकीर्तनात्।
प्रारम्भे देवतापूजा पुष्पैः कार्येति सूच्यते॥
मङ्गलं सर्वनृत्यानां समाप्तौवाचरेदिति।
गङ्गावतरणस्यान्ते कीर्तनादवदन्मुनिः॥

विप्रदासः

कररेचकः

स भवति कररेचकः क्रमाद्या भ्रमणततिः परितोऽतितूर्णजाता।
विरचितवरहंसहंसपक्षाकृतित इति प्रचुरोपपत्तिकर्त्री॥

कुम्भः

कररेचितरत्नम्

पार्श्वयोः प्रथमं याम्या विदिश्यपि ततो नृप।
संयातस्वस्तिकौ स्यातां कटिमूर्ध्नगतौ मिथः॥
बालव्यजनपाताख्यौ क्रियां प्राग्वत्समाश्रितैः।
वर्तनास्वस्तिकं कृत्वा ततो भूतलसंमुखौ॥
उद्वृत्तौ मण्डलाकारं स्वस्तिकावितताबधः।
विधायैकं नितम्बाश्रमपरं रथचक्रवत् (?)॥
भ्रामयित्वा विलासेन कर्मणा दोलनेन च।
सरलोत्सारितोद्वेष्टप्रसारितविनम्रकैः॥
अंसान्ते लुठितौ स्वैरमेकैकं मण्डलोर्ध्वगौ।
निर्गतामिमुखौ स्यातां भुजौ पर्यायतो यदि॥
पतितोत्पतितौ दीर्घोत्कटिक्षेपावसानकम्।
पश्चात्स्वस्तिकबन्धेन रमणीयेषु केष्वपि॥

कुम्भः

करहीनः

करहीनः कम्पयुक्तशिरः उग्रीय गायति।

भरतकल्पलतामञ्जरी

कराणां भिन्नगामिता

करौ हि स्वस्तिकीभूय विच्युतौ विप्रकीर्णकौ॥
ऊर्ध्वमण्डलिभावेय पार्श्वमण्डलिनाविह।
विशेषणे चोल्बणयोः कर्तव्यावलपल्लवौ॥
विशेषजातशेष्ये च स्यातां तौ भिन्नगामिनौ।
नालमुत्पलमित्यत्र नहीष्टं पङ्कजद्वयम्॥
प्रसिद्धरूपरूपस्यार्थं युक्तिरेता मयोदिताः।
आचार्याणां तु सर्वेषां पृथगुद्देशलक्षणम्॥

हम्मीरः

करालः—नायकः

गानेन गर्वितो यस्तु करालेत्यभिधीयते।

भरतकल्पलतामञ्जरी

करिहस्तलक्षणम्

स्पृशन् करिकराकारः पार्श्वयोश्चलताकरः।
उन्नतो दोलितोऽन्यस्तु कर्णस्थः खटकामुखः॥

त्रिपताकोऽथ वा यत्र करिहस्तममुं विदुः ।
नन्वन्यहस्तवत् कस्मान्नात्र द्विवचनं कृतम् ॥
प्रमो यत्रैकशब्देन सजातीयावुभौ करौ ।
उक्तौ तत्र द्विवचनं घटवच्चतुरस्रवत् ॥
भिन्नशब्दौ विजानीयौ यौ वा द्विवचनं तयोः ।
यथा घटपटौ स्यातामरालखटकामुखौ ॥
करिहस्ताकृतिस्त्वेको दृश्यतेऽत्र लताकरः ।
इति कर्तव्यतात्वन्या स्यादेकवचनं ततः ॥
न चात्र करिहस्तत्वमेकैकत्र पटत्ववत् ।
न चात्रकः करिहस्तशब्दवाच्योऽपरः करः ॥
नैकशेषो न च द्वन्द्वो यतो द्विवचनं भवेत् ।
आम्रेडितं चैकवचनं मुनिना सर्वदर्शिना ॥

हम्मीरः

संहितस्थानमास्थाय चरणौ यत्र घर्षति ।
धरणीं पार्श्वदेशाभ्यां करिहस्ता तु सा स्मृता ॥

कुम्भः

—चारी

संहतस्थानकं स्थित्वा पार्श्वाभ्यां घर्षतः क्षितिम् ।
चरणौ यत्र सा चारी करिहस्ता प्रकीर्तिता ॥

सङ्गीतमुक्तावली देवेन्द्रकृता

करिहस्तालक्षणम् —देशीचारी

संहतं स्थानमाश्रित्य घर्षतश्चरणौ भुवं ।
पार्श्वद्वयेन यत्रैषा करिहस्ता प्रकीर्तिता ॥

मोक्षदेवः

करुणः—तालः

करुणे गुरुणैकेन ।   ऽ   कुम्भः

करुणस्थायाः

करुणायाश्च ते स्थाया येषु स्यात्करुणो रसः ।

कुम्भः

करौ—शरीराङ्गम्

असंयुताः कियन्तोऽपि कियन्तः संयुताः परे ।
नृत्यहस्ताः कियन्तः स्युरित्थं हस्तास्त्रिधा मताः ॥
हस्तेनैकेन कर्माणि येषां ते स्युरसंयुताः ।
येषां हस्तद्वयेनैव कर्माणि ते तु संयुताः ॥
नृत्यमात्रास्थिता ये तु न किञ्चिद्वस्तुवाचकाः ।
अङ्गहारेण सहिता नृत्यहस्तास्तु ते मताः ॥

शुभङ्करः

कर्णयुग्मप्रकीर्णकम्

उपकर्णं यदा तिर्यग्लुठितौ क्रमतः करौ ।
निजे पार्श्वे पुरोदेशपर्यन्तं यत्र तत्तदा ।
कर्णयुग्मप्रकीर्णाख्यं चालयं कथितं बुधैः ॥

कर्णाटः

निषधत्रितयं यत्र संपूर्णो वा रिधोज्झितः ।
दिनान्ते गीयते नित्यं कर्णाटोऽयं सुखावहः ॥

कुम्भः

कर्तरी—हस्तपाटः

कर्तरी वामहस्तेन चञ्चलाङ्गुलिनाहतेः ।
तिरिटि रिटिरि किटथो डिगिदतरकिरि किडडेंडें किटट

कुम्भः

कर्तरीलोहडी

एकः पादलुठितं वा ।
लोहड्यैव स्वस्तिकाङ्घ्री रचिता लोहडी मता ।

कुम्भः

कर्तर्याश्रितम्

यदाञ्चितवदुत्प्लुत्य दण्डवन्नृत्यकोविदः ।
खण्डप्रमाणाञ्चितकं कर्तर्याञ्चितमेव च ।
चरणाभ्यां स्वस्तिकाभ्यामञ्चिते परिकीर्तितम् ॥

कुम्भः

कर्तम्

ऊरुवेणीगतिर्यत्र तालः स्याल्लघुशेखरः ।
ऊरुवर्तनिका युक्तं तत्कर्तमभिधीयते ॥

सङ्गीतमुक्तावली देवेन्द्रकृता

कलरवः

......................तथा कलरवस्य च ।
माधुर्यं यत्र बाहुल्यान् ध्वनौ ॥

कुम्भः

कलविंकविनोदः

मुष्टिर्विलुठितस्यैकस्तदूर्ध्वं .... ।
गतागतः पार्श्वयोश्च पश्चात्तु पुरतो गतः॥
एवं सति पुनर्यत्र व्यत्यासात्करयोः क्रिया ।
चालयद्भिस्समाख्यातं मण्डलाभ्रमिदं तदा ॥

कलम्

अङ्गुष्ठाभ्यां समं तन्त्र्योः स्पर्शनं च कलं तु तत् ।

नाट्यशास्त्रे

कलशः—हस्तः

अन्योन्याभिमुखौ चार्धचन्द्रौ कलशसंज्ञिकः ।
भूचारी नटने पूर्णवस्तुनिर्देशभावने ।
जलावगाहे कलशे युज्यते कलशः करः ॥

भरतकल्पलतामञ्जरी

कलहान्तरिता—नायिका

चाटुकारमतिजीवितनाथं कोपतः समुदीर्य पुनर्वा ।
तप्यतेऽनुशयमन्मथभावैः कथ्यतेऽत्र कलहान्तरिता सा ॥

शुभङ्करः

कला

त्रिविधा सा च विज्ञेया त्रिमार्गनियताद्बुधैः ।
चित्रे द्विमात्रा कर्तव्या वृत्तौ सा द्विगुणा स्मृता ।
चतुर्गुणा दक्षिणे स्यादित्येवं त्रिविधा कला ॥

नाट्यशास्त्रे

अष्टमात्रा कला ज्ञेया मार्गे दक्षिणसंज्ञके ।
वार्तिकस्य चतुर्मात्रा कला चित्रा द्विमात्रिका ॥
द्रुता चित्रतरे तस्या लघुश्चित्रतमो मतः ।
अतिचित्रतरो मार्गः कलाश्च द्रुतसंज्ञिकाः ॥

सङ्गीतमकरन्दे

कलाः

कलाः पञ्च तथा सप्त पुनर्नव च कीर्तिताः ।
दशैकादश चैवैते सङ्कीर्णाः समुदीरिताः ।
न ह्येषामुपयोगोऽस्ति सप्तरूपे ध्रुवासु वा ॥

नाट्यशास्त्रे

कलापः

परस्परमुखं हस्तं कृत्वोर्ध्वे विरलाङ्गुलिः ।
पृष्ठतोऽस्य द्वितीयोऽपि तदङ्गुल्यन्तराङ्गुलिः ॥
निवेश्यः करयोः प्रान्ते यथाङ्गुष्ठौ बहिर्गतौ ।
स्यातां तथाविधमिमं कलापं हस्तकं विदुः ।
कश्चिच्छ्लेषफलं प्राहुरमिनेयेऽत्वहोश्वरे ॥

विप्रदासः

—मण्ठकः

रङ्गतालेषु विज्ञेयो लघुश्चैको गुरुद्वयम् ।
कलापो मण्ठकस्तेन रसे रौद्राभिधानके ॥

रङ्गतालः ।ऽऽ

गान्धर्ववेदे

कलाभेदाः

सूची च नागबन्धश्च मुखबन्धोऽम्बुजासनम् ।
सम्मुखावाङ्मुखी चैव पुनश्चैव हसन्मुखी ॥
पादास्फाली विलम्बीच द्रुतोऽनुगतस्तथा ।
चिरं विलोकितव्येति कला द्वादश कीर्तिता ॥
चित्रका पञ्चका रूढेत्येष त्रिविधोदिता ।
सर्वगात्रेषु शिथिलो यथा नृत्यति केवलम् ।
चक्षुषा श्लाघ्यते वाद्यं रेखा स्याच्चित्रवादनात् ॥

कुम्भः

कलासकः

चकितेव निरीक्षन्ती पश्चाद्वामेतरं मुहुः ।
प्रचारं धृतखड्गे च तन्वती विविधं द्रुतम् ॥
प्लुतमानादसंबाधं विदधती करानपि ।
यत्रार्धचन्द्रप्रभृतीन स खड्गाद्यः कलासकः ॥

कुम्भः

कविचारकः

नायको वर्ण्यते यत्रोत्तमः स कविचारकः ।

कुम्भः

कलासमेदाः

विद्युत्खड्गौ मृगबकसंज्ञौ प्लवसंज्ञमपरमपि द्वितीयम् ।
एते हि षट्प्रभेदाः पृथग्विभिन्नाः कलासकरणस्य ॥
विद्युत्खड्गौ प्लुततो गुरुणा द्वौ मृगबकौ च मण्डूकः ।
लघुता द्रुतेन हंसः परिमीयन्ते क्रमात् षष्ठी ॥

विद्युत्कलास इष्टः षोढा खड्गश्चतुर्विधः कृतिभिः ।
एको मृगककलासो बकसंज्ञः स्याच्चतुर्धात्र ॥
दुर्दुर एकोऽपि चतुर्धा हंसकलास्तु त्रिधा ज्ञेयः ।
एवं द्वांविंशतिधाः कलासभेदाः समासेन ॥

कुम्भः

स्वस्तिकं कर्कटं चैव मुष्टिकं च पताककम् ।
चतुरः क्रमतः कुर्यात्करान् यत्र तु नर्तकी ॥
धृतौ मोहे तथा घाते पाते स स्याच्चतुर्थकः ।
घातस्तत्र चतुर्धा स्यादूर्ध्वाधः पार्श्वयोर्द्वयोः ।
खड्गपूर्वकलासस्य भेदा एते चतुर्विधाः ॥

कुम्भः

कलासिका—नाट्याङ्गम्
झंकारादिस्वरैःश्लिष्टं दीर्घकैर्वाक्षरैर्युतम् ।
प्रायेण दृश्यते यत्र कीर्तिता सा कलासिका ॥

भरतकल्पलतामञ्जरी

कलिहस्तः
तर्जन्यौ तिर्यगाकारे मिथुनं मध्यपर्वणि ।
ईषच्च कुटिले स्वच्छौ तदोक्तः कलिहस्तकः ।
कलहे निग्रहे द्वेषे प्रयोज्यः शत्रुतर्जने ॥

सङ्गीतनारायणः

कलोद्भवाः
तालस्य यैः कलापूर्तैः क्रियते ते कलोद्भवाः ।

कुम्भः

कल्यतालविधिः
उत्तानवञ्चिताग्रन्तु नलिनी पद्मकोशकम् ।
अथेमानि विधायैतद्धस्तषोडशकं परम् ॥
संयुतैर्वियुतैर्वाथ करैर्नृत्यं समाचरेत् ।
मध्ये मध्ये भ्रमरिकां गीतान्ते च प्रदक्षिणम् ॥
निस्सारुरासधं वाद्यस्तालः स्वेच्छाकरःकरः ।
आलापोऽपि स हस्तः स्याल्लयो हस्तानुगः स्मृतः ॥
दूरे पादप्रचारः स्याज्झम्पायामिति तद्विदः ।
झम्पडे हस्तको ज्ञेयः स्वेच्छया तु लयाश्रयः ॥
षट्स्वेतेषु च गीतेषु कलासः स्याद्विकल्पतः ।
कल्यतालविधिर्ज्ञेयो मण्ठकस्येव सूरिभिः ॥

कुम्भः

कल्याणनाटरागः
कल्याणनाटो विज्ञेयः संपूर्णो रित्रयो मतः ।
षड्जत्रयेऽपि कैश्चित्तु संप्रदिष्टो मनीषिभिः ॥
कृपाणपाणिर्गजदन्तपत्रसुवीरवेषः समरे प्रविष्टः ।
प्रचण्डमूर्तिः किल रक्तवर्णःकल्याणनाटःकथितोमुनीन्द्रैः ॥
रि ग म प ध नि स रि स रि ग म प ध नि स

सङ्गीतदर्पणः

कंबुजः—रासकः
राजविनोदे ताले स्याद्गुरुद्वन्द्वमथ प्लुतः ।
रासकः कंबुजस्तेन गीयते गीतकोविदैः ॥

गान्धर्ववेदे

काकलीसाधारणम्
साधारणं भवेत्तच्च द्विप्रकारतया द्विधा ।
स्वरसंयोगतो जातिसंयोगात्तत्पुनर्मतम् ॥
चतुर्धाद्वयं निसगौ मध्यमाश्रयतो भवेत् ।
श्रुतिद्वयस्य ग्रहणान्निसयोः स्वरयोरिह ॥
काकलीसाधारणं स्यात् षड्जसाधारणं पुनः ।
निषादर्षभाभ्यां च षड्जाद्यन्तश्रुतिद्वयम् ॥

कुम्भः

काकी—गायकः
गानं क्रूरतरं यस्य स काकीत्यभिधीयते ।

भरतकल्पलतामञ्जरी

काकुभेदाः
स्वरजाता रागजाता चान्यजा देशसम्भवा ।
क्षेत्रजा यन्त्रजा चेति तासां लक्षणमुच्यते ॥

कुम्भः

काण्डारुणा
काण्डारुणा तु कथिता तारस्थाने सुशीघ्रता ।
गमकैर्विविधैर्युक्ता कौशल्येन विभूषिता ॥

सङ्गीतदर्पणः

काण्डारणाः
स्तम्भादिषु यथालोके पश्चात्करणं तथा ।
यत्र काण्डारणा रागे स्थायास्तेस्युः समुद्भवाः ॥

कुम्भः

कातरः—निःसारुकः

लघुद्वयं विरामान्तं ताले कन्दुकनामनि ।
द्रुतं लयेन गातव्यं कातरो भवति स्फुटम् ॥

गान्धर्ववेदे

कान्तालक्षणम्

जाता हर्षविषादाभ्यां दृष्टिः कान्ता समन्मथा ।
सा भ्रूक्षेपकटाक्षा च रसे शृङ्गारसंज्ञके ॥

हम्मीरः

कान्ता—शृङ्गारोपदर्शनम्

भोक्ता प्रधाने भोग्ये तु कान्ता तदुपदर्शनम् ।
अतोऽन्तरान्तरा शक्तिस्तस्याः शृङ्गारभङ्गिकृत् ॥

हम्मीरः

कामगणाः

अत्युक्तायास्तु चत्वारो भेदा रतिगणा मताः ।
किन्तु लपूर्वा ये तेष्वादावधिको लघुः (?) ।
एवं मध्यभवा भेदा अष्टौ कामगणाः स्मृताः ॥

हम्मीरः

ब्रह्मणः पूर्ववदने ऋग्वेदात्सम्भवो मतः ।
ब्रह्मणी देवता त्वस्या ब्राह्मीशम्भुर्गणाधिपः ॥
प्रथमेन्द्रो द्वितीयेन्द्रो वद्यो मासे भवेद्यदि ।
कामद्वयं रतिश्चैकः प्रत्येकं च तृतीयकः ॥
रत्यन्तश्च चतुःकामो मध्याद्यप्राससंयुतः ।
नादावती सुरेखेयं कर्णाटैः परिगीयते ॥
दक्षिणास्ये यजुर्वेदात्संमूर्तिः क्षत्रिया मता ।
सावित्री देवता यस्या गोविन्दोऽथ गणाधिपः ॥
आद्या चन्द्री चतुःकामौ सप्रासावाद्यमध्ययोः ।
क्रमात्ततस्तृतीया ह्रिरष्टाभिर्मान्मथैर्गणैः ॥

मोक्षदेवः

कामतालः

दद्वयं च गुरुः कामे ।

कुम्भः

कामलेखा

अन्ये द्वाविंशतिर्मात्रा द्वितीयेऽपि च तन्मिताः ।
तृतीये विंशतिर्मात्रा कामलेखा तु मान्मथैः ॥

मोक्षदेवः

कालनियमः

अधुना कालनियमः पादोत्क्षेपस्य कथ्यते ।
चतुष्कलो भवेत्पादोत्क्षेपस्तु पतनावधिः ॥
उत्तमानां मध्यमानां द्विकलः परिकीर्तितः ।
अयमेककलस्तज्ज्ञैरधमानामुदीरितम् ॥

वेमः

कालनियमेऽपवादः

रङ्गभूमौ नृपाज्ञायां कालदोषो न विद्यते ।

शुभङ्करः

कावोदः

कावोदो गायते पूर्णो निशादौ सलयान्वितः ।
ईषद्भेदो बुधैः प्रोक्तः कल्याणाख्यहम्मीरयोः ॥

कुम्भः

कावोदी

उभयोर्गौडमल्हारमल्हाराभिधयोर्मतः ।
किञ्चिद्विभेदो भेदज्ञैरन्योन्यं रसपुञ्जयोः ॥
पूर्णा धलयसंयुक्ता मल्हारनिकटस्थिता ।
गेया प्रत्यूषकाले सा कावोदी कामदीपनी ॥

कुम्भः

काव्यनाटकभेदेन पाठ्यद्वैविध्यम्

काव्यनाटकरूपेण पाठ्यमेतत्प्रवर्त्तते ।
तदवान्तरभेदानां गुणादीनां च लक्षणम् ॥
ग्रन्थेऽस्मदीये साहित्यचिन्तामणिसमाह्वये ।
प्रपञ्चितमशेषं तत्तस्मादेवावगम्यताम् ॥

वेमः

काष्ठानृत्यम्

काष्ठानृत्यं प्रभवति कृतस्वस्तिकमण्डलम् ।

सङ्गीतनारायणे

कांस्यताललक्षणम्

पद्मिनीदलसंकाशं युगलं कांस्यतालयोः ।
त्रयोदशाङ्गुलं वक्रे कुर्वीत त्र्यङ्गुलं तले ॥
निम्नत्वमङ्गुलेनान्तस्तयोः शेषं च तालवत् ।
वर्णाश्चात्र विनिर्दिष्टाः शिष्टे संनकटास्फुटम् (?) ॥

सोमराजदेवः

किन्नरीवाद्यम्

किन्नरी द्विविधा प्रोक्ता मार्गे देश्यां तु सा त्रिधा ।
मार्गस्थाने कुती कार्यौ देशीस्थाने तु यद्द्वयम् ॥

तद्वर्तते मध्यमायास्तासां लक्षणमुच्यते ।
मध्यमाया दण्डदैर्घ्यं त्रिचत्वारिंशदङ्गुलम् ॥

परिधिर्दृश्यते तत्र द्वयस्तेन षडङ्गुलम् ।
साधर्घ्यङ्गुलविस्तारं विदैर्घ्यं काकुभं शिरः ॥

मध्यकूर्मोन्नतां लौहपत्रिकां शिरसि क्षिपेत् ।
परितोऽर्धाङ्गुलन्यूना शिरसोऽसौ प्रकीर्तिता ॥

क्षिपेत् ककुभदण्डस्य वीणादण्डेऽङ्गुलद्वयम् ।
तावांश्च परिशोष्योऽसौ यावन्तः परिशोषिणे ॥

हम्मीरः

किरिकिचालक्षणम्

ऊर्ध्वस्फाटितसद्वेणुपर्वाग्राङ्कुनिरायसी ।
दन्तुरा किरिकिचा स्याद्वाद्या लोहशलाकया ॥

सोमराजदेवः

किरिकिटालक्षणम्

भवेद्व्यङ्गुलविस्तारं दैर्घ्ये च द्वादशाङ्गुलम् ।
वंशादिकाष्ठघटितं मसृणं कम्बिकाद्वयम् ॥

मणिबन्धप्रकम्पेन प्रत्येकं हस्तयोर्द्वयोः ।
धृत्वा तद्वादयेदत्र बली किरिकिटादयः ॥

सोमराजदेवः

किलिकिञ्चितः—सात्त्विकभावः

क्रोधहर्षादिभीत्यादिसाङ्कर्यं किलिकिञ्चितः । यद्वा :—

रुदितं हसितं कोपं कारणेन विनापि यत् ।
कामिनीहर्षमाश्रित्य कुरुते किलिकिञ्चितम् ॥

शुभङ्करः

किलिकिञ्चितलक्षणम्

रोषाभिलाषरुदितः स्मितभीत्यादिसङ्करः ।
हर्षेण रचितो यस्तु तद्भवेत्किलिकिञ्चितम् ॥

वेमः

कीर्तिः—तालः

कीर्तौ लगपाललपाः ।
।ऽऽ॥ऽ

कुम्भः

कीर्तिधराचार्यमतम्

अत्युत्पन्नमिदं सूत्रमिति कश्चिदनूनुदत् ।
अहेतुत्वेन भावानां हेतुत्वस्यानुकीर्तनात् ॥

प्रमाद्य लोल्लटोऽत्राह घटेतेदं यदा भवेत् ।
षष्ठीसमासः किन्त्वत्र समासोऽयं तृतीयधा ॥

विभावाद्यैः स्थायिनोऽत्र संयोगस्तन्मते मतः ।
अर्थाक्षिप्तस्थायिनोऽत्र भवेत्सापेक्षिता ततः ॥

सापेक्ष्यमसमर्थं स्यात्सामर्थ्याभावतस्ततः ।
समासाभावतः षष्ठीसमासः संमतस्त्विह ।
इति कीर्तिधराचार्यमतस्यानुमतेन हि ॥

कुम्भः

कीर्तिलहरी

उद्ग्राहस्यान्तिमो भागो ध्रुवार्धस्थानके यदि ।
शेषं च पूर्ववत्सर्वं स्यात्कीर्तिलहरी तदा ॥

मोक्षदेवः

कीलकः—हस्तः

कनिष्ठे कुञ्चिते शिष्टे मृगशीर्षे तु कीलकः ।
स्नेहे च नर्मालापे च विनियोगः प्रकीर्तितः ॥

भरतकल्पलतामञ्जरी

कीलस्वरूपम्

पद्मपत्रशतैकैक भेदकालः क्षणः स्मृतः ।
लवः क्षणैरष्टभिः स्यात्काष्ठा स्यादष्टभिर्लवैः ॥

स्यान्निमेषो सकाष्ठाभिर्निमेषैरष्टभिः कला ।
कलाद्वयी चतुर्भागः स एव त्रुटिरुच्यते ॥

चतुर्भागद्वयेनैव विद्वद्भिः परिकीर्तितः ।
अणुद्वयं द्रुतः प्रोक्तो लघुस्तद्द्वयमुच्यते ॥

कुचुम्बिनी—पाटः

स्वस्तिकेन तु हस्तेन खाकारबहुलाश्रितम् ।
वल्लीपिहितं वक्त्रं वाद्यते सा कुचुम्बिनी ॥

कुम्भः

कुञ्चिता

एकैकमग्रतः पादौ न्यस्येदुत्क्षिप्य कुञ्चितौ ।
यस्यां सा कुञ्चिता नाम ।

कुम्भः

एकाङ्घ्रिं कुञ्चितं कृत्वा द्वितीये पार्श्वतः स्थिते ।
यथोल्लासं करौ तस्माद्भ्रमणात्कुञ्चिता मता ॥

कुम्भः

कुट्टमितम्—सात्त्विकभावः

स्तनाङ्गे रोदनाख्यं यत्तत्तु कुट्टमितं विदुः । यद्वा :—

रक्ष निर्दय मामित्थं किं ओपद्रवसि प्रभो ।
दुःखाविष्करणं सौख्यादिति कुट्टमितं विदुः ॥

शुभङ्करः

कुट्टमितलक्षणम्

केशस्तनाधरादीनां ग्रहणे हर्षसम्भ्रमात् ।
सञ्जातस्य सुखस्यापि दुःखवन्नटनं तु यत् ।
तत्कुट्टमितमाचष्टे.................. पतिः ॥

वेमः

कुडुपचारणा—पाटः

कुडुपादुद्भवा यत्र पाटा ये वाद्यसंश्रयाः ।
तद्वाद्ये वाद्यमाचख्युराद्याः कुडुपचारणाम् ॥

कुम्भः

कुण्डलीनृत्तम्

अथ वेमनृपो वक्ति देवमार्गोक्तचारिकाः ।
एकस्मिन् कुण्डलीनृत्ते सूडद्वयमुदाहृतम् ॥

प्रथमं वाद्यसूडः स्याद्गीतसूडस्ततो भवेत् ।
नवतालश्च झङ्कारो रिगोणि तुडुकस्तदा ॥

पल्लवश्च चमत्कारः प्रहारश्चेत्यनुक्रमात् ।
प्रबन्धाः सप्त विज्ञेया वाद्यसूडे मनीषिभिः ॥

एषु वाद्यप्रबन्धेषु नृत्तं स्यादुचिताङ्गकम् ।
एषां सुसन्धिरुचिरः पद्धतिक्रम उच्यते ॥

तत्रादौ देवताप्रीत्यै रङ्गविघ्नोपशान्तये ।
शुष्कबालं विधातव्यं गम्भीरध्वनिबन्धुरम् ॥

ततः सभायाः कुण्डल्या मध्ये यवनिकात्रयम् ।
पादपाटविशेषाणां वैचित्र्यालोकसिद्धये ॥

कर्त्तव्यं तत्र नीरन्ध्रं स्निग्धा यवनिकादिमा ।
अपरे द्वे यवनिके नीहारावरणोपमे ॥

येन यवनिकास्तिस्रः क्रमाद्धार्या यथोचितम् ।
सकञ्चुकाभ्यां नारीभ्यां प्रागृधृतं चापसारयेत् ॥

आद्ये धृते तु नैपथ्ये नृत्ताचार्यस्तदन्तरे ।
स्थितो गणेश्वरं वाणीं रुद्राणीं च महेश्वरम् ॥
स्तुत्वा सभां सभानाथमाशीर्वादपुरःसरः ।
पात्रं प्रसाद्य तदनु पुष्पविक्षेपमाचरेत् ॥
ततः सौन्दर्यलावण्यसौकुमार्यतरङ्गिता ।
पादपाटैर्बहुविधैर्दृश्यमानैर्मनोहरैः ॥

प्रेक्षकाणां वितन्वानां नयनानन्दकन्दली ।
नैपथ्योत्सालिता भूत्वा नर्त्तकी नृत्तमाचरेत् ॥
तत्रादौ नवतालः स्यादुद्ग्राहपरिवर्जितः ।
ध्रुवखण्डानि षट् तत्र त्रयस्त्वाभोगखण्डकाः ॥
चञ्चत्पुटश्चैकतालो द्वितीयश्च ततःपरम् ।
पञ्चतालो रूपकश्चाड्डुतालश्चाथ मट्ठकः ॥
प्रतिमट्ठश्चेति तालाः खण्डेषु नवसु क्रमात् ।
तालाः प्रोक्तास्ततस्तेषु कथ्यते नर्तनक्रमः ॥
आद्यायां प्रतिसीरायां तालश्चञ्चत्पुटो भवेत् ।
मानश्च दक्षिणः प्रोक्तो गोपुच्छश्चलनिर्मितः ॥
वितालोञ्चालनश्चापचकारस्त्वादौ भवेदिह ।
ततो विलम्बिते माने गुरुकालौ प्रयोजयेत् ॥

मात्राद्वयं चित्रमाने द्रुते मात्राद्वयं तथा ।
एवं मानत्रयेऽप्यस्य तत्तन्मात्रानुसारतः ॥
यथोचितं प्रयुञ्जीत पाटाक्षरकदम्बकम् ।
पार्श्वोद्वृत्ताभिधं पाटं चाचकारे प्रयोजयेत् ॥
पाटाः स्थित्वा प्रयोक्तव्याः पार्श्वयोरुभयोरपि ।
तलताडिकमादौ स्यात्सारिकावेष्टने ततः ॥
उद्वेष्टनं निकुट्टश्च पुराटी तदनन्तरम् ।
कुत्तोरुताडितं पृष्ठोत्क्षेपः स्वस्तिकताडितम् ॥
त्रिताडितं ततश्चार्थस्खलितोत्क्षेप एव च ।
पर्यायताडितं पार्श्वोरुताडितसमाह्वयं ॥
ततश्चार्द्धपुराटी च क्रमताडितमेव च ।
ततः परं लताक्षेपः पार्श्वताडितसंज्ञितम् ॥
समः स्खलितका चेति पाटा विंशतिरीरिताः ।
एते पुनःपादपाटाश्चारुसन्धि समुज्ज्वलाः ॥
पूर्वविधाद्विसाराणां तस्यान्ते च यथोचितम् ।
चतस्रष्वाद्यमात्रासु योज्यमाने विलम्बिते ॥
अवशिष्टासु मात्रासु पादानेकान् यथोचितम् ।
अञ्चितं चरणं कृत्वा पूर्वं माने तु मध्यमे ॥
त्रिताडितं कृते माने पूर्वं कृत्वा यथाक्रमम् ।
सम्भवेन प्रयुञ्जीत शोभातिशयनिर्भरम् ॥

सम्पूर्णाभिनयस्तालो जोडना कथ्यतेऽधुना ।
संधायकं वर्तमानं भविष्यत्वाद्भवो मिथः ॥
नानापाटमनोहारि यद्वाद्यं सा तु जोडना ।
तालश्चश्चत्पुटोऽत्रापि जोडनायां प्रकीर्तितः ॥
अत्र वाद्याक्षरोद्धारं ताला वृत्तिसमन्वितम् ।
यथोचितं प्रयुञ्जीत बुध्या युक्तिविशारदः ॥
पाटतालोद्धृतिश्च समोद्वृत्तत्रिनाडितम् ।
स्वस्तिकश्चापि पादाग्रान्युद्धृत्य ततःपरम् ॥
सरिकालुटितश्चैव पार्श्वोद्वृत्तो यथोचितम् ।
पाटाश्च जोडनायाश्च क्रमे कार्या यथोचितम् ।
एवं नृत्तं विधायाग्रे प्रपञ्चमपसारयेत् ॥

कुण्डविचारकम्

चिलोक्यते यत्र करो वामदक्षिणयोर्यदि ।
गतागतेषदहिक्षु तिर्यग्व्यावर्तिता पुनः ।
कुटिलोत्समकृतपदिष्टं तदाकुण्डविचारकम् (?) ॥
.... ।
ततः कुतपविन्यासो गायनः सर्पमेहः ।
वैपञ्चिको वैणिकश्च वंशवादस्तथैव च ॥
मार्दङ्गिकः पाणविकस्तथा दार्दरिकोऽपरः ।
अवनद्धविधावेष कुतपः समुदाहृतः ॥

नाट्यशास्त्रे

कुन्तलः—तालः

वर्णैः षोडशभिः पादः कुन्तलो लघुशेखरे ।

गान्धर्ववेदे

कुन्दः—प्रतिमण्ठः

द्रुतमेकं भवेद्यत्र स तालः खण्डसंज्ञितः ।
द्रुतैर्लयेन गातव्यः कुन्दश्च प्रतिमण्ठकः ॥

गान्धर्ववेदे

कुम्भः—राशिहस्तः

पद्मकोशाभिधौ हस्तौ स्पृष्टाङ्गुष्ठकनिष्ठिकौ ।
कुम्भराशौ प्रयुज्येत भरतार्णववेदिभिः ॥

शृङ्गारशेखरः

कुरञ्जिनृत्यम्

शाबरी वेषयोर्गुञ्जापुञ्जभूषणयोः स्त्रियोः ।
नित्यं कुरञ्जीति विदुः गायन्त्योश्च स्वभाषया ॥

सङ्गीतनारायणे

कुलीरिका

नन्द्यावर्तस्थिताबङ्घ्री पादौ तिर्यक् सृतौ तदा ।

सङ्गीतमुक्तावली देवेन्द्रकृता

कुलीरिका

नन्द्यावर्तस्थिताबङ्घ्री तिर्यग्भूम्यां प्रसर्पतः ।
कुलीरिकेति सा प्रोक्ता चारी नृत्यविशारदैः ॥

कुम्भः

कुविन्दः—तालः

लो द्वौ गपौ कुविन्दः स्यात् ।
। ० ० ऽ ऽ

कुम्भः

कुहरः

कण्ठे निरुद्धपवनः कुहरो नाम जायते ।

नाट्यशास्त्रे

कूटमानम् -नाट्याङ्गम्

धिरक्ककतकं चादौ धीगुणांगं तु मध्यमे (?) ।
कूटमानमिदं प्रोक्तं पाठाक्षरविचक्षणैः ॥

भरतकल्पलतामञ्जरी

कूर्मः—हस्तः

कुञ्चिताग्राङ्गुलिश्चकेत्यक्ताङ्गुष्ठकनिष्ठिकः ।

भरतकल्पलतामञ्जरी

कूर्मासनम्

समोऽग्रे कुञ्चितः पश्चादन्यः पादस्तु जानुना ।
पृथिवीं संश्रितो यत्र गारुडं स्यात्तदासनम् ॥
वामः समः परो जानुबाह्यगुल्भमिलत्क्षितिः ।
चरणो विधते यत्र तत्कूर्मासनमीरितम् ॥

कुम्भः

केशबन्धलक्षणम्

पार्श्वदेशौ स्थितौ पार्श्वमस्पृशन्तौ गतौ शिरः ।
तदा नितम्बवत्केशान्निष्क्रम्य च पुनःपुनः ।
पृथगुत्तानितौ यौ तौ केशबन्धौ करौ मतौ ॥

हम्मीरः

कैण्यड्डु—नाट्याङ्गम्

कैण्यड्डादिस्तु वकत्तोधिकत्तो धिगतेधि च।
शिरोभेदसमायुक्तदृष्टिस्थानकसंयुतः।
नृत्तहस्तानुगामी च पादचार्यस्तु कैण्यड्डुः॥

भरतकल्पलतामञ्जरी

कैशिकम्

मध्यमग्रामेऽपि साधारणत्वम्। अस्य तु प्रयोगसौक्ष्म्यात्कैशिकमिति नाम निष्पद्यते।

नाट्यशास्त्रे

कैशिकी—भाषा

मध्यमग्रामगान्धारा शुद्धमध्यमसंभवा।
पञ्चमांशग्रहन्यासा मध्यपञ्चमभूयसी॥
सापन्यासा तारषड्जस्वरगान्धारमध्यमा।
पञ्चमांशग्रहन्यासा सेर्ष्यायां विनियोजिता॥
समसप्तस्वरा सा तु तारर्षभविराजिता।
मन्द्रमध्यमसंयुक्ता नियोज्योत्सवकर्मणि॥
कैशिदेताः पुनः प्रोक्ता भाषाङ्गमिह सूरिभिः।
एतामेव विभाषेति याष्टिको मुनिरन्वशात्।
निखिलेषु च भावेषु विनियोगस्तथाब्रवीत्॥

कुम्भः

कैशिकीवृत्तिः

केशानां वृत्तिरिव या वृत्तिः सा कैशिकी मता।

विप्रदासः

उज्ज्वलभूषणरुचिरा नानाविधललितनादगीता च।
कामोपचारचतुरा सुगन्धकुसुमाभिरामवेषा च॥
निर्भरशृङ्गाररसा नित्यं स्त्रीभिः प्रयोक्तव्या।
सौन्दर्यजीविता या सा वृत्तिर्भवति कैशिकी नाम॥

वेमः

कैशिक्यङ्गानि

नर्म च नर्मस्फन्दो नर्मस्फोटश्च नर्मगर्भश्च।
कथितानि नाट्यचतुरैः कैशिक्यङ्गानि चत्वारि॥

वेमः

कैशिक्यादिष्वभिनयाः

वाचिकाभिनयाः सर्वे भारत्यां सुप्रतिष्ठिताः।
आङ्गिकाभिनयाः सर्वे तिसृष्वन्यासु वृत्तिषु॥
आमुखाद्यास्तु ये भेदाः भारत्याद्यास्तु वृत्तिषु।
ते विस्तारभयाद्विप्रदासेनात्र न लक्षिताः॥
आङ्गिकाभिनयेष्वेव पर्यवस्यन्ति सात्त्विकाः।
यस्मान्मुख्यावभिनयौ ज्ञेयावाङ्गिकवाचिकौ॥

विप्रदासः

कैशिक्यादीनां वेदप्रभवत्वम्

ऋग्वेदाद्भारती जाता यजुर्वेदात्तु सात्त्वती।
आथर्वणादारभटी सामवेदात्तु कैशिकी॥

विप्रदासः

कोकिलप्रियः—तालः

गलपाः स्युः। ऽ। ऽ — कुम्भः

कोणाहतः—हस्तपाटः

कनिष्ठाङ्गुष्ठयोगेन शेषाङ्गुलिविवर्तनात्।
कोणाहतो हस्तपाटः परिज्ञेयो बुधैर्यथा॥
खुं खुं धरि खु खुं धरि करगित करिगित। — कुम्भः

कोमलः

कोमलोऽकर्कशः प्रोक्तो। — कुम्भः

कोमला कान्तिः

कोमला दृश्यते कान्तिर्येषु ते स्युः छवेरिह।

कुम्भः

कोलाहलवृन्दलक्षणम्

अधिकं दृश्यते यस्मिन्नुत्तमोत्तमवृन्दतः।
वृन्दं विद्यावतां प्रोक्तं तच्च कोलाहलाभिधम्॥

सोमराजदेवः

कोल्हाटिकः

भ्रमर्यादिषु वंशादौ रज्जुसंचारचञ्चुकः।
भारस्य भूयसोवोढा बुधैः कोल्हाटिकः स्मृतः॥

कुम्भः

कौतुकं—नाट्याङ्गम्

पाठाक्षरेण संयुक्तं देवताविषयात्मकम्।
नानार्थचित्रसंयुक्तं कृतं कौतुकमुच्यते॥

भरतकल्पलतामञ्जरी

कौलुः

पार्श्वदेशोत्थपवनैरभवः कौलुरुच्यते ।
येन वायायुधा वायमायेवा महहचे (?) ॥
न विभेषति वचनं गीतं कौलुरिति स्मृतम् (?) ।
पूरवत्फुल्लमाभोगो पदं चेद्द्विगुणं भवेत् ॥
न्यासस्तदावृत्तिरत्र भारतीत्यायुधः करः ।
नर्तयेत्पात्रमिथुनं मध्यमानेन धीमता ।
आभोगनर्तने पुष्पस्तबकायुधगौ करौ ॥

सङ्गीतसूर्योदयः

क्रमः

परान्स्वरयुगान्कुर्यादान्दोल्यप्रेंखितो भवेत् ।
सरी रिगा गमा मपा पधा धनीति प्रेंखितः ।
केचिदेनमलंकारं क्रममाचक्षते बुधाः ॥

क्रान्तम्

किञ्चिद्बाष्पाकुले नेत्रे बाहुशीर्षगतं शिरः ।
चिबुकक्षेत्रगौ हस्तौ क्रान्तमेतदुदीरितम् ।
शोके ग्लाने निर्जिते च निगृहीते नियुज्यते ॥

कुम्भः

क्रमपादनिकुट्टिता

पादद्वयकृता सैव क्रमपादनिकुट्टिता ।
सैवेति—पादस्थितिनिकुट्टिता । कुम्भः

क्रियाङ्गलक्षणम्

करणोत्साहसंयुक्ता क्रियाङ्गस्तेन हेतुना ।

सङ्गीतदर्पणः

क्रियापरः

यथा शास्त्रप्रयोगेण मार्गे देशीयमेव च ।
यो गायति क्रियादोषात्कथ्यतेऽसौ क्रियापरः ॥

कुम्भः

क्रीडातालः

क्रीडाताल ध्रुवः स स्यात्पक्षैर्वर्णागनिर्मलः ।
शृङ्गाररससंयुक्तः श्रोतुस्तेजोविवर्द्धनः ।
एक एव द्रुतो यस्मिन् क्रीडातालः स कथ्यते ॥

गान्धर्ववेदे

क्रोधः

अवज्ञादिकृताचित्ते विकृतिर्या भवेत् खलु ।
स्वल्पा च न भवेत्क्रोधो मात्रविद्भिरुदाहृतः ॥

क्लेशनिर्वाह्याः

प्राणाः सौष्ठवतो क्लेशनिर्वाह्याः स्युः सुखस्यते ।

कुम्भः

क्ष

क्षत्रियवर्णहस्तः

वामेन शिखरं तिर्यक् धृत्वान्येन पताककः ।
धृतो यदि क्षत्रियाणां हस्त इत्यभिधीयते ॥

भरतकल्पलतामञ्जरी

क्षिप्तः

ऊर्ध्वमूर्ध्वं प्रसारः स्याद्यस्यासौ क्षिप्त उच्यते ।

कुम्भः

क्षेत्रकाकुः

रागे नानाविधच्छाया प्रतिक्षेत्रं निसर्गजा ।
सा क्षेत्रकाकुर्विज्ञेया क्षेत्रं देहो यतः स्मृतम् ॥

कुम्भः

क्षेत्रच्छाया

रागस्योत्पत्तिभूक्षेत्रं शरीरं जगदुर्बुधाः ।
तस्यैवानुकृतिस्तत्र क्षेत्रच्छायेति सा मता ॥

कुम्भः

ख

खञ्जरीटा—चारी

तत उत्कटसंस्थित्या चलद्द्विपताककम् ।
द्रुतमानेन सा चारी खञ्जरीटाभिधा स्मृता ॥

देवेन्द्रः

खटकः—हस्तपाटः

क्रमेण प्रसृताङ्गुष्ठशुकतुण्डेन वाद्यते ।
विरलाङ्गुलिभिर्वाद्यं प्राहुस्तं खटकं बुधाः ॥
दोंगिड दांगिड दां

कुम्भः

खटकामुखः—हस्तः

करं द्विशिखरं कृत्वा कुञ्चितं च समं नयेत् ।
शिखरश्च कपित्थश्च खटकामुखसंज्ञिकः ॥

देवेन्द्रः

परशुरामसंहितायां तु शराभ्यासप्रकरणे—

तर्जनीमध्यमामध्यपुङ्खोऽङ्गुष्ठेन पीड्यते ।
तस्मिन्ननामिकायोगात्स हस्तः खटकामुखः ॥
उत्तानोऽसौ स्रुगादौ स्याधस्तश्चामरधारणे ।
कुसुमापचये छत्रस्रग्दामधारणे तथा ॥
शरमन्थाकर्षणे च सम्मुखे दर्पणग्रहे ।
कस्तूरिकादिवस्तूनां पेषणेऽधिस्तनौ करौ ॥
ताम्बूलवीटिकावृन्तच्छेदनादौ स्वयं स्मृतः ।
वल्गात्रजनपात्राणां ग्रन्थेदां शुकदर्भयोः (?) ।
स्रुवस्रुचो धारणे च नीवीमोक्षे च बन्धने ।

सङ्गीतनारायणे

खड्गः

ऊर्ध्वं कपोतमाधायाधस्तान्मुष्टि करं तथा ।
पताकं तिर्यगादाय ततः खड्गमिधा पुरा ॥

कुम्भः

खड्गकलासः—प्रथमः

सव्यापसव्यतो यत्र नर्तकी चकिता मुहुः ।
विलोक्य च परा पश्चाद्द्रुतखड्गलतेव सा ॥
आचरन्नप्रचारं चे द्विचित्रमथ हस्तकान् (?) ।
प्लुतमानकृतानर्थं चन्द्रादीन् रचयेत्स्फुटम् ।
तदा खड्गकलासोऽसौ विद्वद्भिः परिभाषितः ॥

अशोकः

—द्वितीयः

वामं करं कटौ न्यस्य परं खड्गकृतं करम् ।
कृत्वा सकंपं चेदर्धचन्द्रमास्ते तदादिगः ॥
कृत्वा कपोतमूर्ध्वंचेदधोमुष्टिं करं ततः ।
यत्र तिर्यक्पताकाख्यं करं कुर्यात्तदाभिधा ।
द्वितीया खड्गपूर्वस्य कलासस्य निरूपिता ॥

अशोकः

—तृतीयः

विधाय त्रिपताकौ द्वौ यस्य यश्चरणः पुरः ।
घातयन्निव तत्रैतं योजयेत्स तृतीयकः ॥

अशोकः

— चतुर्थः

स्वस्तिककर्कटमुष्टिकपताक पाणीन्यथाचतुरः ।
धृतिमोहघातपातक्रियां कुर्याच्चतुर्थां सः ॥

तत्र धावतुर्धोर्ध्वमधःपार्श्वद्वयोपि च (?) ।
एवं खड्गकलासस्य भेदाश्चत्वार ईरिताः ॥

अशोकः

खण्डकर्तरी—पाट

अङ्गुष्ठेन करो दक्षे विरलाङ्गुलिसंहतिः ।
हन्ति वाद्यपुटं यत्र वामहस्तो निपीडयेत् ॥
तत्र संपद्यते पाटः खण्डकर्तरिसंज्ञकः ।

यथा—दां खुं खुं दा खुखमद्दे थें टें हें (झें) हं हें (झें) टें णिथों टें

कुम्भः

—हौडुक्किकपाटः

अङ्गुष्ठेन करो दक्षे विरलाङ्गुलिसंहतिः ।
हन्तिवाद्यघटं यत्र वामहस्तो निपीडयेत् ।
तत्र संपद्यते पाटः खण्डकर्तरिसंज्ञकः ॥

कुम्भः

खण्डतालः

विजयाख्यो ध्रुवः.........स्याद्विंशत्यक्षरांघ्रिकः ।
सन्निपातेन संयुक्तः शृङ्गाराभीष्टदे रसे ॥
एक एव गुरुर्यत्र सन्निपातः स कथ्यते ।
यथा विंशतित्रर्णाघ्रिर्ध्रुवः कन्दर्पसंज्ञकः ॥
वीरे वा करुणे वा स्यात्खण्डताले विधीयते ।
द्रुतमेकं भवेद्यत्र तालोऽयं खण्डसंज्ञितः ॥

गान्धर्ववेदे

खण्डयतिः

खण्डपाटयुतं कृत्वा यतिर्वाद्यदि (?) वाद्यते ।
आवर्तनेन च तदा बुधैः खण्डयतिः स्मृता ॥

कुम्भः

खण्डयतिलक्षणम्

गलपाः स्युर्विरामान्तौ लघू निःसारुको भवेत् ।

हम्मीरः

खण्डसूची

भूमिलग्नोरुपार्ष्णिः स्यादेकस्तिर्यक् प्रसारितः ।
अन्योऽङ्घ्रिः कुञ्चितो यत्र खण्डसूचिमतं तदा ॥

कुम्भः

खण्डिता—नायिका

उन्निद्रताजनितरागविलोभिताङ्गः
कान्तानखक्षतविशेषविचित्रिताङ्गः ।
यस्याः कृतेऽपि गृहमेति पतिः प्रभाते
सा नायिका निगदिता खलु खण्डितेति ॥

शुभङ्करः

खरासनः

खरवन्मृदस्समश्नाति स जनः स्यात्खराशनः ।
तद्देशजं गीतनामागर्जेरुः परिकीर्तितः ॥
नायकं नायकां वाद्याख्यमाश्रितायदि (?) ।
गर्जेत्या रोदकं येन स गर्जेरुरिति स्मृतः ॥
एकमात्रादि षण्मात्रा पर्यन्ते तालवर्त्मनि ।
ताली च तद्द्वयेनैव पल्लवाख्यमुग्रं भवेत् ॥
तत्तद्गुणकशायुक्तं पदं नामार्धसंभवम् (?) ।
चतुरावृत्ततालेन आभोगो युग्मनामकः ॥
पुनः पल्लवकेनार्थं वृत्तिरारभटी भवेत् ।
आयुधो दन्त एव स्यात् चार्युत्प्रेरणसंभवाः ॥
युग्मपात्रं नाभिनयभूर्नैकस्यायुधपाणिना ।
द्रुतेन गतिना दूतीनायिका तु तदन्ययोः (?) ॥

सङ्गीतसूर्योदयः

खलकः—हस्तपाटः

क्रमेण स्फुरिताङ्गुष्ठशुकतुण्डेन वाद्यते ।
विरलाङ्गुलिभिर्वाद्यं प्राहुस्तं खलकं बुधाः ॥

दोङ्गिड दाङ्गिड द्राम् ।

कुम्भः

खुत्ता

भूम्यां चरणाग्रेण घाततः ।
खुत्ता निगद्यते ।

कुम्भः

—उत्फुल्ला

खुत्ता चैव तथोत्फुल्ला तयोर्लक्षणमुच्यते ।
विवन्त इव दृश्यन्ते यस्यासन्नन्खरास्तु मा ।
खुत्तेति परिविज्ञेया सोत्फुल्लेत्युदिता पुनः ॥

कुम्भः

खुलहुलः

प्रपदस्थितवामाङ्घ्रेः पार्ष्ण्यांयंत कुट्टनं भुवः ।
तद्वत् स्थितस्य वाङ्गस्य भ्रमः सव्यापसव्यतः ।
योऽसौ खुलहुलः प्रोक्तो घर्घरो नृत्तकोविदैः ॥

कुम्भः

ग

गडप्पाणी—वाद्यम् (झडप्पाणिः)

सा स्यात् गडप्पाणी यस्यामादौ मध्येऽवसानके ।
वाद्यन्ते सर्ववाद्यानि नानावाद्यैरनेकधा ॥

कुम्भः

गणना

एकं द्वे त्रीणि चत्वारि पञ्च षट् सप्त चाष्ट च ।
तथा नव दशेत्येवं गणनाऽङ्गुलिभिर्भवेत् ॥
या च संख्या दशशतसहस्राद्याप्रकीर्तिता ।
तामिमां तु पताकाभ्यां विरलाभ्यां प्रदर्शयेत् ॥

वेमः

गतक्रमस्वरलक्षणम्

हीनस्वरेण सञ्जाता स्वरश्रुतिविवर्जिता ।

भरतकल्पलतामञ्जरी

गतयः

हंसहंसगजाश्वाश्च मीनखंजकनर्कुटाः ।
कुरङ्गास्तित्तिरो लावो गतयो ता दशोदितम् ॥

कुम्भः

गतिप्रचारः

उत्तमे मध्यमे तद्वदधमे च प्रयुज्यताम् ।
गतिप्रचारो द्विविधः प्रकृतिर्विकृतिस्तथा ॥
प्रकृते तूत्तमगते जानुकार्यं कटीसमम् ।
विकृते युद्धचार्यप्रगमने स्तनसम्मतम् ॥

वेमः

गतिभेदाः

भानवी मैनवी चैव गजलीला तुरङ्गिणी ।
हंसी भृङ्गी खञ्जरीटी सप्तैता गतयो मताः ॥

सङ्गीतमुक्तावली देवेन्द्रकृता

उत्तमा मध्यमास्तद्वदधमाश्चेत्यनुक्रमात् ।
गतिर्भेदा निरूप्यन्ते संश्रित्यप्रकृतीरिमाः ।
ते च पात्रैः प्रयुज्यन्ते प्रविष्टे रङ्गमण्डलम् ॥

वेमः

गद्यप्रबन्धः

द्रुता विलम्बिता मध्या द्रुतमध्या तथापरा ।
गतिर्द्रुतविलम्ब्या स्यात् षष्ठी मध्यविलम्बिता ॥

इति गद्यस्य षट् प्रोक्ता गतयः पूर्वसूरिभिः।
लघुभिर्बहुलैरल्पैः समैराद्यं त्रयं क्रमात् ॥

पृथक् सलागमिश्रैस्तु लागैस्तद्वत्परं त्रयम्।
प्रत्येकं गतिषट्केन षट्त्रिंशद्गद्यजा भिधाः ॥

हम्मीरः

गद्यलक्षणम्

अष्टाभिर्यदि वा षड्भिः पदैः प्राससमन्वितम्।
प्रणवाद्यमतालं च बुधैर्गद्यं निगद्यते ॥

कार्योऽनुयायिनो गद्ये गीतस्य नियमो बुधैः।
मध्ये मध्ये तु गद्यस्य स्युर्वर्णा गमकोत्तराः ॥

स्वरप्रान्तेऽथवा स्यातामविलम्बविलम्बकौ।
ततः प्रबन्धनामाङ्कं तालयुक्तं पदद्वयम् ॥

ततस्तालान्वितं गातुर्नामनेतुश्च गीयते।
कृत्वा यतिं ततो गद्ये न्यासं तालं यदृच्छया ॥

गाने गद्यप्रबन्धस्य सर्वास्तृप्यन्ति देवताः।
वर्धन्ते वर्णनीयस्य मङ्गलानि बलानि च ॥

सोमराजदेवः

गमकभेदाः

तिरिपः स्फुरितो लीनः कम्पितान्दोलितौ वलिः।
प्लावितोल्लासितौ चैव त्रिभिन्नकुरुलाहताः ॥

घुम्फितो मुद्रितश्चैव नामतो मिश्रितस्तथा।
एते पञ्चदश प्रोक्ताः प्रसिद्धगमका बुधैः ॥

कुम्भः

गरुडः—हस्तः

तिर्यक् प्रसारितौ चार्धचन्द्रावङ्गुष्ठयोगतः।
गरुडाख्यस्सविज्ञेयः गरुडार्थे नियुज्यते ॥

भरतकल्पलतामञ्जरी

गाढालिङ्गनगुणः

मदे दुःखे श्रमे स्वस्तौ एकेच्छौ मुष्टिकुन्तयोः।
प्रहारे कर्णलग्नौ स्तः शिशिराश्लेषयोरपि ॥

कुम्भः

गात्रछाया

ये गात्रयैव दृश्यन्ते छाया गात्रस्य ते मताः।

कुम्भः

गात्रसंहतलक्षणम्

स्वभावसुन्दरे देहे पार्श्वाङ्गुष्ठाश्च संयुताः।
अन्योन्यं संहतं तत्स्यात्प्रणामादौ विधीयते ॥

देवेन्द्रः

गाथालक्षणम्

गाथाप्रबन्धे लक्ष्म स्यादार्यायां यदुदीरितम्।
आर्या संस्कृतया वाचा गाथोक्ता प्राकृतेन तु ॥

सोमराजदेवः

गान्धर्वः

मार्गं देश्यं च यो वेत्ति स गान्धर्वोऽभिधीयते।

सङ्गीतमकरन्दे

गानम्

यत्तु वाग्गेयकारेण रचितं लक्षणान्वितम्।
देशीरागादिभिः प्रोक्तं तद्गानं जनरञ्जनम् ॥

तुलजः

गानं चतसृभिः कुर्याद्वृत्तिभिर्मार्गभेदतः।
मागध्या चार्धमागध्या गानं चित्रे प्रशस्यते ॥

स्यात्सम्भाविततया मिश्रे गानं पृथुलया पुनः।
पूर्वरङ्गे भवेच्छुद्धे वृत्तीनां लक्ष्यदर्शितम् ॥

विप्रदासः

प्रवेशाक्षेपनिष्क्रामप्रासादिकमथान्तरम्।
गानं पञ्चविधं विद्याद् ध्रुवायोगसमन्वितम् ॥

नाट्यशास्त्रे

गानलक्षणम्

सर्वलक्षणसंयुक्तं देशीरागादिभिः कृतम्।
यच्च वाग्गेयकारेण तद्गानं मुनयो जगुः ॥ मोक्षदेवः

गाने स्वरनिर्णयः

यो यदा बलवान्यस्मिन्स्वरो जातिसमाश्रयः।
तत्प्रवृत्तं रसे कार्यं गानं गेये प्रयोक्तृभिः ॥

मध्यपञ्चमभूयिष्ठगानं शृङ्गारहास्ययोः।
षड्जर्षभप्रायकृतं वीररौद्राद्भुतेषु च ॥

गान्धारः सप्तमप्रायं करुणे गानमिष्यते।
तथा धैवतभूयिष्ठं बीभत्से सभयानके ॥

एकैव षड्जमध्या ज्ञेयात्तु सकलरसाश्रया जातिः।
तस्या ह्यंशाः सर्वे स्वराश्च विहिताः प्रयोगविधौ ॥

नाट्यशास्त्रे

गान्धर्वम्

अनादिसंप्रदायं यद् गन्धर्वैः सम्प्रयुज्यते ।
नियतं श्रेयसे हेतु तद्गान्धर्वं जगुर्बुधाः ॥

गान्धर्वलक्षणम्

न गायति मनुष्योक्तं गीतं ये शिवतत्पराः ।
गायन्ति मन्त्रगीतानि ते गन्धर्वाः प्रकीर्तिताः ॥

यत्र जात्यादिगन्धर्वैर्गीयतेऽभ्युदयाश्रये ।
सर्वदा सन्निधौ शम्भोस्तद्गान्धर्वं बुधैः स्मृतम् ॥

मोक्षदेवः

गान्धारः

गान्धारस्थाश्च गायन्ते तस्माद्गान्धार उच्यते ।

सङ्गीतसारः

पञ्चादिकौ समौ यत्र गान्धारस्त्रिश्रुतिर्भवेत् ।
विशुद्धासमपानिस्युर्मलदेशाक्षिकोद्भवे ॥

पूर्णो देशाक्षिको ज्ञेया भूषिता मन्त्रयेण च ।
वीरे रसे प्रयोज्या सा प्रातःकाले प्रगीयते ॥

कुम्भः

गान्धारग्रामः

यदाधस्त्रिश्रुतिः षड्जे मध्यमे तु चतुःश्रुतिः ।
रिमयोः श्रुतिरेकैका गान्धारस्य समाश्रया ॥

पञ्चमश्रुतिरेकैका निषादश्रुतिसंश्रया ।
गान्धारग्राममाचष्टे तदा तं नारदोऽब्रवीत् ॥

सङ्गीतमकरन्दे

लक्ष्मीनारायणाख्योऽयं सङ्गीताम्भोधिपारगः ।
गान्धारमूर्छनाग्रामं व्यवहारक्षमं यथा ॥

करोति लक्ष्ययोगेन पूर्वलक्षणयोगतः ।
गान्धारो रिमयोर्यस्मिन् एकैकां शुद्धमेलने ॥

श्रुतिं भजति भेदस्तु पञ्चमस्य श्रुतिं ततः ।
निषादा पश्रुतिं पश्येत् तत् श्रुतिं स्वीकरोति च ॥

तथा गान्धारविख्यातो ग्रामोऽयं नारदोदितः ।
अस्यापि मूर्छनाः सप्त तन्नामान्यधुनोच्यते ॥

नन्दा विशाला सुमुखी चित्रा चित्रवती शुभा ।
आलापा चेति गान्धारग्रामे स्युः सप्तमूर्छनाः ॥

अस्यापि मध्यगान्धारमूला प्रथममूर्छना ।
ततः षण्मूर्छनाः पूर्वक्रमेण परिभाषिताः ॥

सङ्गीतसूर्योदयः

गान्धारमेलः

चतुःश्रुतिरिधौ यत्र भवेतां नियतं स्वरौ ।
साधारणोऽपि गान्धारो निषाधः कैशिकी पुनः ॥

वीणिकाविषये शुद्धाः षड्जमध्यमपञ्चमाः ।
श्रीरागस्यापि मेलोऽयं गदितो गायकोत्तमः ॥

कुम्भः

गाम्भीर्यम्—पौरुषः

गाम्भीर्यं शोकहर्षादाविङ्गिताकारगोपनम् ।

वेमः

गायकभेदाः

यकलो यमलो वृन्दो गायकास्त्रिविधाः स्मृताः ।

भरतकल्पलतामञ्जरी

उत्तमं पुनरिहापि मध्यमं तत्कनिष्ठमिति लक्षितं पुरा ।
तत्र गायकचतुष्टयं वरं गायकाद्विगुणितास्तु तत्समाः ॥

द्वादशाङ्गचतुरास्तु गायकास्तत्र त्रिंशिकचतुष्टयं वरम् ।
वेदनामितमृदङ्गवादिभिर्युक्तमुत्तममिदं निवेदितम् ॥

कुम्भः

गायकश्रेष्ठः

त्रिस्थानालापदक्षो गमकलयकला काकुविज्ञोऽतिधीरो
नव्योक्ती रोषरिक्तः सकलजनमनोरञ्जकः सावधानः ।

शुद्धच्छायालगज्ञः श्रमरहिततनुः कोकिलप्रख्यकण्ठ-
स्तालाभिज्ञो ग्रहज्ञः स भुवि निगदितो गायकानां वरेण्यः ॥

कुम्भः

गायकलक्षणम्

षाडवौडुवसम्पूर्णगायने जनरञ्जकाः ।
काकुवर्जितशारीरा गायका राजवल्लभाः ॥

सङ्गीतमकरन्दः

विविधालापचतुरो ग्रहे मोक्षे च शिक्षितः ।
स्थानत्रयविशेषज्ञो गम्भीरमधुरध्वनिः ॥

नानारागविशेषज्ञस्तालभेदप्रयोगवित् ।
वशी जितश्रमो रक्तः कण्ठस्वरविधानवित् ॥

पुनःपुनश्च रागस्तु प्रौढचित्तोपरञ्जितः ।
शिक्षितः सदुपाध्यायात्स्वरसप्तकभेदवित् ।
अकाकुर्लिपिभावज्ञः गायकः परिकीर्तितः ॥

भरतकल्पलतामञ्जरी

नानालप्तिकरोऽवधारणपरो रागाङ्गरागग्रह-
न्यासांशाखिलवस्तुगाननिपुणस्त्रिस्थानकृत्तालवित् ।
गम्भीरो मधुरध्वनिः शमयुतः स्वाधीनकण्ठस्थिरः
सद्यो रागविशेषवेद्यविबुधः स्यादुत्तमो गायकः ॥
सोमराजदेवः

गायनलक्षणम्

प्रबन्धगात्रनिष्णातो विविधालयकारकः ।
रागरागाङ्गभाषाङ्गक्रियाङ्गेयोऽङ्गकोविदः ।
गायनो गीतशास्त्रज्ञैर्भण्यते सर्वसम्मतः ॥
गान्धर्ववेदे

गायनी

तारुण्यप्रतिमप्रपञ्चचतुरा माधुर्यधुर्योक्तयो
लावण्यामृतदुग्धसागरकला रूपाधराप्ताकराः ।
नानाभावकलाकलापकलिताकुञ्चावितार्थप्रिया
गायन्यो गदिता हि गायनवरैः तुल्या नृपेणामुना ॥
कुम्भः

गायनीलक्षणम्

लयतालकलाभिज्ञाः स्वभावमधुरप्रियाः ।
शुद्धछायालगालप्तिप्रगल्भा नवयौवनाः ॥
गीतवाद्यविदः श्यामा रूपसम्पदलङ्कृताः ।
गायन्यश्च प्रशस्यन्ते मूर्ता स्मरजयश्रियः ॥
मोक्षदेवः

गारुडी

तिर्यक्प्रसार्यैकपादं पश्चाज्जानु भुवि क्षिपेत् ।
सम्यक्प्रसार्य बाहू द्वौ भ्रामयेद्गारुडी भवेत् ॥
अशोकः

गार्ग्यः—तालः

गार्ग्यतालेन गीयेत कारुण्ये मधुरो ध्रुवः ।
अङ्घ्रिर्द्विसप्तभिर्वर्णैरानन्दफलदः सदा ।
चतुर्द्रुतो विरामान्तस्तालोऽयं गार्ग्यसंज्ञकः ॥
गान्धर्ववेदे

गीतम्

गीतं स्वरसमूहस्तु गीतमित्यभिधीयते ।
तदेव कैश्चिद्विद्वद्भिर्धातुरित्यभिधीयते ॥
ध्रुवादिधातुरचितं विद्याद्वाद्यैरलङ्कृतम् ।
पदेन बिरुदेनाथ तालेन च विराजितम् ।
गीतमित्युच्यते तद्ज्ञैः सामान्यं गानमात्रकम् ॥
सङ्गीतसूर्योदये

गीतगुणाः

व्यक्तं पूर्णं प्रसन्नं च सुकुमारमलङ्कृतम् ।
समं सुरक्तं मधुरं श्लिष्टं विक्षिप्तमेव च ॥
गीतं स्याद्दशधा तत्र सुव्यक्तं व्यक्तमिष्यति ।
विद्यते पूर्णं सम्पूर्णं छन्दोरागमुपस्वरैः ॥
तत्प्रसन्नं स्फुटार्थं यन्निःसन्देहमगद्गदम् ।
सुकुमारं पुनर्गीतं कण्ठस्थानमृतं मतम् ॥
स्थानत्रितयनिष्पन्नमलङ्कृतमिहोच्यते ।
वर्णस्थाने लये सम्यक् साम्येन सममुच्यते ॥
सुरक्तवल्लकीवंशः कण्ठध्वन्येकता मता ।
मृदुलावण्यसंयुक्तं मधुरं श्रुतिसौख्यदम् ॥
श्लक्ष्णं च द्रुतनीचोच्चद्रुतमध्यविलम्बितैः ।
विकृष्टं कथ्यते गीतमुच्चैरुच्चारितं सदा ॥
सोमराजदेवः

गीतदोषाः

गीतमव्यक्तमुद्धुष्टं शङ्कितं सानुनासिकम् (?) ।
विरसं काकस्वरं ... स्थानवर्जितम् ॥
व्याकुलं तालहीनं च विषमाहतमेव च ।
शिरोगतं च विश्लिष्टं गीतदोषाश्चतुर्दश ॥
सोमराजदेवः

गीतनृत्तगम्

गीतपात्रानुवर्ग यं तद्धवेद्गीतनृत्तगम् ।
सोमेश्वरः

गीतनृत्तानुगम्

गीतेन संगतं यत्तु तद्गीतानुगमुच्यते ।
नृत्तेन सहितं यत्र तन्नृत्तानुगमीरितम् ॥
सोमेश्वरः

गीतनृत्यादिषु प्रौढिः

यथा गीते सदा भोगः शिखरत्वे निरूपितः ।
तथा नृत्ये च तासां तु नर्तनं कलशोपमम् ॥
आभोगनर्तने प्रोक्ता भ्रमण्या मुख्यता बुधैः ।
विशेषाद्भ्रमकादीनां सुप्रभास्ताः प्रकीर्तिताः ॥
कुम्भः

गीतप्रयोगः

यानि वस्तूनि वाक्येषु वक्तव्यानीह नाटके ।
तानि सर्वाणि गीतेन प्रयोज्यानि प्रयोक्तृभिः ॥

क्षेमः

गीतप्रशंसा

सर्वस्य दानस्य किलास्ति सङ्ख्या
गायन्ति ये भक्तियुता ममाग्रे ।
तेषां तु गीतोद्भवपुण्यसङ्ख्या
चेत्युक्तमीशेन पुरो भवान्याः ॥
यो वृत्तिलोभेन सुखेन चापि
शाठ्येन वा गायति गीतमात्रम् ।
सञ्जायते वर्षसहस्रमीश
पुरोगणः सर्वगणाग्रणीपः ॥

हम्मीरः

गीतभेदाः

निबद्धमनिबद्धं च मिश्रं गीतं त्रिधा भवेत् ।

सोमराजदेवः

गीतमाहात्म्यम्

वनेचरस्तृणादोऽपि कुरङ्गोऽप्यनुरागतः ।
श्रुत्वा गीतमतन्त्रीर्दत्तेऽसून् सुखलालसः ॥

सोमराजदेवः

गीताङ्गानि

अतःपरं प्रवक्ष्यामि गीतानां वस्तुकष्वपि ।
विवधैककवृत्तानि त्रीण्यङ्गानि समासतः ॥
सर्वेषामेव गीतानां वस्तुष्ववयवेष्वपि ।
विवधैककवृत्तानि त्रीण्यङ्गानि भवन्ति हि ॥
एकैकं तु विदार्यैका त्रीण्योजे विवधः स्मृतः ।
षट्परं त्र्यपरं वृत्तं त्र्यङ्गं संहरणं च तत् ।
विवधैककयोः प्रायो मन्द्रके तु प्रयोजनम् ॥

नाट्यशास्त्रे

गीतलक्षणम्

अष्टभाषा पदैर्युक्तं शब्दझंकारसंयुतम् ।
स्वररागैः प्रगायन्ति गीतमित्यभिधीयते ॥

भरतकल्पलतामञ्जरी

गीतिभेदाः

प्रथमा शुद्धगीतिः स्यात् द्वितीया भिन्नका भवेत् ।
तृतीया गौडिका चैव रागगीतिश्चतुर्थिका ॥
साधारणी तु विज्ञेया गीतिज्ञैः पञ्चमी तथा ।
भाषागीतिस्तु षष्ठी स्यात् विभाषा चैव सप्तमी ॥
सप्तगीत्यो मया प्रोक्ता इदानीं भेद उच्यते ।
गीतयः पञ्च विज्ञेयाः शुद्धा भिन्नाथ वेसरा ।
गौडा साधारिता प्रोक्ता याष्टिकेन महात्मना ॥
इति दुर्गशक्तिमतम् ।

प्रथमा मागधी ज्ञेया द्वितीया चार्धमागधी ।
संभाविता तृतीया च चतुर्थी पृथुला स्मृता ॥
इति भरतमते ।

भाषा चैव विभाषा च तथा चान्तरभाषिका ।
तिस्रस्तु गीतयः प्रोक्ता याष्टिकेन महात्मना ॥
भाषागीतिर्विभाषा च मतङ्गेनाप्युदाहृता ।
भाषागीतिस्तथैकैव शार्दूलमतसम्मता ॥

मतङ्गः

गीतेन देवताप्रीणनम्

रराज वस्तुध्वनिना रमेशो गीतेन देवो मुदुरेति शम्भुः ।
रतो विरिञ्चिः किल सामगीत्यः सक्ता सरस्वत्यपि वीणिकायाम् ॥

कुम्भः

गुरुगुम्फितः—अपाटः

दक्षिणानामिकाङ्गुष्ठवलनाभ्यसनक्रमात् ।
तथा रामकरोल्लासाज्जायते गुरुगुम्फितः ॥

कुम्भः

गुरुतालः

सद्द्वयगुरोर्द्वन्द्वं गुरुताले गुरोर्मतम् ।

कुम्भः

गूर्जरीचतुष्कलक्षणम्

अपञ्चमा महाराष्ट्री गूर्जरी ताडितस्वरा ।
ऋषभांशन्यासयुक्ता निमन्द्रा गीयते बुधैः ॥
महाराष्ट्री च सौराष्ट्री गूर्जरी विबुधैर्मता ।
परिपूर्णा भवेदेषार्षभकम्पनसंयुता ॥
मध्यस्फुरणसंयुक्ता संपूर्णा ताडितस्वरा ।
ऋषभांशग्रहन्यासा दाक्षिणात्या च गूर्जरी ॥

सम्पूर्णद्राविडी ज्ञेया गूर्जरी हर्षदायिनी ।
एतस्यां तारमन्द्राभ्यां ऋषभस्फुरणं भवेत् ॥

मोक्षदेवः

अष्टस्वराः

संपूर्णरागो देशाक्षी मध्यमादिः प्रकीर्तितः ।
वसन्तभैरवी शुद्धभैरवी मादितः क्रमात् ॥

संपूर्णमालवीरागो गान्धारादिः प्रकीर्तितः ।
नाटरागश्च सम्पूर्णः सषड्जादिरुदाहृतः ॥

मुखहारी च सम्पूर्णो धैवतादिर्निगद्यते ।
संपूर्णश्चाहरी प्रोक्तो मध्यमादिरुपक्रमः ॥

बलहंसश्च संपूर्णो गान्धारादिः प्रकीर्तितः ।
वसन्तः शुद्धसंज्ञश्च सषड्जादिरुदाहृतः ॥

रामक्रिया शुद्धसंज्ञा सषड्जादिरुदाहृता ।
वराटिका शुद्धसंज्ञा सषड्जादिरुदाहृता ।
एवं संपूर्णरागाणां ग्रहस्वर उदाहृतः ॥

सङ्गीतमकरन्दे

गेयपदम्

अतोऽन्यवनितारतं रमणमप्रियेऽपि स्थितम् ।
व्रजामि सखि रोदिनीमपनयामि लज्जामपि ॥

यत्रासने सुखासनस्तं व्याख्यातोद्वादने (?) ।
गायन्ति गायकाः स्वैरमाहुर्गेयपदं हि तत् ॥

चिन्ताशोकाकुलत्वेन वाक्ये चाभिनयेऽपि च ।
विमूढाः खण्डिताः कान्तास्तदासनमिहोच्यते ॥

प्रसरति दिनमणितेजसि विगलिततमसि प्रकाशिते नभसि ।
अपनीताधररागं पश्य वयस्यं समागते रमणम् ॥

कुम्भः

गोण्डली

वाद्यः प्रबन्धैः कठिनैस्त्यक्तमेलादिभिस्तथा ।
गीतैः साळगसूडस्थैः प्रबन्धैश्च ध्रुवादिभिः ॥

लास्याङ्गैरन्वितं यत्र नृत्तं यद्द्रुतमानतः ।
स्वयं गायति वाद्यं च त्रिवलीं वादयेत्स्वयम् ॥

त्रिवलीधारणं स्कन्धे प्राम्यत्वं कुरुते स्त्रियः ।
अगायन्तीत्वशारीरा सैव स्यान्मूककुण्ली ।
गोण्डल्यां मण्डनं प्रोक्तं तज्ज्ञैः कर्णाटदेशजम् ॥

गीतं सालगमस्य स्याच्चतुष्कं गोण्डलीविधौ ।

कुम्भः

गोरी

पञ्चभिर्लैर्घुभिर्गौरी ।

कुम्भः

गौडचतुष्टयलक्षणम्

सन्यासांशग्रहो गौडः कर्णाटपदलाञ्छितः ।
गामं स्वाद्वीरशृङ्गारत्स्थाने ताडितस्वरः ॥

षड्जांशन्यास संयुक्तो देशवालो रिपोज्झितः ।
गेयो वीररसे विद्भिः षड्जेनान्दोलितस्वरः ॥

एष प्रसिद्धिमगमत्पूर्वायो गौड इत्यपि ।
निग्रहांशो रिपत्यक्तो गो बहुमन्द्रताडितः (?) ॥

तुरुष्कगौडी वीरे स्यान्मालवीयः स्मृतो जनैः ।
द्राविडो निग्रहांशस्तु स्फुरितौ षड्जपञ्चमौ ।
गान्धारतिर...... .....स्तोके सौमालिगो मतः (?) ॥

मोक्षदेवः

गौडमल्हारः

शुद्धौ सगौ मपौ शुद्धौ पधाविकौ मपौ पुनः ।
त्रिश्रुतिस्स्यान्निषादोऽपि मल्हारस्यापि मेळने ।
अत्रैव गौडमल्हारको तोडीप्रियस्वामिताः (?) ॥

कुम्भः

गौडी

सत्रया धगरिक्ता स्याद्गौडी सर्वाङ्गमञ्जुला ।
गायकैर्गीयते साय गम्भीरगुणगुम्फिता ॥

कुम्भः

ग्रन्थोक्तविषयाणां प्रतिज्ञा

नाट्यदर्पणसंगीतवल्लीसङ्गीतशेखरम् ।
नाट्यलोचनसङ्गीतकल्पवृक्षौ निरूपयन् ॥

दशरूपं रत्नकोशं भरतोक्तादिकं तथा ।
सङ्गीतसर्वस्वमिदं तनोति श्रीजगद्धरः ॥

जगद्धरः

ग्रहः

तत्र ग्रहस्तु गीतादिस्वरोंऽशे पूर्वकीर्तितः ।
पञ्चस्वरपरस्तार उभेरंशाविहेष्यते ॥

दत्तिलः

ग्रहाः

ग्रहास्तु सर्वजातीनामंशवत्परिकीर्तिताः ।
यः प्रवृत्तौ भवेदंशः सोंऽशो ग्रहविकल्पितः ॥

नाट्यशास्त्रे

ग्रहाख्यिया समातीतास्तथानागत इत्यपि ।
तल्लक्षणं च वक्ष्यामि नारदो मुनिपुङ्गवः ।
ग्रहातीते त्वतीतस्य तालातीते त्वनागतः ।
समः समग्रहः प्रोक्तस्तालज्ञैः पूर्वसूरिभिः ॥

सङ्गीतमकरन्दे

ग्रामः

समूहवाचिनौ ग्रामौ स्वरश्रुत्यादिसंयुतौ ।
यथा कुटुम्बिनस्सर्वे एकीभूत्वा वसन्ति हि ॥
सर्वलोकेषु स ग्रामो यत्र नित्यं व्यवस्थितः ।
षड्जमध्यमसंज्ञौ तु द्वौ ग्रामौ विश्रुतौ किल ॥
गान्धारं नारदो ब्रूते स तु मर्त्यैर्न गीयते ।
सामवेदात् स्वरा जाताः स्वरेभ्यो ग्रामसंभवः ।
द्वावेतौ च इमौ ज्ञेयौ षड्जमध्यमलक्षितौ ॥

मतङ्गः

ग्रामाः

नन्द्यावर्तोऽथ जीमूतस्सुभद्रो ग्रामकास्त्रयः ।
षड्जमध्यमगान्धारास्त्रयाणां जन्महेतवः ॥

भरतकल्पलतामञ्जरी

ग्रामस्वरूपम्

स्थाने यावतिथे यस्यां भवेतां षड्जमध्यमौ ।
तावतिथ्येदसौ ज्ञेया मूर्च्छना ग्रामयोः क्रमात् ॥

म प ध नि स रि ग	सौवीरी
ग म प ध नि स रि	हरिणाश्वा
रि म म प ध नि स	कलोपनता
स रि ग म प ध नि	शुद्धमध्या
नि स रि ग म प ध	मार्गी
ध नि स रि ग म प	पौरवी
प ध नि स रि ग म	हृष्यका

इति मध्यमग्राम मूर्छनाः ।

ग्रामौ

षड्जग्रामो मध्यमग्रामश्चेति ।

नाट्यशास्त्रे

तत्र यो यदंशः स तदा वादी । ययोश्च नवकत्रयोदशकमन्तरं तावन्योन्यं संवादिनौ । तद्यथा :— षड्जपञ्चमौ, ऋषभधैवतौ, गान्धारनिषादवन्तौ, षड्जमध्यमावि‍ति षड्जग्रामे । मध्यमग्रामेप्येवमेव । षड्जपञ्चमवर्जं पञ्चमर्षभयोश्चात्र संवादः ।

अत्र श्लोकः :—

संवादो मध्यमग्रामे पञ्चमस्यर्षभस्य च ।
षड्जग्रामे तु षड्जस्य संवादः पञ्चमस्य च ॥

नाट्यशास्त्रे

ग्राम्यलक्षणम्

नादस्संबन्धश्रुतिको ग्राम्यं च कठिनस्वरैः ।

भरतकल्पलतामञ्जरी

ग्लानिः—व्यभिचारिभावः

तपोनियमनिन्दायासोपवासव्याधिक्षुत्पिपासासाधुसेवादिजन्तोर्ग्लानिः ।

शुभङ्करः

ग्रीवारेचकलक्षणम्

ग्रीवाकटिकराङ्घ्रीणां चतुरो रेचकान् ब्रुवे ।
पृथङ्मुग्धविबोधाय करणान्तर्गतानपि ।
प्रोच्यते विबुधभ्रान्तिर्ग्रीवायाः कण्ठरेचकः ॥

मोक्षदेवः

ग्रीष्मकालाभिनयः

वायोरुष्णस्य नास्पर्शात् व्यजनग्रहणादपि ।
स्वेदप्रमार्जनाच्चापि ग्रीष्मकालं निरूपयेत् ॥

वेमः

घ

घटलक्षणम्

महोदरः स्वल्पवक्त्रः सुपक्वो मञ्जुलो घनः ।
चर्मनद्धाननो वाद्यः कराभ्यां वादकैर्घटः ।
पुष्करत्रितयप्रोक्तपाटवर्णविराजितः ॥

कुम्भः

घटसलक्षणम्

हुडुक्कातः प्रायभेदो यो घटः सः विविच्यते ।
एतस्य तूहली नद्धा दक्षिणास्यस्य मण्डली ॥
कर्तव्या वामवक्त्रस्य मण्डली रज्जुयन्त्रिता ।
गोंकारपाटवर्णाद्यो वाद्यते वादकोत्तमैः ॥
मुहुर्दक्षिणहस्तस्य मध्यमाङ्गुष्ठयोस्तथा ।
मदनाक्तप्रदेशाभ्यां घटनं घर्षणं तथा ॥

सर्वाभिर्वामहस्तस्याङ्गुलीभिः परिवाद्यते ।
वामाङ्गुष्ठेन निष्पीड्यात्युक्तोऽयं घटसो मया ॥

कुम्भः

घटिता—मार्दलवादनमार्गः
घटिता करमूलस्य विकृष्टाङ्गुलिमूलतः ॥

सङ्गीतनारायणे

घत्ता—पाटः
वाद्यतेऽर्धे निबन्धे चेत् झंकाराद्यं ततोर्धकम् ।
वादयेदनिबद्धं चेत् स्वबुद्धया करयुग्मतः ।
पुनराद्यं निबन्धं चेत् वाद्यं घत्ता तदा भवेत् ॥

कुम्भः

घननखः—पाटः
पाटैर्निरन्तरद्वाभ्यां पाणिभ्यां पाणिनाथवा ।
कुर्याद्घननखं वाद्यं निरन्तरघनस्वनम् ॥

कुम्भः

घनभेदाः
करतालः .... जयघण्टा च शुक्तकः ।
झिञ्जिकापणवाद्यं च घण्टा तोद्यं च घर्घरम् ॥
झम्पातालश्चमभिरकर्तियुक्तर एवच (?)।
द्वादशैते मुनीन्द्रेण कथिता घनसंज्ञिताः ॥
तस्य करमुपलक्षणम् ।

संगीतनारायणे

घनवाद्यभेदाः
इदानीं घनवाद्यस्य ब्रूमो नामानि लक्ष्म च ।
तालश्च कांस्यतालश्च जयघण्टा च झल्लरी ।
वगुरुः किरिकिट्टश्च कम्रा घर्घरिका तथा ॥

सोमराजदेवः

घनम्—वाद्यं
वाद्यं तु यद्घनं प्रोक्तं कलापातलयान्वितम् ।
कालस्तस्य प्रमाणं हि विज्ञेयं तालयोगतः ॥

नाट्यशास्त्रे

घर्घरिकाभेदाः
तत्र घर्घरिकावाद्ये वहनिर्घर्घरो मतः ।
तस्य भेदाः षडेवात्र पडिवाडस्तदादिमः ।
ततश्च पडवापश्च शिरपिस्यपि संज्ञिता ॥

ततश्चालगपाठः स्यात्ततः शिरिभिराह्वयः ।
ततस्तुलहरश्चेति तल्लक्ष्म व्याहरेऽधुना ॥

कुम्भः

घुत्ता—वाद्यं
वाद्यतेऽर्धे निबन्धे चेत् धोंकाराद्यन्ततोऽर्धकम् ।
वादयेदनुबन्धे चेत् स्वबुध्या करयुग्मतः ।
पुनराद्यं निबन्धे चेत् वाद्यं घुत्ता तदा भवेत् ॥

कुम्भः

घुलम्बिताः
जलं दोलायते यद्वद्भृतार्धभृते घटे ।
गीते लुठन्ति ये तद्वत्ते स्थाया स्युर्घुलम्बिताः ॥

कुम्भः

घुल्लरीलक्षणम्
अष्टादशाङ्गुलो यस्याः परिधिर्द्वादशाङ्गुला ।
दैर्घ्ये सा घुल्लरी पञ्चविंशत्या निर्मिता पलैः ॥
कण्ठे मुखद्वयोपेता सुषिरद्वयसंयुता ।
चर्मणा नद्धवदना सुसमा यमदैवता ।
वाद्या दक्षिणहस्तेन धृत्वा वामेन पाणिना ॥

कुम्भः

च

चक्रकुट्टनिका
कुट्टितं चरणं पश्चाद्भ्रामयित्वा च विन्यसेत् ।
कुट्टयेच ततः स्थाने चक्रकुट्टनिका मता ॥

कुम्भः

चक्रकुट्टिता
कुट्टयित्वा तु विन्यस्य भ्रमितो लुठितो यदि ।
कुट्टितोऽङ्घ्रिः पुनःस्थाने तदोक्ता चक्रकुट्टिता ॥

चक्रबन्धकम्
दक्षिणाङ्गं समारभ्य वामाङ्गक्रमतो यदा ।
आवर्जिते पुनस्तालाश्चक्रवच्चक्रबन्धकम् ॥

सङ्गीतमुक्तावली देवेन्द्रकृता

चक्रबन्धरूपम्
संहतस्थानभेदे तु लक्ष्यलक्षणसंविदा ।
देवेन्द्रेण नटानन्दहेतुनेदं प्रदर्शितम् ॥

यत्र बन्धामिधं रूपं नटानामतिदुस्तरम् ।
चक्रबन्धान्तरेणैवमङ्गानि मतिवित्तमैः ॥

सङ्गीतमकरन्दे

चक्रभ्रमरी

खण्डसूच्यभ्रमार्थैश्चक्रवच्चक्रभ्रमरी भवेत् ।

कुम्भः

चक्रभ्रमरीलक्षणम्

खण्डसूचीं विधायादौ यत्र भ्राम्यति चक्रवत् ।
सा चक्रभ्रमरी प्रोक्ता देशीशास्त्रविशारदैः ॥

हम्मीरः

चक्रवर्तिनी

प्रसार्य बाहुयुगलं समे चाङ्घ्रिद्वये स्थिता ।
तत्र वेगभ्रमणतो विज्ञेया चक्रवर्तिनी ॥

कुम्भः

चतुष्कोणनिकुट्टिता

यत्राङ्घ्रिः कुट्टितः पूर्वं पुरःपश्चान्निवेशितः ।
अंगभावात्पुनश्चापि पुरःपश्चात्तदान्यथा ।
स्थाने च कुट्टिता सा स्याच्चतुःकोणनिकुट्टिता ॥

चतुःपताकम्

ऊर्ध्वं विलुठितः पूर्वं पश्चान्मण्डलवद्भ्रमः ।
विलासेन चतुर्दिक्षु हस्तो यत्र प्रवर्तते ॥

नामिदेशसमीपस्थे लुठत्यन्यकरे सति ।
पर्यायाश्चेत्तथदोक्तं चतुःपताकचालयम् ॥

चतुरश्रम्

अन्तरं चतुरं प्रोक्तं चतुरश्रं मनोहरम् ।

कुम्भः

चतुरश्रः—तालः

तथा योनिद्वयं चास्य कीर्त्यमानं निबोधत ।
चच्चत्पुटश्च विज्ञेयस्तथा चाचपुटो बुधैः ।
चतुरश्रस्तु विज्ञेयस्तालश्चच्चत्पुटो बुधैः ॥

नाट्यशास्त्रे

चतुरश्रध्रुवा

ध्रुवेयं चतुरस्रा स्यात्सन्निपातचतुष्टया ।
शम्यात्रैककलाकार्या तालश्चैककलः पुनः ॥

शम्यैककलया प्रान्ते सन्निपातः कलात्रये ।
लयः स्यान्मध्यमे गानं तदुदाहरणं यथा ॥

आदिनटं धर्षितमदनमदं नागाजिनवाससमीशानम् ।
गङ्गाजलधौतजटाभारं तं दानवनाशकरं वन्दे ॥

अस्यां तु गीयमानायां ध्रुवायां सूत्रधृक् स्वयं ।
शृङ्गारचारी सश्लोकां प्रयुञ्जीत प्रसन्नधीः ॥

विप्रदासः

चतुरस्रलक्षणम्

अङ्गहारोपयोगित्वादियत्ता मुनिना कृता ।
नर्तनादौ समीपादौ प्रायशस्तौ लताकरौ ।
चतुरस्रो भवेदङ्गं विधिः प्रोच्यतेऽधुना (?) ॥

मोक्षदेवः

स्थितौ वक्षःपुरो देशे वक्षसोऽष्टाङ्गुलान्तरे ।
चतुरस्राविति प्रोक्तौ खगाग्राकर्षणे करौ ॥

हम्मीरः

चतुरस्रा

सन्निपातैरष्टकलैश्चतुर्भिरुपशोभिता ।
चतुरस्रा द्रुतलया पादैरष्टभिरङ्किता ॥

त्रैष्टुभिः पदनिर्माणे वक्ष्ये गुरुलघुक्रमम् ।
आद्यो गुरुश्चतुर्थश्च सप्तमो दशमस्तथा ।
एकादशश्च लघवः शेषाः वर्णाः क्रमस्थिताः ॥

विप्रदासः

चतुर्थपताकम्

केशबन्धौ करौ कृत्वालिकं सव्येतरं करम् ।
वामं कृत्वा मूर्ध्नि कुर्यात्पताकौ च चतुर्थके ॥

कुम्भः

चतुर्थप्लवः

पुरतः पृष्ठतश्चैव व्युत्क्रमक्रमयोगतः ।
वामदक्षिणयोर्नृत्यं चतुर्धा यत्र जायते ।
मण्डूकस्य तदा भेदश्चतुर्थः कीर्तितो बुधैः ॥

कुम्भः

चतुर्दन्त्यम्

शृङ्खलात्मा भवेद्गुल्मे लताजालस्वरूपिणी ।
सन्देशो वाचको रूपे चतुर्दन्त्यमिदं मतम् ॥

कुम्भः

चतुर्दशशिरांसि

धुतमञ्चितमाधूतमवधूतं निकुञ्चितम् ।
विधुतं कम्पितं मध्ये मुखमाकम्पितं तथा ॥

परिवाहिसमुत्क्षिप्तं परावृत्तं विलोलितम् ।
प्राकृतं चेति विज्ञेयं चतुर्दशविधं शिरः ॥

विप्रदासः

चतुर्मुखः—तालः

चतुर्मुखो जगणतः प्लुतेन परिकीर्तितः।
। ऽ । ऽ̇

कुम्भः

चतुर्विधमध्यनायिका

विचित्रसुरता प्रकटस्मरयौवना त्रेधे प्रगल्भवचना मध्यमव्रीडा चेति ।

शुभङ्करः

चतुर्विधं स्मश्रु

ततश्चतुर्विधं स्मश्रु वक्ष्ये नाट्योपकारकम् ।
शुद्धं विचित्रं श्यामं च तथा रोमशमित्यपि ॥

तत्र शुद्धं विधातव्यं पुरोघोऽमात्यलिङ्गिनाम्।
दिव्यानां च नृपाणां च तथा राजोपसेविनाम् ॥

श्रृङ्गारिणां कुमाराणां विचित्रं स्मश्रु कल्पयेत् ।
तपस्विदुःखितादीनां कर्तव्यं स्मश्रु रोमशम् ॥

वेमः

चतुर्विधस्वराः

चतुर्विधत्वमेतेषां विज्ञेयं श्रुतियोगतः ।
वादी चैवाथ संवादी ह्यनुवादी विवाद्यपि ॥

नाट्यशास्त्रे

चतुस्कलः

कनिष्ठाङ्गुलि निष्क्रामः प्रवेशश्च ततो भवेत् ।
कनिष्ठानामिकास्थानं ततस्तालस्तृतीयकः ॥

शम्यातालश्चतुर्थो तु निष्क्रामो पञ्चमीकृतः ।
षष्ठस्तालस्ततो ज्ञेयो निष्क्रामस्तर्जनीकृतः ॥

शम्याष्टमी ततस्तालो नवमी तु कला स्मृता ।
कनिष्ठिकाप्रवेशस्तु दशमी तु कला भवेत् ॥

निष्कामश्चैव तर्जन्या तदनन्तरमिष्यते ।
सन्निपातस्तथान्ते च कलाद्वादशको भवेत् ॥

एष त्वावापविक्षेपव्यवधानेन पण्डितैः ।
विधिश्चतुष्कलो ज्ञेयः प्रागुक्ताङ्गुलिभिः कृतः ॥

नाट्यशास्त्रे

चतुष्कोणः

कुट्टितश्चरणं पूर्वं पुरःपश्चान्निवेशितः ।
मिश्रभावात्पुनश्चापि पुरः पश्चात्तदन्यथा ।
कुट्टितश्चलितस्थाने चतुष्कोणाख्यकुट्टिता ॥

कुम्भः

चन्द्रः—चालकः

द्रुत्रयं लद्वयं ताले चन्द्रसंज्ञे प्रकीर्तितम् ।
० ० ० ॥

कुम्भः

—नवमहहस्तः

अर्धचन्द्रकरः सोऽयं चन्द्रार्थे संप्रयुज्यते ।

श्रृङ्गारशेखरः

चन्द्रकला—तालः

मगणं पत्रयं लघुः । ताले चन्द्रकला संज्ञे ।
ऽ ऽ ऽ ऽ̇ ऽ̇ ऽ̇ ।

कुम्भः

—वाद्यम्

प्रवर्द्धन्ते प्रलीयन्ते मात्राश्चन्द्रकला इव ।
तालश्चन्द्रकलासंज्ञो यदि चन्द्रकला तदा ॥

केचिच्चन्द्रकलां प्रोचुर्द्वात्रिंशन्मात्रिकं ततः ।
द्विमात्रा षोडशकला वृद्धिह्रासयुता यदि ॥

तादृशी मिश्रतुःषष्टींकलाभिर्दक्षिणे पथि ।
प्राहुश्चन्द्रकलां नाम वाद्यं वाद्यविशारदाः ॥

कुम्भः

चन्द्रकान्तः

अर्धचन्द्रं विधायादावथो मकरमाचरेत् ।
शुकास्यदण्डपक्षाख्यौ करौ जानुललाटयोः ।
कुर्यादेतैश्चतुर्भिः स्याच्चन्द्रकान्ताभिधः करः ॥

विप्रदासः

चन्द्रकान्तजयन्तौ

अर्धचन्द्रं करं कृत्वा ततो मकरमाचरेत् ।
शुकस्य दण्डपक्षौ च जानुदेशललाटयोः ॥

चतुर्भिर्हस्तकैः प्रोक्तश्चन्द्रकान्ताभिधः करः ।
वामे विधाय मकरं दक्षिणे चारचन्द्रकं ॥

भ्रामयित्वा समं कुर्यात्पताकं दक्षपार्श्वके।
त्रिपताकं तथास्पन्दे जयन्तो हस्तको भवेत् ॥

कुम्भः

चन्द्रिका—एकताली

गुरुद्वयं भवेद्यत्र तालो ललितसंज्ञकः।
चन्द्रिका चैकताली स्यात्तेन सौभाग्यदायिनी ॥

गान्धर्ववेदे

चपलता—व्यभिचारिभावः

रागद्वेषमात्सर्यादिजनितं चलत्वं चपलता।

शुभङ्करः

चरणोद्भवः

स भवति चरणोद्भवः प्रयत्ना-
भ्रमनमथोन्नमनं स्फुटियुपेतः।
अतिचलचरणाग्रदेशभूत्वे
य इह चलाचलपार्ष्णिभागजातः ॥

कुम्भः

चर्चरीनृत्यम्

द्विपद्या वर्णतालेन चर्चर्या वा मनोहरैः।
सलास्यैर्गतिभेदैश्च मण्डलीभूय सर्वशः ॥
यत्र नार्यः प्रनृत्यन्ति प्राप्ते वासन्तिकोत्सवे।
बालिकाभिरलंकृत्य देशभावविभूषिता।
तदुक्तं चर्चरीनृत्यं रसरागलयानुगम् ॥

कुम्भः

चलौ

उष्णावुच्छ्वासनिश्वासौ सशब्दौ वक्त्रनिर्गतौ।
चलावुक्तौ तु तौ चिन्तोत्सुक्यशोकेषु कीर्तितौ ॥

कुम्भः

चल्लावर्णी—पाटः

चल्लावर्णी तु सा यत्र मण्डली वाद्यते यदा।

कुम्भः

चषकः

कूर्परौ पार्श्वलग्नौ चेत्स्यातां पुष्पपुटाभिधे।
तदा स्याच्चषको हस्तः पानिप्रात्रे नियुज्यते ॥

कुम्भः

चारी

स्थानं स्थितिर्गतिश्चारी स्थानमाद्यन्तयोर्गतेः।
तत्रैकपाद्यनिष्पाद्या चारीशब्देन कथ्यते ॥
पादद्वयेन करणं तन्नृत्तकरणात्पृथक्।
करणैस्त्यात्त्रिभिः खण्डो मण्डलं भाणकैस्त्रिभिः।
चतुर्भिर्वा क्रमात्ताले त्र्यश्रे च चतुरश्रके ॥

चारीभेदाः

पुरःपश्चात्सरा चारी तथा पार्श्वात्पुरःसरा।
त्रिकोणचारी पश्चाच्च तथैकपदकुट्टिता ॥
क्रमपादनिकुट्टा च पार्श्वद्वयचरी तथा।
चारी डमरुकुट्टाख्या डमरुद्व्यकुट्टिता ॥
पुरःक्षेपनिकुट्टा च पश्चात्क्षेपनिकुट्टिता।
पार्श्वक्षेपनिकुट्टा च चतुष्कोणाख्यकुट्टिता ॥
मध्यस्थापनकुट्टा च तिरश्चीनाख्यकुट्टिता।
चारी च पृष्ठलुठिता पुरस्ताल्लुठिता तथा ॥
अनुलोमविलोमा च प्रतिलोमानुलोमिका।
समपादनिकुट्टा च नखकुट्टनिका ततः ॥
मध्यचक्रतला मध्यलुठिता वक्रकुट्टिता।
पञ्चविंशतिसंख्याश्च कीर्तिता ह्यर्थयोगतः ॥

कुम्भः

चारीलक्षणम्

नृत्ते तु चारीप्राधान्यादेव स्यादङ्गयोजना।
नाट्ये तु हस्तमुख्यत्वात्तान्येवाङ्गान्युपासते ॥
अथवा चरणं चार्यश्चारं चारं बहिः क्रियेत्।
तथा हस्तोऽप्यभिनये कारंकारं व्रजेत्कटीम् ॥
अर्धचन्द्रकरो नाट्ये कटीप्रान्ते कटीयते।
पक्षवञ्चितको यद्वा पक्षप्रद्योतकः करः।
कटीनिकटमध्यस्थौ हस्तौ नर्तनकर्मणि ॥

वेमः

चारीसङ्ख्यायां मतभेदः

देशीप्रसिद्धाः सन्त्यन्याश्चतुःपञ्चाशदूचिरे।
मार्गदेशगतत्वेन षडशीतिरिमा मता ॥

हम्मीरः

चारुश्रवणिका—पाटः

बोल्लावणीत्र विज्ञेया चारुश्रवणिका बुधैः।
क्रमाद्वा युगपत्पादैः पाणिभ्यां सरिभिः कृतैः ॥

स्याद्व्युत्क्रमतो ज्ञेया पाटोपाधिवशाद्यथा ।
शुद्धैः पाटैः कृता शुद्धा चित्रैश्चित्रा मता सताम् ॥

कुम्भः

चार्यः

आदौ समनखा तिर्यङ्मुखा च रथचक्रिका ।
ततो नूपुरविद्धा च मराला च कुलीरिका ॥
करिहस्ता कातरा च विशिष्टा पार्ष्णिरेचिता ।
ऊरुवेणी तलोद्वृत्ता ततश्चाप्यूरुताडिता ॥
हरिणत्रासिता तिर्यक्कुञ्चिताऽप्यपकुञ्चिता ।
सञ्चारितोत्कुञ्चिता च स्फुरिता च मदालसा ॥
अर्धमण्डलिका स्तम्भक्रीडनी तलदर्शनी ।
सङ्घट्टिता परावृत्ततला लङ्घितजङ्घिका ॥
इति देशीगता भौम्यश्चार्यः षड्विंशतिर्मताः ।
विद्युद्भ्रान्ता च विक्षेपा पुरक्षेपा मृगप्लुता ॥
भ्रमरी दण्डपादा च जङ्घावर्त्ताञ्चिताडिता ।
अवक्षेपा तथालाता जङ्घालङ्घनिका तथा ॥
रिङ्खा चान्दोलिता सूची भ्रमरी चेत्यनुक्रमात् ।
आकाशिक्यः पञ्चदशश्चार्यस्तज्ज्ञैः प्रकीर्तिताः ॥
ताः सर्वा मिलिता एकचत्वारिंशदुदीरिताः ।
मार्गदेशीगताश्चार्यो मिलिताः स्युस्त्रिसप्ततिः ॥

वेमः

चारीयं च चरेर्धातोरण्युटाङ्किपि जायते ।
भावे तत्साधकतमं चरणो हस्तकाञ्चितः ॥
समाचरणजङ्घोरुकटिनिष्पादिता क्रिया ।
चारीति कथ्यते तच्छास्त्रभेदानभिदध्महे ॥
अङ्घ्रिणैकेन निष्पन्ना चारी चार्ये च कथ्यते ।
चरणद्वयनिष्पन्ना चारी करणमुच्यते ॥
एतच्च करणं नृत्तकरणेभ्यः पृथङ्मतम् ।
करणत्रयनिष्पन्ना चारी खण्डमिति स्मृतम् ॥
खण्डैस्त्रिभिश्चतुर्भिर्वा चारीमण्डलमुच्यते ।
खण्डैस्त्रिभिर्भवेत्त्र्यस्रे चतुर्भिश्चतुरस्रके ॥
सेयं चारी द्विधा ज्ञेया भौमीत्याकाशकीति च ।
मार्गे षोडश भूम्यः स्युराकशिक्योऽपि षोडश ।
देश्योऽपि द्विविधा भौम्य आकाशिक्य इति क्रमात् ॥

सिंहभूपालः

चार्यङ्गविनियोगः

नृत्ये नाट्यगतौ वेषः प्रयोक्तव्यो मनीषिभिः ।
प्रधाने यो यदा यत्र हस्तपादोऽथवा भवेत् ॥
सोऽग्रे तदनुगोऽन्यः स्यात्साम्ये तु समकालता ।
यतः पादस्ततो हस्तो यतो हस्तस्ततस्त्रिकः ॥
चरणानुचराण्याहुरङ्गानि किलसूरयः
एवं चार्याः प्रधानत्वे स्यादङ्गविनियोजनम् ॥
प्राधान्ये हस्तकानां तु हस्तमङ्गान्युपासते ।
वारं वारं यथा ह्यार्यां चरणाः श्रयते महीम् ॥
कारं कारं करद्वन्द्वे चाश्राम्यति कटीतटे ।
अर्धचन्द्रः करो नाट्ये संश्रयेत कटीतटम् ।
पक्षप्रद्योतको नृत्ये पक्षवञ्चितकोऽथवा ॥

सिंहभूपालः

चार्यादिव्यायामभेदाः

चारी च करणं खण्डो मण्डलं चेत्यनुक्रमात् ।
चारी भवेदेकपादनिष्ठाद्या गतिसन्ततिः ॥
करणं नाम तत्प्रोक्तं या चेष्टा पादयोर्द्वयोः ।
व्यायाम एव संक्षिप्तस्स नृत्यकरणात्पृथक् ॥
खण्डस्त्रिभिः स्यात्करणैर्व्यायामो मध्यमस्त्वसौ ।
त्रिभिश्चतुर्भिर्वा खण्डैर्मण्डलं पण्डितैः स्मृतम् ॥
एष प्रोक्तस्तु विस्तीर्णव्यायाम इति कोविदैः ।
खण्डैस्त्रिभिर्यत्त्रैतत्त्र्यश्रताले प्रयुज्यते ॥
चतुःखण्डं मण्डलं तु ताले स्याच्चतुरश्रके ।
अधिकैरपि वा खण्डैर्मण्डलं तद्विदो विदुः ।
तन्मण्डलं मिश्रताले प्रयोज्यं मानवेदिभिः ॥

वेमः

चार्युपाङ्गानि

यतः पादस्ततो हस्तो यतो हस्तस्ततस्त्रिकम् ।
पादयोर्निर्गमो यत्र तत्रोपाङ्गानि योजयेत् ॥
चारीं विधाय चरणः श्रयते भूतलं यथा ।
तथा हस्तेऽप्यभिमयं विधायश्रयते कटी ॥
अर्धचन्द्राभिधो हस्तो नाट्ये कटिमुपाश्रयत् ।
परवञ्चितको नृत्ते पक्षप्रद्योतकोऽथवा ॥
मुख्यत्वेऽङ्गानि चारीणां चरणौ समुपासते ।
हस्तकानां तु मुख्यत्वे हस्तमङ्गान्युपासते ॥

चरणो वाथवो हस्तो यो यदा मुख्यतां व्रजेत् ।
तं कुर्यात्पुरतस्तस्यानुगम्य तु योजयेत् ।
लक्षणानि क्रमात्तासां चारीणामभिदध्महे ॥
विप्रदासः

चालिभेदाः

यतिरोता च गजरो व्यापकः श्रुतिभाषणः ।
पाटचालिस्तथा रुद्रभाषणाः क्रमशो मताः ॥
कुम्भः

चालिसंभवाः

रम्यविश्रान्तिनिर्वाहस्तशुताश्चालिसम्भवाः ।
कुम्भः

चित्रम्

गतिस्तिर्यङ्मुखा यत्र करश्च त्रिपताककः ।
तालश्च मल्लिकामोद एतच्चित्रं प्रकीर्तितम् ॥
सङ्गीतमुक्तावली देवेन्द्रकृता

चित्रकरणम्

स्वरैः सहस्तपाटैश्च मुरजाक्षरजैः पदैः ।
उद्ग्राहध्रुवकौ स्यातां तच्चित्रकरणं मतम् ॥
मोक्षदेवः

चित्रतालः

चित्रेऽणुः स्यात् ।
कुम्भः

चित्रनटलक्षणम्

प्रोक्तश्चित्रनटो नटी च रचने भाषादिवित्तत्त्ववित्।
चित्तज्ञश्च चतुर्विधाभिनयविन्नाट्यागमे पारगः ॥
कुम्भः

चित्रपदम्

आकारमपि कान्तस्य पश्यन्ती कामपीडिता ।
यत्र खिद्यति दुश्चित्ता प्रिया चित्रपदं हि तत् ॥

यथाः—

कान्तं चित्रपटे विरच्य विदधेत्यावत्तदालापनम्
लब्धो जीवनवासरैः कतिपयैस्त्यक्ष्यामि न त्वामिति ।
तावन्मज्जनतालबाष्पसलिलैः संभिन्नचित्राक्षरम्
क्षोदस्वेदकपाटकोटिघटितं कण्ठे विशीर्षे वचः ॥
कुम्भः

चित्रपदलक्षणम्—लासः

यत्र प्रियाकृतिं दृष्ट्वा विनोदयति मानसम् ।
मदनानलतप्ताङ्गी तच्चित्रपदमुच्यते ॥
नृत्तरत्नावली

चित्रपाटः

भ्रमराकुञ्चितश्चेति चित्रपाटद्वयं परम् ।
तत्र स्याद्भ्रमरो नाम घातो वलितभेदतः ।
तलेन क्रियते यत्र चित्रपाटो मनीषिभिः ॥
कुम्भः

चित्राभिनयः

अङ्गाद्यभिनयस्यैव यो विशेषः क्वचित्क्वचित् ।
अनुक्त उच्यते चित्रः सचित्राभिनयः स्मृतः ॥
कुम्भः

चिन्ता—व्यभिचारिभावः

अभीष्टाप्राप्तिजनितध्यानं चिन्ता ।
शुभङ्करः

चिबुकारोपणा—कला

कृत्वा पञ्चविलासकेषु चिबुकं वक्रं च सीत्कुर्वती
हस्तांघ्रिद्वयजां च पृष्ठपदवीं यानेन नीत्वा पदौ ।
आस्याग्रं पुनराकलय्य सजलं पात्रं च ताभ्यां शनैः
या मूर्ध्नि न्यसतीति यत्र निपुणं प्रोक्ता कला चैबुकी ॥
नागेन्द्रसंगीते

चूर्णिका

गीर्वाणवाक्यरूपेण गेया वै चूर्णिकेरिता ।
भरतकल्पलतामञ्जरी

चोक्षस्थायः

स्निग्धो रूक्षस्वरहितो ध्वनिर्यत्र दृश्यते ।
स्निग्धाः स्थायास्तु ये प्रोक्ताः चोक्षस्थाया प्रकथ्यते ॥
कुम्भः

छ

छण्डणलक्षणम्

कुर्यादाद्यविमुक्तिं तु येन तच्छण्डणं मतम् ।
सोमराजदेवः

छन्दस्वती—एला

अथ छन्दस्वतीमेतां वक्ष्ये लक्षणसंयुताम् ।
पञ्च कामगणाश्चैको रतेरन्ते च मान्मथः ॥

एवं पादत्रयं यस्याः सोक्ता छन्दस्वती बुधैः ।
सर्वास्वेलासु सौभाग्यशौर्यधैर्यादिवर्णनम् ।
गणादेरूनताधिक्यादेलाभासा इमे मताः ॥

मोक्षदेवः

छान्दसः

छान्दसः स तु विज्ञेयो ग्रामीणजनवल्लभः ।

कुम्भः

छायाः

रागछायाः स्मृताः ये ते रागे छायान्तरं श्रिताः ।
अन्यच्छायाप्रवृत्तौ हि नित्यं रागांशवेदिभिः ॥

कुम्भः

गाम्भीर्यं चैव माधुर्यं घनत्वं येषु दृश्यते ।
मन्द्रस्थाने स्वरस्यैते छायाः पूर्वैरुदीरिताः ॥

कुम्भः

छेवाडी भाषा

याष्टिकः पुनराचष्ट पूर्णामेतां समस्वराम् ।

कुम्भः

ज

जकरि

कोमलाङ्गैर्यदा नृत्यं भ्रमर्यादि विराजितम् ।
सशब्दा च क्रिया यत्र ध्रुवसंपादिभेदतः ।
यत्र चेष्टाविरहितं तन्नृत्यं जकरिर्मता ॥

जगडीनृत्यम्

पुच्छपुच्छकरौपान मतौ गीतं स्वभाषया ।
तुरुष्की नृत्यतो यत्र तन्नृत्यं जगडीति च ॥

सङ्गीतनारायणे

जङ्घालङ्घनिका

ईषदाकुञ्चितं पादमन्यपादेन लङ्घयेत् ।
गगने चेत्तदा प्रोक्ता जङ्घालङ्घनिका बुधैः ॥

कुम्भः

जङ्घावर्ता

बहिर्भ्रमस्य चरणस्याङ्घेरन्तर्भ्रमस्य च ।
तलं क्रमाज्जानुपार्श्वे जानुपृष्ठे च निक्षिपेत् ।
जङ्घावर्ता तदा प्रोक्ता चारी चानर्तचञ्चुना ॥

कुम्भः

जयः —मण्ठकः

लघुर्गुरुर्लघुर्यत्र स तालो हंसकः स्मृतः ।
तालश्चायं रसे वीरे कर्तव्यो जयमण्ठकः ॥
हंसकतालः । S ।

गान्धर्ववेदे

जयघण्टाभल्लरीलक्षणम्

कार्या कांस्यमयी प्रान्तछिद्रद्वयगुणान्विता ।
पिण्डे त्वेकाङ्गुलावृत्ता जयघण्टाकरायता ॥
कोणेन वादयेतां देङ्कारबहुलध्वनिम् ।
एषैव निम्नपर्यन्ता पिण्डे न्यूना च भल्लरी ॥

सोमराजदेवः

जयन्तः

विधाय वामे मकरसर्पचन्द्रश्च दक्षिणे ।
युगपद्भ्रमयित्वैतौ पताकं दक्षपार्श्वके ॥
त्रिपताकं तथा स्कन्धे रचयेद्यत्र नर्तकी ।
तत्रोक्तो नृत्ततत्त्वज्ञैर्जयन्तो नाम हस्तकः ॥

विप्रदासः

जयश्रीः—तालः

जयश्रीः रगणाल्लोगः ।
S । S । S

कुम्भः

जर्जरपूजा

ततो विघ्नविनाशार्थं जर्जरं परिपूजयेत् ।
पञ्चपर्वयुतो वंशो जर्जरः परिकीर्तितः ॥
ऊर्ध्वपर्वणि शुक्लः स्यात् तदधो नीलवर्णकः ।
ततः पीतस्ततो रक्तश्चित्रवर्णस्ततःपरम् ॥
सर्ववर्णपताकाभिः सर्वतः समलङ्कृतः ।
अत्र विघ्नविनाशार्थे पितामहमुखैः सुरैः ॥
निर्मितस्त्वं महावीर्यो वज्रीमारो महातनुः ।
शिरस्ते रक्षतु ब्रह्मा सर्वदेवगणैः सह ॥
द्वितीयश्च हरः पर्व तृतीयश्च जनार्दनः ।
चतुर्थं च कुमारस्ते पञ्चमं पन्नगोत्तमः ॥

सङ्गीतसर्वस्वम्

जर्जरलक्षणम्

अथेदानीं जर्जरस्य लक्षणं तु मयोच्यते ।
चेतश्चितौ समुत्पन्नपुष्यनक्षत्र योगतः ॥

वेणुमार्गे प्रयत्नेन जर्जरार्थे प्रयोक्तृभिः ।
षडङ्गुलं भवेदस्य मानमष्टोत्तरं शतम् ॥

पर्वाणि पञ्च चत्वारि ग्रन्थयस्तालमात्रतः ।
कीटादि . . . . रत्नावर्तुलस्तथा ॥

गन्धमाल्योपचाराद्यै रुपास्यो जर्जरो बुधैः ।
पूर्वरङ्गे सूत्रधारधार्योऽयं विघ्नशान्तये ॥

दण्डकाष्ठं भवेन् वैल्वं कापित्थं वंशमेव वा ।
त्रिभागचक्रकीलादिसर्वदोषविवर्जितम् ।
धार्यं विदूषकेणेदं प्रयोगे नाटकाश्रये ॥

वेमः

जर्जरश्लोकः

पुनरन्यं पठेत् श्लोकं देवतायाः प्रसादकम् ।
आनयं जर्जरं दण्डं तदुदाहरणं यथा ॥

अभिनवमृगमदतिलकः करकृतकमनीयवेणुमुखः ।
मधुरं व्रजेषु गायन्नव्यादव्याजसुन्दरः शौरिः ॥

विप्रदासः

जर्जराख्या नान्दी

नान्दीपदार्थविस्तारश्लोका जर्जरसंज्ञकाः ।
गदित्वा जर्जरश्लोकं पठेच्छुष्कापकृष्टकम् ॥

विप्रदासः

जलक्लिन्ना

कामपि भ्रमरीं कृत्वा संहितस्थानमाश्रिता ।
करौ कृत्वालपद्माख्यावलातौ यत्र पादयोः ॥
नीला क्रमेणैकदा चाकम्पयेदच्युताविव ।
जलक्लिन्नावधाताख्यः पार्ष्णि मुकलसंज्ञिकम् ॥

अशोकः

जलशायनम्

जलशायिपदे तस्यादासनं जलशायनम् ।

कुम्भः

जातयः

तास्त्वहं वर्तयिष्यामि न्यासापन्याससंयुताः ।
षाड्जी चैवार्षभी चैव धैवती सनिषादिनी ॥

षड्जोदीच्यवती चैव तथा वै षड्जकैशिकी ।
षड्जमध्या तथा चैव षड्जग्रामसमाश्रयाः ॥

अत ऊर्ध्वं प्रवक्ष्यामि मध्यमग्रामसंश्रयाः ।
गान्धारी मध्यमा चैव गान्धारोदीच्यवा तथा ॥

पञ्चमी रक्तगान्धारा तथा गान्धारपञ्चमी ।
मध्यमोदीच्यवा चैव नन्दयन्ती तथैव च ।
कार्मारवी च विज्ञेया यथान्ध्री कैशिकी तथा ॥

नाट्यशास्त्रे

खराशनः पार्श्वजश्च मूलक्षाणोऽथ लाटकः ।
अवशीयधनश्चेति जातयः षडुदीरिताः ॥

सङ्गीतसूर्योदयः

चतुरस्रस्तथा त्र्यश्रः खण्डा मिश्रस्तथैव च ।
सङ्कीर्णाः पञ्च विज्ञेया जातयः क्रमशो बुधैः ॥

कुम्भः

जातिः करुणे रसे

निषादोंऽशे तु नैषादी गान्धारे षड्जकैशिकी ।
करुणे तु रसे कार्या जातिर्गानविशारदैः ॥

नाट्यशास्त्रे

जातिक्रमः

द्व्यङ्गे तारावली जातिः प्रोक्ता त्र्यङ्गेषु पावनी ।
दीपनी चतुरङ्गे स्यात्पञ्चाङ्गेषु प्रमोदिनी ।
षडङ्गेऽन्तरगर्भा स्यादिति जातिक्रमो गतः ॥

सोमराजदेव

जातिः बीभत्से भयानके च

धैवती धैवतांशे तु बीभत्से सभयानके ।
ध्रुवाविधाने कर्तव्या जातिर्गाने प्रयत्नतः ॥

नाट्यशास्त्रे

जातिलक्षणम्

स्यात्षड्जमध्यमाभ्यां निर्वृत्ता षड्जमध्यमा जातिः ।
गान्धारीषाड्जीभ्यां संयोगात्षड्जकैशिकी चापि ॥

षाड्जीगान्धारीभ्यां धैवत्या चापि या विनिष्पन्ना ।
संसर्गाद्विज्ञेया सा षड्जोदीच्यवाजातिः ॥

षाड्जी गान्धारी पञ्चमी तथा धैवती च खलु जातिः ।
गान्धारोदीच्यवतीं जातिं निर्वर्तयन्त्येताः ॥

गान्धारपञ्चमाभ्यां मध्यमया विरचिता च धैवत्या ।
जातिः सा मध्यमोदीच्यवती सद्भिः सदा ज्ञेया ॥

गान्धारीपञ्चमयोः सप्तम्याश्चैव रक्तगान्धारी ।
गान्धार्यार्षिकाभ्यां सञ्जायते जातिः ॥

योनिस्तु नन्दयन्त्यास्त्वार्षभिका पञ्चमी सगान्धारी ।
कार्मारवीं निषादी सार्षभिका पञ्चमीं कुर्युः ।
धैवत्यार्षिकाभ्यां हीनं खलु कैशिकीं कुर्युः ॥

नाट्यशास्त्रे

जातिः - वीररौद्राद्भुतेषु रसेषु

षाड्जात्वार्षभिका चैव स्वरराशिपरिग्रहात्।
वीररौद्राद्भुतेष्वेते प्रयोज्ये गानयोक्तृभिः ॥

नाट्यशास्त्रे

जातिसाधारणम्

जातिसाधारणमेकांशानां विशेषाज्जातीनां तु समवायात् प्रत्यक्षेण संज्ञा इति।

नाट्यशास्त्रे

जातींशकः

गोडत्वाद्यं जमां जातिं समाश्रित्य प्रवर्तिता।
कर्णाटाद्याः सजातीयास्तेष्वेकांशोपरत्र यः।
स जातींयांशको सोऽत्र विज्ञेयो रागवेदिभिः ॥

कुम्भः

जातेर्लक्षणम्

तालेनानुगतज्ञानकृतष्टादशधास्थितम्।
महासामान्यमित्येता जातयः परिकीर्तिताः ॥

शुद्धत्वविकृतत्वाख्याविभेदेनात्मनैव हि।
जन्यत्वं जनकत्वं च भवन्त इति सम्मतिः ॥

शुद्धानां तत्र शुद्धत्वं विकृतत्वं च सम्मतम्।
अन्यासां विकृतत्वं हि तद्वे विक्रियते स्फुटम् ॥

षड्जत्वां तु यस्य मन्द्रत्वमादृतं हि पुरातनैः।
मृदुत्वान्मोदकत्वाच्च मन्द्रो यन्मोदनं मुदे ॥

तारेर्यत्प्लावनार्थस्य तारस्तारयति स्वरान्।
आप्लावयन्ति तत्पूर्णो मध्यो मिश्रस्वरूपवान् ॥

षाड्जत्वभेदास्तेषु चाष्टौ पूर्णता परिवर्जिता।
समान्यलक्षणैर्हीनाः षाड्जत्वा षाडवमेव तत् ॥

षाडवौडुवभेदेनार्षभ्यादिषु च षट्स्वपि।
प्रतिस्वमष्टावधिकास्त्रयोविंशातिरिक्तः।
एवं ते विकृता भेदा वह्निबाणभुवः स्मृताः ॥

कुम्भः

जानुगतम्

जानुनी भूमिसंस्थे चेत्स्थानं जानुगतं तदा।
हासे देवार्चने दीनयाचने मृगदर्शने।
क्रुद्धप्रसादने पैतत्कुमस्त्वत्रासने तथा ॥

कुम्भः

जारुमानम्

क्रीडातालानुगं बालकीडासाधनचक्रवत्।
गतीनां यत्र संकोचप्रस्तारौ नेमिरीरितम् ॥
समा च विषमा सूची शुद्ध स्यान्मध्यमानतः।
आदितालेनचेद्भिन्नैः जारुमानं तदोदितम् ॥

आदितालः—

दक्षिणं पादमेकं चेद्दोल येच्चलितं वपुः।
लघुशेखरतालेन मुहुर्मुहुः तदुच्यते ॥

जारुमानकम्

उत्कटस्थानकं स्थित्वा खण्डसूच्याख्यमाव्रजेत्।
ततो मण्डभ्रमरिकां कृत्वा दक्षिणवामतः।
चतुर्दिक्षु गतिर्यत्र तदुक्तं जारुमानकम् ॥

सङ्गीतमुक्तावली देवेन्द्रकृता

जामातृहस्तः

मयूरो दक्षिणे हस्ते भ्रमरो वामहस्तके।
जामातरि नियुज्येत करकर्मविशारदैः ॥

भरतकल्पलतामञ्जरी

जुगुप्सा

अहृद्यवस्तुश्रवणाद्दर्शनादपि जायते।
या चित्ते विकृतिः स्वल्पा जुगुप्सा सा निवेदिता ॥

जोडणी—पाटः

अनुलोमविलोमाभ्यां तदर्धार्धविभेदतः।
खण्डतालाश्च पाटाश्च योज्यन्ते जोडणी तु सा ॥

कुम्भः

ज्येष्ठः

द्विर्भावान्मध्यमस्यैव ज्येष्ठमित्यभिधीयते।
मध्यमस्य विधानेन न्यासाश्च द्विगुणाः कलाः।
सन्निपातैर्निपातैश्च तेषां वस्तु प्रकीर्तितम् ॥

नाट्यशास्त्रे

झ

झडप्पणी—पाटः

सा स्यात् झडप्पणी यस्यामादौ मध्येऽवसानके।
वाद्यन्ते सर्ववाद्यानि नानावाद्यैरनेकधा ॥

कुम्भः

झम्पकः—तालः

द्विघ्नद्वादशवर्णाङ्कस्तालो वै झंपको भवेत् ।
वीरश्रृङ्गाररसयोर्जपकृज्जपमङ्गलः ।
द्रुतद्वयं विरामान्तर्लघुनैकेन झम्पकः ॥

गान्धर्ववेदे

झम्पातालः

द्रुतद्वयं विरामान्तं लघुनैकेन संयुतम् ।
झम्पातालो भवेत्तेन गेयः शान्तो बुधोत्तमैः ॥

गान्धर्ववेदे

झम्पानृत्तम्

झम्पाताले गीयमाने मध्यमानेन नर्तकः ।
यदि नृत्येत्समं देवं दूरपादप्रसारणम् ॥
लसत्कलासैर्लास्यांगी यो नटः पाणिमिस्तदा ।
झम्पातालादिनृत्तं स्यात्कलासैरन्तरान्वितम् ॥

झल्लरी

अष्टादशाङ्गुलो यस्याः परिधिः द्वादशाङ्गुला ।
दैर्घ्यं सा झल्लरी पञ्चविंशत्या निर्मिता पलैः ॥
कण्ठसूत्रद्वयोपेतसुषिरद्वयसंयुता ।
चरणानद्धवदना सुसमा यमदैवता ।
वाद्या दक्षिणहस्तेन धृत्वा वामेन पाणिना ॥

कुम्भः

झंकृतिः—तालः

लपाभ्यां झंकृतिः प्रोक्ता ।
। ऽ

कुम्भः

झंपा—तालः

लघुरेकोऽनुद्रुतं च द्रुतमेकं च यत्र वै ।
चतुरश्रस्सप्तमात्रा झंपातालस्स उच्यते ॥

भरतकल्पलतामञ्जरी

ट

टम्मकी

चर्मणाकृतदण्डेन वाद्यते वैरिभीषणम् ।
एवं विधा च या लघ्वी टम्मकी सा प्रकीर्तिता ॥

सोमेश्वरः

टाकणी—वाद्यः

कर्तव्या टाकणी वाद्यौ तयोर्द्वेदद्वयं मतम् ।
जौडा चैकसरा चेति तयोर्लक्षणमुच्यते ॥
टाकिण्येकसरा चेति तथैकसरटाकिणी ।
जौडैकसरजोडा च तथैकसरजोडकः ॥
जोडावाद्य इमे भेदाः पृथक् च द्वयगोचराः ।
तत्र सा टाकणी ज्ञेया यस्तालेषु कलादिके ।
भ्रमस्य वह्नीं कृत्वाभीष्टताललयानुगः ॥

कुम्भः

ड

डक्का

द्वादशाङ्गुलदैर्घ्या च मनाङ्मध्ये कृशा च या ।
अर्धाङ्गुलमिता पिण्डे स्यातामष्टाङ्गुले मुखे ॥
वदने प्रतिविस्तारशङ्कवस्ताम्रनिर्मिताः ।
तन्त्रीभ्यां द्वावधःशङ्कू द्वावूर्ध्वे यन्त्रणाय च ॥
तन्त्र्यो न्यस्येत्तथा पुष्ट्यै तृणनिर्मिताम् ।
शेषमत्र हुडुक्कावत् पाटवर्णादिकं मतम् ॥
कोणोऽस्या वादने प्रोक्ते द्वादशाङ्गुलदैर्घ्यभाक् ।
अस्याः करेण कोणेन केचिदूचुः प्रवादनम् ॥
झंकृतिः करघातेन जायते कुडुपेन तु ।
घटस्तडोडगिश्चेति मुख्याः प्रोक्ताः पुरत्र तु ॥
निगो कखरटाश्चेति देवता विन्ध्यवासिनी ।
त्रिधा सा मिद्यते तत्रोत्तमाद्यं भेदमाश्रिता ॥
उत्तमा तूक्तमानेनाङ्गुलोना मध्यमा स्मृता ।
अङ्गुलद्वितयेनोना डक्का प्रोक्ता कनीयसी ॥

कुम्भः

ढकुलीलक्षणम्

कांस्येन दन्तिदन्तेन गोविषाणेन वा भवेत् ।
ढकुली दैर्घ्यमानेन मिता पञ्चभिरङ्गुलैः ॥
भवेतां वदने तस्याः सम्मिते चतुरङ्गुलैः ।
मेषायाप्युद्दलीमध्ये स्वस्ववक्त्रसमन्विते ॥
कांस्यजे लोहजे वाथ ताम्रजे वाथ ते पृथक् ।
पञ्चरन्ध्रे तथा हल्या छिद्रविन्यस्तदोरकैः ॥
निबध्यते दृढं सूत्रैस्तथा...... ।
नातिश्लथं नातिगाढं मध्यसूत्रे त्वनामिकम् ॥

विन्यस्य मध्यतर्जन्यौ निवृत्ते वक्त्रसंयुते ।
अन्यस्मिन् वदनेऽङ्गुष्ठं विन्यस्य मदनान्वितम् ॥
निधायाङ्गनिकामेकां ढक्कुलीं वादयेद्बुधः ।
बुं बुं बुं बुपाटवर्णसंयुतां मर्दलोदितैः ।
पाटवर्णैर्युतामेतां वाद्यमित्यपरे जगुः ॥

कुम्भः

डमरुः

वितस्तिद्वितयायामो वितस्तित्रितयं तथा ।
सत्र्यङ्गुलं तु परिधौ वलीवलयसंयुते ॥

द्वादशाङ्गुलके वक्त्रे प्रत्येकं कवलद्वये ।
निबद्ध...............मण्डलीयुतमेव च ॥

दधानः क्षाममध्यश्च निबद्धस्तत्र दोरकैः ।
दधानो वादनस्यार्थं मञ्जुलं गोलकद्वयम् ॥

अञ्जनीप्रान्तसंबद्धसिक्थकेन विनिर्मितम् ।
मध्ये विधृत्य हस्ताभ्यां वाद्यो डवडवाक्षरैः ।
वर्णैः कखरटैर्वाथ डमरुर्वाद्यते जनैः ॥

कुम्भः

डमरुः

द्वादशाङ्गुलका दैर्घ्येमुख्येस्याष्टांगुले मतं ।
मण्डलीयुगलोपेते नद्धव्ये श्लक्ष्णचर्मणा ।
मध्ये तु गाढतां नीतैः सुदृढैः सूत्रदोरकैः ।
मध्ये स्याद्दोरकद्वन्द्वं दृढवादनहेतवे ॥

स्यातां तत्प्रान्तसंलग्नौ सम्यङ्मदनगोलकौ ।
धृत्वा डमरुकं मध्ये हस्ताभ्यां वादयेद् बुधः ।
पाटवर्णौ डुवौमुख्यौ जगुः कखरटान्परे ॥

मोक्षदेवः

डमरुकुट्टिता

वाद्यश्चेत्कटितः पूर्वं लुठितोऽङ्गुलिप्रसृतः ।
पश्चात्त्रिकुट्टितस्थाने तदा डमरुकुट्टिता ॥

डमरुद्वयकुट्टिता

पादयुग्मकृता सैव डमरुद्वयकुट्टिता ।

डालम्

मुलं बध्वा तदोत्प्लुत्य चरणं पक्षिपक्षवत् ।
भ्रमित्वान्निपतेद्भूमौ तदा डालमितीरितम् ॥

डिमः—रूपकम्

गन्धर्वामरदैत्त्यराक्षसगणप्रेताहियदादयो (?)
नेतारः कपटेन्द्रजालसमरक्रोधान्विताः शोभनाः ।
हास्यो यत्र न कैशिकी न च भवेच्छृङ्गारमङ्गो रसो
ज्ञातव्यश्चतुरङ्क एव सुबुधैर्य........ मर्थो डिमः ॥

शुभङ्करः

डेङ्की

पादौ समौ यदान्यस्मिन् पार्श्वे त्वपरपार्श्वतः ।
उत्प्लुत्य पातयेच्चित्रं तदा डेंकीति कथ्यते ॥

डोम्बिकादिकाव्यानि

यो कोहलमतङ्गाद्यैः कृतो मार्गावलम्बनः ।
तन्मतस्यानुसाराच्च तथा लोकानुसारतः ॥

आचार्यैरपरैर्व्याचोत् प्रेक्षवद्भिर्विचक्षणैः ।
प्रपञ्चिता च बहुधा सा देशीति निगद्यते ॥

अथ देशीनृत्यकाव्यप्रभेदा डोम्बिकादयः ।
कथ्यन्ते डोम्बिका भाणः प्रस्थानं षिद्गकोऽपि च ॥

भाणिका प्रेरणं चाथ रामक्रीडं तथैव च ।
रागकाव्यं च हल्लीशः रसकं चेल्यमी दश ।
कोहलोनोक्तमेवात्र तेषां लक्षणमुच्यते ॥

वेमः

डोल्लकताललक्षणम्

प्रतिमट्ठः स्मृतः प्राज्ञैः भगणः सगणोऽथवा ।
तालविद्भिरसौ कैश्चित्कथ्यते डोल्लकाभिधः ॥

सोमराजदेवः

ढ

ढेङ्कीभेदाः

ढेङ्की चतुर्विधा मुक्तावली स्याद्वृत्तबन्धिनी ।
युग्मिनी वृत्तमाला च तासां लक्ष्माभिदध्महे ॥

मोक्षदेवः

ढेंकीलक्षणम्

मेलापको ह्यतालो वा ढेङ्कीतालेन वा युतः ।
अन्यो लयस्तथा तालो ध्रुवाभवकोगयोरिह (?) ॥

सानुप्रासे प्रगीयेते द्वे दण्डे समधातुनी ।
तृतीयमुचकं यः स्यादाभोगस्तु सकृत्ततः ॥

ध्रुवं गीत्वा पुनर्न्यासो ढेङ्किकायां सदा भवेत्।
यद्वाद्यश्चैव मेलापो ढेङ्कीतालो भवेद्यतः।
तस्मादस्य प्रबन्धस्य नाम ढेङ्कीति कीर्तितम् ॥

मोक्षदेवः

त

ततभेदाः

आलावणी ब्रह्मवीणा किन्नरी लघुकिन्नरी।
विपञ्ची वल्लकी ज्येष्ठा चित्रा घोषवती जया॥

हस्तिका कुब्जिका कूर्मा सारङ्गा परिवादिनी।
त्रिसरी गतचन्द्रा च नकुली चाचचम्सरी (?) ॥

औदुम्बरी पिनाकी च निबद्धः पुष्कलस्तथा।
गदा रावणहस्तश्च रुद्रोऽथ स्वरमण्डलः।
कपिलासो मधुस्यन्दी घोणेत्यादिततं भवेत्॥

सङ्गीतनारायणे

तम्बरी

निःस्थानवत्तम्बरीस्यात् ततोल्पो गात्रवादयोः।
वाद्यते सद्वितीयोऽसौ दमामेति निगद्यते॥

कुम्भः

तन्नाकारः

पञ्चवर्धे स्वरैर्युक्तं तन्नाकारं समुद्भवेत्।

भरतकल्पलतामञ्जरी

तरङ्गितः

चलाचला उल्ललन्ति स्वरा यत्र तरङ्गवत्।
तरङ्गितः स विज्ञेयः............... ॥

कुम्भः

तलम्

वामेन पीडनं कृत्वा दक्षिणेनाहतिस्तलम्।

नाट्यशास्त्रे

तल्लम्

पश्चात् क्षिप्यमुरः क्षेत्रायत्र स्यातां लताकरौ।
तिर्यक्कुञ्चितयोपेतं तत्तल्लमिति कीर्तितम्॥

सङ्गीतमुक्तावली देवेन्द्रकृता

तलदर्शनी

स्वस्तिकौ चरणौ यत्र संहतस्थानकौ स्थितौ।
तिर्यक् पृथग्गतौ बाह्यपार्श्वाभ्यां भूतलं यदा।
स्पृशतस्तत्र सा प्रोक्ता चारिकातलदर्शनी॥

कुम्भः

तलदर्शिनी

स्थित्वा चैकाङ्घ्रिणा चान्यं दण्डवच्च प्रसारयेत्।
यदा भ्रमति सा तस्माद्विज्ञेया तलदर्शिनी॥

कुम्भः

तलप्रहारः—पाटः

तलप्रहारः पाटः स्यात् वामस्कन्धस्य चालनात्।
वामेन पाणिना वामपुटमध्यनिपीडनात्॥

यथा—देथों हें दिगितकि तकिटकि जों थियरिथि थरिस।

कुम्भः

तलपुष्पपुटलक्षणम्

प्रायशो नर्तनारम्भे समपादौ लताकरौ।
चतुरस्रं भवेदङ्गं विशेषस्त्वयमुच्यते॥

चार्याध्याधिकया पादः विनिष्क्रामति दक्षिणे।
व्यावर्तनात्करयुगे दक्षिणं पार्श्वमागते॥

परिवर्तनतो वामपार्श्वं सन्नतमाश्रिते।
तत्कुचक्षेत्रसंविष्टो यस्य पुष्पपुटः करः।
तलपुष्पपुटं तस्मादमे तु तलसञ्ज्ञरे॥

यद्यनन्तरमेतस्मात्करणं करणान्तरात्!
तदा करक्रिया तत्र त्याज्या माह्या करानुगा।
एतत्पुष्पाञ्जलिक्षेपे लज्जायां च नियुज्यते॥

हम्मीरः

तलपाटाः

चत्कुलः खलकश्चैव पाण्यन्तरनिकुट्टकः।
दण्डहस्तः पिण्डहस्तो योगहस्तोऽर्थहस्तकः॥

स्थूलहस्तोऽर्धार्धपाणिः पार्श्वपाण्यर्थपाणिकौ।
कर्तरीसमकर्तर्यौ तथा विषमकर्तरी॥

समपाणिश्च विषमपाणिः स्यात्पाणिहस्तकः।
नागबन्धावघटकौ स्वस्तिकश्च समग्रहः।
इत्येकविंशतिर्हस्तपाटाः स्युर्मुरजादिषु॥

कुम्भः

तलमुखयोर्लक्षणम्

भूत्वा वृत्तौ स्थितौ व्यस्तौ हंसपक्षौ स्वपार्श्वयोः।
जातौ मिथःसंमुखस्थतलौ तलमुखौ मतौ॥

हम्मीरः

ताण्डवम्

मृदङ्गहारकरणे चारी चरणकोमलः ।
ताण्डवं तद्भवेद्यत्तु प्राधान्येन प्रवर्तितम् ॥

करणैरङ्गहारैश्च प्रयोगैरुद्धतैरिह ।
तण्डुना निर्मिते नृत्ये प्राहुर्भेदद्वयं परे ॥

विषमं विकटं लघ्वित्यत्र तद्विषमं मतम् ।
यदभ्यासवशाद्रज्जुभ्रमणादि प्रदृश्यते ॥

विरूपवेषावयवव्याहारं विकटं (विषमं) मतम् ।
करणैरञ्चितैर्यस्य प्रयुक्तं तद्भवेल्लघु ।
सङ्कीर्णं तद्भवेन्नृत्यं यदेतत्त्रयसङ्करात् ॥

कुम्भः

वर्धमानासारिताद्यैः गीतैस्तत्र ध्रुवायुतम् ।
करणैरङ्गहारैश्च प्राधान्येन प्रकीर्तितम् ।
तण्डूक्तमुद्धतप्रा[illegible] प्रयोगं ताण्डवं विदुः ॥

सङ्गीतनारायणे

ताण्डिका

विचित्रवाद्यस[illegible] कलशखण्डकम् ।
अन्तास्तादाहुर्मुनयो[illegible]भाषणम् ॥

तमेव ताण्डिकां [illegible]ङ्कारकं जगुः ।
श्रोतोवहा यतिश्चात्र [illegible] प्रेप्सितो मतः ॥

कुम्भः

तामवल्लसम्

एकवक्त्रं तामवल्लूप्तं अधो[illegible] मुखे बृहत् ।
खरचर्मनिबद्धास्यं वध्रीबद्धं समानतः ॥

सोमेश्वरः

तारः

यस्य कण्ठे स्वरोऽधः स्यात्स तु तारः प्रकीर्तितः ।

नाट्यशास्त्रे

—प्रतिमण्ठकः

विरामान्तं द्रुतद्वन्द्वं गुरुश्चैकस्ततःपरम् ।
सुरङ्गतालो गीतव्यस्तारश्च प्रतिमण्ठकः ॥

गान्धर्ववेदे

सुरङ्गतालः ।   ० ० ऽ

तारलक्षणम्

भवेच्चतुः स्वरारोहो मध्यसप्तवर्तिनः ।
अंशकाः सह लुप्तैश्च तारेऽसौ परमावधिः ॥

कामचारमिदं प्राहुरूनतायां विपश्चितः ।
आषड्जं नन्दयन्त्याम्यात्तारो नातःपरं व्रजेत् ॥

पञ्चस्वरान् समारोहेदंशादूर्ध्वं च यन्मते ।
विरोधस्तन्मते षड्जर्यां तारषड्जस्य दर्शनात् ॥

अत्रोदाहरणम्

धा धा धनि सनि धपा सा सा सा ।

मोक्षदेवः

ताराविधिः (?)

यस्मिन् ग्रामे यः स्वरोंऽशः षड्जो वा मध्यमोऽथवा ।
तस्मात्स्वराणां चतुरः क्रमादारोहयेत्तदा ॥

ताराविधिरिति प्रोक्ता सुखदैर्हितकोविदैः ।
विशेषं ब्रूमहे तत्र मध्यमग्रामवेशने ॥

कृत्वांशं मध्यमस्थाने ताल (तारे) च भावयेत् ।
मध्यमस्वरमारभ्य निषादान्तं चतुःस्वरान् ॥

क्रमादारोहयेत्तस्य निषादःपरमो विधिः ।
स्थानाभावात्स्वराभावात्प्रयोगो नान्यतःपरम् ॥

षड्जग्रामे तदाकारा षड्जमंशं विधाय तान् ।
स्वरान् चतुर आरोहेत् षड्जं त्यक्त्वा स्वरस्थितान् ॥

पञ्चमान्तान् स एवात्र ताराविधिरितीरितः ।
आधारषड्जग्रामेऽथ निश्शेषौ तात्ररक्तिकौ ॥

यदारोहणसंख्यायां वर्ज्यो भवति यः स्वरः ।
स गण्यस्तेषु सर्वत्र स्वरेषु चतसृष्वलम् ॥

सङ्गीतसूर्योदयः

तालः

तालः काल इति ज्ञेयः स कालश्शम्भुरुच्यते ।
शम्भोरुत्पद्यते नादो नादादुत्पद्यते मनः ।
मनसो जायते कालः सकालस्तालसंज्ञिकः ॥

भरतकल्पलतामञ्जरी

तालशब्दस्य निष्पत्तिः प्रतिष्ठार्थेन धातुना ।
गीतं वाद्यं च नृत्यं च भाति ताले प्रतिष्ठितम् ॥

संयोगे च वियोगे च वर्तते च तयोर्द्वयोः ।
स्थापितोऽपि दशप्राणैः स कालस्तालसंज्ञिकः ॥

सङ्गीतमकरन्दे

पञ्चलघ्वक्षरोच्चारकालो मात्रा तु तालगा ।
कालश्च सप्तधा पातः तत्र चावापनिष्क्रमौ ॥

विक्षेपश्च प्रवेशः स्यात्तालः स्यात्सन्निपातयुक् ।
लयश्च त्रिविधो ज्ञेयो द्रुतो मध्यो विलम्बितः ॥

सोमराजदेवः

त्र्यश्रश्च चतुरश्रश्च स तालो द्विविधः स्मृतः ।
द्विविधस्यापि तालस्य त्वेका प्रकृतिरिष्यते ॥

नाट्यशास्त्रे

काश्मीरादिसमुद्भूतं तालमाहुर्मनीषिणः ।
सुनादं दक्षिणं तालं ततो हीनं च वामकम् ॥

शुभङ्करः

तालम्

त्रयोदशयवव्यासमवक्रपिण्डं यवान्वितम् ।
यवपञ्चकपालीकं मध्ये च यवसप्तकम् ॥
विस्तृतं वर्तुलं निम्नं यवत्रयमितं ततः ।
पृष्ठतो मध्यदेशश्च शिवलिङ्गं समावृतम् ॥
मध्ये गुञ्जासमच्छिद्रं पट्टसूत्रादिगुम्भितम् ।
अयत्नपैत्तिकस्निग्धशुद्धकांस्यविनिर्मितम् ।
तत्स्वरादिसमुद्भूतं तालमाहुर्मनीषिणः ॥

सङ्गीतनारायणे

तालः

लयो लयास्तु विज्ञेया द्रुतमध्यविलम्बिताः ।
यस्तत्र तु लयो मध्यस्तत्प्रमाणा कला भवेत् ।
कलाकालप्रमाणेन ताल इत्यभिसंज्ञितः ॥

नाट्यशास्त्रे

तालकूटम्

एकतालयुते चान्ये तालकूटं तदाभिधम् ।
चक्रबन्धाभिधं चैवार्जुनबाणाभिधं तथा ॥
हारबन्धाभिधं तद्वत् ज्ञातव्यमिति भेदतः ।
तालकूटाभिधं चैव देवेन्द्रो बहुधाभ्यधात् ॥
तत्रैकतालसंयुक्तं यदा तद्द्रुततालकम् ।
लद्रौ लाद्रौलंयुर्धास्युत्रयो लोष्ठ्रैकतालकम् (?)॥

यथा—।०।००।०००। एवंविधताले पञ्चवारं सप्तवारं नववारं एकादशवारं वा समाहृत्य गतयो यत्र बध्यन्ते तदेकतालयुततालरूपम् ।

सङ्गीतमुक्तावली देवेन्द्रकृता

तालपाटलक्षणम्

पाटश्च मलपश्चैव वाद्यते यत्र मिश्रितौ ।
तमाहुस्तालपाटं तु नन्दिकेश्वरसूत्रितम् ॥

सोमराजदेवः

तालप्रकरणं घनताललक्षणम्

कलापातलयैर्युक्तस्तालो घन इति स्मृतः ।
स च ... क्रियामानं ज्ञातव्यश्च चतुर्विधा ॥

सोमराजदेवः

तालप्राणाः

कालमार्गक्रियाङ्गानि महजातिकलालयाः ।
यतिप्रस्तारकं चैव तालप्राणा दश स्मृताः ॥

सङ्गीतमकरन्दे

तालभेदाः

ध्रुवो मठ्यो रूपकश्च झंपा त्रिपुट एव च ।
अटतालश्चैकतालः सप्ततालाः प्रकीर्तिताः ॥

भरतकल्पलतामञ्जरी

तालभेदाः तेषां लक्षणानि

बद्धस्तथा गदैर्हेन यतिश्चलिवटिभेवेत् ।
वाद्यगीतप्रबन्धादौ कचित्वङ्गतया [illegible] ॥
तद्विदो वादयन्त्यैनां वदन् पुट[illegible] ।
परेऽपि रुद्रं प्राहुरन्त्येधोंकार[illegible] (?) ॥
तस्मिन् प्रौढत्वमापन्ने कैमु[illegible] जनैः ।
यदापिलुनुरुनालपो न प्रौ[illegible]लासकः (?) ॥
प्रबन्धे बहवो भेदा वि[illegible] [illegible]च्छया परे ।
ततस्तालाभिधाः सर्वे [illegible]ताः धिया ॥

कुम्भः

ताललक्षणम्

अर्धमात्रं तथा व्योम व्यञ्जनं बिदुकं द्रुते ।
लघुनि व्यापकं ह्रस्वं मात्रिकं सरलं तथा ॥
द्विमात्रं च कला वक्रं दीर्घं गुरुणि कीर्तितम् ।
प्लुते अङ्कं त्रिमात्रं च दीप्तं सोमोद्भवे तथा ॥
द्रुते बिन्दुविरामान्तैरुक्तो मात्रायुता लिपिः ।
प्लुते मात्रायुते वक्रो लिपी श्रीहम्मीरसम्मतम् ।
तालानां लक्षणं वक्ष्ये तेषां सूरिमताश्रितम् ॥

हम्मीरः

तालवाद्यलक्षणम्

तालयुग्मं तु कांस्यस्य कुर्यादन्योन्यसन्निभम् ।
वर्तुलमङ्गुलमुखं मध्ये निम्नं च कीर्तितम् ॥
अङ्गुलद्वयविस्तीर्णं तलेऽप्यङ्गुलमात्रकम् ।
गुञ्जाप्रमाणविवरं पिण्डिकायां यवप्रभम् ॥

पटवस्त्राञ्चला त्रीणि रन्ध्रे प्रक्षिप्य तत्र च ।
न निर्यान्ति यथा रन्ध्राद्ग्रन्थिं दद्यात्तथाग्रतः ॥

गुरुलघ्वादिभिर्मानैस्तालश्चचपुटादयः ।
भाष्यन्ते मार्गदेशीयास्तालयुग्मेन सर्वतः ॥ सोमराजदेवः

तालवृन्तास्ययोर्लक्षणम्

चतुरस्रीकृत्य पाणीकुतपौ हंसपक्षयोः ।
उत्तानोर्ध्वं व्रजत्येको वक्षोऽन्यो यात्यधोमुखः ॥

यदा स्यातां तदा वृत्तौ तालवृन्तनिरूपणे ।
तावेव तालवृन्ताख्यानवदन्नृत्तकोविदाः ॥

हम्मीरः

तालाः

आदितालो द्वितीयश्च तृतीयः प्रतिमण्ठकः ।
मण्ठरूपकझंपाश्च ध्रुवोऽड्डुस्त्वेकतालिका ॥
वेङ्कोऽमातिलकौ कामो विष्णुर्ब्रह्मशिवा जयः ।
चिघ्ननारायणौ लक्ष्मी गुरुर्गौरी कलध्वनिः ॥
शत्रुशल्याभिधो रङ्गःश्रीकण्ठः कनकप्रभः ।
अभङ्गो जयमाला च वसन्तो राघवो रतिः ।
सर्वेऽपि मिलितास्तालाः सप्तत्रिंशन्मयेरिताः ॥

कुम्भः

ताला‌ङ्गानि

विरामं च द्रुतं चैव लघुर्गुरुप्लुते तथा ।
काकपादं तथा प्रोक्तं तालाङ्गमिति षड्विधम् ॥

भरतकल्पलतामञ्जरी

अनुद्रुतो द्रुतश्चैव लघुर्गुरुस्ततःपरम् ।
प्लुतश्चेति क्रमेणैव तालाङ्गानि च पञ्चधा ॥
द्रुतस्य देवता शम्भुः लघोश्चाद्रिपतेःसुता ।
गौरी च श्रीश्चापि गुरोः प्लुते ब्रह्मादयस्त्रयः ॥

सङ्गीतमकरन्दे

तिरश्चीनकुट्टा

कुट्टितश्चरणं पूर्वं स्वपार्श्वेऽप्यन्यपार्श्वके ।
निक्षिप्तश्चापि मध्ये च तत्रापि च निकुट्टितः ।
सा तिरश्चीनकुट्टाख्या प्रोक्ता साधप्रचारिका ॥ कुम्भः

तिरिपभ्रमरी

तिरिपभ्रमरी सैव भ्रमाङ्घ्रिस्वस्तिकात्परे ।

सङ्गीतमुक्तावली देवेन्द्रकृता

तिरिपभ्रमरीलक्षणम्

कृत्वा स्वस्तिकमंघ्रिभ्यां तिर्यग् भ्रमणमाचरेत् ।
सप्रयोगौ यदा हस्तौ तिरिपभ्रमरी तदा ॥

हम्मीरः

तिरिपादिलक्षणम् (?)

वहाक्षराडंजरजघुलम्बित तरङ्गितः ।
वहाक्षराडंजरजत्रोटितोल्लासितो तथा ॥

अविलम्बविलम्बोत्प्रविष्टा निस्सारणः परः ।
घुलम्बितात्रस्खलन्तत्रोटितोल्लासितस्तथा ॥

दीर्घकम्पितसूक्ष्मान्तस्थायकश्च तथापरः ।
त्रोटितः संप्रविष्टोत्प्रविष्टनिस्सारणाह्वयः ॥

प्रतिगृहीतोल्लासितश्च संप्रविष्टघुलम्बितः ।
त्रिभिन्नलीनस्फुरिताविलम्बकविलम्बकः ॥
ढालशब्दोत्थयन्त्रोत्थवाद्यशब्दभवः परः ।
त्रिभिन्नतिरिपस्फुरितवाद्यशब्दरुहःपरः ॥
चतुर्योगभवा एते मिश्रभेदा दशोदिताः ।
त्रिभिन्नलीनस्फुरितप्लावितोल्लासिताह्वयः ।
ढालच्छाया यन्त्रवाद्यशब्दः स्फुरितसंज्ञकः ॥
तीक्ष्णप्रेरितसूक्ष्मान्तत्रिभिन्नस्वरलङ्घितः ।
त्रिभिन्नलीनस्फुरितकम्पिताहतसंज्ञकः ॥
प्रतिगृहीतोल्लासितभ्रमिताहतहुम्फितः ।
पञ्चयोगभवाः पञ्चमिश्रभेदाः प्रकीर्तिताः ॥
तिरिपान्दोलितात्रिभिलकुरुलाहतः ।
तीक्ष्णप्रेरितसूक्ष्मान्तह्रस्वदीर्घप्लुताह्वयः ॥

यन्त्रछायावाद्यशब्दतीक्ष्णप्रेरितहुम्फितः ।
ढालना यन्त्रोत्थस्थिराकुञ्चितहुम्फितः ॥
दीर्घकम्पितसूक्ष्माग्रप्रमितस्थायकाहतः ।
तिरिपान्दोलितक्षिप्तकुरुलाहतहुम्फितः ॥
... ...

कुम्भः

तिरूरुपम् (?)

विचित्रभ्रमरी युक्तं तालः स्यात् पुण्ड्रनामकः ।
चतुरश्रादिहस्ताभ्यां तिरूरूपमुदीरितम् ॥

सङ्गीतमुक्तावली देवेन्द्रकृता

तिर्यक्करणम्

तिरश्चैकेन पादेन समुत्प्लुत्य निपात्यचेत् ।
एकपादेन पृथ्वीं चेत्तिष्ठेत्तिर्यक्कृतिः सदा ॥

कुम्भः

तिर्यक्कुञ्चिता

तिर्यञ्चं पादमाकुञ्च्य यत्र तं प्रक्षिपेन्मुहुः ।
सा तिर्यक्कुञ्चिता चारी गदिता नृत्यकोविदैः ।।

कुम्भः

—चारी

यत्राकुञ्च्य तिरश्चीनं चरणं प्रक्षिपेन्मुहुः ।
तां तिर्यक्कुञ्चितां चारीं प्राहुस्संगीतकोविदाः ।।

देवेन्द्रः

तिर्यक्कृते

धूनयन्ती करौ स्वीयौ पादयोः कुञ्चितामयोः ।
न्यञ्चं तिर्यग्गयोः कुर्यान्मुहुस्तिर्यक्कृते मते ।।

कुम्भः

तिर्यगञ्चितम्

समपादात्परं तिर्यगुत्प्लुते तिर्यगञ्चितम् ।

कुम्भः

तिर्यग्गतस्वस्तिकाग्रम्

प्रसृतौ पार्श्वयोः पूर्वं हस्तकौ तदनन्तरम् ।
मिथोभिमुखतां प्राप्य जातस्वस्तिकबन्धनौ (?) ।।
पुरताधावतो यस्मिन् सविलासं यदा तदा ।
तिर्यग्गतस्वस्तिकाग्रं तत्समन्तुरभाषत ।।

तिर्यक्ताण्डवम्

पूर्वमूर्ध्वं विधायैकं तिर्यग् नाभिप्रदेशगम् ।
अपरं करमारभ्य तिर्यक्पार्श्वान्तरं गतम् ।
यायते (?) यं क्रिया तस्यात्तिर्यक्ताण्डवचालयम् ।।

तिर्यग्भ्रमण्डलिका

तिर्यक् स्वास्फालनेनैव भ्रमणत्वं च हस्तयोः ।
तिर्यग्भ्रमण्डलिका नाम द्वितीयेऽयं प्रकीर्तिता ।।

कुम्भः

तिर्यङ्मुखा

वर्धमानं समास्थाय पादौ चेद्द्रुतमानतः ।
सव्यापसव्यं सरतस्तदा तिर्यङ्मुखा भवेत् ।।

कुम्भः

तिर्यङ्मुखौ—पादौ

वर्धमाने स्थिते स्थाने वामदक्षिणयोर्यदा ।
सरतौ द्रुतमानेन पादौ तिर्यङ्मुखौ तदा ।।

देवेन्द्रः

तिर्यक्स्वस्तिकम्

तिर्यक्स्वस्तिकमुत्प्लुत्य स्यात्तिर्यक्स्वस्तिके कृते ।

कुम्भः

तिलकः—हस्तः

त्रिपताकाह्वयौ हस्तौ ललाटे हृदयेऽपि च ।
अन्योन्याभिमुखं श्लिष्टौ तिलकाख्य इतीरितः ।।

भरतकल्पलतामञ्जरी

तुङ्गनम्रम्

संहतस्थस्य वपुषः तालमानक्रमेण हि ।
तुङ्गत्वं नम्रता देहे तुङ्गनम्रं तदा भवेत् ।।

देवेन्द्रः

तुङ्गसूतम्

हुडुके वाद्यमानेतु यत्र नृत्ये धृतांचलम् ।
रङ्गं प्रविश्य तदनु नान्दीमभिनयेत्ततः ।।
नृत्येच्छब्देन लास्यांगयुक्तेन तदनन्तरम् ।
आलापेन लसत्तुङ्गसूतलास्याङ्गसुन्दरम् ।।
चित्रितकरणं साक्षाद्रागं मूर्तमिवाङ्गकैः ।
दर्शयन् विविधं नृत्यं लास्यलीलामनोहरम् ।।
ततः पिल्लमुरूनृत्यं मध्येमध्ये यथोचितम् ।
सूलूभिर्हावभावाद्यं लयतालानुसंगतम् ।
कोमलांगैरञ्चितं च नर्तनं तनुयात्ततः ।।

तुरगलीलः—तालः

द्रुतद्वयं विरामान्ते ताले तुरगलीलके ।
विजयो गीयते तेन गीतनृत्यविशारदैः ।।

गान्धर्ववेदे

तुरुपुः—नाट्याङ्गम्

हत्ताधित्तादिपूर्वेतु दं दं दिं धाधिमध्यमे ।
एवं पाठाक्षरं यत्र स नाम्ना तुरुपुर्भवेत् ।।

भरतकल्पलतामञ्जरी

तुरीययौवनलक्षणम्

यौवनं तुर्यमप्यास्ति मदोत्साहं मनोभवम्।
म्लानाधरस्तनाभोगकपालजघनं च तत् ॥

हम्मीरः

तुल्लम्

सपादेनादितालेन धृत्वा सव्यापसव्ययोः।
स्वस्तिकीकृत्य जंघेचेद् भ्राम्येतां कर्तरीं जगुः ॥

राजतालेन तालेन नर्तनं सर्वदिङ्मुखम्।
सौष्ठवाधिष्ठितं यत्र तत्तुल्लमभिधीयते ॥

तुला—राशिहस्तः

कलशाभिधहस्तौ तु स्पृष्टाङ्गुष्ठौ परस्परम्।
तुलाराशौ चन्द्रसूर्यसङ्गमे युज्यते क्रमात् ॥

श्वारशेखरः

तृतीयकलासः

सव्ये तदितरे भागे वामे वामेतरं यदि।
आपादयेद्द्रुतं जानु सवेगं चरणौ भुवि ॥

विदधती तदा प्रोक्ता मण्डिका नृत्यकोविदैः।
मुकुलं हस्तकं कृत्वा शनैः पश्चाद्द्रुतं पुरः ॥

गच्छन्ती प्रस्खलत्येव यद्वत्यमपदं यथा।
धृतमुक्ते बलेमत्स्ये सुपदं हस्तकानपि ॥

अलिपद्ममरालं च मुकुलं वापि तन्वती।
चित्रं नृत्यति यत्रैव भेदः प्रोक्तस्तृतीयकः ॥

कुम्भः

तृतीयतालनृत्तम्

तृतीयाख्येन तालेन द्रुतमानेन यो नटः।
तदामिनेयवशगैः करैरतिमनोहरैः ॥

लास्यांगैरन्वितैः कैश्चित्कलासैरपि नृत्यति।
तदा तृतीयनृत्तं स्यान्नृत्तवेदिसुखावहम् ॥

तृतीयपताकम्

अञ्जलिं हस्तमाधाय समदृष्टिस्तदङ्गुली।
प्रसार्य शिखरं कृत्वाग्रे भुजौ प्रसरेत्पुरः ॥

कुम्भः

तृतीयपरिवर्तम्

तृतीये परिवर्ते च तत्र मन्त्रमिमं जपेत्।
नक्षत्रेऽभिजिति त्वन्तु प्रसूतः शत्रुकर्शनः ॥

जयं चाभ्युदयं चैव पार्थिवाय प्रयच्छ वै।
चतुर्थे परिवर्तेऽथ सूत्रभृत्कृतपोन्मुखः ॥

विक्षेपवेधौ रचयन् पदैः पञ्चपदीं व्रजेत्।
शशताशासन्निपाते पातत्र्यश्रध्रुवागता ॥

द्वादशैतर्द्विगुणितैः परिवर्तद्वयं भवेत्।
परिवर्तद्वयं चात्र कलाद्वादशकं भवेत् ॥

आदावन्तेऽष्टमे तुर्येगाःपरे चलाः (?)।
इयमुत्थापिनी त्र्यश्रापातास्तालादिका इह ॥

चतुरश्रात्पादहना अथ स्यात्परिवर्तिनी।
सूत्रभृत्प्रमुखा अस्यां परिवर्त्य चतुर्दिशम् ॥

कुर्वन्ति लोकपालानां वन्दनानि यतस्ततः।
परिवर्तिनो ध्रुवा स्यात्तु सर्वे ला अन्तिमो गुरुः।
चत्वारश्चरणाश्छन्दो जगतीचालपूर्विका (?) ॥

यथा—त्रिनयनममिनवमृषभगतिं अनपररटनवदनकलनम्।
मदनकदनकरनयनवरम् भजत भुवनभयशमनशिवम् ॥

त्र्यश्रमाद्यश्चतस्रः स्युः कला गुरुचया (?)।
चतुर्लाःस्युःपरा इत्थं कलाः षोडश कीर्तिताः ॥

ताभिरष्टौ सन्निपातः सन्निपातद्वयं तथा।
भवेत्प्रतिदिशं कुर्यादिग्नायेभ्यो नमः क्रमात्।
विक्षेपवेधौ रचयन् पूर्वोक्तक्रमतो सुधीः ॥

कुम्भः

तृतीयप्लवः

त्रिपताकौ करौ कृत्वा समं वा विषमासनम्।
स्थित्वा स्थित्वा समुत्प्लुत्य चरणौ दधती क्षितौ ॥

पुरो गच्छति पश्चाच्च लघुमानेन चेत्तदा।
पश्यन्ती धरणीं प्रोक्तः प्लवभेदस्तृतीयकः।

कुम्भः

तृतीयहंसः

हस्तं हंसास्यमाधाय पार्श्वयोर्ललितां गतिम्।
आलापवरतालानां क्रमतो यत्र नृत्यति।
हंसीवासौ तृतीयोऽयं भेदः प्रोक्तः पुरातनैः ॥

कुम्भः

तृतीयं नृत्यम्

एवं तृतीयाभिनये तृतीयं वस्तु रङ्गगा ।
यद्पितापुत्रकेण द्वे कुर्यातामङ्गहारतः ॥
नर्तक्यो मिलिताः पश्चाल्लताबन्धमुपाश्रिताः ।
अङ्कुरेण पुनः कुर्युरुपोहनमथ स्फुटम् ॥
अन्योन्यं मिलिताः प्राग्वत्तृतीया प्रथमान्विता ।
तृतीयं वस्त्वभिनयेन्नृत्यं कुर्याद्द्वितीयिकम् ॥

तेजः—पौरुषः

तेजः स्यात्प्राणसंरोधेऽप्यवज्ञाद्यसहिष्णुता ।

भावः

तेनकरणम्

स्यातां यत्र प्रत्वोद्ग्राहौ स्वरैश्च तेनसंयुतैः ।
तत्तेनकरणं प्रोक्तं लक्ष्ये लक्षणवेदिभिः ॥

सोमेश्वरः

तोडीलक्षणम्

छायातोडी बुधैः प्रोक्ता मध्यमांशग्रहान्विता ।
पञ्चमर्षभहीना च गीयते गीतकोविदैः ॥

मोक्षदेवः

त्रयोदशजातिलक्षणानि

इति त्रिषष्टिरत्यंशा ग्राहाः स्युरिति केचन ।
नैतद्यतो नन्दयन्त्यां पञ्चमोंशः समः ग्रहः ॥
ग्रहत्वं तत्र गान्धारस्वरस्यैव हि सम्मतम् ।
केषांचन मते तेंशा दशैवेति न संगतम् ॥
तदुक्तप्रायिकत्वेन दृश्यते सर्वजातिषु ।
ग्रहस्य विकृतिः सा तु रागभाषादिषु स्फुटाः ॥
रागाध्याये विशेषेण बाहुल्येन विलिख्यते ।
यस्मिन्नुच्चारिते सम्यग्रागव्यक्तिः प्रजायते ॥
यस्यानुवादी संवादी स्वरास्तोयोंशतां व्रजेत् ।
प्रबन्धान्तर्वर्तिनीषु विदारीषु व्यपेक्षया ॥
तारमन्द्रे व्यवस्था स्यात् बहुतान्यव्यपेक्षया ।
प्रयोगे ग्रहतां न्यासापन्यासतत्स्वरूपता ॥
सन्यासः स्याच्च विन्यासो महिम्नान्यः स्वरान् जयेत् ।
स्वरस्यांशस्वमेभिस्तु लक्षणैर्दशभिः स्मृतम् ॥
ग्रहांशौ तारमन्द्रौ च न्यासापन्यासकौ तथा ।
तथा सन्यासविन्यासावल्पताबहुते ततः ॥
तथैवान्तरमार्गस्तु षाडवौडुविते क्वचित् ।
क्वचिद्ग्रहणतो नित्यपूर्णाजातिं विहाय च ॥
षाडवौडुविततत्वे स्त इति तद्विगसमथा (?) ।
प्रोक्तानि जातिष्वेतानि लक्षणानि त्रयोदश ॥

कुम्भः

त्रवणाभाषा

मध्यमांशग्रहा हीनपञ्चमा षड्जविश्रमा ।
निषादधैवतयोः षड्जधैवतयोः क्रमात् ॥
सङ्गत्या सहताटके त्रवणा याष्टिके मते ।
रसे वीरे प्रयोक्तव्या मध्यमग्रामसंश्रया ॥

कुम्भः

त्रासलक्षणम्

अस्पर्शनसमुद्वेगैस्तथा मुखविकूणनैः ।
विद्युदुल्का घनरवा विस्फुलिङ्गार्चिषस्तथा ।
त्रस्ताङ्गाक्षिनिमेषैश्च दर्शनीयानियोक्तृभिः ॥

कुम्भः

त्रिकोणचारी

निवेशिताभिधः पादः स्थापितोऽङ्गुलिपृष्ठतः ।
निकुट्टितः पुरस्ताच्च पार्श्वे पृष्ठे निवेशितः ॥
चरणाङ्गुलिपृष्ठेन पुनः स्थाने च कुट्टितः ।
त्रिकोणचारी सोद्दिष्टा चारी चान्वर्थसंज्ञिता ॥

कुम्भः

त्रिकोणस्वस्तिकम्

विधाय स्वस्तिकौ पश्चादाकुञ्च्य पुनरूर्ध्वगौ ।
वामां सक्षेत्रपर्यन्तं करौ यदि गतौ तदा ।
तत्स्वस्तिकत्रिकोणाख्यमवदन् पूर्वसूरयः ॥

त्रिगताङ्गलक्षणम्

त्रिष्वेकत्र स्थितेषु स्यादङ्गं त्रिगतसंज्ञकम् ।
विदूषके सूत्रधारे तथा शृङ्गारधारके ॥
वर्तमाने वाक्यमाहुस्त्रिगतं वर्णयामि तत् ।
विदूषको हास्यकरीं वाचं सूत्रकृतां वदेत् ॥
कस्तिष्ठति जितं केनत्येवं रूपा समं मताम् ।
अकस्मात्किमिदं ब्रूषे हसन्त्येव महाजनाः ॥
आचक्ष्व सङ्गतां वाचमिति शृङ्गारधारकः ।
विवादो युवयोरास्तां प्रकृतं साधयन्त्विति ।
सूत्रधारो वदेत्कुर्यादथ प्रस्तावनामसौ ॥

शिङ्गभूपालः

त्रिगुणा —पाटः

भवन्ति त्रीणि खण्डानि वाद्यते यत्र चैककम् ।
त्रिगुणे त्रिगुणा सा तु भणिता त्रिविधा बुधैः ॥

त्रैगुण्यादादिमध्यान्तखण्डानां सा पुनर्द्विधा ।
क्रमव्युत्क्रमयोगेन खण्डानां तद्यथोच्यते ॥

खण्डत्रयं प्रयुज्याद्यौ द्वयमध्यं प्रयोजयेत् ।
पुनराद्यं ततःप्रोक्तमेवं त्रैगुण्यमादिमे ॥

इत्यादि त्रिगुणा प्रोक्ता यो मध्यत्रिगुणोच्यते ।
द्वेधा सा मध्यखण्डस्य त्रैगुण्याद्द्विप्रकारतः ॥

खण्डत्रयं वादयित्वा ततः प्राद्यद्वयं तथा ।
ततो मध्यमिति प्रोक्तः प्रकारः प्रथमो मया ॥

अथ खण्डत्रयं पूर्वं पश्चात्स्यादन्तिमत्रयम् ।
ततो मध्यममित्येष प्रकारः स्याद्द्वितीयकः ॥

अथोक्तं त्रिगुणा तत्र खण्डत्रितयवादनात् ।
आद्यमन्तद्वयं पश्चादन्तिमं वाद्यते पुनः ॥

एवमष्टविधा प्रोक्ता त्रिगुणा पृथिवीभुजा ।
चतुरश्रत्र्यश्रमिश्रखण्डतालेषु वा क्वचित् ॥

ताले कृतैकखण्डस्य मानेनाथ दलद्वयम् ।
अथवा चतुरश्रादि मध्यादेकेन केनचित् ॥

चतुरश्रखण्डमेकं त्र्यश्रखण्डद्वयं ततः ।
मिश्रे खण्डत्रयं वाद्यमेवं तु त्रिगुणां परे ॥

अत्र वाद्यैश्चतुर्भिः स्याद्वादेनैकेन निर्मितम् ।
कलाभिश्च तथाष्टाभिः खण्डमेकं तु लक्ष्यगम् ॥

कुम्भः

त्रिपताकः

पताकस्य यदा वक्राऽनामिका जायते तदा ।
त्रिपताकं विजानीयाद्विनियोगोऽस्य कथ्यते ॥

एष दध्यादिमङ्गल्यद्रव्यस्पर्शे प्रयुज्यते ।
प्रणामे मस्तकगतः कर्त्तव्यः पार्श्वतस्तलः ॥

अश्रुप्रमार्जने नूनमधोगच्छदनामिकः ।
आह्वानेऽङ्गुलियुग्मस्य कुञ्चनात्स्यादवाङ्मुखः ॥

उत्तानाङ्गुलियुग्मः स्याद्वदनोन्नमने त्वसौ ।
अङ्गुल्यौ संश्लेषयेत्वस्य पर्यायेण नतोन्नते ॥

अधस्तलो बहिःक्षिप्तांगुलिद्वन्द्वस्त्वनादरे ।
अधोमुखं भ्रमन् शीर्षप्रान्त उष्णीषधारणे ॥

तादृशे मस्तकादूर्ध्वं कार्यो मकुटधारणे ।
तिलकः स्याद्भ्रुवो मध्यादूर्ध्वमेष ललाटगः ॥

अलकस्यापनयने ललाटादलकाश्रितः ।
गन्धवाक् छुद्रविकृतौ नासास्पर्शोत्तरोऽधरः ॥

पक्षिष्वल्पेष्वथ लघुप्रवाहे मन्दमारुते ।
कटिक्षेत्रगतस्यास्य चलेऽङ्गुल्यावधोमुखे ।
तिर्यक्तले प्रकर्तव्ये शेषे लोकादिहोन्नयेत् ॥

विप्रदासः

त्रिपदी नान्दी

एतस्यामपि चाक्षिप्तवेषौ प्राग्वदिहोदितौ ।
अस्याः प्रयोगसमये श्लोकं रौद्ररसं पठेत् ॥

विप्रदासः

त्रिपुटः —तालः

लघुरेको द्रुतद्वन्द्व मात्राश्चाष्टौ च यत्र सः ।
त्रिपुटश्चतुरश्रः स्यादिति प्राहुर्महर्षिणः ॥

भरतकल्पलतामञ्जरी

त्रिपुटतालः

कल्याणादौ भवेद्वीरे ध्रुवकश्चन्द्रशेखरः ।
द्विदिग्वर्णपदं यत्र त्रिपुटे च विधीयते ।
द्रुतद्वन्द्वं लघुद्वन्द्वं ताले त्रिपुटसंज्ञकं ॥

गान्धर्ववेदे

त्रिभङ्गितालक्षणम्

त्रिभङ्गिस्तु लघू गुरू । ।।ऽऽ

सोमराजदेवः

त्रिभङ्गीवर्णसलकम्

पूर्वपार्श्वे ततः पश्चाद्विदिश्यपि पदक्रिया ।
करयो................... युगपत्क्रमतोथवा ।
त्रिभङ्गीवर्णसलकं चालयं तदुदीरितम् ॥

त्रिवली

त्रिवली हस्तदैर्घ्ये स्यात्सप्ताङ्गुलमुखद्वया ।
मुष्टिनिर्ग्राह्ये मध्यास्यात्कवला वक्रवृत्तका ॥

आयस्यौ ताम्रमण्डल्यौ सप्तरन्ध्रान्विते पृथक् ।
दोरकैरन्ध्रनिक्षिप्तैः कवलानद्धयोर्द्वयोः ॥

वक्त्रयोर्गाढमाबद्ध्य कार्यं मध्ये प्रवेशनम् ।
तत्र हस्तमिता कच्छास्तत्र रज्जुविनिर्मिता ॥

स्कन्धावलम्बिनी कार्या करयुग्मेन वादनम् ।
ते दों दें ति दि वर्णाः स्युः त्रिपुरा चात्र देवता ॥
इयमेव त्रिकुल्याभ्यैर्विंशत्यङ्गुलदैर्घ्यभाक् ।
एकादशाङ्गुलमुखी मध्यदेशेषु निर्मिता ॥
अङ्गुलैः पञ्चभिरसार्धैः मध्ये चांचनिका युता ।
तदर्धे पाटवर्णाद्या वाद्यन्ते तद्विदां वरैः ॥

कुम्भः

त्रिविधवेपः

शुद्धो विचित्रो मलिन इति वर्णप्रसारितः ।
वेपस्तु त्रिविधो ज्ञेयः स तु लोकानुसारतः ।
नाट्यप्रयोगसमये कर्तव्यो नाट्यकोविदैः ॥

वेमः

त्रिशिखा—हस्तः

पताकस्य तु हस्तस्य यदि वक्रा कनीयसी ।
तदा स्यात्त्रिशिखो योऽयस्त्रिसख्यावतिहस्तनी ॥

संगीतनारायणे

त्रिसञ्चः—पाटः

त्रिसञ्चो जायते सव्यहस्ताङ्गुष्ठविघट्टनात् ।
त्रिकस्य वलनात्स्कन्धसञ्चादपि मनोहरः ॥

यथा—खें ट खें द खें द खें द .

कुम्भः

त्रोटितः

स त्रोटितः प्रतिष्ठः स्यात्तत्रैकं मन्द्रतारयोः ।
त्रोटयित्वा तयोरेकः प्रतिगृह्णेत कश्चन ॥
कश्चित्स्वरे स्थिरं स्थित्वा तारं स्पृष्ट्वाम्रिवत्परम् ।
प्रत्यागच्छति यो वेगात्त्रोटितः स उदाहृतः ॥

कुम्भः

त्र्यश्रो लयः

आदौ गुरुद्वयं कार्यं चत्वारस्तु द्रुताः पुनः ।
अन्ते च लघुरेकः स्याल्लयस्त्र्यश्र उदाहृतः ॥

सङ्गीतनारायणे

द

दक्षिणः—नायकः

सद्भावं गौरवं प्रेमभयं प्रथमयोषिति ।
अन्यस्त्रीसक्तचित्तोऽपि न मुञ्चति स दक्षिणः ।

शुभङ्करः

दक्षिणो हस्तः

अङ्गुष्ठो दक्षिणो हस्तो मुहुश्चेत्ताडयेत्पुटम् ।

कुम्भः

दक्षिणहस्तकर्तरी

दक्षिणेनैवहस्तेन सघातो नखकर्तरि ।
कर्तरीवद्यदा हस्तो दक्षिणः परिदृश्यते ॥

सोमेश्वरः

दण्डतरम्

तां ताण्डमाहुः कर्णाटास्तस्यामेव यदा पुनः ।
मिञ्जिनीपरतः पादौ तं दण्डतरमीरितम् ॥

दण्डपादा—डमर्याम्

कुञ्चितश्चरणो यत्र वामतो दक्षतः क्रमात् ।
डमरी स्यात्तदा दण्डपादा चारी तदोदिता ॥

कुम्भः

दण्डरासकः—नृत्यम्

यत्र राज्ञः पुरो नार्यः स त्रिस्रोऽष्टाथ षोडश ।
द्वात्रिंशद्वा चतुष्षष्टिराधाय करपङ्कजैः ॥
दण्डौ सुवृत्तौ मसृणौ सुवर्णादिविनिर्मितौ ।
अरत्निसंमितौ दैर्घ्ये स्थौल्येनाङ्गुष्ठसंमितौ ॥
अथ देशानुरागेण गृहीत्वा दण्डचामरी ।
दण्डक्षौमाञ्चितौ यद्वाच्छूरिकादण्डकावथ ॥
चतुर्भिः पञ्चभिर्घातैर्यदा खङ्गप्रहारजैः ।
सशब्दं घातभेदैश्च युग्मी भूय वियुज्य च ॥
अग्रतः पृष्ठतो वापि पार्श्वसंगतयापि च ।
घातुभेदान्वितन्वन्त्यश्चारीभ्रमरिकादिभिः ॥
चित्रैः सव्योपसव्येन मुहुर्मण्डलसंस्थया ।
लयतालानुगं यत्र प्रनृत्यन्ति वराङ्गनाः ।
तदुक्तं नृत्ततत्त्वज्ञैर्दण्डरासकनर्तनम् ॥

कुम्भः

दण्डहस्तः

परघट्टनमङ्गुष्ठादङ्गुल्यामैश्च पीडने ।
वामेन पीडनाद्वाद्यैर्दण्डहस्तो भवेदसौ ॥

कुम्भः

—पाटः

हस्ताभ्यां क्रमतो द्वाभ्यां मृदुना दक्षिणेन च ।
वाद्यते तादृशैः पाटैः दण्डहस्तः स उच्यते ॥

अङ्गुल्यग्रैर्विनिष्पीड्य पुटमङ्गुष्ठताडनात् ।
वामनिष्पीडनाचापि दण्डहस्तः प्रजायते ॥

यथा—खुं दें ड ३ ट रि ३ — कुम्भः

—हस्तपाटः

पताकरेकहस्ताभ्यामूर्ध्वघातः क्रमाद्यदा ।
क्रियते दण्डहस्तोऽसौ पाटः पाटविदोदितः ॥

दां धयकटदां खरिखरिदां ।

कुम्भः

दन्तिलमते तालस्य नियमहेतुत्वम्

तत्र ज्ञेयाः कलापातकलामार्गास्तथैव च ।
मात्रा च परिवर्त्तश्च वस्तु चैव विशेषतः ॥

हम्मीरः

दर्पणताललक्षणम्

दर्पणो खद्वयं दीर्घः । ० ० ऽ

सोमराजदेवः

दर्पसरणम्

दर्पसरणं प्रोच्यतेऽधुना ।
वैष्णवस्थानमास्थाय पृथिव्यां पार्श्वतः पतेत् ॥

कुम्भः

दशप्राणाः

समानो मधुरः सान्द्रः कान्तो दीप्तः समाहितः ।
अमाम्यो सुकुमारश्च प्रसन्नौजस्विनाविति ॥

मान्धातादिपदेषु स्युः प्राणा दश दशस्विमे ।
समानोऽल्पाक्षरो नादो मधुरः स्वल्पमूर्छनः ॥

सान्द्रः स्यान्निविडैर्वर्णैः कान्तस्तारमनोहरः ।
तारः प्रकाशको दीप्तः स्थायिस्थस्तु समाहितः ॥

ध्वनिरमाम्य इत्युक्तः सञ्चारी वर्णसंश्रितः ।
सुकुमारो ध्वनिः प्रोक्तो मूर्छना वर्णमार्दवात् ॥

पदस्थानस्वरादीनां प्रसक्तेस्तु प्रसन्नकः ।
ऊर्जःप्रचुर ऊर्जस्वी दशानामिति लक्ष्णम ॥

मोक्षदेवः

दशलास्याङ्गानां लक्षणानि

यदोरुकटिबाहूनां यौगपद्येन चालनम् ।
चालिः साशैघ्र्यसांमुख्यप्राया चालिवढो भवेत् ॥

सुकुमारं तिरश्चीनं विलासरसिकं च यत् ।
युगपत् कटिबाहूनां चालनं सा लढिर्मता ॥

कर्णयोर्हावबहुलं लसल्लीलावतंसयोः ।
विलम्बेनाविलम्बेन कृतं तल्लयचालनम् ॥

विलम्बेनाविलम्बेन कुचयोर्भुजशीर्षयोः ।
ललितं चालनं तिर्यक् तज्ज्ञाः प्राहुरुरोऽङ्गणम् ॥

धसकं स्यात्सुललितं स्तनाधोनयनं लयात् ।
सताला ललितोपेता क्रमात्कार्या द्वयोन्नतिः ।
धनुर्वदङ्गहारः स्याद्धम्मीरनृपसंमतम ॥

हम्मीरः

दशलेताललक्षणानि

द्वितीयाद्यतृतीयानां विकारात्कोमला मता ।
द्वितीयाद्यतुरीयानां विकृतौ विजयोदिता ॥

पञ्चमाद्यद्वितीयानां गुरुमध्या विकारतः ।
तृतीयाद्यचतुर्थानां विकाराज्जयमङ्गला ॥

पञ्चमाद्यतृतीयानां वीरश्रीः स्याद्विकारतः ।
रत्नमाल्यं द्वितीयस्यान्यत्वे चतुर्थतृतीययोः ॥

द्वितीयपञ्चमे तुर्ये विकृते रतिमङ्गला ।
विकृतिस्तनुमध्या स्यात्तृतीयतुर्यपञ्चमैः ॥

द्वितीयस्य तृतीयस्य पञ्चमस्य विकारतः ।
एला रतिप्रभा ज्ञेया त्रेता स्याद्दशधेति च ॥

मोक्षदेवः

दाक्षिणात्या—प्रवृत्तिः

मृदुमधुरललितवृत्ताभिनयोपेता च कैशिकीप्राया ।
बहुगीतवाद्यरुचिरा प्रवृत्तिरिह भवति दाक्षिणात्या सा ॥

वेमः

दाक्षिणात्यदेशाः

कोसलास्तोसलासद्वदान्ध्राश्च द्रमिलास्तथा ।
महाराष्ट्राश्च कर्णाटाः कोङ्कणा मलया अपि ॥

अन्तराले च विन्ध्यस्य दक्षिणस्य च वारिधेः ।
एवमाद्यास्तु ये देशा दक्षिणात्यास्तु ते मताः ।
कैशिकीं सात्त्वतीं वृत्तिं तत्प्रयोगश्च संश्रितः ॥

दानवीरः

राज्यं प्रियामपि सुतं स्वशरीरकं वा
दत्वा प्रसन्नवदनो द्विजसत्तमाय ।
क्षुद्धान्तलोचनविषादतिदुःखितोऽपि
प्रोक्तोऽयमेव मुनिना भुवि दानवीरः ॥

हरिश्चन्द्रो बलिः कर्ण दधीचिः पशुनन्दनः ।
एत एव स्मृता लोके दानवीरा मनीषिभिः ॥

मुखप्रसादो हर्षश्च विनयः सत्त्वशालिता ।
धैर्यश्चाभिनये कार्यं दानवीरस्य सूरिभिः ॥

जगद्धरः

दिग्भ्रमरी

भ्रामं भ्रामं सकृत्प्राग्वद्यत्र हस्तधृतक्षितिः ।
चतुर्दिक्षु च क्ष्मास्थितदा दिग्भ्रमरी मता ॥

कुम्भः

दिग्वर्षाभिधचालनम्

दिग्वर्षाख्यमनङ्गांगा मोटनं तोरणाभिधम् ।
अनङ्गोद्दीपनं चाथ तथा मुरजकर्तरी ॥

पञ्चेति चालयानि स्युरधिकानि मतान्तरे ।
पुरस्तात्पार्श्वयोस्तिर्यगूर्ध्वं पश्चाच्च लोडितः ।
करो यत्र तदुद्दिष्टं दिग्वर्षाभिधचालनम् ॥

दिण्डम्

उद्धृत्य चरणद्वन्द्वं वज्रनिष्पीडनोपमम् ।
परि भ्राम्यावनीं याति यदि तद्दिण्डमुच्यते ॥

दिव्यस्त्रीणां भूषणविधिः

अथाङ्गनानां दिव्यानां स्वस्वरूपोपलब्धये ।
कथ्यते भूषणविधिर्मया नाट्ये यथोचितम् ॥

शिखाबन्धं शिखण्डं च भूषां मौक्तिकभूयसीम् ।
वेषं शुद्धं प्रकुर्वीत विद्याधरमृगीदृशाम् ॥

वेषमप्सरसां कुर्यात्केवलं रत्ननिर्मितम् ।
एष एव भवेद्वेषो यक्षाणामधिकश्शिखा ॥

शुकपक्षप्रतीकाशैर्वस्त्रैर्वैडूर्यमौक्तिकैः ।
अवेषं च प्रयुञ्जीत नाट्ये त्रिदशयोषितम् ॥

एष एव विधातव्यो वेषः पन्नगयोषिताम् ।
किन्तु तासां फणं कुर्यान्मुक्तामणिविनिर्मितम् ॥

मुक्ताहारैर्मरतकैर्ह्यरिद्रवसनैरपि ।
विभूषणं विधातव्यं नाट्ये सिद्धमृगीदृशाम् ॥

पद्मरागमणिप्रायं वल्लकीविलसत्करम् ।
जपाकुसुमसंकाशैः कौसुम्भैर्वसनैर्युतम् ॥

एष गन्धर्वयोषाणां कल्पयेन्नाट्यकर्मणि ।
वेषः स्यान्मुनिकन्यानामेकवेणीसमन्विताः ॥

नैव तासां विधातव्यं प्राचुर्येण विभूषणम् ।
इन्द्रनीलमणिप्रायः सितदंष्ट्रासमन्वितः ॥

निशाचराणां वेषः स्यान्नीलैर्विर्वसनैरपि ।
योषितां मानुषीणां तु तत्तद्देशानुसारतः ॥

भूषाकर्म विधातव्यं नाट्यलक्षणवेदिभिः ।
एवं नानाविधं वेषं विधानं नाट्यसंश्रयम् ॥

देशजातिवयोऽवस्थायोगं स्त्रीणां प्रयोजयेत् ।
अतथाकल्पितो वेषो हास्यायैवोपजायते ॥

वेमः

दीप्तप्रसन्नः

दीप्तप्रसन्नस्तारेपि यः सौकर्यमुपागतः ।

कुम्भः

दीर्घकम्पितः

स दीर्घकम्पितो यत्र सुचिरं कम्पनो स्वरः ।

कुम्भः

दुन्दुभिः

दुन्दुभिः स्यान्महागात्रो महानादोऽतिमञ्जुलः ।
ताम्रहेमसमुद्भूतो वलयाभ्यां विवर्जितः ॥

कांस्यभाजनसंभारगर्भो वध्रैः समन्ततः ।
गाढं बद्धश्चर्मनद्धवदनोऽयं प्रवाद्यते ॥

चर्मनिर्मितकोणेन महाप्राणेन दुन्दुभिः ।
मेघगम्भीरनिर्घोषध्वानोध्वांकारपाटभाक् ।
मङ्गले विजये देवमन्दिरे च प्रवाद्यते ॥

कुम्भः

दूताः

निसृष्टार्थो मितार्थश्च तथा सन्देशहारकः ।
निगूढार्थश्च दुर्ज्ञातः दूतदूत्योऽपि तत्समाः ॥

शुभङ्करः

दूत्यः

सखी धात्री नटी दासी शिल्पिनी प्रतिवेशिनी ।
बाला प्रव्रजिताभीरी मालाकारी च रेहरी ।
मार्गे द्यूतं तपस्विन्या गण्या द्वादश दूतिकाः ॥

शुभङ्करः

दृतछायाः

येषु दृतत्वं शब्दस्य छायास्ते दृतशब्दजाः ।

कुम्भः

दृश्यम्

दृश्यं दर्शनयोगेन निर्देश्यं च यथोचितम् ।

वेमः

दृष्टयः

शून्या च मलिना चैव श्रान्ता लज्जान्विता तथा ।
म्लानाथ शङ्किता चैव विषमा मुकुला मता ॥

कुञ्चिता ह्यभितप्ता च जिह्मा च ललिता तथा ।
वितर्कितार्धमुकुला विभ्रान्ता विप्लुता तथा ॥

आकेकरा विशोका च त्रस्ता च मदिरा तथा ।
षट्त्रिंशद्दृष्टयस्त्वेता नामतस्त्वथ लक्षणम् ॥

हम्मीरः

दृष्टीनां सङ्ख्या

षट्त्रिंशसङ्ख्यया प्रोक्ताः दृष्टयः पूर्वसूरिभिः ।
कान्तादयोऽद्भुतानां स्युः तत्रादौ रसदृष्टयः ॥

स्निग्धाद्या विस्मितान्तास्तु तथाष्टौ स्थायिभावजाः ।
शून्यादयो विकाशान्ताः सञ्चारिण्यस्तु विंशतिः॥

सोमराजदेवः

देवानां भूपतीनां च भूषणानि

चूडामणिश्च मुकुटं मुक्ताहारश्च कूसकम् ।
अङ्गदं चापि केयूरमङ्गुलीयकमेव च ॥

भूषणान्येवमादीनि देवानां भूभुजामपि ।
यथोचितं तु धार्याणि तत्तद्देशानुसारतः ॥

वेमः

देवादिनटनम्

प्रत्यक्षा येऽभिनेयास्ते भयोद्वेगैस्सविस्मयैः ।
स्वभावैश्चेष्टितैर्देवाः प्रणामकरणादिभिः ॥

अप्रत्यक्षा विनिर्देश्याः प्रयोगनिपुणैर्नटैः ।
प्रत्यक्षा देवताः साक्षात्पूजोपकरणादिभिः ॥

निर्दिशेदथ वृक्षादीनचलांश्च समुच्छ्रितान् ।
ऊर्ध्वप्रसारणाद्बाह्वोर्दर्शयेल्लोकयुक्तितः ॥

मञ्जुलैरुज्ज्वलैर्वेपैर्निर्निमेषैर्विलोचनैः ।
मुदितेनापि मनसा दर्शयेद्दिव्ययोषितः ॥

चमूसमूहमम्बोधिविस्तीर्णं वनमेव च ।
विक्षिप्ताभ्यां पताकाभ्यां निर्दिशेन्नाट्यनृत्ययोः ।
कामेन महशापाभ्यां ज्वरेणापि च येऽर्दिताः ॥

अशोकः

देवोपहारकम्

अरालकपरावृत्तेरुभयोः पार्श्वयोरपि ।
सरलप्रसृतस्याग्रे करस्य लुठति ... ... ॥

संप्राप्य कूर्परक्षेत्रं परे लुठति यत्र तत् ।
देवोपहारकं प्रोक्तं तदा नृत्तविचक्षणैः ॥

देशकाकुः

देशस्वभावजा छाया रागे या वर्तते क्वचित् ।
सा देशकाकुर्विज्ञेया रागकाकुविचक्षणैः ॥

कुम्भः

देशछाया

देशच्छायोद्भवो रागो देशच्छायोच्यते बुधैः ।

कुम्भः

देशी

नाट्यमार्गोपाधिभिन्नं द्विधा नृत्यमुदीरितम् ।
नृतेः क्तप्रत्यये रूपं देशी नृत्यमिहोदितम् ॥

कुम्भः

देशे देशे नृपादीनां यदाह्लादकरं परम् ।
गानं वाद्यं तथा नृत्तं तद्देशीत्युच्यते बुधैः ॥

सङ्गीतनारायणः

जनानां प्रतिदेशं यन्मनोरञ्जनकारकम् ।
देशीति कथ्यते सर्वैराचार्यैर्भरतादिभिः ॥

कुम्भः

देशीकरणोपसंहारः

आचार्यनर्तकग्रन्थसंप्रदायानुसारतः ।
षट्त्रिंशत्करणान्येवमुक्तान्युत्प्लुतिपूर्वकम् ॥

अन्येऽपि सन्ति भूयांसो भेदाः करणमार्गगाः ।
तान्नावोचद्विप्रदासो ग्रन्थविस्तरकारतः ।।

विप्रदासः

देशीनृत्तम्

नृत्तेः क्तप्रत्यये रूपं देशीनृत्तमिहोदितम् ।

कुम्भः

देशीनृत्यम्

क्तप्रत्ययान्तादुक्तार्थाद्धातोर्निष्पद्यते पुनः ।
नृत्तशब्दो विवक्षार्थां शोभारूपश्च कर्मणः ।
देशीयमेतदेवोक्तं पण्डितैर्नृत्यवेदिभिः ।।

विप्रदासः

देशीनृत्यविधिः

श्रुतीर्गीतं कलासश्च तालश्चेति चतुष्टयम् ।
यालप्त्यादिकभेदेन देशी नृत्यविधिक्रमः ।।

पृथक्प्रदर्शितः कैश्चित्स एवात्रोपदिश्यते ।
सङ्गप्रवेशे सञ्जाते पार्श्वयोश्चतुरः करान् ।।

अग्रतः षोडश पश्च नर्तक्यो गायकैस्ततः ।
आलप्तौ क्रियमाणायां नर्तकी वामपाणिना ।।

धृत्वा चेलाञ्चलं दक्षे पताकं दधती करे ।
कलासैर्हावभावाभ्यां युतं भ्रमणमाचरेत् ।।

कुम्भः

देशीपटहः

दक्षिणं वदनं तस्य मितं सप्तभिरङ्गुलैः ।
वामं तु वदनं तस्य भवेत्सार्धषडङ्गुलम् ।।

यदान्तरं पक्षोश्चर्म जठरं तत्प्रकीर्तितम् ।
उद्दलीसंज्ञकस्तेन वामं वक्त्रं विधीयते ।।

यन्मया मार्गपटहे लक्षणं प्रागुदीरितम् ।
तदशेषं विधातव्यन्तमस्मिन पटहे बुधैः ।।

कुम्भः

देशीयकरणानि

अन्याङ्गेन समायोगो न कार्यश्च नरैः सदा ।
उच्चैर्देशीयकरणानि मनोहराणि तत्तत्स्वदेशललनालपनेषु चित्रम् ।
तेन त्रिनेत्रपरितोषकरेण राज्ञा देशप्रसिद्धकरणानि विनिर्मितानि ।।

कुम्भः

देशीरागाः तल्लक्षणानि च

देशीरागान् प्रवक्ष्यामः पूर्वशास्त्रानुसारतः ।
ते च रागाङ्गभाषाङ्गक्रियाङ्गोपाङ्गसंज्ञकाः ।।

ग्रामरागस्य भाषाङ्गक्रमाच्छायानुकारतः ।
ग्रामाङ्गमथ भाषाङ्गमुपाङ्गं त्वनया भवेत् ।।

तन्त्रीतानक्रियायोगात्क्रियाङ्गं जगदुर्बुधाः ।
पवनाज्जायते नादो नादतः स्वरसम्भवः ।।

स्वरात्सञ्जायते रागः स रागो जनरञ्जकः ।
रञ्जनादागता भाषा रागाङ्गादेरपीष्यते ।।

गीते वाद्ये च नृत्ये च रक्तिः साधारणो गुणः ।
सा चेदस्ति किमन्येन दूषणेन गुणेन च ।।

हम्मीरः

देशीलक्षणम्—अभिनयः

नाट्ये ह्यभिनयश्चित्रात्प्रच्छादनफलं हि तत् ।
एतद्देशीति विख्यातं तत्तद्देशजयेच्छया ।।

नृत्तरत्नावली

देशीलालक्षणम्

प्रान्तप्रासात्मका लाटी नानारसविभूषिता ।
वर्जिता गमकप्रासैर्गौडीत्वेकरसा मता ।।

नानाप्रयोगरागांशरसा भावास्युटङ्किका ।
भूरिभावरसोत्कर्षा द्राविडी प्रासवर्जिता ।।

मोक्षदेवः

देहजस्वराः

अतिसूक्ष्मश्च सूक्ष्मश्च पुष्टोऽपुष्टस्तथैव च ।
तारश्चेति च विज्ञेयाः पञ्चधा देहजाः स्वराः ।।

सङ्गीतमकरन्दे

दोलम्

यत्रोऽधोर्ध्वो मुखो व्यश्रलीलया लुठितः क्रमात् ।
करस्तद्दोलमादिष्टं चालयं भाक्तैर्बुधैः ।।

दोषाः

प्रोच्यते गायकप्रीत्यै सर्वभूतानुकम्पिना ।
अपथ्यवर्जनाद्दोषाः न स्युः प्रायो नृणां यतः ।।

अतस्तद्वर्जनं पूर्वमुच्यते ऽन्यं ततोऽपि च ।
गायनो वर्जनक्षारं चान्नं पर्युषितं तथा ।।

आरनालं यवान्नं च वटुकं चापि यद्भवेत् ।
गुरुप्रायमिहाग्यघन्माहिषक्षीरमूषितः ॥
श्लेष्मकारी च यत्प्रायस्तदशनीयान्न कर्हिचित् ।
प्रत्यूषे मधुना साकं चूर्णमाहौषधं लिहेत् ॥

कुम्भः

दोहदभेदाः

प्राकृते दोहदाख्यः स्यात्तद्भेदाः कीर्तिता नव ।
सारसो भ्रमरो हंसः कुररश्चन्द्रलेखकः ॥
कुञ्जरस्तिलको हंसक्रीडोऽप्यथ मयूरकः ।
त्रयोदश युजि समे मात्रा द्वादश सारसे ॥
ऊर्जेह्वौ मनवो मात्रा भ्रमरे रवयः समे ।
मात्रा पञ्चदशायुग्मे समे हंसे त्रयोदश ॥
त्रयोदश युजि कलाः कुररे मनवो युजि ।
ऊर्जे कलाचन्द्रलेखे तिथयो रवयः समे ॥
ऊर्जेत्रयोदशकलाः कुञ्जरे तिथयः समे ।
मात्राः पञ्चदश युग्मे तिलके मनवः समे ॥
त्रयोदश सामहंसक्रीडे युग्मकलाः कलाः ।
यद्येषामर्द्धयोरन्ते पञ्चादिलघुभिः शिखा ।
तं शिखा द्विपथं प्राहुर्मयूरमपि सूरयः ॥

मोक्षदेवः

दौहित्रनप्तृहस्तः

मृगशीर्षतिर्यगानि वामे हंसास्यहस्तकः ।
दौहित्रनप्त्रोर्युज्येतेत्यगस्त्येन प्रकीर्तितम् ॥

द्रुता

एतेष्वेव तु भावेषु करुणावेदिनेषु च ।
ध्रुवा द्रुता च कर्तव्या करुणे भावसंश्रयाः ॥

नाट्यशास्त्रे

द्वन्द्वभेदाः—तल्लक्षणानि च.

उपवीतं समाश्रित्य द्वादशाङ्गविधानतः ।
यथाङ्गिकसमायुक्तः सोऽयमाहार्य ईरितः ॥
स्ववाचिकं समासाध्य शिरोनेत्रादिभिः क्रमात् ।
स स्यादभिनयो नाम्ना भाविकद्वन्द्वसंज्ञिकः ॥
अनुकृत्य परान् शुद्धगीतवाचिकनर्त्तनान् ।
संभाषणादिभिर्भावाधिक्यः स्यादनुकारिकः ॥

शृङ्गारशेखरः

द्वात्रिंशत् चारीणां लक्षणानि

बद्धां विधाय चारीं चेदुध्दृत्याङ्घ्रिं च कुञ्चितम् ।
पार्श्वे विनिक्षिपेच्चारीमपक्रान्तां तदादिशेत् ॥
नीत्वोपरि स्वपार्श्वेन कुञ्चितं चरणं ततः ।
पार्श्वयोः पातयेद्भूमौ पार्श्वपादा तदोच्यते ॥
कुञ्चितं पादमुत्क्षिप्योत्प्लुत्य भूमौ निपातिताम् ।
अन्याञ्चिताङ्घ्रिं जघनं पश्चाद्देशे क्षिपेद्यदा ॥
तदा मृगप्लुता ज्ञेया साविर्भूयककर्तृका ।
कुञ्चितोत्क्षिप्तपादस्य जानुस्तत्र समं यदा ॥
न्यस्य तद्यौ कृतोऽन्योऽङ्घ्रिरूर्ध्वं जानुस्तदा भवेत् ।
पृष्ठप्रसारिताङ्घ्रिश्चेदन्योर्वाभिमुखं तलम् ॥
कृत्वा पार्ष्णिं स्वपार्श्वे क्षमान्यास्तालाता तदोदिता ।
उत्क्षिप्य कुञ्चितं पादं जङ्घामस्य प्रसार्य च ॥
जान्वन्तो चोरुपर्यन्तामप्रयोगेन तं भुवि ।
चरणं पातयेद्यस्यां सा सूचीति निगद्यते ॥
पश्चान्नीत्वाञ्चितं पादं तस्य पार्श्वयो स्फिजं स्पृशेत् [?] ।
तं ततोऽन्वितजङ्घं च भूमावग्रतले न चेत् ॥
निपातयेत्तदा चारी प्रोक्ता नूपुरपादिका ।
पादं कुञ्चितमुद्धृत्य दोलयित्वा च पार्श्वयोः ॥
न्यस्येत् पार्श्वयो स्वपार्श्वे चेद्दोलापादा तदोच्यते ।
नूपुरश्चरणौ न्यस्य पार्ष्णिदेशे निधाय चेत् ॥
स्वदेहक्षेत्राभिमुखं जान्वग्रं [?] तेन वेगतः ।
अग्रे प्रसार्यते चारी दण्डपादा तदोच्यते ॥
पृष्ठतो वलितं स्पृष्ट्वा शिरो भ्रान्त्वा च सर्वतः ।
प्रसृतश्चरणो यत्र विद्युद्भ्रान्ता भवेदसौ ॥
अतिक्रान्तामतं पादं न्यस्तास्योरोर्विवर्तितम् ।
कृत्वा पादान्तरतलभ्रमेण भ्राम्यते तनुः ॥
यत्र सा भ्रमरी चारी हम्मीरेण प्रकीर्तिता ।
अन्योरुमूलक्षेत्रान्तं पादमुत्क्षिप्य कुञ्चितम् ॥
नितम्बाभिमुखी पार्ष्णिः कुर्याज्जानु स्वपार्श्वगम् ।
यत्रोत्तानं पादतलं कटिजानुविवर्तनात् ॥
अनङ्गवासिता सा स्याद्भुजङ्गत्रासलूचिका [?] ।
तालक्षयान्तरक्षिप्तं कुञ्चितं पादमानयेत् ॥

पार्श्वान्तरं तु जघनं स्वस्तिकीकृत्य पातयेत् ।
धरण्यां पार्ष्णिभागेन यत्राक्षिप्तामम् विदुः ॥

विश्लिष्टजङ्घयोः कृत्वा स्वस्तिकं तस्य कुञ्चितम् ।
पादः प्रसारितो वक्षः स्वपार्श्वस्थोऽथ पात्यते ॥

पाष्ण्यां पाष्ण्यन्तरक्षेत्रे पराविद्धा भवत्यसौ ।
आविद्धा पादमन्योरुप्रदेशस्थास्तु पार्ष्णिकम् ॥

कृत्वोत्प्लुत्य भ्रमरकं दत्वा यत्र निपातयेत् ।
तथान्यं पादमुद्धृत्य सोद्धृत्ताशेषरूपिणी ॥

ललितां च क्रियासाध्याश्चार्यो युद्धनियुद्धयोः ।
नृत्ये नाटचगतौ चैताः प्रयोक्तव्या मनीषिभिः ॥

प्रधाने यो यदा यत्र हस्तः पादोऽथवा भवेत् ।
साम्ये तदनुगोऽन्यः स्यात् साम्ये तु समकालता ॥

यतः पादस्ततो हस्तो यतो हस्ततस्त्रिकम् ।
चरणानुचराण्याहुरङ्गोपाङ्गानि सूरयः ॥

हम्मीरः

द्वादशपदानान्द्युदाहरणम्

पैर्द्वादशभिर्यस्यास्नान्दीं तामपि वर्णये ।
करेण नीवीं वदनेन लज्जामंसेन धम्मिल्लभवे वहन्ती ।
रताबसाने नवकेलितल्पादुद्वीस्थिता पातु पिनाकिकान्ता॥

अत्रापि वृत्ते शुद्धेऽपि पूर्ववद्योजना भवेत् ।
नान्दीसमाप्तौ गायन्ति ध्रुवां नैष्कामिकीं ततः ॥

विप्रदासः

द्वादशवर्णेलाः

वर्णानां नियमादेव वर्णेला परिकीर्त्यते ।
लक्ष्म नामानि तासां च क्रमणे ब्रूमहेऽधुना ॥

षडक्षरादिपु पादेष्वेकैकाक्षरवृद्धितः ।
वर्णेला द्वादशाप्यत्र यावत्सप्तदशाक्षरम् ॥

आद्या मधुकरी ज्ञेया द्वितीया सुस्वरा मता ।
तृतीया करिणा प्रोक्ता चतुर्थी सुरसा ततः ॥

प्रभञ्जनी पञ्चमी स्यात्षष्ठी मदनवत्यथ ।
सप्तमी शशिनी ज्ञेया प्रभावत्यष्टमी तथा ॥

नवमी मालती प्रोक्ता दशमी ललिता मता।
एकादशी भोगवती परा कुसुमवत्यपि ।
अन्ये च बहवो भेदाः सन्ति ते नात्र कीर्तिताः ॥

मोक्षदेवः

द्वितीयकलासः

त्रिपताकौ करौ कृत्वा विषयासनमास्थिता ।
मण्डिकौ चरणौ कृत्वा यथालास्यं पदे पदे ।
नयन्तीह न कौचित्र सन्दंशमथ तन्वती ॥

पश्यन्ती पार्श्वयोरेव चकितेव यदा नटी ।
कुरुते नृत्यमेषा सा बकभेदो द्वितीयकः ॥

कुम्भः

द्वितीयपताकम्

अर्धचन्द्रं करं कृत्वा दक्षिणं तस्य संमुखम् ।
आनीय कार्मुकाकारं जानु कुर्याद्द्वितीयके ॥

कुम्भः.

द्वितीययौवनलक्षणम्

पीनोरु जघनं पीनं कठिनोरुघनस्तनम् ।
जीवितं मन्मथस्योक्तं द्वितीये यौवनं बुधैः ॥

हम्मीरः

द्वितीयहंसः

मुकुलं हस्तमारभ्य पादाभ्यां पृष्ठतो व्रजेत् ।
विचित्रलास्यभेदज्ञा हंसीवासौ द्वितीयकः ॥

कुम्भः

द्विमूढकलक्षणम् (लासः)

मुखप्रतिमुखोपेतं चतुरश्रपदक्रमम् ।
श्लिष्टभावरसं वक्तद्वैचित्र्यार्थं द्विमूढकम् ॥

नृत्तरत्नावली

द्विशिखरः

शिखरं द्वन्द्वसंयोगात्करयोर्द्विशिखरो मतः ।
हृदये तस्य विन्यासो विहितः पूर्वसूरिभिः ॥

संगीतमुक्तावली देवेन्द्रकृता

द्विशिखरः

श्लिष्टौ मिथश्चेच्छिखरौ करौ द्विशिखरस्तदा ।
शयनार्थेऽङ्गुलिस्फोटे नास्तीति कथनेऽपि च ॥

कुम्भः

ध

धनुराकर्षणम्

स्वस्तिकीकृतयोः पाण्योर्वेगोतिर्यक्च सर्वतः (?) ।
पार्श्वेऽथैककरो कस्मान्निवर्त्ती यदि कर्णगः ।
धनुराकर्षणं प्रोक्तं तथात्वन्वर्थनामकम् ॥

धनुर्वल्लीविनामकम्

कृत्वोर्ध्वाधोमुखौ हस्तौ विलासात्क्रमतो यदि ।
मण्डनाक्रान्तिसंक्रान्तौ ततस्तावेव पूर्ववत् ।
शीर्षदेशे कटीदेशे पार्श्वयोर्नेति संयुतौ ॥
स्यातां तत्र... ।

धातुः

धातुः प्रबन्धावयवः स चतुर्धा प्रकीर्तितः ।
निबद्धस्यादिमो भाग उद्ग्राह इति कीर्तितः ॥

आदावुद्गृह्यते येन सोऽत्र उद्ग्राहसंज्ञकः ।
द्वितीयभागो मेलाप उद्ग्राहध्रुवमेलनात् ॥

ध्रुवत्वाद्ध्रुवसंज्ञस्तु तृतीयो भाग उच्यते ।
आभोगस्त्वन्तिमो भागो गीतपूर्णत्वसूचकः ॥
ध्रुवाभागान्तरे जातो धातुरन्योऽन्तरामिधः ।
स तु सालगसूडस्थरूपकेष्वेव दृश्यते ॥

वातपित्तकफा देहधारणाद्धातवो यथा ।
एवमेते प्रबन्धस्य धातवो देहधारणात् ॥

एष धातुस्सर्वदेहव्यापकोऽङ्गविलक्षणः ।
अङ्गानामेकदेशत्वं प्रसिद्धं दृश्यते यतः ॥

स द्विधातुस्त्रिधातुश्च चतुर्धातुरिति त्रिधा ।
आभोगमेलापकयोः क्वचित्क्वचिदभूवतः ॥

षडङ्गानि प्रबन्धस्य स्वरश्च विरुदं पदम् ।
तेन्नकः पाटताली च पुंसो नेत्रादिकाङ्गवत् ॥

तत्र तेनपदे स्तः पाट विरुदेक्षरौ (?)।
कराभ्यामुद्भवात्कार्ये कारणत्वोपचारतः ॥

प्रबन्धगतिहेतुत्वात्पादे तालस्वरौ मतौ ।
सरिगाद्याः सप्तवर्णाः षड्जादिध्वनिवाचकाः ॥

स्वराभिव्यक्तिसंयुक्ताः स्वरास्तत्र प्रकीर्तिताः ।
संबध्यन्तपदैरेव नेतुर्यदुपबध्यते ॥

वर्णनं धैर्यशौर्यादिर्विरुदं नाम तन्मतम् ।
क्रियाकारकसंबन्धरूपतो यन्निबध्यते ॥

वर्णनं धैर्यशौर्यादि तदेवात्र पदं स्मृतम् ।
अतो न संकराशंका विरुदस्य पदस्य च ॥

तेन्नवो नामतो नेत्ति शब्दस्य विकृतिर्भवेत् ।
विकृतत्वं च भाण्डीरभाषयास्य समागतम् ।
सोऽयं तेनेति शब्दश्च तच्छब्दोपनिबन्धकः ॥

तुलजः

धातुमाने फलः

अथानक्षरताले तु प्रवृत्ते गीतमानतः ।
संदंशनपताकाभ्यां नर्तकीनृत्यमाचरेत् ॥

ध्रुवे नृत्ये यथौचित्यं षट् चत्वारोऽथ पञ्च वा ।
धातुद्वये द्विताली स्यात्कलासो हस्तकस्तथा ॥

स्वेच्छया तु प्रकर्तव्य इति गीतविदो विदुः ।
षडुक्ता मण्ठका यत्र त्रिताली तेषु संमिता ॥

कुम्भः

धृष्टः (नायकः)

अत्यर्थभाषी दुश्चेष्टस्तार्जितोऽपि न सीदति ।
व्यक्तापराधचेष्टो यः स धृष्ट इति कीर्तितः ॥

शुभङ्करः

धैर्यम्—(पौरुषः)

सर्वात्मनाप्युपक्रान्तनिर्वाहः स्थैर्यमुच्यते ।

शैमभूपालः

ध्यानस्य मुख्यता

ध्यानं विना रागसमूहमेतं गायन्ति रागे निपुणा जना ये ।
सङ्गीतशास्त्रोक्तफलानि रागास्तेभ्यः प्रयच्छन्ति कदापि नैव ॥

कुम्भः

ध्रुवः

ध्रुवत्वेन प्रबन्धेषु सम्भवात् ध्रुव उच्यते ।

सोमराजदेवः

ध्रुवः—तालः

लघुरेको द्रुतं त्वेकं लघुद्वन्द्वं चतुर्दश ।
मात्रा यत्र प्रयुज्यन्ते चतुरश्रध्रुवस्स्मृतः ॥

भरतकल्पलता

ध्रुवकलक्षणम्

उत्तमः षट्पदः प्रोक्तो मध्यमः पञ्चभिस्तथा ।
कनिष्ठस्तु चतुर्भिः स्यादेवं स्युर्ध्रुवकास्त्रिधा ॥

एकधातुर्द्विखण्डः स्याद्यत्रोद्ग्राहस्ततः परम् ।
यं किञ्चिदुक्तं ... स्यात्खण्डे गमकशोभनम् ॥

ततो द्विखण्ड आभोगस्त्रयस्तस्य च खण्डकम् ।
उत्संगमकमुक्तं वै नेव स्वाम्यावृतं च यत् ॥

उद्ग्राहस्याद्यखण्डं च न्यासः स ध्रुवको मतः ।
एवं हि षट्पदः प्रोक्तमुत्तमो ध्रुवको बुधैः ॥

पञ्चपादस्य तूद्ग्राहे पदयुग्मं प्रशस्यते ।
तृतीयं चोषखण्डं स्यादित्युभयतमिदं त्रयम् ॥
आभोगश्चैकखण्डं स्याद्द्वितीयं चोषखण्डकम् ।
तुल्यनामाङ्कितं चैवदिति मध्यमलक्षणम् ॥

गान्धर्ववेदे

ध्रुवभेदः

एकादशाक्षरात्पादादेकैकाक्षरवर्धितैः ।
खण्डैर्ध्रुवा षोडश स्युः षड्विंशत्यक्षरावधिः ।
रसतालादिवर्णैश्च ध्रुवाणां लक्षणं शुभम् ॥

गान्धर्ववेदे

जयन्तादिक उत्साहो नन्दनश्चन्द्रशेखरः ।
कामोदो विजयाख्यश्च कन्दर्पो जयमङ्गलः ।
अष्टौ ध्रुवाः समाख्याताः राज्ञे च परिगीयते ॥

हम्मीरः

नाट्यवस्तूपयोगिन्यो ध्रुवाः पञ्च प्रकीर्त्तिताः ।
प्रावेशिकी तु तत्राद्या द्वितीयाक्षेपिका मता ॥
प्रासादिका तृतीयान्या ध्रुवा तुर्यान्तरा भवेत् ।
नैष्कामिका पञ्चमी स्यादासां लक्ष्मोच्यते क्रमात् ॥
प्रवेशसूचनीया तु पात्राणामर्थयोगतः ।
नानाभावरसोपेता सा स्यात्प्रावेशिकी ध्रुवा ॥
प्रक्रान्तं वाद्यमुल्लङ्घ्य गीयते यद्द्रुते लये ।
प्रस्तुतार्थसमाक्षेपात् ज्ञेया साक्षेपकी ध्रुवा ॥
अर्थाक्षेपवशाद्या च रसान्तरमुपेयुषी ।
रङ्गप्रसादं कुरुते सा स्यात् प्रासादकी ध्रुवा ॥
प्रयोगगतदोषाणां प्रच्छादनपटीयसी ।
विच्छेदेऽवान्तरार्थस्य तत्सन्धानविधायिनी ।
मध्ये मध्ये प्रयुज्या या सा विज्ञेयान्तरा ध्रुवा ॥

वेमभूपालः

ध्रुवा

गौलो गौलीस्त्रयोगश्च लौग एकादशाक्षरैः ।
चतुर्भिश्चरणैः प्रोक्ता ध्रुवा प्रागुक्तनालयुक् ॥

यथा

गङ्गातरङ्गपरिधौतजटं गौरीकुचद्वयनिषिक्तकरम् ।
देवेन्द्रमुख्यसुरपूज्यपदं वन्दामहे शिवममेयपदम् ॥

कुम्भः

अलङ्कारा लयवर्णा यतयः पाणयस्तथा ।
अपरस्परसंबद्धा यतस्तस्माद् ध्रुवा मता ॥

वेमभूपालः

ध्रुवाः

ध्रुवास्तु पञ्च विज्ञेयाः नानावृत्तसमुद्भवाः ।
यथास्थानरसोपेता ह्युत्तमाधममध्यमाः ॥
कनीयसीग्रहा काचित्सन्निपातग्रहापरा ।
तथाकाशग्रहाकाचित् त्रिविधातु ध्रुवा स्मृता ॥
प्रावेशिकी तु प्रथमा द्वितीया क्षेपिकी स्मृता ।
प्रासादिकी तृतीया च चतुर्थी चान्तरा स्मृता ॥
नैष्कामिकी च विज्ञेया पञ्चमी वृत्तकर्मणि ।
आसामेव प्रवक्ष्यामि छन्दोवृत्तसमन्वितम् ॥

नाट्यशास्त्रे

ध्रुवाङ्गानि

मुखं प्रतिमुखं चैव वैहायसकमेव तु ।
स्थितप्रवृत्ते वज्रं च सन्धिस्संहरणं तथा ॥
प्रस्तारो माषघातः स्यादुपावर्तनमेव च ।
उपाघातः प्रवेणी च चतुरश्रं सशीर्षकम् ॥
सम्पिष्टमन्ताहरणं माहाजनिकमेव च ।
ध्रुवाणामङ्गसंज्ञानि पञ्चानामपि नित्यशः ॥

नाट्यशास्त्रे

ध्रुवाणां विनियोगः

अपकृष्टा ध्रुवा बद्धे निरुद्धे पतिते तथा ।
व्याधिते सादितारा च प्रयोज्या करुणाश्रया ॥
अपविद्धे तथौत्सुक्ये विषादे परिदेविते ।
श्रमे दैन्ये च चिन्तायां दुःखे प्रत्यक्षजे तथा ॥
स्थिता ध्रुवा प्रयोक्तव्या नाट्यलक्षणवेदिभिः ।
आश्चर्यदर्शने रोषे विषादे संभ्रमे तथा ॥
उत्पातविस्मये चैव प्रत्यक्षावेदने तथा ।
वीरे भयानके रौद्रे कुर्याद्द्रुतलया ध्रुवा ॥

वेमभूपालः

ध्रुवालक्षणम्

यथाङ्गैः करणादिभ्यो न भिन्नं सदिदं पुनः ।
भवेत् तैरेवाङ्गभावं प्रत्याहारादिभिस्तथा ॥

अङ्गैरङ्गा पूर्वरङ्गस्तेभ्यो भिन्नोऽपि गम्यताम् ।
अर्थापत्त्याः प्रयोगो वा प्रधानत्वेन योज्यताम् ॥

प्रत्याहारादिकं याता प्राच्योदीच्यां गतां तदा ।
आश्रावणादिकं मार्गासारिता भागबद्धकम् ॥

देवस्तुत्यर्थमपदं पदबद्धमिति द्विधा ।
अपदं तत्र निर्गीतं पतबद्धं तु गीयते ॥

बहिर्गीतमितीदं तु सर्वदेवप्रियावहम् ।
पदबद्धं प्रयुञ्जीत तस्मादाश्रावणादिकम् ॥

क्रमारूढैरक्षरैः स्यात्पदबन्धः स च क्रमः ।
गुरुलघ्वादिभावेन तत्र तत्राभिधास्यते ॥

पदान्मैषां प्रयोगेऽसौ ध्रुवेति व्यपदिश्यते ।
अत्र वर्णा ह्यलङ्कारा लयाः पाताश्च पाणयः ॥

ध्रुवमन्योन्यसम्बद्धा यस्मात्तस्माद् ध्रुवा इमे ।
अङ्गस्य च प्रयोगस्य ध्रुवा यश्च विवक्षया ॥

लिङ्गत्रयेण निर्देशस्तत्र तत्र भविष्यति ।
उद्दिष्टानामथाङ्गानां लक्षणं संप्रचक्ष्महे ॥

विप्रदासः

ध्रुवा या सौरसेन्यादिभाषाणां नियमश्च यः ।
छन्दसां नियमस्तद्वदौपम्यार्थपरिग्रहः ॥

वेमभूपालः

ध्रुवाविधानम्

तस्य प्रागभिहितं तु लक्ष्यसंज्ञा परीक्ष्यते ।
मार्गदेशीविभेदेन सा द्विधा गदिता बुधैः ॥

द्विकमाद्यं मार्गसंज्ञं परदेशीति कीर्तितम् ।
निःशब्दा शब्दसंयुक्ता तत्राद्यस्य क्रिया द्विधा ॥

आवापश्चाथ निःक्रामो विक्षेपश्च प्रवेशनम् ।
इमाः कलाश्चतस्रश्च निःशब्दा इति कीर्तिता ॥

ध्रुवः शम्या तथा तालः सन्निपात इमाः कलाः ।
सशब्दाः पातसंज्ञाश्च चतस्रः परिकीर्तिताः ॥

ध्रुवादीनां चतुर्णां तु नित्या पाताभिधा मता ।
पाक्षिकी तु कलासंज्ञा क्रमादेषां विविच्यते ॥

पातानां पूर्वमुद्देशो युज्यतैककलत्वतः ।
ततो द्विकलिकावर्हौ निःक्रामाख्यप्रवेशकौ ॥

तत आवापविक्षेपौ चतुःकलतयोचितौ ।
सत्यप्येवं परादृष्टसाधनत्वाद्विदां वरैः ॥

चतुःकलादेः प्रथममुद्देश्यत्वं समीरितम् ।
मद्रकाण्यन्तरत्वादौ निरदिक्षन् महामुनिः ॥

अतो प्रधानभागेषु द्विकलादिविधाविह ।
निःशब्दाः पूर्वमुद्दिष्टाः पातास्तु तदनन्तरम् ॥

सर्वपातानुगामित्वात् तत्र स्यात्प्रथमं ध्रुवः ।
शम्यादक्षिणहस्तस्य प्रयोगस्तदनन्तरम् ॥

तदनन्तरतस्तालो ततो वामकरोद्भवः ।
तथोभयकरोत्पाद्यः सन्निपातस्ततो भवेत् ॥

उत्तानस्य करस्यास्यादावापोऽङ्गुलिकुंचनात् ।
निःक्रामोऽधस्तलस्य स्यादङ्गुलीनां प्रसारणात् ॥

विक्षेपः पार्श्वतः क्षेपात् पाणेरुत्तानितस्य तु ।
प्रसारिताङ्गुलीकस्य निर्दिष्टः पृथिवीभुजा ॥

पाणेरधस्तलस्य स्यात् प्रवेशोऽङ्गुलिकुंचनात् ।
त्रयोरेकतरस्यात्र छोटिकाशब्दपूर्वकम् ॥

पाणेः संपातनादुक्तो ध्रुवो विक्षेपवर्जितः ।
गातुः पापस्य शमनात् शम्या दक्षिणपाणिना ॥

वामपाणितलाघाताद्रक्तप्रत्यर्थिघातिना ।
प्रतिष्ठार्थतया घातोरद्रष्टस्थापकत्वतः ॥

तद्विपर्ययतस्तालं तालवित्कीर्तिनादितम् ।
सन्निपातो मिथः सम्यक् पाणिद्वयनिपातनात् ॥

... ... कलायाः अपरो कलः ।
द्विकलत्वविधौ साङ्गैर्नि काम इति कीर्तितः ॥

यदा पूर्व ... ... कला ।
तदा विक्षेपसंज्ञा स्यात्तथाभिनययोगतः ॥

तत्र चेत्पूर्वपातं तं त्यक्त्वा......गेद्वितीयकौ ।
द्वितीयास्या संप्रवेशे प्रवेशाख्या कला भवेत् ॥
अनेनैव विधानेन देशीतालेषु जानता ।
कलापातविधिर्ज्ञेयो मिश्रत्वान्मिश्रितः क्वचित् ॥
यतो विधीयते तालो बुधैरेष चतुःकलः ।
तदैको गुरुरस्यैव विधातव्यश्चतुःकलः ॥
अस्मादेवात्र विज्ञेयः पादभागश्चतुःकलाः ।
मुख्यत्वमतरत्वाद्यावापस्यैव निगद्यते ॥

केचिच्छम्यादिशब्देन छोटिकामाहुरञ्जसा ।
तावान् किं तन्मते पातोऽथवा पातद्वयं भवेत् ॥

पातैक्ये चित्रमार्गेऽस्य द्विमात्रासंभवो भवेत् ।
पातद्वये विरुध्येत लक्ष्यमस्य विपश्चितः ॥

तथाहि शम्यायुक्तायां गीतोपाते द्विमात्रके ।
गीतसाम्यं न भज्येत कथं तत्तेन कथ्यताम् ॥

तृतीयपक्षाङ्गीकारे शम्यादेर्ध्रुवपालता ।
नैषमेको भवेन्मात्रा ध्रुवे शम्यादिके पुनः ॥

मात्राद्वयं कथं ततो नैत्रमित्यपि सुन्दरम् ।
दत्तो यथाक्षरे चचत्पुटे लघ्वंशगोचरः ॥

शम्यादिर्मात्रिको दृष्टः ध्रुवोऽप्येककले तथा ।
उपोहने मद्रकादौ द्विमात्रः सद्भिरिष्यते ॥

अथानियतपातोऽत्र ध्रुवः शम्यादिनो तथा ।
तर्हि ध्रुवो किं न भवेत् शम्या चातन्तरत्र वा ॥

वृत्तिदक्षिणयोर्यद्वदथ वा ध्रुव इष्यते ।
सर्पिण्योर्मध्यमध्ये च छोटिका न तदामता ॥

हस्तपातो व्यवहितः शम्यादिस्तु यथास्थितः ।
पातस्य वक्तुं प्राधान्यं शम्यादौ तु लिलिक्ष्यते ॥

छोटिकां भरताचार्यो न समस्मरदाप्युत ।
यतो दक्षिणहस्तस्य पातः शम्येति कीर्तितम् ॥

चतुर्विधस्य पातस्य सशब्दत्वं यदा दिशेत् ।
तेनैवोदाहृता सम्यक् शम्यादीनां सशब्दता ॥

अन्यथा पातमेवैषामभ्यधान्न सशब्दताम् ।
ध्रुवाण ... ... यदोच्येत मार्गयोर्ध्रुवचित्रयोः ॥

शम्यादिकाः प्रयुज्यन्ते तदा नियतहस्ततः ।
ध्रुवो नियतहस्तः स्यादित्येषा ...... कथी ॥

वृत्तिर्दक्षिणयोः केश्चिच्चतुरस्ते यथाक्षरे ।
सर्पिण्याद्याः समादिष्टाः शम्यादिष्वपि तन्मते ॥

ध्रुवस्तेभ्यो भवेद्धि कथं पार्थक्यमर्हति ।
नैव शम्यादयो यस्माच्चतुरस्तादिगामिधः ॥

ध्रुवः शम्याद्यनुगतः स्वातन्त्र्येण विवक्षितः ।
कलामानमिह ज्ञेयं मार्गभेदवशाद्बुधैः ॥

एकमत्र कला ज्ञेयो ध्रुवे चित्रादिके पुनः ।
तत्कान्तमानकलनात् कलाविद्भिः कलोदिता ॥

मार्गत्रितयहेतुत्वान्मार्गता ध्रुवगामिनी ।
ततोऽन्येषु ध्रुवकला निर्गच्छन्ति विशंति च ॥

अतश्चित्रादिकानां तु त्रयाणां मार्गता मता ।
दश्यन्ते वार्तिके मार्गे चतस्रो ध्रुवगाः कलाः ॥

विशंत्यो दक्षिणत्वेन चित्रस्तु द्विकलस्ततः ।
मात्रादीनां लक्षणन्तु प्रोक्तं लक्ष्यपरीक्षणे ॥

उत्तरोत्तरतो मार्गत्रितये द्विगुणाः कलाः ।
अष्टानां तत्र मात्राणां नामानि व्याहरामहे ॥

ध्रुवका सर्पिणी कृष्णा पद्मिनी च विसर्जिता ।
उत्क्षिप्ताख्या पताका च पतिता चाष्टमी मता ॥

छोटिकाशब्दपूर्वं तु पात आसां प्रकीर्तितः ।
अतः प्रयोगमासां तु ध्रुवपातानुगं विदुः ॥

नावापादिषु तेनेमा प्रयोज्याः स्युः कथं च न ।
अथासां लक्षणं वच्मि पूर्वशास्त्रानुसारतः ॥

करघातात् ध्रुवो ज्ञेयो वामगा सर्पिणी मता ।
दक्षिणे गमनात्कृष्णा स्यादधोगा तु पद्मिनी ॥

विसर्जिता बहिःपाता विक्षिप्तांगुलिकुञ्चनात् ।
ऊर्ध्वगात्रपताका स्यात्पतितान्वर्थसंज्ञया ॥

आसारिते मुखाद्यङ्गे ध्रुवपाताञ्चिते बुधैः ।
आवापादिक्रियात्राग्रे ध्रुवकाद्याः समीरिताः ॥

सम्यगेतासु मात्रासु प्रयुक्तासु नियोगतः ।
अद्य संघविनाशः स्यादाचार्यस्यानुशासनात् ॥

ध्रुवकापतिते स्यातां चित्रे मार्गे तु वार्तिके ।
ध्रुवकासर्पिणीतद्वत्पताका पतितेति च ॥

चतस्रो मातृका ज्ञेयाः क्रमादष्टौ च दक्षिणे ।
चित्रशब्देन केचित्तु चतुरस्रं यथाक्षरम् ॥

केचिद्गुरुकृतकलं केचित्कालं तु तन्मितम् ।
प्राहुर्गीतिपरिच्छेदं नाद्यस्तत्र यतः स्मृतः ॥

लघौ प्लुते द्विमात्रत्वाभावश्चित्रविरोधकृत् ।
द्विमात्रत्वात्स्वभावेन गुरुश्चापि विचित्रता ॥

चित्रस्यैव परिच्छेदात् तृतीयस्य कथा वृथा ।
स्वभावात् गुरवो लोके द्विद्विमात्रास्तथा सति ॥

चित्रमार्गे द्विमात्रत्वं सुवचं न कथं च न ।
मार्गो नाम कलामानभेद इत्यायसंकथा ॥

मार्गशब्दः क्रियावाच्यः प्रसिद्धो लोकवेदयोः ।
तथाहि लौकिको मार्गो वैदिकोऽयमिति प्रथा ॥

अत आवापशम्यादेर्या क्रिया कुञ्चनादिका ।
सैवोक्ता मार्गशब्देन मूलभूते ध्रुवे ततः ॥

मार्गे कलैकिकामात्रा समैवद्विगुणीकृते ।
चित्रयन् चित्र इत्युक्तस्तामेव ध्रुवजां कलाम् ॥

चतुर्गुणां वार्तयैव कुर्वन् वार्तिक उच्यते ।
एकस्यैव लघोर्यत्र चतुर्मात्रत्वकीर्तनम् ॥

सावर्तैव यतो लोका लघुगुर्वादिकानि च ।
प्रयुंजते नवावर्णान् चतुरालोकमातृकान् ॥

सैवैकत्र ध्रुवकला दक्षिणेऽष्टगुणा भवेत् ।
यतो दक्षिणमार्गस्य प्राप्तिर्नोके क्रियापद्वा ॥

अतो न दक्षिणे मार्गे कलावृद्धिरतोधिका ।
केश्चित् कालः परिमितो मार्गशब्देन गीयते ॥

यथा चित्रं भवेत्कालो निमेषैर्दशभिर्मतः ।
विंशत्या वार्तिके तैश्च द्विगुणैर्दक्षिणे भवेत् ॥

ध्रुवो ध्रुवतयैव स्यादेकमात्रक एव सः ।
केचित्सर्वलघुं तालं न किंचिदिह मन्यते ॥

लघ्वभावादिके मार्गाः भजन्त कलरूपताम् ।
नैवं चचत्पुटाद्यास्तु सर्वे स्युर्लघवस्तदा ॥

गुर्वाद्या द्विकलाधाने विश्लेष्यन्ते यदा बुधः ।
नोचेदेवं चित्रलक्ष्म सर्वगेषु वृथा भवेत् ॥

चतुरश्रे लघुगुरुप्लुतात्मनि यथाक्षरे ।
चित्रमानं स्मृतं तज्ज्ञैः कलोधापेक्षयैवहि ॥

द्विमात्रादिकलासाक्षाच्च सर्वत्र समीक्षते ।
अतः कलापातमार्गलक्षणं कीर्तितं मया ॥

इति कलापातमार्गः

यः कालो वर्तते मध्ये कलयोर्लय एव सः ।
लीङ् धातोः श्लेषणार्थत्वादिह लघ्वन्तरेण यः ॥

आश्लेषो लयनात्सोऽत्र लयशब्देन गीयते ।
ते लयास्त्रिविधा ज्ञेया द्रुतमध्यविलंबिताः ॥

आदौ प्रयुज्य लघ्वाद्यमध्यं चेत्तत्परं द्रुते ।
विश्रम्य प्रविशेल्लघ्वन्तरे द्रुतलयस्तदा ॥

एवं विश्रान्तिरत्र स्यात् ध्रुवमात्रैव केवला ।
मध्योऽध्यर्धनत्रो विश्रांत्या संमतो मतः ॥

विलम्बिते तु विश्रान्तिः सार्धमात्राद्वये भवेत् ।
अर्धमात्रा कृतावत्र मात्रा ज्ञेया चतुर्लघु ॥

तामर्धीकृत्य विश्रान्तिः कर्तव्या पञ्चमे लघौ ।
पीतादिविषये लक्ष्यं सर्वत्रैतल्लयस्य हि ॥

स्वरयोर्वर्णयोर्वापि मध्यकालो लयः स्मृतः ।
अधुना क्रमतो वक्ष्ये लयानेतान् प्रयोगतः ॥

लयः सोऽत्र द्रुतो ज्ञेयो यत्र तालान्तरं ततः ।
गाता प्रयोक्तुं शक्नोति क्षिप्रत्वेन न कर्हिचित् ॥

समध्यमो लयो यत्र गीतं द्रुतलयं परैः ।
द्विर्गीयते यदेवात्र तत्सकृद् गीयते स्फुटम् ॥

यन्मध्येन लयेनात्र द्विर्गीतं सकृदेवतत् ।
चेद्गीयते तदा प्राह विलंबितलयं नृपः ॥

चित्रवार्तिकदक्षेषु मार्गेषु क्रमतो लयान् ।
द्रुतमध्यविलंबाद्यान् दंतिलप्रमुखा जगुः ॥

एवं कश्चित् ध्रुवे मार्गे न लयस्तन्मते भवेत् ।
गान्धर्वसंग्रहान्मार्गौ ध्रुवो नास्तीति चेन्न तत् ॥

तदभावे कथं गेयं लघ्वष्टकपरिष्कृतम् ।
मन्द्रकं ह्येककलिकं देशीताला अथ स्फुटम् ॥

गीयन्ते सर्वलघवस्तस्माद्देशेऽस्ति गम्यते ।
तत् सद्भावाल्लयोऽप्यत्र कश्चिद्भवति निश्चितः ॥

वर्णे पदे तथा वाक्ये लयस्त्रिविधमिष्यते ।
परस्परं यदेताविं प्रोच्यन्ते कालसाम्यतः ॥

तदेतेषु त्रिधा ज्ञेयो लयोन्तय विचक्षणैः ।
भो भो रे रे विह ज्ञेयो लयोऽक्षरगतो बुधैः ॥

रामचन्द्रपदांभोजमित्यादिपदसंचयः ।
मुरारिचरणाम्भोजं व्रजेऽहं सततं शुभम् ॥

इत्यादि वाक्यगो ज्ञेयो राजराजोपदेशतः । इति लयाः ।
नृत्यंगकर्मणां स्थायिमुखानां गीतिगामिनाम् ॥

तद्वद्यादीनां च पादानां वाद्यसंगतिचारिणाम् ।
लयस्य किंचित्कालान्तु वृत्तौ नियमनं यतिः ॥

समा श्रोतोगता गोपुच्छिकेत्येषा त्रिधा मता ।
प्रति स्वसा ... ... तल्लयसमागतान् ॥

आदिमध्यं गतौ यस्मादेक एव लयो भवेत् ।
लयसाम्येन सर्वत्र समेरा ... ... शरिता ॥

स्रोतोगता यतिर्यत्र लयव्युत्क्रमतः क्रमात् ।
द्रुतस्थाने यदा मध्यो लयोऽस्यां दृश्यते पुनः ॥

तदा भेदो द्वितीयोऽस्या भुवोर्भेत्रा निगद्यते ।
क्रमात्स्रोतो यदा गच्छेदुन्नतत्वं द्रुत चलन् ॥

तद्वदेषापि विज्ञेया द्रुतयोगाद्विलम्बितम् ।
व्रजन्ती क्रमतो लोके स्यात् स्रोतोगता बुधैः ॥

आदौ मध्यलयेनोते तृतीयाख्या विधा भवेत् ।
यदा श्रोतोगता तज्ज्ञैर्विपर्यासो द्विरुच्यते ॥

तदासौ त्रिविधो ज्ञेयो गोपुच्छाद्या यतिर्बुधैः ।
विलम्बितद्रुताभ्यां सा चतुर्धापि परैः स्मृता ॥

सा रक्तिभावाद्गीतज्ञैरुपेक्षापक्ष ईरिता ।
लघुद्वयात्लघोः पूर्तिं दृष्ट्वा कैश्चिद्विहेरितम् ॥

यस्योर्लयद्वयं तत्र मनोराज्यविजृंभितम् । इति यतिः ।
गीतादिमाने विश्रान्ताली लौकिकतामियात् ॥

स एवात्र लयो नाम यत्यवच्छिन्नतामितः ।
आवापादिक्रियस्तालो गान्धर्वैर्यस्तु कीर्तितः ॥

गीतादिकं परिच्छिन्दन् स तालः काल एव हि ।
सर्पिण्यादिक्रियायोगो गान्धर्वे यस्तु कीर्तितः ॥

रक्तिमाधुर्यविरहात् सोऽदृष्टः फलदः परः ।
लौकिके तु पुनर्गीते दृष्टादृष्टफलप्रदे ॥

श्रोतृचित्तप्रसन्नार्थं ध्रुवपातादिका क्रिया ।
चतुरस्रस्तथा त्र्यस्रो द्वौ तालौ मुनिनोदितौ ॥

तत्र चच्चत्पुटस्यैव गीतसर्वस्वभूमिषु ।
प्रयोगो जातिषु प्रायो बाहुल्येन यदीक्ष्यते ॥

तथोत्तमानां पात्राणां प्रवेशो विधिरीक्ष्यते ।
तत्रायं पूजितप्रायमाचार्याणां श्रितो मतात् ॥

न तु चाचपुटो यस्मादधमानामयं मतः ।
पुरा प्रसन्नवदनः पञ्चवक्त्रः कदाचन ॥

चतुर्भिर्वदनैर्वर्णान् चतुरः समुदीर्य च ।
चच्चत्पुट इमान् पश्चात् विभ्रान्तः पार्वतीपतिः ॥

ततोऽयं सर्वलोकेषु पूज्यतामगमत् सदा ।
पञ्चवक्त्रस्य तुष्ट्यर्थं पञ्चवक्त्रविनिर्गताः ।
पञ्चतालाः समुद्दिष्टा मार्गे सन्मार्गदर्शिना ॥

कुम्भः

ध्वन्युपशान्तिः

येपूपशान्तिः क्रियते कृत्वा तीव्रतरं ध्वनिम् ।
रागप्रयोगतत्त्वज्ञः विद्यादुपशमस्य तत् ॥

कुम्भः

न

नटः

अभिनेयार्थतादात्म्यपटुः स्फुटतरो नटः ।
पदार्थाभिनयान् चित्तं व्यञ्जयन् स्यात्तदमतः ॥

रसाभिधायकं नाट्यशब्दे नाट्येऽपि वृत्तितः ।
लक्षणाया वर्तमानमुभयं दर्शयन् स्फुटम् ॥

तथा च नृत्यशब्दार्थमुभयानुग्रहणं वदन् ।
नृत्ये चाभिनये साक्षाद्वक्ति लक्षणयान्वयम् ॥

नाट्येनाभिनयं नृत्यशब्देन च रसं पुनः ।
वृत्त्या लक्षणया साक्षादुभयं दर्शयत्पदम् ॥

करणाङ्गहारनिचयैर्नृत्तमत्रोपदर्शयन् ।
रसरभ्ये नटे वास्य विकलस्य जीहीर्षया ॥

स्वात्मानं तन्मयं कुर्वन्निव रङ्गमुपाश्रयेत् ।
ततः कुतपविन्यासाद्रङ्गप्रणयपेशलम् ॥

कुम्भः

नटलक्षणम्

चतुर्धाभिनयाभिज्ञो नटो भाषाविभेदवित् ।

हम्मीरः

नटीनां हस्तव्यापाराः

पताकाद्याः कपित्थान्ता रूपकेऽष्टकरा ध्रुवे ।
ध्रुवे लयान्विलम्बादीनुद्ग्राहोभोगयोर्ध्रुतः ॥

उद्ग्राहादिष्वट्टताले लयः कार्यो विलम्बितः ।
विकल्पतः कलासाः स्युः खटकामुखपूर्वकाः ॥

सूच्यन्ता हस्तकाः द्विता कार्याः सर्वे ध्रुवे पदे ।
यतो लयास्त्रयः प्रोक्ताः हस्तकाः षोडश क्रमात् ॥

पद्मकोशादिडोलान्ताः प्रतिताले तु हस्तकाः ।
कार्याः पुष्पपुटाद्यास्तु चतुरस्रावसानकाः ॥

कुम्भः

नतम्

सुमं कस्तकरद्वन्द्वमीषत्प्रसृतजङ्घकम् ।
तत्स्थानकं नतं खेदश्रमालस्यादिषु स्मृतम् ॥

कुम्भः

नतपृष्ठम्

कपालघूर्णने जाते वक्षस्युन्नमिते नते ।
नतपृष्ठं परैरुक्तं बङ्कोलकरणं त्विदम् ॥

कुम्भः

नतम्—नाट्याङ्गम्

ताद्भिमिद्भिमिवर्णं तु तद्भिकिकिटमेव च ।
नाम्ना तु नत्रमित्येवमुच्यते पूर्वसूरिभिः ॥

भरतकल्पलता

ननान्दाहस्तः

शुकतुण्डो दक्षिणे च मुकुलो वामहस्तकः ।
ननान्द्रायां प्रयुज्येत पार्वत्या परिकीर्तितम् ॥

भरतकल्पलता

नन्दः—निःसारुकः

द्रुतमेकं भवेद्यत्र क्रीडातालः स कथ्यते ।
अनेन गीयते नन्दो नित्यं निःसारुकोत्तमः ॥

गान्धर्ववेदे

—रासकः

द्रुतश्च गुरुरेकत्र तालो विद्याधरः स्मृतः ।
यत्रासौ रासको नन्दो गीयतेऽभ्युदये शुभः ॥

गान्धर्ववेदे

नन्दावतीलक्षणम्

मालवः कौशिको रागस्तालस्तु प्रतितालकः ।
रीतिर्भवति गौडीया सात्त्वतीवृत्तिसंयुता ।
सैन्यावुत्साहवीरौ च वर्णः पीतोऽस्य देवता ॥

मोक्षदेवः

पोलोर्मा वैश्यजातिश्च खसहस्त्रकरी मणौ ।
त्रयः पादाः समं प्रासैरेश्च नन्दावती पुरा ।
पञ्च विष्णुपदान्यस्मिन्नेकस्मिन्मध्यतिर्मतः ॥
ऽ ऽ । ऽ ऽ । ऽ ऽ । ऽ ऽ । ऽ ऽ ।

सोमराजदेवः

नन्दावत्याः कामगणाः

पला नन्दावती प्रोक्ता कर्णाटैः स्मरलेखिका ।
उत्तराल्येऽथर्वजाता शूद्रजातिः सदेवता ।
गौरीगणेशगन्धर्वैर्बाणान्ता मन्मथाश्च षट् ॥

मोक्षदेवः

नन्द्यावर्तम्

नन्द्यावर्तं तदा प्रोक्तं पक्षप्रद्योतके करौ ।

सङ्गीतमुक्तावली देवेन्द्रकृता

नर्तकः

संप्रोक्तोऽपि च नर्तको निशितधीर्मार्गोल्यनृत्ये परे ।
विख्यातोऽत्र कृतश्रमोऽङ्गचलने दक्षः स्वकीये स्मृतः ॥

कुम्भः

करणेष्वङ्गहारेषु ललितेषूद्धतेषु च ।
देशीनृत्तविशेषेऽपि नृत्तशिक्षस्तु नर्तकः ॥

वेमभूपालः

नर्तकलक्षणम्

नर्तकः सूरिभिः प्रोक्तो देशीमार्गे कृतश्रमः ।

हम्मीरः

नर्तकी

नातिदीर्घा न खर्वा च सुपक्ष्मा च सुलोचना ।
सर्वाङ्गसुभगाधारनितम्बजघनस्तनी ॥
लयमानसमायुक्ता यतितालप्रदोत्तमा ।
कन्या सरभसा पुण्या नर्तकी समुदाहृता ॥

सङ्गीतनारायणे

रूपयौवनलावण्यधृतिमाधुर्यसंयुता ।
शिरीषदाममृदुलविलसद्भुजवल्लरी ॥
लयतालकलाभिज्ञा रसभावविचक्षणा ।
या शुद्धकुलजा योग्या कर्तव्या नर्तकी बुधैः ॥

वेमभूपालः

—प्रवेशः

निष्क्रान्ते सूत्रधारादौ प्रवृत्ते वाद्यगीतयोः ।
आयतस्थानकेनैव प्रविशेन्नर्तकी ततः ॥
अभिवन्द्यामरानेषा रङ्गे पुष्पाञ्जलिं क्षिपेत् ।
रसोचितानभिनयान् यथाशास्त्रमथाचरेत् ।
रसान्तरोऽप्यभिनयेद्यथाशास्त्रं रसाः पुरः ॥

विप्रदासः

—प्रवेशनम्

सर्वेष्वासारितेष्वत्र नर्तकीनां प्रवेशनम् ।
वैशाखरेचितेन स्यादिति राजेन्द्रसम्मतम् ॥

कुम्भः

—लक्षणम्

कृत्वा संपुटमेकहस्तचरणाम्भोजे द्वितीयं करं
नम्रं रेचनितं विधाय मधुरं वाद्यैर्मृदङ्गादिभिः ।
नानाविभ्रमचेष्टिताकुलपदं स्मेरानना नर्तकी
नाट्योक्तैः करणैर्विदग्धगतिभिर्लीलायिता नृत्यति ॥

कुम्भः

रूपयौवनसौभाग्या मध्यवेषविभूषिता।
नातिदीर्घा नातिह्रस्वा कृशाङ्गी चारुलोचना ॥

प्रगल्भा प्रौढवर्णा च भूरिभावसमन्विता।
स्मरवक्त्रा तु वेषोघैरङ्गलालित्यशालिनी ॥

तालचारी गतिज्ञानमहमोक्षविचक्षणा।
यथास्थानमविच्छिन्नं भ्रूनेत्राङ्गविवर्तिनी ॥

चतुरस्रा सावधाना नानापाटपटीयसी।
मल्पादौ च निष्णाता गीतवाद्यानुवर्तिनी ॥

कर्णाटलाटसौराष्ट्रमहाराष्ट्रादिदेशजा।
शिक्षिता सदुपाध्यायादुत्तमा नर्तकी भवेत् ॥

सोमराजदेवः

नर्तनम्

नर्तनं त्रिविधं नाट्यं नृत्यं नृत्तमिति क्रमात्।

सङ्गीतनारायणे

नर्मगर्भः

नायको यत्र कार्यार्थवशाद्गुप्तगुणैरिह।
नर्मगर्भो भवेदेष रूपसम्भावनादिभिः ॥

कुम्भः

नर्मलक्षणम् (कैशिक्यङ्गम्)

वल्लभाभ्यर्थनविधौ चारुवाग्वेषचेष्टितैः।
सलीलहसितोपेतैः शृङ्गाररसपोषणैः।
विदग्धकलिता क्रीडा नर्मेति परिकथ्यते ॥

वेमभूपालः

नर्मस्फुञ्जः

नवसङ्गमसम्भोगरतिरागसमुद्भवैः।
नर्मस्फुञ्जो भवेदत्रावसानभयसम्मुखः ॥

कुम्भः

नर्मस्फोटः

नानाभावरसैर्युक्तः समग्ररसपेशलः।
नर्मस्फोटश्च विज्ञेयो विशेषबहुलाकुलः ॥

कुम्भः

नलिनीपद्मकोशकौ

पद्मकोशाभिधौ हस्तौ व्यावृत्तादिक्रियाकृतौ।
आश्लिष्टौ स्वस्तिकक्षेत्रे व्यावृत्तपरिवर्तितौ ॥

मिथः पराङ्मुखौ स्यातां नलिनीपद्मकोशकौ।
मणिबन्धसमाश्लिष्टौ कनिष्ठाङ्गुष्ठसम्मुखम् ॥

श्लिष्टलक्षणसंयुक्तावेतावन्यैरुदाहृतौ।
एतावन्यतमक्षेत्रे स्कन्धवक्षोजजानुतः ॥

प्रोक्तौ विवर्तितौ कैश्चित् नलिनीपद्मकोशकौ।
एतौ कीर्तिधरायास्तु पद्मवर्तनिकां जगुः ॥

जाननः

नवरत्नमुखम्

विश्लिष्टवर्णितार्थैश्च नवभिर्दशभिश्च वा।
उत्कैस्संसर्गरूपेण रचितैश्चालयैर्यदि ॥

आकेशबन्धमुत्क्षिप्तैः पश्चात्स्वस्तिकतां गतैः।
ततोऽन्यां च परावृत्तौ धारासंमुखतां गतौ ॥

मण्डलाकारसंप्राप्तौ तिरश्चीनौ ततः परम्।
आविद्धावपविद्धौ च युगपत्क्रमतोऽथवा ॥

तत्कालार्हक्रियायोग्यौ तदान्दोलनसंयुतौ।
करावेवं यत्र तत्स्यान्नवरत्नमुखं तदा ॥

नवरेखाः

आद्या रेखा पुरः पात्रे वर्या रेखा द्वितीयिका ॥
कला तृतीयरेखा स्यात्सौभाग्या च चतुर्थिका।
पञ्चमीरसरेखा च षष्ठी श्रीः शोभनं वपुः।

सप्तमी मानरेखा च शृङ्गारिजनवीक्षिता।
एवं हि नव रेखाभी रङ्गभूमिः प्रशस्यते ॥

हम्मीरः

नवधावंशविभागः—कीर्तिधरस्य

स्थानत्रयस्य निष्पत्त्यै केचित्कीर्तिधरादयः।
नवैवात्र जगुर्वंशान् व्यवस्थातस्तथोच्यते ॥

आदित्यो विश्वमूर्तिश्च मन्द्रस्वरविधायकौ।
नाथेन्द्रश्च महानन्दो रुद्रवंश इति त्रयः ॥

मध्यस्वरविधातारस्तथा तारविधायकाः।
षण्मुखो मुनिवंशश्च वसुवंश इति त्रयः ॥

सर्ववंशमयत्वेन त्रिस्थानस्वरसाधकः।
वर्णालङ्कारधात्वादिवाद्यसंवेदनत्वतः ॥

नवमो मनुवंशश्च तन्मते प्रवरो मतः।
एवं वंशा नवैवेति व्यवस्थातः प्रकीर्तिताः ॥

कुम्भः

नवस्थानकानि

सुस्थं निष्कम्भितं कान्तमुत्कटं च मदालसम् ।
स्रस्तालसं जानुगतं मुक्ताजानुविमुक्तकम् ॥
एवं नवोपविष्टस्य स्थानान्यूचे मुनिः स्वयम् ।
समभाकुञ्चितञ्चैव प्रसारितविवर्तिते ॥
नतमुद्राहितं चेति स्युः सुप्तस्थानकानि षट् ।
षट् पुंसां सप्त नारीणां त्र्युत्तराविंशतिर्द्वयोः ॥
स्थानकान्युपविष्टस्य नव सुप्तस्य षट् क्रमात् ।
एवं स्युर्मिलितान्येकपञ्चाशदखिलान्यपि ॥
वैष्णवं समपादं च पुनरुक्तेन युज्यते ।
देशीये द्वितयं नोचुः केचित्तन्न मनोहरम् ॥
वैष्णवं समपादं च देशीस्थानेषु यत्स्थितम् ।
स्त्रीपुंसयोस्तत्समानं मार्गस्थानस्थितं पुनः ॥
पुंसामेवेति युक्त्यैव पुनरुक्तिर्व्यवस्थितेः ।
विनियोगवती नैते विनियुक्ते तु ते उभे ॥
भिन्नं तयोर्लक्ष्म चेति कथनं पुनरर्थवत् ।
सर्वेषां लक्षणं वच्मि विप्रदासो विदां वरः ॥

विप्रदासः

नागबन्धः

तदेव नागबन्धं स्यान्नागबन्धवदासने ।
दक्षिणान्तु यदा जङ्घां वामोरुः पृष्ठदेशगाम् ।
निदध्यादुपविष्टः सन्नामबन्धं तदादिशम् ॥

कुम्भः

—हस्तपाटः

व्याप्रियेते करौ यत्र विपर्यासात्पुटद्वये ।
तन्नागबन्धमाचष्टे प्रत्येकं वा पुटद्वयम् ॥
कराभ्यां ताडयेद्यत्र नागबन्धो भवेदसौ ।
टन गिन गिन गिनन गिड गिड ग गि ॥

कुम्भः

नागरनृत्यम्

तदेतन्नामरं नृत्यं कुण्डली सूच्यते बुधैः ।
ततो लास्याङ्गकैः कुर्याद्विचित्र चित्रशोभितम् ।
विषयोद्धतमाधुर्यैस्तद्विचित्रमिहोच्यते ॥

शुभङ्करः

नाटकम्

चूर्णिकावाक्यश्लोकैश्च तथा गेयं तु नाटकम् ।

भरतकल्पलतामञ्जरी

नाटकलक्षणम्—पाठ्यम्

नाटकात्मनि पाठ्यं तु ह्रस्वदीर्घप्लुतात्मकम् ।
अक्षरं त्रिविधं योज्यं रसभावानुसारतः ॥
लघ्वक्षरप्रधानं स्यात्पाठ्यं वारादिके रसे ।
करुणादौ रसे पाठ्यं गुर्वक्षरकृतं भवेत् ॥
पठने ब्राह्मणानां च स्मृते च परिदेविते ।
असूयते च पाठ्यं स्यात्प्लुताक्षरसमन्वितम् ॥
ओंकारोऽध्ययनो ज्ञेय ओंकारः परिदेविते ।
असूयिते स्यादूकार आकारस्तु स्मृते भवेत् ॥
यथारसं यथाभावं ह्रस्वदीर्घप्लुतानि तु ।
अक्षराणि प्रयुञ्जीत नाट्यदक्षो यथोचितम् ॥
अगूढशब्दार्थयुतं सुखबोधं मनीषिभिः ।
पदार्थैर्ललितैर्युक्तं बुद्धिमन्नर्तनोचितम् ॥
सन्धिसन्धानरुचिरं नानाविधरसोज्वलम् ।
एवं विधं नाटकं स्यात्प्रेक्षकानन्दकारणम् ॥

वेमभूपालः

नाटीलक्षणम्

नटयपाङ्गं निगकम्पा मन्द्रपञ्चमभूषिता ।
छाया नटया च शृङ्गारे सवीरे गीतकोविदैः ॥

मोक्षदेवः

नाट्यम्

नाट्यं तन्नाटकेष्वेव योज्यं पूर्वकथायुतम् ।

भरतकल्पलतामञ्जरी

सोऽयं स्वभावो लोकस्य नानावस्थान्तरात्मकः ।
सोऽङ्गाभिनयनैर्युक्तो नाट्यमित्युच्यते बुधैः ॥

सङ्गीतनारायणः

नानाविधैर्यथा पुष्पैर्मालां बध्नाति माल्यकृत् ।
अङ्गोपाङ्गै रसैर्भावैस्तथा नाट्यं प्रयोजयेत् ॥

कुम्भः

देवर्षिक्षितिपालपूर्वचरितानालोक्य धर्मादय-
स्तद्भावाश्रितभूमिकाभिनयने स्यादर्थसिद्धिः परा ।
सङ्गीताङ्कविचित्रवृत्तिरचनावश्या भवन्त्यङ्गना
ज्ञानं शंकरसेवयेति कथितं नाट्यं चतुर्वर्गदम् ॥

शुभङ्करः

नाट्यगृहापूजने दोषकथनम्

अपूजयित्वा रङ्गन्तु न कुर्यात्प्रेक्षणक्रियाम् ।
कुरुते यस्तु मूढात्मा तिर्यग्जातिमवाप्नुयात् ॥

विप्रदासः

नाट्यधर्मीलक्षणम्

यश्च कक्ष्याविभागोऽपि मुनिभिः शास्त्रचोदितः ।
नानादेशाश्रया रङ्गमण्डपे संप्रयुज्यते ॥
आगम्याभूमिकायाश्च गम्या नरी नियुज्यते ।
आगम्यापि वधूर्यत्र गमाया भूमिकां भजेत् ॥
अपि चैकां भूमिकां तु विधाय धेनुलक्षणम् ।
अपरां भूमिकां प्राप्नोत्यात्मनः कौशलेन तु ॥
इत्यादिनाट्यनिपुणैर्यच्च नाट्यक्रियोचितम् ।
प्रयुज्यते च तत्सर्वं नाट्यधर्मीति कथ्यते ॥

वेमभूपालः

नाट्यधर्मी

लीलाङ्गहाराभिनयसत्त्वभावरसैर्युतम् ।
अतिवाक्यक्रियायुक्तं नाट्यलक्षणसंयुतम् ॥
स्वरालङ्काररुचिरं वाक्यखण्डमनोहरम् ।
प्राप्य वेषान्तं तैः पात्रैर्विविधैरन्वितं च यत् ।
नाट्यं तन्नाट्यतत्त्वज्ञैर्नाट्यधर्मीति कथ्यते ॥

वेमभूपालः

नाट्यप्रमाणम्

लोको वेदस्तथाध्यात्मं प्रमाणं त्रिविधं स्मृतम् ।
लोकाध्यात्मपदार्थेषु प्रायो नाट्यं व्यवस्थितम् ॥

कुम्भः

नाट्यप्रयोगः

मण्डलानां च देशानां पुराणां धरणीभृताम् ।
अन्येषां स्थावराणां च नाम ऋक्षकरक्रमैः ॥
सङ्केतपूर्वैश्चिह्नैश्च क्वचित्क्वचिदुपाश्रितैः ।
नाट्यप्रयोगो विज्ञेयो वायुसूनुमतान्तरे ॥

शृङ्गारशेखरः

अथ नाट्यप्रयोगस्तु द्विविधः परिकीर्तितः ।
सुकुमारस्तथाविद्धस्तयोर्लक्षणमुच्यते ॥
मधुरललिताङ्गहारं महिलाजनसंप्रयोगमभिनीयम् ।
स्वल्पपुरुषानुषक्तं नाट्यं सुकुमारमीरितं तज्ज्ञैः ॥
नाटकं च प्रकरणं भाणो वीथी च नाटिका ।
अङ्कश्चेत्युपदिष्टानि रूपकाणि पुरातनैः ।
सुकुमारप्रयोगाणि मानुषैराश्रितानि तु ॥
बहुविधयुद्धनिबन्धनमुद्धतविविधाङ्गहारसंपन्नम् ।
मायेन्द्रजालबहुलं पुरुषैर्बहुभिः प्रयोज्यं च ॥
स्वल्पवधूजनविलसितमारभटीसात्त्वतीप्रायम् ।
रक्षोदानवदेवैः कलितं नाट्यं तदाविद्धम् ॥
डिमः समवकारश्च व्यायोगेहामृगौ तथा ।
एतान्युक्तानि चाविद्धप्रयोगाणि प्रयोक्तृभिः ॥
एतौ नाट्यप्रयोगौ तु यथाभावं यथारसम् ।
देशीरूपकभेदेष्वप्यूहनीयो विचक्षणैः ॥

वेमभूपालः

नाट्यफलम्

राज्यसौख्यमपि स्वल्पं भरतस्य मुनेर्मतेः ।
वराङ्गनाजनैः सङ्गः सन्नाटकविनोदनम् ॥
इतोऽधिकं सुखं किञ्चिन्न लोके विद्यते क्वचित् ।
सुखाय यशसे धीरैर्मतं नाट्यप्रचारणम् ॥

जगद्धरः

नाट्यभेदाः

शृङ्गारनाट्यमुग्रं च भृंगिनाट्यं च चित्रकम् ।
नारीनाट्यं च चालीयं शुद्धनाट्यं च विश्रुतम् ॥
हस्तचालीयनाट्यं च मार्गनाट्यं च सम्मतम् ।
अङ्गहाराख्यनाट्यं च पादचारी च पार्श्वकम् ॥
मुखचालीयनाट्यं च लवणीनाट्यमीरितम् ।
देशीनाट्यं फेरणी च लीलानाट्यं ततः परम् ॥
ताण्डालिकं च सन्धिश्च प्रान्तनृत्यं प्रकाश्यते ।
भूचारिनाट्यमावृत्तं विद्युद्भ्रमरनाट्यकम् ॥
पुष्पाञ्जलिस्तु नाट्यं च चतुर्विंशतिनाट्यकम् ।
यत्यादिनाट्यभेदाश्च भरतज्ञैरुदाहृताः ॥

भरतकल्पलतामञ्जरी

पेरणी गौण्डली चेति नाट्यं दशविधं स्मृतम् ।

कुम्भः

—कोहलोक्ताः

ततः परं प्रवक्ष्यामि नाट्यनृत्तविकल्पनम् ।
नटस्यातिप्रवीणस्य कर्म वा नाट्यमुच्यते ॥

मार्गो देशीति नाट्यस्य भेदद्वयमुदाहृतम् ।
ब्रह्मणा यत्तपस्तप्त्वा मा ... शवयोः पुरा ॥

मार्गनाट्यं ततः प्राहुः तच्च विंशतिधोच्यते ।
नाटकं सप्रकरणं बाणः प्रहसनं डिमः ॥

व्यायोगसमवाकारौ वीथ्यङ्केहामृगा इह ।
रूपकाणि दशैतानि शङ्करेण विभाषिरे ॥

नाटिका प्रकरणिका भाणिका हासिका ततः ।
वियोगिनी च डिमिका कलोत्साहवती पुनः ॥

चित्रा जुगुप्सिता चैव विचित्राचेति दुर्गया ।
एवं मार्गं नाट्यमुक्तं शिवाभ्यां ब्रह्मणा पुरा ॥

दत्तिलादिभिरुक्तानि देशीरूपाणि षोडश ।
सट्टकं त्रोटकं गोष्ठी बृन्दकं च ततः परम् ॥

शिल्पकं प्रेक्षणं चाप्युल्लापकं चेत्यतः परम् ।
हल्लीसरासिके उल्लोप्यङ्कं श्रीगदितं तथा ।
नाट्यरासकदुर्मल्लीप्रस्थानं काव्यलासिकाः ॥

इति षोडशरूपाणि ।

नृत्तानि द्वादश प्रोक्ता डोम्बिका भाणिका तथा ।
भाणकः प्रस्थानकश्च लासिकारासिकास्तथा ॥

दुर्मल्लिका विदग्धश्च शिल्पिनी हस्तिनी तथा ।
भिन्नकी तुम्बिकी चैव द्वादशोक्तानि सूरिभिः ॥

एषामलङ्कारशास्त्रे लक्षणं बहुशोदितम् ॥

सङ्गीतनारायणे

नाट्ययुक्तिः

नाट्योपयोगिनः प्रायो विचित्राभिनया मया ।
ते लिख्यन्तेऽभिनेयार्थं व्यंजयन्तीव ते स्फुटम् ॥

सन्निकर्षं विना यस्य न वेत्त्यर्थं कथंचन ।
तस्योक्तो मनसो भावः त्रिधा तान्प्रति कोविदैः ॥

इष्टोनिष्टस्तथामध्यस्तस्याभिनयनं यथा ।
मुखस्यातिविकासेन शरीराह्लादनेऽपि च ॥

तथोल्लुकसितेनेष्टं दर्शयेन्नाट्यकोविदः ।
अप्रदानेन नेत्रस्य संकोचाद्दक्षिणेऽनुयोः ॥

परावृत्ताख्यशेषेणाप्यनिष्टं संप्रदर्शयेत् ।
जुगुप्सया न चात्यन्तं मनसा नातिहर्षणात् ॥

मध्यभावेन मध्यस्थं भावं धीमान्निरूपयेत् ।
कर्णदेशस्थतर्जन्या तथा तिर्यङ्निरीक्षणात् ॥

पार्श्वानतेन शिरसा सुधीः शब्दं प्रदर्शयेत् ।
सभ्रूक्षेपेण नेत्रेण मनायाक्कुंचितेन च ॥

तदा गण्डमुखस्पर्शात्स्पर्शो धीरैर्निरूपितः ।
शिरःस्थितौ पताकौ द्वौ कृत्वेषद्वलिताननः ॥

दृष्ट्वा निर्वर्ण्यन्त्यापि रूपमेवं विनिर्दिशेत् ।
नयने किंचिदाकुंच्य फुल्लां कृत्वा च नासिकाम् ॥

एकोच्छ्वासेन च प्राज्ञो रसगन्धौ प्रदर्शयेत् ।
नृत्याय देवरंगायाद्यशब्दाद्यभिनये मया ॥

निरूपितस्तथा ज्ञेयो इन्द्रियाभिनयो बुधैः ।
विधायोत्तानितौ हस्तौ पताकौ स्वस्तिकौ च्युतौ ॥

शिरसोद्वाहितावेव तथोर्ध्वप्रेक्षणेन च ।
प्रदोषं दिवसं रात्रिं प्रभातं गगनं घनान् ॥

जलाशयान् वनान्तांश्च नक्षत्राणि महान् दिशः ।
नानादृष्टिषु तं धीरोऽभिनयेन्नाट्यनृत्तये ॥

एताभ्यामेव हस्ताभ्यां सनेत्रशिरसा तथा ।
अधस्तात्प्रेक्षणेनापि भूमिस्थं संप्रदर्शयेत् ॥

दृष्ट्वा मुकुलहस्तेन नतेन शिरसापि च ।
हृदि संदंशहस्तेन सव्येनैकमना नटः ॥

वितर्कितं तथा ध्यानं निर्दिशेन्नाट्यनृत्तयोः ।
विधायोद्वाहितं शीर्षं तथोर्ध्वं हस्तपक्षकम् ॥

दीर्घमानं तथोच्चत्वं प्रासादस्य प्रदर्शयेत् ।
अरालेन तथा वामभागोद्वाहितशीर्षतः ॥

नतश्वान्तनिमित्तानि श्रान्तं वाक्यं च दर्शयेत् ।
परितो गतया दृष्ट्या तर्जन्या भ्रमणेन च ॥

सर्वार्थग्रहणद्देशं सुधीभिर्नाट्यनृत्तयोः ।
उत्तानितौ पताकौ द्वौ कृत्वा स्वस्तिकविच्युतौ ॥

तथोद्वाहितशीर्षेण चित्रवागवलोकनैः ।
प्रसन्नास्यं तथा स्तब्धसर्वेन्द्रियसमन्वितः ॥

शरदं निर्दिशेन्नाट्ये पुष्पैरपि तदुद्भवैः ।
कायसंकोचनाद्वक्रे रिक्षयोर्ध्वनिरीक्षणात् ॥

आभ्यामेव कराभ्यां तु पूर्वोक्तशिरसा तथा ।
हेमन्ततुं विनिर्दिश्य मानवैर्मध्यमोत्तमैः ॥

दन्तोष्ठशिरसःकम्पाद्गात्रसंकोचनादपि ।
अधमोऽभिनयेच्छीतं क्रन्दितैरपि सीत्कृतैः ॥

उत्तमोऽपि कदाप्येवमवस्थान्तरसंयुतः ।
शीताभिनयनं त्वेवं विदध्याद्वयसनोद्भवम् ॥

गन्धघ्राणैः प्रसूनानामृतुजानां तथा बुधः ।
संस्पर्शाद्रूक्षवातस्य शिशिरं सन्निरूपयेत् ॥

सहर्षोत्पादकारंभ रूपभोगैर्विचित्रितैः ।
अभिनेयो वसन्तस्तु नानापुष्पप्रदर्शनात् ॥

सबीचीनैः भूमितापैस्तथा स्वेदापमार्जनात् ।
संस्पर्शाच्चोष्णवातस्य धीरो ग्रीष्मं विनिर्दिशेत् ॥

हस्तौ शिरस्तथा दृष्टिः शरदीव विनिर्दिशेत् ।
शिशिरर्तौ वसन्ते च ग्रीष्मेऽपि निपुणो नटः ॥

शिखिनां रम्यवाणीभिरिन्द्रगोपैः सशाद्वलैः ।
अधोमुखपताकाभ्यां शिरसोद्वाहितेन च ॥

तथोर्ध्वप्रेक्षणादेवं प्रावृषं सन्निरूपयेत् ।
चिह्नं यदस्य रूपं च कर्म वा वेष एव च ॥

निर्दिशेत्तमृतुं तेन तथेष्टानिष्टदर्शनात् ।
ऋतूनिमानर्थवशात्प्रयुंजीत यथा रसम् ॥

सुखितः सुखितेष्वेव दुःखितो दुःखितेषु च ।
आविष्टो येन भावेन यः सुखेनापरेण वा ॥

सदृग्जनितसंस्कारस्तन्मयं वीक्षतेऽखिलम् ।
प्रह्लादनेन गात्रस्य स्पर्शस्य ग्रहणात्तथा ॥

सुखगन्धरसं वायु चन्द्रज्योत्स्नां निरूपयेत् ।
वासोऽवगुण्ठनाद्धातुं धूलिं धूमधनंजयौ ॥

उष्णं च भूमिसंतापं दिशेच्छायाभिवांछया ।
दृष्ट्योर्ध्वमाकेकरया मध्याह्ने दर्शयेद्रविम् ॥

सौम्यानि यानि वस्तूनि सुखभावोद्भवान्यपि ।
निर्दिशेत्तानि रोमांचैर्गात्रस्पर्शैश्च नाट्यवित् ॥

दर्शयेत्तीक्ष्णरूपाणि वस्तून्यौग्र्यकृतानि च ।
ससौष्ठवैः साभिमानैर्गात्रैराटोपसंयुतैः ॥

गम्भीरार्थानुदात्तार्थांन्नाट्यज्ञस्सन्निदर्शयेत् ।
ध्वजच्छत्रपताकादीन् दर्शयेद्दण्डधारणात् ॥

प्रहारान्विविधांश्चैव नानाशस्त्रप्रहैर्दिशेत् ।
विस्फुलिंगान् घनस्वानान् विद्युदुल्कार्चिषस्तथा ॥

त्रस्तैरंगै ... स्वद्वक्षिनिमेषैर्निर्दिशेद्बुधः ।
उद्वेष्टितौ परावृत्तौ कृत्वा हस्तौ शिरो नतम् ॥

जिह्मदृष्ट्यङ्गसंकोचादास्यप्रच्छादनेन च ।
अलिरेणुपतंगानां तोयस्य च निवारणम् ॥

नभस्तेजोऽनिलं चोष्णं नाट्यज्ञः सन्निरूपयेत् ।
अथ पुंसां तथा स्त्रीणामखिलाभिनयं पृथक् ॥

भावानुभावसंयुक्तं कथाम्यधुना क्रमात् ।
आश्लेषणाच्छरीराणां सस्मितान्नयनादपि ॥

तथोल्लुकसनेनापि पुमान् हर्षं विनिर्दिशेत् ।
शीघ्रमुत्पन्नरोमांचबाष्पसंरुद्धलोचनः ॥

भावं विनिर्दिशेदेवं नर्तकः स्मितसंयुतः ।
निःश्वासेनांगकम्पेन दशनेनाधरस्य च ॥

क्रोधं निरूपयेद्धीमानुद्वृत्तारुणलोचनः ॥
चिबुकोष्ठप्रकंपेन बाष्पपूर्णेक्षणेन च ॥

शीर्षस्य कम्पनेनापि भ्रुकुटीरचनेन च ।
अङ्गुलिस्फोटनान्मौनात्स्रगलंकारवर्जनात् ॥

आयतस्थानकं धार्यरोषेर्ष्ये निर्दिशेत् स्त्रियः ।
अधिकोच्छ्वासनिःश्वासैरधोमुखविलोकनैः ॥

विहाय प्रेक्षणाद्यापि नृणां दुःखं विदर्शयेत् ।
शिरोनिघातात्सह्वानै रोदनैरमितापतः ॥

भूमिघातादपि स्त्रीणां दुःखं धीमान्नियोजयेत् ।
उद्वेगसंभ्रमैः शस्त्रसंपातेनापि साध्वसम् ॥

पुंसामभिनयेद्धीमान् धैर्यावेगादिभिस्तथा ।
लोलतारकनेत्राभ्यामङ्गस्फुरितकम्पितैः ॥

पार्श्वावलोकनैश्चित्रासादाक्रन्दितेन च ।
आलिङ्गनेन पुंसोऽपि स्त्रिया भीतिं प्रदर्शयेत् ॥

पुंस्कृतः स्त्रीकृतो भावो द्विधेत्यभिनयं प्रति ।
तत्राद्यो धैर्यमाधुर्यसंपन्नो ललितो परः ॥

कम्पनेन शरीरस्य घूर्णनान्नेत्रयोरपि ।
हंसास्याभिधहस्तेन दक्षिणेनेतरेण तु ।
कटिस्थेनार्धचन्द्रेण समेन शिरसा तथा ।
ब्रह्माख्ये स्थानकेनापि धीमानृषभमादिशेत् ॥

शुकतुण्डेन हस्तेन दृष्ट्या करुणया तथा ।
अधोमुखेन शीर्षेणाश्वक्रान्तस्थानकेन च ।
चार्यापि्यंचितया धीमान्गान्धारं स्वरमादिशेत् ॥

पताकौ स्वस्तिकौ कृत्वा शिरसा विधुतेन च ।
शैवाख्यस्थानकेनापि कटीभिन्नेन वा पुनः ।
दृष्ट्या च हास्यया धीरोऽभिनयेन्मध्यमं स्वरम् ॥

कुत्वालपल्लवौ हस्तौ धुतेन शिरसा तथा ।
वैष्णवस्थानकेनापि दृष्ट्या कान्ताख्यया तथा ॥

परावृत्ताख्यमूर्ध्ना च प्रत्यालीढाभिधेन च ।
स्थानकेन विनिर्देश्यो धैवतो निपुणैर्नटैः ॥

हस्तेन कटिहस्तेन करिहस्तेन हीनया ।
दृष्ट्वावधूतशिरसा निषादं सन्निरूपयेत् ॥

सुधाब्धिमतमाश्रित्याशोकमल्लेन भूभुजा ।
अभिनीताः स्वराः सप्त षड्जाद्या नाट्यवेदिनः ॥

तं निर्दिशेत्पताकेन ह्रिकारं चतुरेण च ।
तौंशब्दं त्वर्धचन्द्रेण तथा टेन्तिपताकतः ॥

कर्तयोस्येननं पञ्चवर्णा वाद्योद्भवा मया ।
अभिनीता यदौचित्यमभिनेया परे बुधैः ॥

ब्रह्मस्थः शुकतुण्डेन वामेनान्येनपाणिना ।
तिर्यक्स्थितेनोपलाभ्रे सूच्यास्येन विनिर्दिशेत् ॥

तेन शब्दं सुधीरेवमन्यं च बिरुदादिकम् ।
यथौचित्यं हस्तकार्यैरन्यैरभिनयेदिति ॥

प्रसारितभुजो मुष्टिर्वामोऽन्यः खटकामुखः ।
कर्णस्थो धनुराकर्षनियुक्तो नृत्यपण्डितैः ॥

खटकास्यकरस्थाने करः सूचीमुखो यदा ।
तदासौ बाणसन्धाने विद्वद्भिः परिकीर्तितः ॥

श्रव्यं श्रवणयोगेन मुखयोगेन वाचिकम् ।
स्पृश्यमङ्गादियोगेन चक्षुर्योगेन चाक्षुषम् ॥

गन्धाघ्राणस्य योगेन स्वादं जिह्वाभियोगतः ।
एवं योग्येन हस्तेनाभिनयेन्नृत्यकोविदः ॥

अशोकः

नाट्ययुतम्

ध्रुवास्त्वभिनयो हर्षशोककोपादिभिः स्फुटम् ।
रसभावान्वितस्तत्तत् स्थानेऽन्वर्थानुसारतः ।
क्रियते यस्तु चतुरैस्तत्त नाट्ययुतं भवेत् ॥

वेममूपालः

नाट्यरङ्गः

संसाध्या भूमिरायामे पूर्वपश्चिमयोर्दिशोः ।
दक्षिणोत्तरविस्तारा प्रतीच्या विभजेच्च ताम् ॥

दण्डैश्चतुर्भिर्द्वाभ्यां च द्वाभ्यामष्टाभिरेव च ।
चत्वारि स्युः क्रमाद्भागास्तेषां पश्चिमतो भवेत् ॥

नेपथ्यस्य गृहं तस्य पुरतो रङ्गशीर्षभूः ।
तदग्रतो रङ्गपीठं तत्पुरस्तात्सभास्पदम् ॥   कुम्भः

नाट्यं रङ्गप्रवृत्तम्

या या सलीला नियता गतिश्च रङ्गप्रवृत्तस्य विधानयुक्ता ।
तामेव कुर्यादवियुक्तसत्त्वो यावत्तु रङ्गात्प्रतिनिस्सृतः स्यात् ॥

कुम्भः

नाट्यरासकम्

यत्र स्त्रीभिर्वसन्ततौ नृत्यतेऽभिनयात्मकम् ।
वसन्तरागसंबद्धैर्गीतैरौद्धत्यवर्जितम् ।
चरितैश्चित्रितं राज्ञस्तदुक्तं नाट्यरासकम् ॥

कुम्भः

हास्यशृङ्गारभूयिष्ठं दशलास्याङ्गभूषितम् ।
उदात्तनायकं चैव पीठमर्दोपनायकम् ॥

यत्र वासकसज्ज्यत्र नायिकोदात्तनायकौ ।
नाट्यरासकमेकाङ्कमिदमाह महामुनिः ॥

शुभङ्करः

नाट्यलक्षणम्

लोकस्य च स्वभावो यः सुखदुःखविमिश्रितः ।
नाट्यं तस्यानुकरणं बिम्बिताभिनयान्वितम् ।
स्पन्दनार्थतया धातोर्नटैः सात्त्विकभूरि तत् ॥

नृत्तरत्नावली

नाट्यवेश्म

नाट्यवेश्म ततः कुर्याद्वस्तुलक्षणलक्षितम् ।
दोषैरदूषिता भूमिः सामाग्रैरश्मिरादृढा ॥

अनूषरा भूमिदोषैः कीलकाद्यैरदूषिता ।
लाङ्गलोल्लिखिता शस्ता तन्नक्षत्राणिसमासतः ॥

हस्तपुष्यानुराधान्त्यसौम्यचित्रोत्तरासु च ।
द्विदैवत्ये दिगीशस्ते विष्ट्यादैरपरिप्लुते ॥

पुण्याहवाचनादयेम नाट्यवेश्म समारभेत् ।
समां कृत्वा भुवं तत्र सितं तन्तुं प्रयत्नतः ॥

कार्पासाद्यन्यतरजं दृढं सूत्रं प्रसारयेत् ।
यथाकृष्टं बलात्पुम्भिर्न तृट्यति कदाचन ।
मध्यत्रिभागतुर्यांशे तृटिते क्रमतो भवेत् ॥

कुम्भः

नाट्यवेश्मक्रमः

तदिष्टं तत्प्रबोद्धव्यमणुश्चैव रजस्तथा ।
वालो लिक्षा च यूका च यमाश्चैवाङ्गुलं तथा ॥

एकैकोत्तरवृद्ध्या च क्रमादष्टगुणं त्विदम् ।
हस्ताङ्गुलानां विंशत्या चतुरन्वितया मितः ॥

चतुर्हस्तो भवेद्दण्डो नाट्यवेश्मगतो सदा ।
तत्र स्यान्नाकिनां वेश्म सप्तविंशतिदण्डकम् ॥

दैर्घ्यविस्तरतस्तस्मात्तदर्धेन मितं पुनः ।
नृणां षोडशभिर्दण्डैर्मितमायामतो मतम् ॥
त्रिरष्टभिस्तु विस्तारे तत्र सूत्रं प्रसारयेत् ।
नाट्यवेश्म न कर्तव्यमतथोर्ध्वं कदाचन ॥

कुम्भः

नाट्यवेश्मविभागः

तत्त्रिधा गदितं वेश्म विकृष्टं चतुरश्रकम् ।
त्र्यश्रं चेति पुनर्मध्यं दीर्घं सममिति द्विधा ॥
तत्राद्यं देवतागारमतिदीर्घमनुत्तमम् ।
चतुरस्रं च यद्दीर्घं भूपतीनां तदीरितम् ॥
ब्राह्मणादेर्गृहं प्रोक्तं चतुरस्रं समं बुधैः ।
शूद्रादिहीनवर्णानां वेश्म त्र्यश्रमिहोदितम् ।
प्रेक्षागृहाणां निर्माणे प्रमाणं विश्वकर्मणा ॥

कुम्भः

नाट्यशाला

भूशुद्धिं बलिकर्मादि कृत्वा भित्तिं प्रयोजयेत् ।
भित्तिव्यापारवृत्तौ तु स्तम्भानां स्थापनं भवेत् ॥
शुभे दिने सानुकूले स्थिरनक्षत्रलग्नयोः ।
स्तम्भानां स्थापनं कुर्यात्त्रिरात्रोपोषितो गुरुः ॥
स्तम्भास्तु खादिराः साजा पानसा अकुचन्दनाः ।
अग्रन्थयो ह्यसुषिराः स्थूलाश्चानपिच्छलाः ॥
तत्र मन्त्रः –
यथाचलो गुरुर्मेरुः हिमवांश्च यथाचलः ।
यथावहो नरेन्द्रस्य तथा त्वमचलो भव ॥
एवं मन्त्रं समुच्चार्य स्थापयेत्तत्र ……म्भणम् ।
दृश्यते यावदेतेषां तदर्धं विखनेद्भुवि ॥
तेषां मूलानि यत्नेन सिकताभिः प्रपूरयेत् ।
विदध्याद् दीर्घविस्तारो पात्रनाट्यानुरूपतः ॥
दामोदरस्तु–हस्तविंशतिविस्ताररङ्गभूमिर्मनोहरा । इत्याह ॥
शालामध्येन कर्तव्यं स्तम्भानां स्थापनं बुधैः ॥
कुर्यादुपरिभागं तु दारुवृद्धिभिरावृतम् ।
गवाक्षौ भित्तयश्चित्रैः सालभञ्जीभिरन्विताः ॥
कलशैश्च पताकाभिः वितानैस्तोरणैरपि ।
ऊर्ध्वभागो युतः कार्यः पुष्पमाल्यैरलङ्कृतम् ॥
अधोभागे कुट्टिमः स्यात् सुधाभिः परिलेपितः ।
नातिश्लक्ष्णं स्थलं कुर्यात्पादो न स्खलितो यथा ॥
धाम्नास्त्रितयभागेन नेपथ्यं पश्चिमादिशि ।
कारयेत्तत्र पात्राणां वेशनातोद्का कचः (?) ॥

सङ्गीतनारायणः

नाट्यशालालक्षणम्

निष्पत्तिर्नाट्यशास्त्रस्य तत्पारम्पर्यकीर्तनम् ।
निर्मितिर्नाट्यशालाया निवेशोऽथ सभापतेः ॥
सन्निवेशः सभायाश्च सर्वरंगार्थकीर्तनम् ।
कीर्तनं पूर्वरङ्गाङ्गं प्रत्याहारादिलक्षणः ॥
सम्यग्नान्दीलक्षणञ्च ध्रुवासोपोहना ततः ।
पात्रस्याथ प्रवेशश्च तथैवाङ्गनिरूपणम् ॥
प्रत्यङ्गलक्ष्मोपाङ्गानां लक्ष्माभिनयलक्षणम् ।
हस्तस्याकरणं हस्तक्षेत्रस्यापि च लक्षणम् ॥
प्रचारो हस्तयोस्तद्वद्धस्तकर्माण्यनुक्रमात् ।
स्थानकानि तथा चार्यो द्विविधा मण्डलान्यपि ॥
द्विविधानि तथा नृत्तकरणानि तथैव च ।
तानि चोत्प्लुतिपूर्वाणि कलासाश्च सरेचकाः ॥
करणैरभिनिर्वृत्ता अङ्गहारा द्विधा ततः ।
वृत्तयश्च तथा न्यायाश्चातुर्विध्यमुपाश्रिताः ॥
देशीनृत्तविधिर्द्वेधा तथा परिवडिर्मता ।
नृत्ते पेरणिनस्तस्य लक्षणं प्राग्रलक्ष्म च ॥
लास्याङ्गानां तथा लक्ष्मोपाध्यायाचार्ययोस्तथा ।
नटीनर्तकयोस्तद्वल्लक्ष्म वैतालिकस्य च ॥
लक्षणं रेचकस्याथ देशीनृत्ताभिधां तथा ।
लक्षणं रासकादीनां लक्ष्म कोल्लाटिकस्य तु ॥
नृत्तश्रमविधिस्तद्वत्संप्रदायस्य लक्षणम् ।
तद्गताश्च गुणा दोषाः क्रमेणैतत्प्रकाश्यते ॥

कुम्भः

नाट्यं लोकप्रमाणम्

नानाशीलाः प्रकृतयः शीले नाट्यं प्रतिष्ठितम् ।
तस्माल्लोकप्रमाणं हि नाट्यं ज्ञेयं प्रयोक्तृभिः ॥

कुम्भः

नाट्यस्य लोकप्राधान्यम्

एतेऽभिनयविशेषाः कर्तव्याः सर्वभावसम्पन्नाः ।
अन्येऽपि लौकिका ये तु ते सर्वे लोकतः साध्याः ॥

कुम्भः

नाटयस्य पृथक्त्वम्

अङ्गेषु मुकुटादीनां शब्देषु यमकादिवत् ।
ससंस्कारविशेषत्वात्पृथक्त्वं कस्यचिन्मतम् ॥

कुम्भः

नाटयस्वरूपम्

यानि शास्त्राणि ये धर्मा यानि शिल्पानि याः क्रियाः ।
लोकधर्मप्रवृत्तानि नाटयमित्यभिधीयते ॥

कुम्भः

नाटयाङ्गानि

विच्छेदश्चार्पणं चाथ विसर्गश्चानुबन्धकाः ।
दीपनं च प्रशमनं षडङ्गानीति मन्वते ॥

वेमभूपालः

नाटयालङ्काराः

उच्चो दीप्तश्च मन्द्रश्च नीचद्रुतविलम्बिताः ।
इत्येते षडलङ्कारा नाटयविद्भिर्निरूपिताः ॥

वेमभूपालः

नाटये कर्तव्यं भूषणम्

नाटये प्रयोगे निपुणैर्न कार्यं भूषणं गुरु ।
यतस्तेन तु पात्राणां खेदः सञ्जायते तदा ।
भूषणं लघु नाटयेषु कर्तव्यं जतुपूरितम् ॥

वेमभूपालः

नाटये प्रमाणम्

यथा धुतादिके मूर्ध्नि क्रियाभेदाद्भवेद्भिदा ।
एवं भूषाविभेदेन भेद इत्येव सुन्दरम् ॥

कुम्भः

नाटयोचितान्यायुधानि

एवमाहार्यरचना नानादेशसमुद्भवा ।
आचार्यबुद्धया कर्तव्या बहुयुक्तिसमेतया ॥
नाटये योग्यान्यायुधानि कोदण्डप्रभृतीनि तु ।
धनुःशास्त्रोक्तमार्गेण कुर्यान्नाटये यथोचितम् ॥
छेद्यं भेद्यं प्रहरणं नैव नाट्ये प्रयुज्यते ।
संज्ञामात्रेण कर्तव्यमायुधस्य विमोचनम् ॥
यद्वा शिक्षाविशेषेण विद्यया माययाथवा ।
शस्त्रमोक्षो विधातव्यो रङ्गमध्ये प्रयोक्तृभिः ॥

वेमभूपालः

नाटयोत्पत्तिः

इहानुभूयते ब्रह्मा शक्रेणाभ्यर्थितः पुरा ।
चकाराकृष्य वेदेभ्यो नाटयवेदन्तु पञ्चमम् ॥
ऋग्भ्यः पाठयमभूद्गीतं सामभ्यः समपद्यत ।
यजुर्भ्योऽभिनया जाता रसाश्चाथर्वणोऽभवन् ॥
इहोपवेदा वेदाश्च चत्वारः कथिताः श्रुतौ ।
तत्रोपवेदो गान्धर्वः शिवेनोक्तः स्वयंभुवे ।
तेनापि भरतायोक्तं तेन मर्त्ये प्रचारितः ॥

सङ्गीतसर्वस्वम्

नादः

नकारः प्राणमानन्दो दकारमनलं विदुः ।
जातः प्राणाग्निसंयोगात्तेन नादोऽभिधीयते ॥

सङ्गीतमकरन्दः

नादभेदः

नादोऽतिसूक्ष्मः सूक्ष्मश्च पुष्टोऽपुष्टश्च कृत्रिमः ।
इति पञ्चविधा धत्ते पञ्चस्थानस्थिताः क्रमात् ॥

सङ्गीतमकरन्दः

नादशब्दनिष्पत्तिः

इति पञ्चाभिधं नूनमाविर्भावयति ध्वनिम् ।
नादोऽयं नदतेर्धातोरसौ पञ्चविधः स्मृतः ॥

कुम्भः

नादावतीलक्षणम्

श्रीरागो यत्र रागः स्यान्मन्द्रतालोऽथ कैशिकी ।
वृत्ती रीतिस्तु पाञ्चाली रसः शृङ्गार एव च ॥
शुक्लस्तु कथ्यते वर्णो ब्राह्मयधिष्टातृदैवतम् ।
ब्राह्मं कुलं समादिष्टा सेयं नादवती बुधैः ॥
पञ्च यत्रेन्दवगुणास्त्वेकस्त्रैविष्टपो गुणः ।
सानुप्रासास्त्रयः पादा भवन्तीति मुनेर्मतम् ॥

ऽ।।ऽ।।ऽ।।ऽ।।।।।

सोमराजदेवः

नादोत्पत्तिः

नादरूपः स्मृतो ब्रह्मा नादरूपो जनार्दनः ।
नादरूपा पराशक्तिः नादरूपो महेश्वरः ॥
यदुक्तं ब्रह्मणः स्थानं ब्रह्मग्रन्थिश्च यः स्मृतः ।
तन्मध्ये संस्थितः प्राणः प्राणाद्वह्निसमुद्भवः ॥

वह्निमारुतसंयोगान्नादः समुपजायते ।
नादादुत्पद्यते बिन्दुः नादात्सर्वं च वाङ्मयम् ॥

इति केचित् ।

कन्दस्थानसमुत्थो हि स च पञ्चविधो भवेत् ।
सूक्ष्मश्चैवातिसूक्ष्मश्च समीरः सञ्चरन्नधः ।

ऊर्ध्वं च कुरुते सर्वां नादपद्धतिमुद्धताम् ॥

इत्यन्ये वदन्ति ।

नकारः प्राण इत्याहुर्दकारश्चानलो मतः ।

नादस्य द्विपदार्थोऽयं समीचीनो मयोदितः ॥
नादोऽयं नदतेर्धातोः स च पञ्चविधो भवेत् ।

सूक्ष्मश्चैवातिसूक्ष्मश्च व्यक्तोऽव्यक्तश्च कृत्रिमः ॥
सूक्ष्मनादो गुहावासी हृदये चातिसूक्ष्मकः ।

कण्ठमध्ये स्थितो व्यक्तः अव्यक्तस्तालुदेशके ॥
कृत्रिमो मुखदेशे तु ज्ञेयः पञ्चविधो बुधैः ।
इति तावन्मया प्रोक्ता नादोत्पत्तिर्मनोहरा ॥

मतङ्गः

नादोद्भवक्रमः

नकारः प्राणनामा स्याद्दकारो वह्निरुच्यते ।
जातः प्राणाग्निसंयोगात्तेन नादोऽभिधीयते ॥

हम्मीरः

नान्दीलक्षणम्

ध्रुवायां गीयमानायामस्यां नान्दीं पठेत्ततः ।
मध्यमस्वरमाश्रित्य सूत्रधारः सलक्षणाम् ॥

स्याद् द्वादशपदा नान्दी यद्वा दशपदी भवेत् ।
अथवाष्टपदी वाक्यं पदशब्देन भण्यते ॥

अथवा सुविभक्तान्तं पदमत्रोक्तलक्षणम् ।
एतां नान्दीं प्रयुञ्जीत तदुदाहारणं यथा ॥

विप्रदासः

नान्दीश्लोकार्थवर्णनम्

अर्थप्रपञ्चसहितं कुर्वातां पारिपार्श्वकौ ।
अर्थप्रपञ्चवाक्यानि क्रमेण द्वादशस्वपि ॥

वाक्येपूभौ योजयतस्तानि वक्ष्याम्यनुक्रमात् ।
सूत्रधारेण वाक्येऽस्मिन् प्रयुक्ते पारिपार्श्वकौ ॥

शेषमहाहिशयाय नमो दिव्यकिरीटधराय नमः ।
चक्रोदारधराय नमः सागरशयनाय नमः ॥

यैरिदमार्यं रङ्गशरीरं भूषितमार्यैस्ते विजयन्ताम् ।
कविकुलगीतं गुणपरिवीतं हरिसमलीलं भजत नृपालम् ॥

माधव किन्तव मामिकया पीनकुचद्वयपीडनया ।
इत्युपहसितो राधिकया वारिजलोचन पालय गाः ॥

जितमुरजवरैरभिनवजलदैर्लसतिवसुमती शिखरिवरवती ।
नवजलललितस्वेदापरितः प्रत्यग्रशस्यरोमाञ्चा ।
कलकृतमयूरशब्दा नृपवरहर्षाय कल्पनामचला ॥

विप्रदासः

नान्द्युदाहरणम्

श्रीनाथः श्रियमातनोतु जगतामृद्धिं लभन्तां बुधाः
पृथ्वीशः पृथिवीं प्रशास्तु सकलां गावो भवन्त्वक्षयाः ।

काले वर्षतु वारिवाहनिवहो भूरस्तु शस्योत्तरा
भूयात्क्षेमसुभिक्षवाञ्जनपदो रङ्गः सदा वर्धताम् ।

यायात्पापमतिः क्षयं विलसतात् धर्मस्य रक्षाकरो
भक्तिः शूलिनि शाश्वती प्रसरतात्प्रेक्षाकरो नन्दताम् ॥

विप्रदासः

नामावली

श्रुत्युक्तपदशब्दैश्च गेयं नामावलीरिता ।

भरतकल्पलतामञ्जरी

नायकः

विशेषज्ञस्तौर्यत्रितयनिपुणः कोऽभिनयवि-
द्रसालंकारज्ञः सकलगुणदेशैकनिकषः ।

पराभिप्रायज्ञो यशसि बहुमाने धृतरुचिः
क्षमादाता वीरो जयति गिदतो नायक इति ॥

पुरो भूपश्च विप्राश्च मण्डलस्य च दक्षिणे ।
अमात्यराजपुत्राश्च उत्तरा वित्तमाश्रिताः ॥

पुरोडाशे नरपतेर्वेश्या स्युः वित्तमाश्रिताः ।
वन्दिनः कवयोऽत्रैव कलानाट्यविदोऽपि ये ॥

नाट्यनाम्नो बहिर्योधमुख्यास्तिष्ठन्ति शस्त्रिणः ।
राज्ञोऽङ्गरक्षितैः कार्या यावन्नाटकदर्शनम् ॥

गोष्ठीयात्रादूतिनाट्यपुष्पापचययोषितः ।
राज्ञां विनाशस्थानानि तस्माद्रक्षः सतेः सदा ॥

तत्रोत्सार्या प्रयत्नेन अविज्ञाताश्च शस्त्रिणः ।
अथाम्लेच्छाः पामराश्च तथा पाषण्डधर्मिणः ॥

राजाज्ञया सर्व एवोपविष्टाः स्युः सभासदः ।
अन्यथा पीडिताङ्गानां रसोद्बोधो न जायते ॥

सङ्गीतनारायणे

नायकस्वरूपम्

भावाश्रयो बुधैर्ज्ञेयो विकृतार्थानुकारवान् ।

कुम्भः

नायिकाः

चतुर्दशसमा यावद्बालेति परिगीयते ।
ततस्तु विंशतिं यावन्मुग्धा प्रथमयौवना ॥

....

चतुर्थयौवनं केचिदत ऊर्ध्वं वदन्ति च ।
पञ्चचत्वारिंशदन्तं यावद्वृद्धा ततो मता ॥

शुभङ्करः

निकुञ्चकः

पताकोऽङ्गुष्ठको यत्र मध्यमामूलसंश्रितः ।
निकुञ्चकोऽसौ स्वल्पार्थे वेदस्याध्ययने मतः ॥

कुम्भः

अङ्गुष्ठो मध्यमामूलं पताके यत्र संश्रयेत् ।
निकुञ्चकाभिधं हस्तमूचुः कर्मास्य कथ्यते ।
स्वल्पस्यार्थस्याभिनये वेदस्याध्ययनेऽप्यसौ ॥

विप्रदासः

निकुट्टकः

अग्रेणाङ्घ्रेः कुञ्चितेन गतिः प्रोक्ता निकुट्टकः ।

कुम्भः

निकुन्तछाया

अनूनाधिकता रागे येषु स्थायेषु दृश्यते ।
स्थाया निकुन्तेर्विज्ञेया बलात्संस्थापिता स्थितौ ॥

कुम्भः

निकुम्भितलक्षणम्

कुञ्चितं पादमन्याङ्घ्रेः पार्ष्णिभागे विनिक्षिपेत् ।
वक्षः समुन्नतं बिभ्रत्खटकामुखमध्यमम् ॥
कुर्यात्तिलकवत्फाले यत्र तत्स्यान्निकुम्भितम् ।
अनेन करणेन स्यादभिनेयस्त्रिलोचनः ॥

अत्र कीर्तिधरस्त्वाह सूचीमुखमधोमुखम् ।
तस्याभिनयने हस्तौ यस्मादयमुदीरितः ।
एतस्मिन् करणे पादं वृश्चिकं केचिदूचिरे ॥

नृत्तरत्नावली

निगूढार्थः (दूतः)

उद्देश्यकार्यवादे च विपक्षे नायके स्वयम् ।
वैरमुद्धरते यस्तु निगूढार्थः स उच्यते ॥

शुभङ्करः

निगृहीतं—मृदङ्गप्रहारभेदः

करयोः पुटयोगेन निगृहीतमुदाहृतम् ।

संगीतनारायणे

निजाहार्यः

अर्धोरुकादिकक्षैश्च शिरोवेष्टादिभूषणैः ।
निजाहार्य इति प्रोक्तो भरतान्वयवेदिभिः ॥

शृङ्गारशेखरः

नितम्बलक्षणम्

उत्तानोऽधोमुखत्वाभ्यां क्रमेण स्कन्धदेशतः ।
पताको यदि निष्क्रम्य नितम्बक्षेत्रवर्तिनौ ।
रेचकं कुरुते हस्तौ नितम्बावुदितौ तदा ॥

हम्मीरः

निद्रा—व्यभिचारिभावः

दमश्रमक्लमालस्याच्चक्षुर्निमीलनं निद्रा ।

शुभङ्करः

निन्दितगायनाः

सन्दष्टः कपिलः काकी शीत्कारी सानुनासिकः ।
उद्घटो सस्वरोऽव्यक्तो विरसो विनिमीलनः ॥
तुम्बकी बोम्बको वक्री स्थानभ्रष्टो व्यवस्थितः ।
प्रसारी कक्कुभो भीतः सन्दष्टोऽनवधानकः ॥
कम्पितः शङ्कितो मिश्रः करालो च वितालकः ।
पञ्चविंशतिरित्येते गायना निन्दिताः स्मृताः ॥

कुम्भः

निबद्धस्य नामानि

निबद्धस्य च गीतस्य नामधेयत्रयं मतम् ।
रूपकं च प्रबन्धश्च वस्तु चापि तृतीयकम् ।
उद्ग्राहश्चेति चत्वारः कथ्यन्ते तस्य धातवः ॥

सोमराज कुम्भ

निबद्धादित्रयाणां लक्षणम्

वर्णान्वितं निबद्धं स्यादालप्त्या त्वनिबद्धकम् ।
मिश्रं तालान्वितैर्वर्णैः जातैश्च पदसंग्रहः ॥

सोमराजदेवः

निबन्धः

नानाविधविभक्तं वा ध्वानौ यस्य भवेद्द्रुतम् ।
निबन्धः स तु विज्ञेयो गीततत्त्वविचक्षणैः ॥

कुम्भः

निमीलकः

निमीलनं तु यो गायेन्निमीलक इति स्मृतः ।

भरतकल्पलता

निरस्तः

निर्गच्छति मुहुर्वक्त्रान्निरस्तश्शब्दवान् मुहुः ।
शान्ते रोगे च दुःखार्ते विनियुक्तो बुधैरयम् ॥

कुम्भः

निर्घोषः—हौडुक्किकपाटः

निर्घोषं पाटमाचख्युः कोणाघातेन तद्विदः ।

यथा —

न ख खि थों थों दिगिद थोंदिगि दथो दिगि ।

कुम्भः

निर्जवनाः

सुकुमारो रक्तियुक्तो वक्ता सूक्ष्मत्वमापितः ।
स्वरा येषु क्रमेणैते ज्ञेया निर्जवनान्विताः ॥

कुम्भः

निर्युक्तम्

तत्र सर्वैस्तु नियमैर्युक्तं निर्युक्तमिष्यते ।

दत्तिलः

निर्विकल्पकरसः

सभ्यचेतसि वर्तेत वासनारूपतो रसः ।
दीनेन चालम्बनानामपेक्षी कुरुते रसः ॥
यत्प्रसिद्धालम्बनताश्चयं स्थायिनि दृश्यते ।
निर्विकल्पकमत्रेष्टं प्रमाणं मुनिचोदनात् ॥

कुम्भः

निर्वेदस्य स्थायित्वव्यभिचारित्वस्थितिः

अमङ्गलमपि ब्रूते पूर्वं निर्वेदमेव यत् ।
मुनेर्मेनेऽस्य तन्नूनं स्थायिताव्यभिचारिते ।
पूर्वापरान्वयो ह्यस्य मध्यस्थस्यानुषङ्गतः ॥

हम्मीरः

निवृत्तिप्रयोजनम्

वर्णालङ्कारसौभाग्यं विच्छेदं करणस्य च ।
तत्त्वादीनां प्रयोगश्च निवृत्तीनां प्रयोजनम् ॥

नाट्यशास्त्रे

निवृत्त्यङ्कुरः

अन्येनाभिहितं वाक्यं सूचया योजयेत्पुरः ।
परस्परार्थसंबन्धो निवृत्त्यङ्कुर उच्यते ॥

वेमभूपालः

निष्कृष्टगुणः

उच्चैरुच्चारणादुक्तं निष्कृष्टं भरतादिभिः ।

भरतकल्पलता

निसृष्टार्थः (दूतः)

उभयोर्भावमुन्नीय स्वयं वदति चोत्तमम् ।
सुश्लिष्टं कुरुते कार्यं निसृष्टार्थः स उच्यते ॥

यद्वा—

धीरः स्थिरमतिः शूरः स्वामिकार्यविधायकः ।
स्वपौरुषप्रकाशी च निसृष्टार्थः स उच्यते ॥

शुभङ्करः

निःसारणः

... ... स तु निस्सारणाभिधः ।
निःसरन्त इवाभान्ति स्वरा यत्र क्रमोद्गताः ॥

कुम्भः

निःसारुकः

कातरः समराख्यश्च वैकुण्ठो वाञ्छितस्तथा ।
विशालश्च तथानन्दः षट् च निःसारुको भवेत् ॥

गान्धर्ववेदे

निस्स्वानः

निस्स्वानस्त्वेकवक्त्रः स्यात् स त्रिधा परिकीर्तितः ।
उत्तमः कांस्यजस्ताम्रनिर्मितो मध्यमः स्मृतः ॥

अधमो लोहघटतो ह्रस्वोऽधस्तान्मुखे महान् ।
चर्मणा मानुषेणायं गाढं वक्त्रे सुयंत्रितः ॥
वध्रैः सुषिरनिक्षिप्तैर्निविश्यवलये मुहुः ।
व्यावर्तितैर्नद्धचर्मा मेघगम्भीरनिस्वनः ॥
वैरिवित्रासजनको भीरुहृद्भेदनोपरः ।
शूररोमाञ्चजनको युद्धप्रोत्साहकारकः ॥
घटद्धटेतिशब्देन व्याप्तसर्वरणाङ्गणः ।
चर्मकोणेन वाद्योऽयं सद्वितीयो महाभटैः ॥

कुम्भः

नूपुरविद्धका

चरणौ स्वस्तिकीकृत्य पार्श्वयोः पादयोस्तथा ।
रेचितौ यत्र सा ज्ञेया चारी नूपुरविद्धका ॥

कुम्भः

नृत्तम्

रसभावविहीनं तु नृत्तमित्यभिधीयते ।

भरतकल्पलता

गात्रविक्षेपमात्रं च सर्वाभिनयवर्जितम् ।
आङ्गिनोक्तप्रकारेण नृत्तं नृत्यविदो विदुः ।
एतत्त्रयं द्विधा प्रोक्तं मार्गदेशीप्रभेदतः ॥

सङ्गीतनारायणे

नृत्तधर्मौ

नृत्ते नृत्यैकदेशोऽपि नृत्यशब्दाद्द्वयोर्ग्रहः ।
नाट्यधर्मी लोकधर्मीत्येवं रूपविशेषणात् ॥

कुम्भः

नृत्तप्रशंसा

आगत्य ब्रह्मलोकादिह भरतमुनिश्शास्त्रमेतन्मदीयं
दृष्ट्वा भूयः कृतार्थः प्रसृमरपुलकव्यञ्जितान्तः प्रमोदः ।
आश्चर्यं पश्यतेदं कथमिति गतवानाशयं मे समग्रं
सश्रीमान् जयसेनापतिरिति नियतं वक्ष्यतामे मुनीनाम् ॥

नृत्तरत्नावली

नृत्तभेदाः

नृत्तं चापि त्रिधा प्रोक्तं विषमं विकटं लघु ।
विषमनृत्तं विकटनृत्तं लघुनृत्तं चेति त्रिविधम् ॥

सङ्गीतनारायणे

नृत्ताचार्यः

कुलशीलगुणैर्युक्तो नानाशिल्पप्रयोगवित् ।
गुरूपदेशनियतो नाट्यप्रयोगविचक्षणः ॥
एवमादिगुणोपेतो नटनाट्यविदां मतः ।
उज्ज्वलो रूपवान् दक्षो दृष्टावतरणक्रियः ॥
चतुर्विधाभिनयविन्मेधावी नट उच्यते ।
रूपवान्नृत्ततत्त्वज्ञः समादिग्रहकोविदः ॥
वाद्यवादनदक्षश्च ग्रहमोक्षविशारदः ।
सम्प्रदायगतज्ञानो लयतालविचक्षणः ॥
कर्ता वाद्यप्रबन्धानां प्रगल्भो मुखवाद्यवित् ।
नानाविधस्थायिभेदविवेचनविशारदः ॥
निर्माता नृत्तभेदानां शिष्यशिक्षाविचक्षणः ।
तूर्यत्रयव्यवस्थायाः प्रतिष्ठापयिता स्फुटम् ॥
नृत्तदोषसमाधानचतुरो रञ्जकस्तथा ।
एवं विधगुणोपेतो नृत्ताचार्यः प्रकीर्तितः ॥

वेमभूपालः

नृत्यम्

नृत्ते क्यप्प्रत्यये नृत्यशब्दः कर्मविवक्षया ।
भावोपसर्जिते यत्र रसो मुख्यः प्रकाश्यते ॥

कुम्भः

रसभावव्यञ्जकादियुतं नृत्यमितीर्यते ।

भरतकल्पलता

यस्यां भित्तिगतेन्द्रनीलमणिषु प्रोद्दीप्तरत्नावलिं
दृष्ट्वा नूतननीरदोपरिलसद्विद्युल्लताविभ्रमात् ।
गम्भीरं मुरजप्रतिध्वितमपि श्रुत्वोर्ध्वगेहोद्भवं
प्रोन्मत्तप्रमदासखो वितनुते नृत्यं मयूरव्रजः ॥

कुम्भः

—दशविधम्

नाट्यनृत्ते ताण्डवं च नृत्तं लास्यमिमाभिधा ।
नर्तनस्याथ नृत्ते तु विषमं विकटं लघु ।
पेरणी गौण्डली चैव नृत्यं दशविधं स्मृतम् ॥

नृत्यत्रयम्

नाट्यमार्गं च देशीयमुत्तमं मध्यमंतथा ।
अधमो क्रमतो ज्ञेयं नृत्यत्रितयमुत्तमैः ॥

कुम्भः

नृत्यत्रिगतित्वम्

काचिन्नृत्यविधौ विलम्बितमपि क्षिप्रं च नानाविधं
यत्यादिप्रचुरप्रबन्धरचनां कृत्वा मृदङ्गे मुदा ।
चञ्चत्पाणिचलत्पृथुस्तनयुगं स्वेदार्द्रगण्डस्थलं
तत्तद्भूषणभूषिताङ्गरुचिरा रङ्गस्थले राजते ॥

कुम्भः

नृत्यदिदृक्षा

पश्चान्मञ्जुलकण्ठगायकजना गायन्ति गीतं मुदा
तार्थैधोङ्कुति धोङ्कुतिध्वनिभवेन्नृत्ये पराकामिनी ।
दां दां दिं दिमिकि द्रूमि द्रमिदि दीङ्कारे मृदङ्गे मुहुः
देवा नृत्यदिदृक्षयैव मिलिताः स्वर्गादपि क्ष्मातले ॥

कुम्भः

नृत्यप्राणः

रेखा च स्थिरताले गो भ्रमरी दृष्टिरङ्गमयः ।
प्रीतिर्मेधावचो गीतं नृत्ये प्राणा दशोदिता ॥

कुम्भः

नृत्यमहिमा

क्षितौ रत्नच्छायाफलनमुदके वीचिललितं
शिखिन्यर्चिः प्रेङ्खा सहजगतिवैचित्र्यमनिले ।
तटित्क्रीडाव्योम्नि प्रकटसुभगः पञ्चसु परः
प्रविष्टो भूतेषु प्रभवति हि नृत्तस्य महिमा ॥
अभ्यासाद्भरतोक्तिभङ्गिषु बहुव्याख्यापदेषु श्रमा-
त्संवादाद्गुरुसंप्रदायसुहृदां शम्भोः प्रसादादपि ।
ज्ञात्वा शास्त्ररहांसि निर्मितमिदं व्यक्तं महार्थान्वितम्
न स्यात्कस्यहिताय शाश्वतयशस्संरक्षणं लक्षणम् ॥

नृत्तरत्नावलिः

नृत्यलक्षणम्

देशरुच्या प्रतीतो यस्तालमानरसाश्रयः ।
अविनाभावविक्षेपो नृत्यमित्युच्यते बुधैः ।

शुभङ्करः

नृत्यवेला

उदये घटिका पञ्च मध्याह्ने घटिकात्रयम् ।
पराह्णे घटिकाः सप्त नृत्यवेला प्रकीर्तिता ॥

हम्मीरः

नृत्यशब्दव्युत्पत्तौ—अर्थभेदेन प्रत्ययभेदः

यद्यप्येतौ समानार्थौ तौ कयक्तप्रत्ययौ स्मृतौ ।
तथापि सम्प्रदायज्ञैर्यादृशो यः प्रयुज्यते ॥
तादृमर्थः सविज्ञेयो विवक्षात्र न कारणम् ।
लोके हस्तैकदेशेऽपि हस्तशब्दो यथा तथा ॥
नृत्ते नृत्यैकदेशत्वान्नृत्यशब्दोऽपि वर्तते ।
शोभाया एव मुख्यत्वं विवक्षित्वात्प्रयुज्यते ॥
मार्गनृत्तेऽप्ययं नृत्यशब्दस्तस्माद्द्वयोर्मता ।
स्यान्नृत्यैर्नृत्तशब्दाभ्यां देशीयमार्गयोर्ध्रुवम् ॥
उत्तमं नाट्यनृत्यं स्यान्मार्गनृत्यं तु मध्यमम् ।
देशीयनृत्यमधमं विज्ञेयं काव्यवद्बुधैः ॥

विप्रदासः

नृत्यस्वरूपम्

मृदङ्गो दण्डिका तालं चर्चरी श्रुतिकाहले ।
गीतनादप्रबोधं च अष्टाङ्गं नृत्यमुच्यते ॥

हम्मीरः

नृत्यहस्तभेदाः

उपधानः सिंहमुखः कदम्बश्च निकुञ्चकः ।
एते सम्मिलिता भूत्वा स्युरष्टाविंशतिश्च ते ॥

कुम्भः

नृत्यहस्ताः

नृत्यमात्रस्थिता ये तु न किञ्चिद्वस्तुदर्शिनः ।
अङ्गहारेण सहिता नृत्यहस्तास्तु ते मताः ॥

सङ्गीतनारायणे

नृत्याङ्गम्

स्थानकानि तथा चारी करणं मण्डलं तथा ।
अङ्गहाराश्च भरते नृत्याङ्गं पञ्चधोदितम् ॥

सङ्गीतनारायणे

नृत्यानिष्टदर्शनम्

परावृत्तेन शिरसा नेत्रनासावकूणनैः ।
चक्षुषश्च प्रसादेन ह्यनिष्टमभिनिर्दिशेत् ॥

कुम्भः

नृत्ये विटलक्षणम्

हास्ये विटकृते नृत्ये उच्छ्रितौ हर्षगर्वयोः । कुम्भः

नृत्योत्पत्तिः

गेयादुत्तिष्ठते वाद्यं वाद्यादुत्तिष्ठते लयः ।
लयतालसमारब्धं ततो नृत्यं प्रवर्तते ॥ शुभङ्करः

नृपलक्षणम्

सङ्गीतरीतिविदुषो भावभेदविचक्षणः ।
कामशास्त्रकलावेदी धर्मसङ्गृहविग्रहः ॥
कविः काव्यप्रबन्धानां निर्माता वित्तदानवित् ।
संभूयसाररूपश्च सभामध्यमुपस्थितः ॥
संगीतमुक्तावली देवेन्द्रकृता

नेपथ्यम्

अखण्डमण्डलं चित्रं विस्तीर्णं दीर्घमंशुकम् ।
विस्तृत्य पूर्वरङ्गेऽस्मिन्नेपथ्यं कल्पयेद्बुधः ।
नेपथ्यान्तरितः पूर्वं रङ्गपूजां समाचरेत् ॥
भरतकल्पलता

पश्चिमाभिमुखीनां च रम्यानां भूषणाम्बरैः ।
नायकाभिमुखीनां च गायन्तीनां परस्परम् ॥
तालैः कृतावधानानां नटीनामुपवेशनम् ।
पार्श्वयोरुभयोस्तासां मृदङ्गानां चतुष्टयम् ॥
दक्षिणे मुरजस्थानं पृष्ठे जवनिका तथा ।
तन्मध्ये मण्डनस्थानं नेपथ्यं तच्च गीयते ॥
शुभङ्करः

नेपथ्यभेदाः

नेपथ्यं तु वयःकालदेशजातिविशेषतः ।
नानाविधं तथाप्येतच्चतुर्धा प्रोच्यते बुधैः ॥
पुस्तमाल्यविभूषाङ्गपरिवेदनभेदतः ।
शैलजालविमानानि चर्मवर्मध्वजादयः ॥
शस्त्राणि सर्पविकृतमुखानि च वपूंषि च ।
यानि च क्रियते नाटये तत्पुस्तमिति कीर्त्यते ॥
सङ्गीतनारायणे

नेरिभेदाः

तत्र नेरी भवेत् षोढा शुद्धाख्या नटनेरिका ।
तथा करणनेरिः स्यात् कावनेरिस्ततः परम् ।
सालंगनेरिः सङ्कीर्णनेरिरित्यं समूचिरे ॥
सङ्गीतमुक्तावली देवेन्द्रकृता

नैसर्गिकम्

हस्तकात् भ्रमरीं विद्यादधोऽम्बुजादि पातनम् ।
अङ्घ्रेर्भूमेश्च यो योगः स च नैसर्गिको मतः ॥
कुम्भः

न्यायलक्षणम्

युद्धे परात्मशस्त्राणां क्रमाद्यो नवपातने ।
विधातुमुचिता गात्रवर्तना न्याय उच्यते ॥
भारतः सान्वतो वार्षगण्यकैशिकसंज्ञकाः ।
भेदास्तस्येति चत्वारः क्रमाद्वृत्तिचतुष्टये ॥
विप्रदासः

न्यासः

गीतकान्त्यस्वरो न्यासः विदारी मध्यगस्तथा ।
न्यासवत्स्यादपन्यासो यथा जाति — ॥
प्रथमाया विदार्याया मध्ये न्यासत्वभाक् स्वरः ।
न चेदंशो विवादी स्यात् सन्न्यासः सोऽभिधीयते ॥
दत्तिलः

न्यासापन्यासयोर्भेदः

नैव न्यासस्तु जात्यादेरन्त एवावतिष्ठते ।
अपन्यासः पुनस्तत्रान्तराले खण्डितं तु यत् ॥
कुम्भः

प

पक्षिशार्दूलः

यदा मण्डीमधिष्ठाय प्रसृतौ भ्रमतः करौ ।
तदा तं नृत्तशार्दूलाः पक्षिशार्दूलमूचिरे ॥

पक्षीणामुच्चारणम्

तित्तिररटकश्चैव बकचातककोकिलाः ।
वायसः कुक्कुटश्चैव क्रमादुच्चारयन्त्यमी ॥
कुम्भः

पङ्क्तिः

चतुरश्रमष्टकलां स्यायवर्णा स्थिते लये ।
खद्वयं गद्वयं गोतागात्रैवं चरणाङ्किता ॥
पङ्क्तौ षोडशमात्राभिरपकृष्टा ध्रुवा यथा ।
हेलाविदलितकामशरीरं लालानिर्जितदानवराजम् ।
देहार्धीकृतभूधरसूनुं वन्दे शम्भुं त्रिभुवननाथम् ॥
कुम्भः

पञ्चकर्त्तरी—(वाद्यम्)

पञ्चकर्त्तरिकासंज्ञैः पाटैः स्यात्पञ्चकर्त्तरी ।

कुम्भः

पञ्चगानस्थानानि

अथ प्रावेशकाक्षेपप्रासादिकमथान्तरम् ।
नैष्क्रामश्चेति गानस्य स्थानं पञ्चविधं स्मृतम् ॥

वेमभूपालः

पञ्चतालेश्वरः

आलापः प्रागतालः स्यात्पृथग् द्विः पदपञ्चकः ।
चच्चत्पुटेन तेनैव स्वराः पाटास्ततःपरम् ॥
द्विचच्चत्पुटमानेन पाटः पटहसम्भवैः ।
कार्येऽन्तरस्ततश्चाचपुटेन पदपञ्चकः ॥
तद्वत्तेन स्वरः पाटास्तद्विमानेन वान्तरः ।
हौडुक्कपाटैस्तदनुषट्पितापुत्रकेण तु ॥
पृथक्पदानि पञ्चद्विस्तेनैव स्वरपाटकाः ।
तद्विमानाच्छक्कपुटैरन्तरः स्यात्ततस्तु षट् ॥
प्रत्येकं द्विः पदानि स्यु. संपक्वेष्टकतालतः ।
तत्तालाः स्युः स्वराः पाटाः पाटैर्मुरजसंभवैः ॥
अन्तरः पूर्ववत्पश्चादाभोगश्च विलम्बितः ।
प्रबन्धनाम्ना प्राङ्माने नेतृनामाथ मङ्गलम् ॥
वाक्यमालापके न्यासः पञ्चतालेश्वरे भवेत् ।
वीरावतारश्रृङ्गारतिलकश्चेति स द्विधा ।
वीरश्रृङ्गारयोस्तेन प्रीयन्ते सर्वदेवताः ॥

हम्मीरः

पञ्चध्रुवहेतवः

अथ जातिप्रमाणं च प्रकारं नामकल्पना ।
स्थापनं चेत् ध्रुवाणां स्युर्भेदकाः पञ्च हेतवः ॥
वृत्ताक्षरप्रमाणस्तु जातिरित्यभिधीयते ।
षट्कलाष्टकलैश्चैव प्रमाणे द्वे प्रकीर्तिते ॥
समार्धविषमाणां तु वृत्तानां तु विधीयते ।
... ... नाट्यज्ञैः ... प्रकार इति कथ्यते ॥
कुलाचाराश्रयं नाम यथा नृणां विधीयते ।
तथा स्थानाश्रयोपेता ध्रुवाणां नामकल्पना ।
यद्वा वृत्तविशेषैश्च स्वेच्छया नाम कल्पयेत् ॥

वेमभूपालः

पञ्चपाणिः (वाद्यम्)

पाणिहस्ताभिधैः पाटैः पञ्चपाणिः प्रकीर्तितः ।

वेमः

—पाटः

हस्तशब्दान्वितैर्हस्तपादैः स्यात्पञ्चहस्तकम् ।
पाणिहस्ताभिधैः पाटैः पञ्चपाणिः प्रकीर्तितः ॥

कुम्भः

पञ्चमः

पञ्चप्राणोद्भवो यस्मात् तस्मात्पञ्चम उच्यते ।

सङ्गीतसारः

पञ्चमपताकम्

हस्तं पुष्पपुटं कृत्वा विलोक्य च ततः पुनः ।
कृत्वोत्सङ्गं स्पृशेत्पश्चाद्दक्षिणं चरणं नटः ॥
हस्तेन दक्षिणेन द्राग्वामाङ्घ्रिं वामकेन तु ।
इति पञ्चमभेदोऽयं सम्यगत्र प्रदर्शितः ॥ कुम्भः

पञ्चमरागः

रागः पञ्चमको ज्ञेयः पहीनः षाडवो मतः ।
रक्ताम्बरो रक्तविशालनेत्रः श्रृंगायुक्तास्तरुणो मनस्वी ।
प्रभातकाले विजया च नित्यं सदा प्रियः कोकिलमञ्जुभाषी ॥
स रि ग म ध नि स — स रि ग म प ध .

सङ्गीतदर्पणः

पञ्चवाद्यानि

नखजा वायुजाश्चर्मलोहशारीरजास्तथा ।
वीणादयस्तु नखजाः वंशाद्या वायुजास्तथा ॥
चर्मजाश्च मृदङ्गाद्याः लोकजा लोहचर्मजाः ।
शारीरजानि गीतानि वाद्यं पञ्चविधं जगुः ॥

भरतकल्पलता

पञ्चविधनादावृत्याः—एकविधवाणलक्षणम्

आद्यं त्यक्त्वा चतुर्णां स्याद्विकारादुत्सवप्रिया ।
विना द्वितीयमन्येषां महानन्दा विकारतः ॥
चतुर्णां विकृतौ हित्वा तृतीयं लहरी भवेत् ।
त्यक्त्वा तुर्यं चतुर्णां स्याद्विकाराच्च जयाभिधा ॥
चतुर्णां विकृतौ हित्वा पञ्चमं कुसुमावती ।
चतुरा पञ्चधेति स्याद्वाणा चैकाभिधा पुनः ॥

आद्यपञ्चगणानां स्याद्विकृतेः पार्वतीप्रिया ।
इत्येकत्रिंशदेलाः स्युर्नादावत्या विकारतः ॥

गोपेन्द्रः

पञ्चविधः स्तम्भः

देवस्तम्भनरस्तम्भस्थिरस्तम्भमतः परः ।
स्थावराणां स्तम्भ इति मुनिस्तम्भश्च पञ्चधा ॥

शृङ्गारशेखरः

पञ्चशिरःप्रकारे आरात्रिकम्

स्कन्धं तु किञ्चिदाश्लेष्य भ्रान्तमारात्रिकं मतम् ।
विस्मये दृश्यते तच्च पराभिप्रायवेदने ॥

हम्मीरः

पञ्चसञ्चलक्षणम्

स्कन्धस्य मणिबन्धस्य कूर्पराङ्गुष्ठयोस्तथा ।
वामस्य चरणस्यापि कम्पनं सञ्च उच्यते ॥
ततः स्याद्वादकः श्रेष्ठः पटहेऽङ्गुष्ठसञ्चतः ।
वामाङ्घ्रिसञ्चादधमो वादकस्त्वन्यजो मतः ॥

कुम्भः

पञ्चस्वरपरा तारगतिः

अंशात्तारगतिं विद्यादाचतुर्थस्वरादिह ।
आपञ्चमात्पञ्चमाद्वा नातःपरमिहेष्यते ॥

नाट्यशास्त्रे

पञ्चहस्तम्——वाद्यम्

हस्तशब्दान्वितैर्हस्तपाटैः स्यात्पञ्चहस्तकम् ।

कुम्भः

पटहः

अथावनद्धवाद्यस्य पटहादेर्निरूप्यते ।
लक्षणं द्विविधस्तत्र पटहः परिकीर्तितः ॥
मार्गदेशीविभेदेन तत्रादौ मार्गमुच्यते ।
सवितस्तिकरद्वन्द्वं दैर्घ्ये स्यात्परिधौ पुनः ॥
षष्ट्यङ्गुलो मध्यदेशे पृथुः खदिरदारुजः ।
उत्तमो बीजकाष्ठादिकृतो धातुमयोऽथवा ॥
दक्षिणं वदनं तस्य स्यात्सार्धैकादशाङ्गुलम् ।
वामं तु वदनं कार्यं सार्धदशभिरङ्गुलैः ॥
दक्षिणे वदने तस्य वलयं लोहनिर्मितम् ।
वामे च वलयं वक्त्रे कार्यं वल्लीसमुद्भवम् ॥
षाण्मासिकस्य वत्सस्य मृतस्यादाय पारिकाम् ।
तथावकुण्ठ्य वलयं वामवल्लीसमुद्भवम् ॥
संङ्कितं सप्तभिश्छिद्रैः शोन्वभभूतैरदृढम् ? ।
तत्र सप्तसु रन्ध्रेषु निक्षिप्तैः सूक्ष्मदोरकैः ॥
कलशाः सप्त हेमादिधातुभेदर्विनिर्मिताः ।
नियन्तव्याः श्लथतरदैर्घ्येण चतुरङ्गुलाः ॥
पटहस्य च वामास्यं स्यादं गुलचतुष्टयम् ।
विस्तारतस्त्र्यङ्गुलया स्वर्णदीप्ततया ततः ॥
वेष्टयेत्पटहं कण्ठे तया पत्रिकया दृढम् ।
बाह्यं कायस्य यच्चर्मपशोस्तत्कवलं स्मृतम् ॥
कृतान्तःसुषिरानेन घनेन वदनद्वयम् ।
विदध्यादस्य वदने दक्षिणे कवलं पुनः ॥
सर्वतोऽपि हि तच्छिद्रं पिदध्याद्वाद्यसिद्धये ।
गुणैः सुषिरनिक्षिप्तैः गाढमाकृष्य यत्नतः ॥
वामवक्त्रस्य वलये सप्तरन्ध्रनिवेशितान् ।
गुणानाकृष्य सुदृढं यथास्थानं निवेशयेत् ॥
वामस्य कवलं तत्र सप्तछिद्रनिवेशितैः ।
तैर्गुणैः स्वर्णकलशानावेष्ट्य विधिवत्सुधीः ॥
दक्षिणास्यस्य वलये लोहे प्रक्षिप्य मध्यतः ।
समुत्कृष्टैस्तु सुदृढैः वलयं गाढतां नयेत् ॥
कलशेभ्यो बहिर्वामवल्लीवलयवल्लिके ।
कच्छाकटीवेष्टनाय सांचलाबद्धयते दृढा ॥
इत्येवं मार्गपटहो लक्षितः शास्त्रमार्गतः ।
देवता देवतानाथेनोक्तः स्वस्मिन् षडाननम् ॥
दैर्घ्येऽध्यधरो देशीपटहः परिकीर्तितः ।
दक्षिणं वदनं तस्य मितं सप्तभिरङ्गुलैः ॥
वामं तु वदनं तस्य भवेत्सार्धषडङ्गुलम् ।
यदान्तरं पशोश्चर्मजाठरं तत्प्रकीर्तितम् ॥
उद्दलीसंज्ञकस्तेन वामं वक्त्रं विधीयते ।
यन्मया मार्गपटहे लक्षणं प्रागुदीरितम् ॥
तदशेषविधातव्यममुष्मिन्पटहे बुधः ।
उत्तमादिविभेदेन त्रिधासौ द्विविधा भवेत् ॥

तत्रायमुत्तमः प्रोक्तः प्रोक्तमानविनिर्मितम् ।
द्वादशांशे विहीनोऽतो मध्यमः पटहो भवेत् ॥
अधमस्तु भवेदस्मात् षष्ठांशेनोनितस्तु यः ।
देशीपटहमेवेमं जानन्तत्त्वधमं जगुः ॥
उदल्यामत्र डेंकारो डेंकारः कवतेऽधिकः ।
अन्येऽनयोः पाटवर्णा उक्ताः पात्रपरीक्षणे ॥
वादनाय भवेदस्य कोणस्त्वष्टादशाङ्गुलः ।
पृथुर्मध्ये नतः किञ्चिदग्रे सिद्धकवाससा ॥
मूले प्रस्थापितः कार्यो वादकेन विजानता ।
अथैनं वादयेद्विद्वान् निषण्णः पङ्कजासने ॥
गोष्ठीषु मार्गपटहः स्थाप्य चोरुद्वयोपरि ।
घटवाद्यवदुत्तानवदने नाटकादिषु ।
कोणेन हस्ततो यद्वा वाद्यते पाटपण्डितैः ॥

कुम्भः

पताकः—हस्तः

अङ्गुष्ठो यत्र वक्रस्सन् तर्जनीमूलसंश्रितः ।
ऋजवोऽङ्गुलयः श्लिष्टाः स पताक इति स्मृतः ॥
लोकप्रयोगमुद्वीक्ष्य नाट्यज्ञमतम् ... ... च ।
तत्तच्चेष्टानुसारेण हस्तकान् सम्प्रयोजयेत् ॥
पर्वतान्च्छेदनादर्शविभागादौ स्फुटं हि तत् ॥

सङ्गीतनारायणे

पताकः

पताको विरलाङ्गुष्ठ उपधानः करो भवेत् ।
स्याच्चिन्ता निद्रयोरेष उपधानेऽपि युक्तितः ॥

कुम्भः

उत्पाटने पताकौ द्वौ कार्यावन्योन्यसंमुखौ ।
सरःपल्लवनिर्देशे स्वस्तिकीभूय विच्युतौ ॥
कार्यौ पताकौ विश्लिष्य स्वस्तिकाकारतां गतौ ।
विधेयौ गोप्यनिर्देशे पालनीये पताककौ ॥
नाट्याचार्योपदेशेन लोकयुक्तिमवेक्ष्य च ।
पताकस्यापरेऽप्यर्थाः स्वयमूह्या विपश्चितः ॥

विप्रदासः

पदम्

वर्णपूर्वकमेतद्धि पदं ज्ञेयं सदा बुधैः ।

मतङ्गः

तावादिस्वरमध्यं तु गीतान्त्यं च पद भवेत् ।

भरतकल्पलता

यत्स्यादक्षरसंबद्धं तत्सर्वं पदसंज्ञितम् ।

नाट्यशास्त्रे

कर्णाटभाषयाबद्धं यदुद्ग्राहादिभिर्युतम् ।
तालेन येनकेनापि युतं तत्पदसंज्ञकम् ॥

पदकरणम्

उद्ग्राहध्रुवकौ यत्र निबद्धौ तत्पदैः स्वरैः ।
तदुक्तं गीततत्त्वज्ञैः करणं पदपूर्वकम् ॥

मोक्षदेवः

पदनिर्युक्तम्

छन्दः पादादिभिर्योगात् पदनिर्युक्तसंज्ञितम् ।

दत्तिलः

पदस्वराः

व्यञ्जनानि स्वरा वर्णाः सन्धयोऽथ विभक्तयः ।
नामाख्यातोपसर्गाश्च निपातास्तद्धिताः कृतः ।
छन्दोविधिरलङ्कारा ज्ञेयः पदगतो विधिः ॥

नाट्यशास्त्रे

पदार्थटीका—(हस्तप्राणः)

अथासां कथनानां स्यादर्थनिर्वाहता यदि ।
ज्ञेया पदार्थटीकेति पूर्वं या भ्रमतोदिता ॥
चेष्टागुणैश्च नियमैस्तत्तदर्थप्रबोधकैः ।
नृत्तहस्तदशप्राणाः कीर्तिता हस्तवेदिभिः ॥

शृङ्गारशेखरः

पद्धतिस्वरूपम्

प्रेक्षार्थं समुपस्थिते बुधगणैः संगीतविद्भिः समं
पूर्णां रङ्गभुवं प्रविश्य निखिलैरङ्गोपहारैः समम् ।
तिष्ठन्तोऽखिलरङ्गकार्यविधुराः सत्संप्रदायान्तराः
वाद्यानां समतां विधाय सकलां नादस्य साम्यं ततः ॥
तच्चिन्ताः परिवादयेयुरतुलं मेलापकं तत्परम्
संपूर्णं गजरं ततो जवनिकामन्तः प्रसूनाञ्जलिम् ।
धृत्वा पात्रमवाप्य सौष्ठवमथोऽधिष्ठाय सुस्थानकम्
अन्तर्धानपटेऽपसारित इहारब्धे विधानानथः ॥
खण्डे चोपशमाह्वये जनमनांस्येकाग्रतामानयन्
प्रान्तं रङ्गभुवं विशोध्य च समन्ताद्वाद्यमाने समम् ।

खण्डे चोपशमाख्यकेन विधिना पुष्पाञ्जलिं मध्यतः
तस्मात्संमदसंभृतं त्वविकलैर्नृत्याङ्गकैः केवलैः ॥
वाद्येनोपशमेन नृत्यति परं पात्रं मनः संयुतं
तावत्संकुलगोपिकाश्च तुडिका स्यात्तत्पदं तत्परम् ।
साङ्गं तं मलपं तथा च कवितं वाद्यप्रबन्धैरिमैः
पर्यायेण च वा क्रमाद्बहिरथो स्वेच्छाकृते वादने ॥
सामस्त्येन लयाञ्चितश्च विषमैर्नृत्याङ्गकैर्नर्तनं
शुद्धैश्चाप्यथ रूपकं रुचिवशैर्जेगीयमानैश्चिरम् ।
पात्रं नैकविधं विधाय निपुणं नृत्यं ततः संत्यजेत्
रङ्गे यत्र न वादयन्ति गजरातपश्चाचले वादकाः ॥
खण्डं तूपशमाभिधं खलु तदा प्राप्तं परं प्राविशेत्
उक्तैः सस्थलपद्धतिः परिवडियां प्रोच्यते तद्विदाम् ।
बृन्दैः साखिलराजराजमुकुटालङ्कारहारेण हि
वारं चासमहस्तमत्र निगदन्त्येके प्रवेशात्पुरः ॥
पार्श्वे समहस्तकादिभिरिह स्यात्सर्वतो पृष्ठतः
स्थानं वा समपादमत्र निगदन्त्येके प्रवेशे बुधाः ।
केचित्केवलयोः प्रयोगमभणन् तं गीतवाद्यानुगम्
गीतादिरिवाञ्चितैः परमसावेकैकशः कैश्चने-
त्येवं पद्धतिरीरितासुविमला शुद्धाभिधा भूभृता ॥

कुम्भः

परसलक्षणम्

स्थानत्रितयविस्तीर्णः परसः कीर्तितो बुधैः ।

मोक्षदेवः

पराभिमतः—अरालः

स्त्रीणामरालविहितं त्रिपाकेऽपि न युज्यते ।
पुंसामरालविहितं त्रिपताके न युज्यते ।
इत्याह सिङ्गणार्यो व्याख्यायां भरतस्य वै ॥

विप्रदासः

पराभिमतनृत्तभेदत्रयम्

नृत्तस्योक्तस्वरूपस्य प्राहुर्भेदत्रयं परे ।
विषमं विकटं लघ्विवत्यत्र तद्विषमं मतम् ॥
यद्रज्जुभ्रमणादि स्याद्विकटं तदिहोच्यते ।
विरूपवेषावयवव्यापारं यत्प्रदृश्यते ॥
करणैराश्रितार्यैर्यत्प्रयुक्तं तद्भवेल्लघु ।
एतेषां सङ्करे तज्ज्ञैः सङ्कीर्णं नृत्यमुच्यते ॥

विप्रदासः

परार्थः

परानुभावयोग्यार्थः परार्थ इति कीर्तितः ।

वेमभूपालः

परावृत्ततला

बहिश्चेत्प्रसृतः पाद उत्तानिततलः प्लुते ।
पश्चाद्देशे तदा चारी परावृत्ततला स्मृता ॥

कुम्भः

परिक्रमः—तालः

परिक्रमाभिधे ताले द्वृयाद्यगणो भवेत् । ० ० । ऽ ऽ

कुम्भः

परिघट्टना

दीर्घाण्यादावष्टौ लघूनि कुर्यात्पुनर्द्विगुणितानि ।
ह्रस्वान्यपि चत्वारि द्विगुणानि स्युः सदीर्घाणि ॥
षोडशलघूनि च स्युः सहनिधनेनैव कार्याणि ।
एषः परिघट्टनायाः गुरुलघुवस्तुक्रमः प्रोक्तः ॥

नाट्यशास्त्रे

परिभूमिका

स्निग्धं समतलं स्वच्छं तत्र स्यान्मत्तवारणे ।
दक्षिणोत्तरपार्श्वस्थस्तम्भयुग्मसमाश्रया ॥
साधारकाष्ठरुचिरा वर्णकैरुपभूषिता ।
रत्नानि चात्र देयानि वज्रं पूर्वदिशि स्मृतम् ॥
वैडूर्यं दक्षिणे पार्श्वे पश्चिमे स्फटिकं तथा ।
उत्तरे तु प्रवालं स्यान्मध्ये कनकमीरितम् ॥
एवमेतस्य विदुषा कर्तव्या परिभूमिका ।
चतुःस्तम्भसमायुक्ता सुवर्णकलशोज्ज्वला ।
यथा शैलगुहाकारो जायते नाट्यमण्डपः ॥

कुम्भः

परिमण्डली

भ्रमन्ती मण्डले या सा त्वराभ्रमणमङ्गतः ।
सपार्ष्णिभ्रमरीत्युक्तो मुहुः सा परिमण्डली ॥

कुम्भः

परिवर्तोऽग्रिमः

शशताशशसं द्विः समतिपाताः कलाष्टके ।
ध्रुवामिश्चतसृभिः स्यात्परिवर्तोऽग्रिमः पुनः ॥

शेषास्त्रयस्तु तिसृभिस्तत्राद्यपरिवर्तिनी ।
इहामिदधिरे केचिद्गणैस्ताण्ड्यादिभिः पृथक् ॥

कुम्भः

परिवर्तनम्

विधाय पादावूर्ध्वाग्रौ समौ स्कन्धेन भूतलम् ।
आक्रम्योल्लालयेत्पादौ परिवर्तनमाचरेत् ॥

कुम्भः

परिवाडः

प्रपदेन भुवि स्थित्वा पाष्ण्यां पार्ष्णिद्वयेन वा ।
क्रमेण कुट्टने भूमेः परिवाड इति स्मृतः ॥

कुम्भः

परिवृत्तः—पाटः

पुटद्वयप्रहारेण परिवृत्तः प्रजायते ।
यथा – जें थां ४. गि णि ना ।

कुम्भः

—हस्तप्राणः

पार्श्वभागे पुरोभागे प्राप्तो यो नटने करः ।
परिवृत्तस्समाख्यातो नाम्ना हस्तविशारदैः ॥

भरतकल्पलता

परिश्रवणिका—पाटः

परिश्रवणिका सोक्ता वाद्यते यत्र तु क्रमात् ।
कर्तरी समपाणिश्च वाद्या वादनकोविदैः ॥

कुम्भः

पर्यायपार्श्वोत्प्लवनम्

पर्यायपार्श्वोत्प्लवनं कर्तरीव तु मोदितम् ।
त्रिपताकस्य करयोः कृत्वा शश्वत्प्रकाशनात् ॥
(कपालोत्प्लवनम्)
पार्ष्णिमेकैकपादस्य कटौ पर्यायतो न्यसेत् ।
अर्धचन्द्रकरौ मध्ये न्यस्य यत्स्यात् कपालगम् ॥

अशोकः

पल्लकौ

वलितौ पल्लकावापि शीर्षगौ ललितौ विदुः ।
अपरे चतुरश्रेण शिरस्स्थावश्चितौ विदुः ॥
अपरे खटकावत्तौ शिरःप्राप्य शनैः शनैः ।
अन्योन्यस्य विलग्नाग्रौ ललितौ संप्रचक्षते ॥

कुम्भः

पल्लवलक्षणम्

बाहुल्यावर्तितेनोर्ध्वं प्रसार्य परिवर्तितः ।
स्वस्तिकाकृतितां नीतौ पताकौ पल्लवौ मतौ ॥
प्रशिथिलौ पताकौ तु केचिदत्र प्रचक्षते ।
नतोन्नतौ पद्मकोशौ शिथिलौ मणिबन्धयोः ॥
स्वपार्श्वयोः पुरस्ताद्वा पल्लवावदन् परे ।
पद्मकोशकरस्थाने पताकानपरे जगुः ॥

हम्मीरः

पश्चात्पुरःसरा

सैव पश्चात्पुरःक्षेपात्प्रोक्ता पश्चात्पुरःसरा ।

कुम्भः

पाञ्चाली

प्रोक्ता प्रवृत्तिः पाञ्चाली याविद्धभुजविक्रमा ।
पाञ्चालाः शौरसेनाश्च काश्मीरा बाह्लिका अपि ॥
औशीनरा माद्रकाश्च ये देशा एवमादयः ।
भागीरथीं समारभ्य हिमवत्पर्वतावधिः ॥
संश्रितास्ते तु पाञ्चालीं प्रवृत्तिं समुपाश्रिताः ।
भारत्यारभटीप्राया साटोपवचनक्रमा ॥

वेमभूपालः

पाटाः

अपञ्चमकवर्गाख्यष्टतवर्गौ लघौ मतौ ।
रहाविति च वर्णानां विंशतिः पाटसंज्ञकाः ॥
सस्वरा सस्वरैर्नानास्तेऽपि स्युः क्रमव्युत्क्रमात् ।
त्रिधा पाटाः पुनर्मिश्रो कूटखण्डविभेदतः ॥
मृदङ्गे थोन्धलां भेर्यां भवत् डमरुके डमम् ।
पटहे दन्विवल्यां दोङ्कटे षडविभेदतः ॥
ढवेटिढे च ढक्कायां झङ्खधुन्धि च सेलुके ।
रूजोरुड्डुं च डक्कुल्यां तुन्तकौ घनतालके ॥
करटायां तुटमिच्छन्ति मुक्ताष्टाक्षरयोजना ।
समानाः सर्ववाद्येषु शेषः पाटा यथोचिताः ॥

कुम्भः

पाटकरणम्

स्वैः सहात्र पाटैश्च यत्रोद्ग्राहध्रुवौ कृतौ ।
क्रमव्यत्यासतो द्वेधा तत्पाटकरणं मतम् ॥

मोक्षदेवः

पाटभेदाः

उल्लोलः पाण्यन्तरश्च निर्घोषः खण्डकर्तरी ।
दण्डहस्तस्समनखो विदुर्यमलहस्तकः ॥
रेचितो भ्रमरी विद्युद्विलासश्चार्धकर्तरी ।
अलग्नकोसप्तपाणि तु परिठयस्तकः संज्ञकः ॥
इति षोडशपाटाः स्युः सर्ववाद्योपयोगिनः ।
प्रायेणैतान् प्रयुञ्जन्ते हुडुक्कायां मुनीश्वराः ॥
अथोदाहरणं तेषां वक्ष्ये लक्ष्यपुरस्सरम् ।
रेफश्च भ्रमरः पाण्यन्तरोऽथ दण्डहस्तकः ।
श्रीकण्ठेन समुद्दिष्टं परं पाटचतुष्टयम् ॥

कुम्भः

पाटवर्णेषु स्वराः

एतेषु पाटवर्णेषु स्वराः सप्त प्रकीर्तिताः ।
अ आ इ ई उ ए ओ च वाद्यविद्याविशारदैः ॥

कुम्भः

पाटविन्यासभेदाः

विन्यासभेदाः पाटानां वाद्यन्ते मुरजादिषु ।
जोलावणी च चल्ला च रेफवश्च कुचुम्बिनी ॥
चारुश्रवणिकालग्नः परिश्रवणिका ततः ।
समप्रहारः कुडुपं चारणीकरणा तथा ।
दण्डहस्तो घननखस्तानि द्वादशधाऽवदन् ॥

कुम्भः

पाठभिन्नफूत्कारः

अन्यथैवाभ्यधुः केचित् स्थानत्रितयवर्तिनाम् ।
स्वराणामुद्भवं तेषां मतमत्रोपवर्ण्यते ॥
मध्यमे सप्तमेऽभ्यासवशतः फूत्कृतेरह ।
शरीरवीणासंभूतस्वरसंवादभाजनम् ॥
स्वराः समग्रा जायन्ते तारस्थानगता अपि ।
मुखसंयोगसांकल्यमापिते मुखरन्ध्रके ॥
दीपापटीयसा चक्षुस्तं प्रकारं पुरातनाः ।
तद्वादनप्रकारेण यद्रन्ध्रे वाद्यते बुधैः ॥
तस्मादुत्पद्यते यस्तु स्वरः सिद्धगणो भवेत् ।
विप्रकर्षे तु रन्ध्रस्य मुखसंयोगकर्तृके ॥
मन्द्रस्थानगतानां च स्वराणामुद्भवो भवेत् ।
अभ्यासवशतः केचिद्वंशवादनकोविदाः ॥
शैघ्र्याशीघ्रतया वायोस्तीव्रातीव्रतयापि च ।
रन्ध्रस्य पूरणाद्वायोः पूरणेन च वा ध्वनेः ॥
प्राप्तोपचययोगेनापचयेनाथ वा कचित् ।
एकस्मिन्नेव रन्ध्रेऽपि चित्रं नानास्वरोदयम् ।
कुर्वन्ति किल तन्नास्ति किमभ्यासस्य दुष्करम् ॥

कुम्भः

पाठीलक्षणम्

वितस्तिमात्रा पाठी स्याद्यक्षावेशविधायिनी ।
एकच्छिद्रा मुखे पञ्चच्छिद्रा च स्वरसाधने ॥
वेष्टितस्त्रपुपत्रेण लोकं पुष्णाति तद्ध्वनिः ।
नवाङ्गुलस्य वंशस्य पाटः कार्यः प्रमाणतः ॥

सोमराजदेवः

पाणिरेचकः

पाणिकण्ठकटीपादविशेषेण समुद्भवान् ।
त्वरया परितो भ्रान्तिर्यदा स्याद्वंसपक्षयोः ।
पर्यायेण तदा धीरैरादिष्टः पाणिरेचकः ॥

अशोकः

पाणिहस्तः—हस्तपाटः

पाणिहस्तो भवेदेष यत्र स्याद्विरलाङ्गुलिः ।
समपाणिः स्फुरन् वाद्ये इति वाद्यविदो विदुः ॥
तरगड दरगड तगड दरगड तगड दगड दगड ।

कुम्भः

पाण्यन्तरः—पाटः

वक्षोऽङ्गुष्ठविनाभूतैः पौनःपुन्येन पीडयेत् ।
वामस्तु स्वं पुटं हस्तो हस्तपाण्यन्तरस्तदा ॥
अर्धार्धाङ्गुष्ठहननात् संहतांगुलिचालनात् ।
परे पाण्यन्तरं प्राहुरपरे त्वन्यथा जगुः ॥
अङ्गुष्ठो दक्षिणो हस्तो हेतुः पाण्यतरोद्भवे ।
विश्लिष्टाङ्गुलिसञ्चारमङ्गुलार्धार्धताडनम् ।
पाण्यन्तरस्य जनकं भिन्नलक्षणया यथा ॥
नखं ३ खें ३ नखें ३ खेद खुंद ।

कुम्भः

पाण्यन्तरनिकुट्टकः—हस्तपाटः

तर्जन्यङ्गुष्ठपातेन यत्र दक्षिणहस्ततः ।
सरेफवामहस्तेन क्रमव्युत्क्रमयोगतः ।
वाद्यते वाद्ययुक्तो सौ पाण्यन्तरनिकुट्टकः ॥
दां गिड दां खखिटक दां खरि धुदादां खरिखरिदां गिडदां

कुम्भः

पात्रगुणाः

सौष्ठवं रूपसम्पत्तिश्चारुविस्तीर्णकर्णता ।
विसारिनेत्रता बिम्बाधरपाकान्तदन्तता ॥
सुकम्बुकण्ठता वेल्लल्लतासरलवामता ।
तन्मध्ये न तत्स्थूलनितम्बकरभोरुता ॥
अत्युन्नपीनस्तनता घनोरुजघनोन्नता ।
गौरता श्यामता वेति तद्ज्ञैः पात्रगुणा स्मृताः ॥

सङ्गीतनारायणे

रूपयौवनलावण्यमाधुर्याणि च सौष्ठवम् ।
मुखप्रसादः प्रागल्भ्यं विशालायतनेत्रता ॥
कृशावलग्नशोभित्वं तथैव तनुगात्रता ।
एते पात्रगुणाः प्रोक्ताः दोषः स्यात्तद्विपर्ययात् ॥

वेमभूपालः

पात्रप्रवेशक्रमः

अथेदानीं तु पात्राणां प्रवेशक्रम उच्यते ।
आदावुपोहनं कृत्वा यथा मार्गं यथा रसम् ॥
पुरःस्थित भाण्डवाद्यैर्गम्भीरध्वनिशालिभिः ।
ध्रुवायां संप्रयुक्तायां प्रस्तुतार्थानुसारतः ॥
अपनीते च नैपथ्ये पात्रैरुत्तममध्यमैः ।
वैष्णवस्थानके स्थित्वा कृत्वा वक्षः समुन्नतम् ॥
नात्युक्षिप्तप्रसन्ने च भुजशीर्षे विधाय च ।
निधाय नाभिनिकटे दक्षिणं खटकामुखम् ॥
तथा वामलताहस्तं विधाय चिबुकं पुनः ।
कृत्वा च वक्षसः क्षेत्राच्चतुरङ्गुलतः स्थितम् ॥
प्रवेशस्तु विधातव्यो नानारससमाश्रयः ।
पादोत्क्षेपस्तु पात्राणां स्वप्रमाणकृतो भवेत् ॥
स पुनश्च चतुस्तालो देवानां भूभुजामपि ।
द्वितालो मध्यमानां तु पादोत्क्षेपः प्रकीर्तितः ।
एकतालप्रमाणोऽसौ कार्यः स्त्रिति च लिङ्गिनाम् ॥

वेमभूपालः

पात्रप्रशंसा

यत्पात्रं गात्रविक्षेपैः कोमलैर्विलसल्लयैः ।
सुतालैरक्षराणीव प्रोद्गिरुद्गीतवाद्यकैः ॥

हम्मीरः

पात्रप्रसादनम्

भूषणालेपवसनमाल्याद्यैः परिशोभितः ।
पात्रप्रसादनं कुर्यात्तत्तद्देशानुसारतः ॥

वेमभूपालः

पात्रप्राणाः

जवत्वं स्थिरता रेखा भ्रमरी दृष्टिरश्रमः ।
प्रीतिर्मेधा वचो गीतिः पात्रप्राणा दश स्मृताः ॥
यत्र मध्येन संचेन नैरन्तर्येण वर्तनम् ।
प्रमाणरेखा उक्ता स्यात् मदनृत्तं प्रचक्षते ॥

पात्रमण्डनानि

कुङ्कुमैरञ्चितो देहश्चन्दनैर्धूसरोऽथवा ।
पृष्ठतः केशपाशः स्याल्लसत्पुष्पावतंसकाः ॥
ऋज्वी वा त्रितयं वाणी मुक्ताजालविराजिता ।
भाति सिन्दूरकस्तूरिचन्दानाद्यैर्विशेषतः ॥
तत्त्वाञ्जनान्विते नेत्रे कर्णयोस्तालपत्रके ।
कस्तूरीपत्रवल्लयङ्कौ गण्डौ कण्ठविलम्बितम् ॥
ग्रीवायां मौक्तिकाहारावली स्यात्स्तनमण्डले ।
न्यस्तसद्रक्तसौवर्णवलये च प्रसृष्ठयोः ॥
सूक्ष्मं कार्पासिकं वस्त्रं कुङ्कुमं वासकञ्चुकम् ।
वलक्ष्यंवासमञ्जीरौ पादौ देशानुसारतः ।
इत्येतन्मण्डनं चान्यत्पात्रे कुर्याद्यथोचितम् ॥

मोक्षदेवः

पात्रलक्षणम्

नृत्ताधारतया पात्रं नर्तकी प्रोच्यते बुधैः ।
मुग्धं मध्यं प्रगल्भं च तत्पात्रं त्रिविधं मतम् ॥
मुग्धादेः प्रोच्यते लक्ष्म यौवनत्रितयं क्रमात् ।
लीना चारु स्तनाभोगकपोलजघनोरुकम् ॥
प्रायो निम्नवनासं च यौवनं प्रथमं मतम् ।
पीनजङ्घोरुकं पीनकठिनोरुघनस्तनम् ॥
संजीवितं मन्मथस्य द्वितीयं यौवनं बुधाः ।
प्रसन्नोन्मादकरणं श्रीमत्सुरतनैपुणम् ॥
स्मरभावैः समृद्धं च त्रितीयं यौवनं जगुः ।
यौवनं तुर्यमथाहुर्मन्दोत्साहमनोयुतम् ॥
तज्जराभिमुखं शोभाविकलं नादृतं बुधैः ।
बालं मनोविहीनत्वान्न पात्रं जनरञ्जनम् ॥

मोक्षदेवः

अतिप्रगल्भमेतस्मात्यौवनात्पात्रमुच्यते ।
तज्जरामिमुखं शोभाविकलं नादृतं बुधैः ।
बालं मनोविहीनत्वान्न पात्रं जनरञ्जकम् ॥

हम्मीरः

पादद्वयुकुट्टिता

एवं पादद्वयकृता सा पादद्वयकुट्टिता ।
एवमिति पादस्थितिकुट्टितायाः ।

कुम्भः

पादपाटभेदाः

पाटस्तु षोडशः प्रोक्तः सारिकार्धपुरटिका ।
स्वस्तिकास्फुरिता चैव तालोत्क्षेपो निकुट्टकः ॥
प्रदुस्खालतिकावृत्तं प्रष्ठोक्षेपपुटिका ।
समरखलतिकोल्लालस्तथोद्वेष्टकवेष्टिनौ ।
प्रावृत्तं च लताक्षेप इत्येषां लक्षणं ब्रुवे ॥

सोमराजदेवः

पादरेचकः

पार्ष्ण्यङ्गुष्ठाग्रयोरन्तः बहिश्च सततं नतिः ।
नमनोन्नमनोपेतः प्रोच्यते पादरेचकः ॥

सङ्गीतमुक्तावली

पादरेचकलक्षणम्

पार्ष्ण्याङ्गुष्ठयोर्गमनं बहिरन्तश्च सन्ततम् ।
नासानेन्नमनोपेतं कथ्यते पादरेचकः ॥

मोक्षदेवः

पादलोहडी

एकपादप्रयुक्तेयमेकपादस्य लोहडी ।

कुम्भः

पादस्थितिकुट्टिता

कुट्टितः प्रथमः पादः स्थितश्चाङ्गुलिपृष्ठतः ।
अन्यस्ततः कुट्टितः स्यात्पादस्थितिनिकुट्टिता ॥

कुम्भः

पारिपार्श्वकयोरपसरणक्रमः

अस्यां प्रयुज्यमानायां पारिपार्श्वकयोर्भवेत् ।
पश्चिमेनापसरणं तत्प्रयोगक्रमो यथा ॥
अत्रहित्थस्थानकेन स्थित्वाञ्चितशिरा मनाक् ।
चतुरस्रमुनेकृत्वा नाभाविन्यस्य जर्जरम् ॥

अलपल्लवहस्ताभ्यां तुलावद्भिभृयात्समम् ।
आक्षिप्तचार्यां विक्षेपवेधौ कुर्वन् पुरोक्तवत् ।
गच्छेत् पञ्चपदीं धीरः सविलासाङ्गचेष्टितः ॥

विप्रदासः

पारिपार्श्वकः

सूत्रधारगुणैरेतैः किञ्चिन्न्यूनैः समन्वितः ।
मध्यमः प्रकृतिः पारिपार्श्वकः परिकीर्तितः ॥

वेमभूपालः

पार्वतीलोचनः—तालः

पार्वतीलोचनः पुनः । लौ द्रौ लौ द्रौ तनभका ।
॥ ० ० ॥ ० ० ऽ ऽ । । । । ऽ ॥

कुम्भः

पार्श्वक्षेपकुट्टिता

पार्श्वतश्च पुरःक्षेपात् पार्श्वक्षेपाख्यकुट्टिता ।

कुम्भः

पार्श्वपाणिः—हस्तपाटः

पार्श्वपाणौ नखाग्रेण वाद्यं धीरैः प्रवाद्यते ।

कुम्भः

पार्श्वपाणिः—हस्तपाटः

पार्श्वपाणौ नखाग्रेण वाद्यं धीरैः प्रवाद्यते ।
थ र र गड धर गड दग ढदग ।

कुम्भः

पार्श्वमण्डलिलक्षणम्

तौ पताकाकृती पार्श्वन्यस्तावन्योन्यसंमुखौ ।
पार्श्वमण्डलिनावुक्तोवन्येत्वाहुः स्वपार्श्वयोः ॥
आविद्धभ्रमितभुजौ पार्श्वमण्डलिनाविति ।
कक्षवर्तनिकेत्येतौ मन्यन्ते नृत्तवेदिनः ॥

हम्मीरः

—मतान्तरे

केचित्स्वपार्श्वयोरेतावाविद्धभ्रमितौ भुजौ ।
पार्श्वमण्डलिनावूचुः कक्षवर्तनिकेति च ॥

विप्रदासः

पार्श्वमण्डली—हस्तः

एतौ हि पार्श्वद्वितये पर्यायात्समुपागतौ ।
पार्श्वमण्डलिकाहस्तः प्रोच्यते भरतागमे ॥
कपोतानां च गमने नागानां कन्यकासु च ।
पार्श्वमण्डलिकाहस्तः प्रोच्यते भरतादिभिः ॥

भरतकल्पलता

पार्श्वाक्रान्ता—चारी

यद्वान्यचरणस्योरुक्षेत्रपर्यन्तमुद्धृतम् ।
चरणं धरणीभागे न्यायोदाहृतकं यदि ।
एषापि पार्श्वाक्रान्ताख्या चारी नृत्तविदां मता ॥

वेमभूपालः

पार्श्वाभिमुखलक्षणम्

पार्श्वाभिमुखमन्वर्थं पार्श्वस्थस्यावलोकने ।

हम्मीरः

पार्षगण्डः(वार्षगण्यः)—न्यायः

प्रविचारः सात्त्वतवत्पार्षगण्डेऽपि दृश्यताम् ।
किन्तु हस्तोद्वेष्टनं तु स्कन्धे वक्षसि वा भवेत् ॥
अत्राधिकं स्याद्भ्रमणं पृष्ठतः फलकस्य तु ।
अत्र पादः कृपाणस्य क्रियते वक्षसः स्थले ॥

वेमभूपालः

पार्ष्णिविद्धम्

पार्ष्णिविद्धे भवेत्पार्ष्णिरङ्गुष्ठक्षेपिणी सदा ॥

कुम्भः

पार्ष्णिरङ्गुष्ठसंश्लिष्टो सदा पादान्तरस्य हि ।
पार्ष्णिविद्धं तदा प्रोक्तं सूरिभिः परिकीर्तितम् ॥

संगीतमुक्तावली

पार्ष्णी

यस्याः पार्ष्णी पार्श्वगते स्थाने स्थित्वाथ रेचयेत् ।

कुम्भः

पालिका

षड्जग्रहांशा सन्यासा गरिक्ता पालिका मता ।
गानज्ञैर्गीयते सायं कतिचिद्गमकान्विता ।
पाली ललाटोदितचन्द्रलेखा प्रफुल्लराजीव समत्रिनेत्रा ॥

कुम्भः

पाशः—हस्तः

सूच्यां निकुञ्चिते श्लिष्टे तर्जन्यौ पाश ईरितः ।
अन्योन्यकलहे पाशे शृंखलायां नियुज्यते ॥

भरतकल्पलता

पिण्डविनिर्णयः

रक्ताधिक्ये पुरन्ध्री स्याद्बीजाधिक्ये तु पूरुषः ।
तयोः साम्ये भवेत्क्लीब इति पिण्डविनिर्णयः ॥

सोमराजदेवः

पिण्डहस्तः—हस्तपाठः

व्याप्रियेते समं यत्र रेफहस्तोर्ध्वहस्तकौ ।
स पिण्डहस्तो विज्ञेयो वाद्यविद्याविशारदैः ॥
धरकट धरकट झें झें ।

हम्मः

पिण्डीबन्धः

स चेष्टदेवतारूपानुकारेण स्मृतो बुधैः ।
तस्य चेष्टानुकारेण विधेया चाविपश्चिता ।
पिण्डाकारेण विज्ञेयः पिण्डीबन्धस्तदा पुनः ॥

कुम्भः

पितामहहस्तः

सन्दंशस्त्वलिके भागे चलितो विरलो यदि ।
पितामहे नियुज्येत शिवेन परिकीर्तितः ॥

भरतकल्पलता

पितामहीहस्तः

अलपद्मः कण्ठदेशे कृत्वापि चलितो यदि ।
पितामह्या नियुज्येत कथितो भरतादिभिः ॥

भरतकल्पलता

पितृहस्तः

एतौ तौ विपरीतौ चेत्पित्रर्थे विनियुज्यते ।

भरतकल्पलता

पिशाचादीनामभिनयः

पिशाचभूतयक्षाद्या अप्रत्यक्षा भवन्ति ये ।
तेषामभिनयः कार्यः करणैस्तु यथोचितैः ॥

वेमभूपालः

पीठकम्—नाट्याङ्गम्

तथाक्षरेण संयुक्तस्तादिगिद्गिगिरेव च ।
आदौ तु समपादश्च हस्तश्चेति लताभिधः ।
समं शिरस्समा दृष्टिः पाठकं चाभिधीयते ॥

भरतकल्पलता

पीठमर्दः

कलानामुपदेशेम गोष्टीदेशे च साधयेत् ।
तज्ज्ञानामिति निर्दिष्टः पीठमर्दो मनीषिभिः ॥

शुभङ्करः

—उपनायकः

नायकानुचरो भर्तुस्तुल्यवेषपरिच्छदः ।
पीठमर्द इति प्रोक्तः किञ्चिन्न्यूनस्तु तद्द्वयोः ॥

यद्वा-

कार्यमाणोऽत्र निर्वृत्तः प्रत्यागण्यः समासतः ।
मन्त्रिकागुह्यकोपेतः कलासु च विचक्षणः ॥

पुटतालः

यः षड्विंशतिवर्णाघ्रिः स स्यात्सर्वार्थसिद्धिदः ।
ललितश्च पुटाख्ये च ताले शृङ्गारपोषकः ।
ताले चैव पुटे ज्ञेयं गुरुद्वन्द्वं लघुप्लुते ॥

गान्धर्ववेदे

पुत्रीपुत्रहस्तः

वामहस्ते सर्पशीर्षं मृगशीर्षं तथोपरि ।
विन्यसेत्तत्सुतायां च सुतेऽपि विनियुज्यते ॥

भरतकल्पता

पुरःक्षेपनिकुट्टिता

कुट्टितश्चरणः पूर्वं पुरतोऽङ्गुलिपृष्ठतः ।
स्थापितः कुट्टितस्थाने पुरः क्षेपनिकुट्टिता ॥

कुम्भः

पुरःक्षेपा

कुञ्चितं पादमुत्क्षिप्य वेगाद्विस्तार्य चेत्पुरः ।
विन्यसेदवनौ प्रोक्ता पुरःक्षेपाभिधा बुधैः ॥

कुम्भः

पुरस्ताल्लुठिता

पुरस्ताच्च कृता सैव पुरस्ताल्लुठिताभिधा ।

कुम्भः

पुराटिका

पुराटिका मिथोऽङ्घ्रिभ्यामुद्वृत्ताभ्यां निकुट्टनात् ।

कुम्भः

पुरुषरागाः

भूपालो भैरवश्चैव श्रीरागो फलपञ्जरः ।
वसन्तो मालवश्चैव बङ्गालो नाटकस्तथा ।
अष्टौ रागा इमे धीरैः पुरुषा इति सम्मताः ॥

शृङ्गारशेखरः

पुरोदण्डभ्रमाख्यः

तिर्यङ्मुष्टिं विधायैकं पार्श्वादस्यैवचेद्बहिः ।
अन्तश्च लीलयान्यस्मिन् लुठिते सेति हस्तयोः ॥
पुरस्तात्रिस्मृतिर्यत्र पर्यायेण तदीरितम् ।
पुरोदण्डभ्रमाख्यं तच्चालयं पूर्वसूरिभिः ॥

पुष्पाञ्जलिः

तत्र पुष्पाञ्जलिः पूर्वं मुखचाली ततः परम् ।
रागवाक्यानुगं शब्दनृत्तं शुद्धगतिस्तदा ॥
रूपाणि च तथा ध्वाडः शब्दचालिरतः परम् ।
सूडादिशब्दनृत्तं च शब्दं च जपनर्तनम् ॥
ततः सूडादिगीतानां तदर्थाभिनयोचितम् ।
नृत्तं नानाविधं गीतप्रबन्धानां च नर्तनम् ॥
चिन्दुनृत्तं दरूनृत्तं कन्दराख्यमतः परम् ।
ततो द्रुपदसंचं च नृत्तमेषक्रमोऽत्रहि ॥

सङ्गीतमुक्तावली देवेन्द्रकृता

स्थित्वा पादसरोरुहाग्रविषमे रेखादिभिः प्रोज्ज्वला
संस्थाप्योरुनितम्बबिंबयुगलं संकुञ्च्य जानुद्वयम् ।
हस्ताभ्यां कुसुमाञ्जलिं सुललितां धृत्वा स्तनाभ्यां मुहु-
र्नम्रीभावमुपागता नरपतेरग्रे नटी राजते ॥

कुम्भः

ततो जवनिकान्तर्धौ दधानौ कुसुमाञ्जलिम् ।
पात्रं तिष्ठेदधिष्ठाय स्थानकं सौष्ठवाञ्चितम् ॥

पुष्पाञ्जलित्यागसमये पठनश्लोकः ।

निषिद्धैरभ्येतं गलितमकरन्दैर्मधुकरैः ।
करैरिन्दोरन्तः छुरितरवसंभिन्नमुकुलम् ॥

विधत्तं संसिद्धिं नयसुभगामस्य सरसः ।
प्रकीर्णं पुष्पाणां हरिहरयोरञ्जलिरियम् ॥

हम्मीरः

पुष्पावकीर्णाः

ततो नैकरसं कार्यं किञ्चित्कुर्याद्विचक्षणः ।
वृत्तिर्वापि रसो वापि सभावोऽपि प्रयोगतः ।
पुष्पावकीर्णाः कर्तव्याः चित्रमाल्यानुकारिणा ॥

कुम्भः

पुस्तलक्षणम्—आहार्याभिनयः

तत्र शैलविमानादिनाट्यं यद्यत्प्रदश्यते ।
तत्पुस्त इति विज्ञेयं स च त्रेधा विधीयते ॥
आदिमः सन्धिमस्तत्र मध्यमो व्याजिमस्ततः ।
अन्तिमो वेष्टिमस्तेषां क्रमाल्लक्षणमुच्यते ॥
किलिञ्जचर्मवस्त्राद्यसन्धानात्तत्र सन्धिमः ।
सूत्रकर्षादिभिर्व्याजैर्निर्वृत्तं व्याजिमं विदुः ।
जतुसिक्थादिसंबन्धात् कथ्यते यस्स वेष्टिमः ॥

नृत्तरत्नावली

पुंनृत्यम्

पुंनृत्यं ताण्डवं प्रोक्तम् ।

सङ्गीतनारायणः

पूजने फलाविष्करणम्

अनेन विधिना यत्र पूज्यते रङ्गमण्डलम् ।
तत्राभिवर्धते राज्यमायुः कीर्तिश्च शाश्वती ॥

बिप्रदासः

पूर्णकूटतानसंख्या

शून्यवेदाक्षिनासत्यवसुनेत्रमिताः स्फुटाः ।
सप्तस्वराणां पूर्णानां पिण्डसंख्योपजायते ॥
(२८२२४०)

पूर्वरङ्गः

अर्थप्रकृतयः पञ्च चतस्रो वृत्तयस्तथा ।
नाट्योक्तेस्तु समावेशस्तथाभाषाविभाषयोः ।
प्रायशः सर्वनाट्येषु कीर्त्यन्ते संहिता इमे ॥

शुभङ्करः

पदभागाः कथा चैव परिवर्षस्तथैव च ।
यस्मिन् रङ्गे प्रयुज्यन्ते पूर्वरङ्गस्स उच्यते ॥

भरतकल्पलता

पूर्वरङ्गः

नटेन नटनीयार्थतादात्म्यपटुना स्फुटम् ।
वक्ष्यतेऽभिनयैः सोऽर्थो यत्र तन्नाट्यमुच्यते ॥
अभिधत्ते नाट्यशब्दस्तत्राभिव्यञ्जकात्पुनः ।
वक्लिलक्षणया न स्यान्नाट्यमेतद्द्वयं मतम् ॥
करणैरङ्गहारैः स्यान्नृत्यं तेनानुरञ्जितैः ।
चतुर्विधैरभिनयैर्निष्पन्नं नृत्यमुच्यते ॥
अभिधत्ते नृत्यशब्दोऽभिनयं व्यङ्ग्यमस्य तु ।
आह लक्षणया तस्मादुभयं नृत्यमुच्यते ॥
नाट्यशब्दस्याभिनये नृत्यशब्दस्य सद्रसे ।
वृत्तिलक्षणया तस्मादुभाभ्यामुभयग्रहः ॥
सत्या रसात्मकस्यास्य प्रयोगः प्रचुरेक्षिते ।
विधिना ये च रक्ष्यन्ति पूर्वरङ्गः स उच्यते ॥
रक्ष्यन्ति येन तत्कर्म रङ्गं तौर्यत्रिकाश्रितम् ।
पूर्वोऽस्य भागो विद्वद्भिः पूर्वरङ्गं निगद्यते ॥
सूत्रधारप्रवेशार्थास्तथौत्पत्यादिका ध्रुवाः ।
उपोहनेन रहिताः क्रियास्तेनानुरञ्जिताः ।
पूर्वरङ्गे प्रयुज्यन्त इति पूर्वरङ्गविचारगीः ॥

विप्रदासः

पूर्वरङ्गभेदाः

चतुरश्रस्त्र्यश्रो मिश्रः स्यादयं भिद्यते त्रिधा ।
शुद्धश्चित्र इति द्वेधा द्विभेदोऽप्ययमिष्यते ॥
करणैरङ्गहारैश्च रहितं शुद्ध उच्यते ।
मिलितस्तैश्चित्रहेतुश्चित्र इत्युच्यते बुधैः ॥

बिप्रदासः

पूर्वरङ्गविधानम्

शतौ द्विद्विकता, शङ्कैककलं त्रिकलस्तु शम् ।
प्रत्येकं चरणेष्वत्र लयत्रितयमेव च ॥
परिवर्तास्तु चत्वारस्तेषामाद्यः स्थिते लये ।
द्वात्रिंशता कलानां स्याल्लये मध्ये द्वितीयकः ॥
सोऽपि तावत्कलस्तावान् तृतीयोऽपि कलस्ततः ।
तावानेव चतुर्थस्तु परं स स्याद् द्रुते लये ॥
ध्रुवेयं चतुरश्रस्यादस्यां पालितयं भवेत् ।
सन्निपातैश्चतुर्भिः स्यात्परिवर्त इहैककः ॥
प्रथमे वा द्वितीये वा तृतीये सन्निपातके ।
पूर्वस्मिन्परिवर्तेऽत्र वाद्यभाण्डपरिग्रहः ॥

सूत्रधारप्रवेशोऽत्र द्वितीये परिवर्तके ।
तत्पारिपार्श्वकौ स्यातां सभृङ्गारकजर्जरौ ॥
सपुष्पाञ्जलयः शुक्लवस्त्राः सुमनसस्त्रयः ।
कृतमङ्गलसंस्कारा वैष्णवस्थानके स्थिताः ॥
प्रविशेयुस्ततः सूत्रधारः पञ्चपदीं व्रजेत् ।
दक्षिणं चरणं पार्श्वाक्रान्तचार्यौ समाक्षिपन् ॥
तालत्रयं ततस्त्र्यया वामं चरणमाक्षिपेत् ।
सद्वयः सूत्रधारोऽथ गत्वा पञ्चपदीं शनैः ॥
रङ्गमध्ये पुष्पमोक्षैः पूजयेत्पद्मसम्भवम् ।
नमस्कुर्यात्ततो देवं मनोवाक्कायकर्मभिः ॥
कलाभिः स्यात् षोडशभिः पञ्चपद्यां प्रवेशनम् ।
पुष्पाञ्जलिविमोक्षे तु कलाषट्कमुदीरितम् ॥
तावतैव तु काले तद्द्वितीयपरिवर्तके ।
नमस्कार्यं देवतानां तृतीये परिवर्तके ॥
आक्रमेन्मण्डलं पूर्णं दक्षिणं पादमुद्धरन् ।
सूच्यासव्ये च दक्षं च विद्वद्दक्षिणहेतुकम् ? ।
सूच्यैव च प्रकुर्वीत मण्डलस्य प्रदक्षिणम् ॥

कुम्भः

पूर्वरङ्गस्थितिः

नृत्यालोकनतत्परे नरपतौ श्रीसूत्रधारः कृती
नीत्वा चीनपटीलसज्जवनिका मध्ये नटीमुत्तमाम् ।
रागालापमृदङ्गतालरचनां रम्यां समावेदिनीं
संपाद्यारभटीं द्रुतं किल नयेदन्तः पटीं दूरतः ॥

कुम्भः

पूर्वरङ्गाङ्गम्

अथाभिधास्यते सम्यक् पूर्वरङ्गाङ्गसङ्ग्रहम् ।
प्रत्याहारोऽवतरणमाश्रावणारम्भवक्त्रपाणी च ।
परिघट्टनाथ संघोटनाथ मार्गासारितं च ।
आसारितोत्थापिन्यौ नान्दीशुष्कावकृष्टाह्वाः ॥
रङ्गद्वारं चारी सैव महत्पूर्विका त्रिगतम् ।
प्रस्तावनेति कथितान्येतान्यङ्गानि सारते पूर्वैः ॥
अङ्गैरेभिरिहाङ्गी निष्पन्नः पूर्वरङ्गोऽयम् ।
तेभ्यो नैवाभिन्नो भिन्नोऽपि प्रेक्षते कविरसद्भिः ॥
उत्थापनीप्रयोगे प्राधान्येनोपकल्पते ।
प्रत्याहाराद्ययं यात्रा प्राच्योदीच्यां गतामव ।
अत्राश्रावणकार्यं यदङ्गषट्कं क्रमेणोक्तम् ॥

देवस्तवार्थमपदं पदबद्धं वा द्विधा तदुद्दिष्टम् ।
अपदं तत्र तु गीतं निर्गीतं कीर्तितं तच्च ॥
यत्पदबद्धं गीतं तदेवप्रीतिदं बहिर्गीतम् ।
तस्मात्पदैर्निबद्धं प्रयोज्यमाश्रवणादिस्तु ॥
प्रयाणे तु बहिर्गीतमन्तर्भवनिकागतैः ।
तन्त्रीभाण्डकृतं तज्ज्ञै प्रयोक्तव्यमतन्द्रितैः ॥
ततो जवनिकां हित्वा समस्तकुतपैः सह ।
नृत्यपाठ्यकृतानि स्युः पूर्वरङ्गाङ्गकानि तु ॥
ततः पुनः प्रयोक्त्रात्र मन्द्रकादेस्तु मध्यतः ।
प्रयोज्यं किञ्चिदेकं तु वर्धमानमथापि वा ॥
पूर्वरङ्गे प्रयुञ्जीत ततोऽन्याङ्गसमुच्चयम् । कुम्भः

पूर्वरङ्गाङ्गभेदाः

प्रयोक्तव्यश्च साङ्गोऽयं तदङ्गान्यभिदध्महे ।
प्रत्याहारोऽवतरणं ततश्चाश्रावणा मता ॥
आरम्भः स्याद्वक्त्रपाणिस्ततश्च परिघट्टना ।
सङ्घट्टना ततो मार्गासारितासारिते तथा ॥
उत्थापना परीवर्त्ती नान्दी शुष्कापकृष्टका ।
रङ्गद्वारं ततश्चारी महाचारीति तं ततः ।
प्रस्तावनेति भरतः क्रमादुदादिशन्मुनिः ॥

विप्रदासः

पृष्ठलुठिता

कुट्टितश्चरणः पृष्ठे लुठितोऽङ्गुलिपृष्ठतः ।
पुनश्च कुट्टितः स्थाने सा पृष्ठलुठिताभिधा ॥

कुम्भः

पृष्ठोत्तानतलम्

भूलग्नाङ्गुलिपृष्ठोऽङ्घ्रिः पश्चादेकोऽपरः पुरः ।
समः पृष्ठोत्तानतलमिति शास्त्रविचक्षणैः ॥

सङ्गीतमुक्तावली देवेन्द्रकृता

पृष्ठोत्तानतलम्

भूमिलग्नाङ्गुली पृष्ठः पश्चात्पादस्तथैककः ।
परः समो यत्रपादः पृष्ठोत्तानतलं हि तत् ॥ कुम्भः

पेरणिः

दक्षः कलासु सर्वासु सभाजनमनोहराः ।
सुरेखो नृत्यशास्त्रज्ञश्चण्डः शारीरपेशलः ।
सभावरससंयुक्तो यो नृत्येत स पेरणिः ॥ कुम्भः

पेरणिः—ताण्डवम्

पेरणिर्वर्तरूपं च ताण्डवं द्विविधं मतम्।
अङ्गविक्षेप . . . . स्यं तथाभिनयशून्यता।
एवं सा पेरणिस्तस्याः साङ्गदेशीति लोकतः॥

शुभङ्करः

पेरणिपद्धतिः

अथ पेरणितः सम्यग्वक्ष्ये पद्धतिलक्षणम्।
संप्रदायविदो रङ्गभूमिदेशमुपागताः॥
गोण्डलीविधिवत्रात्र कुर्युर्विधिः धिधीततैः ?।
गम्भीरध्वनिमातोद्यवादनं मिलिताश्च ते॥
ततो विलम्बितलयं रिगोण्यट्टवणाश्रयम्।
पाटत्रयं वादयेयुर्द्विर्द्विर्निस्सारुतालतः॥
ततो विकृतवाग्वेषभूषो रङ्गभुवं विशेत्।
मोदकः प्राज्यहास्यैकरसस्तस्मिन् प्रनृत्यति॥
रिगोण्योपशमेनाथ प्रनृत्यन् पेरणी विशेत्।
ततः शान्तेषु वाद्येषु सह तालधरैः परम्॥
गारुगौ वाद्यमानेऽथ ताले निपुणवादकौ।
यद्वा सरस्वतीकण्ठाभरणो मर्दलादितः।
मनोहरे तालरसे ध्वनौ च व्याप्तिमृच्छति॥
पेरणी प्रारभेन्नाट्यं घर्घरान् पूर्वसूचितान्।
ततो निबद्धे कवित्ते गूढे वर्णसरेण वा॥
निस्सारुणा च तालेन विषमं नृत्यमाचरेत्।
नृत्यन् सालगसूडेन रेखां च स्थापनं तथा।
हत्वा च बहूनां गीतवर्तनं दर्शयेत्क्रमात्॥
विषमं च प्रहारेणानुगमामोगवादने।
कविधारान् प्रकुरुते तथा भावाश्रयानपि।
लोकमार्गानुसारेण ततोऽन्यानापि दर्शयेत्॥

कुम्भः

पौरुषभेदाः

ततःपरं सत्त्वभेदात्पौरुषानभिदध्महे।
शोभा विलासो माधुर्यं गाम्भीर्यं धैर्यमेव च।
तेजो ललितमौदार्यमित्येतेऽष्टौ प्रकीर्तिताः॥

वेमभूपालः

पौरुषरसप्रेमविलासप्रबन्धः

विजयानन्दतालेन गौरीरागो विरच्यते।
पद्यं पाटाः स्वरास्तेनाः लीलानायकसंभवाः॥
शृङ्गारो कैशिकीरीतौ कामतृप्तिपुरस्सराः।
कामिनीहासनामायं प्रबन्धः श्रीपतेः प्रियः॥
रागे कर्णाटबंगाळे सपौरुषरसात्परः।
प्रेम्णा विलासनामायं प्रबन्धो माधवप्रियः॥

कुम्भः

प्रकटस्मरयौवना—नायिका

विधाय हृदि या कान्तं कान्तेयं गमयन्स्थितम्।
रमेत जन्मनान्दोलैः प्रकटस्मरयौवना॥

शुभङ्करः

प्रक्षेप्यारोप्ययोर्लक्षणम्

पक्षेप्यमुच्यते तज्ज्ञैर्भूषणं नूपुरादि यत्।
भूषणं यच्च हारादि तदारोप्यमिति स्मृतम्॥

वेमभूपालः

प्रगल्भवचना—नायिका

कान्ते कचाञ्चलमिलत्करपल्लवान्ते
किञ्चित्तिरोऽञ्चितमुखी करमुत्क्षिपन्ती।
मामङ्ग न स्पृश विटेति शठेति कोपा-
दीषत्प्रगल्भवचना वचनं व्यनक्ति॥

शुभङ्करः

प्रचाराः

उत्तानश्च नतः पार्श्वगोऽग्रगोऽधस्तलस्तथा।
स्वसम्मुखं तलश्चोर्ध्वमुखोऽधोवदनस्तथा॥
पराङ्मुखं पार्श्वतलः सम्मुखश्चाग्रतस्तलः।
ऊर्ध्वगोऽधोगतः पार्श्वगतोऽन्यं पार्श्वतो मुखः॥
एते पञ्चदशैवात्र प्रचाराः करसंश्रयाः।
नाम्नैव व्यक्तलक्ष्माणो न ततो लक्षिताः पृथक्॥

कुम्भः

—.स्थायकः

स्थित्वा स्थित्वा स्वरेष्वादावेकैकस्मिन् द्वयोर्द्वयोः।
त्रिषु त्रिष्वथवा यस्य प्रचारः स्थायकस्त्वसौ॥

कुम्भः

प्रच्छेदकः—लास्यः

अन्यासक्तं पतिं मत्वा प्रेमविच्छेदमन्युना।
वीणापुरःसरं गानं स्त्रियाः प्रच्छेदको मतः॥

यद्वा—

कान्तेऽन्यनायिकासक्ते पुंभातुप्रासमर्पितः।
मानमन्युर्मनस्त्रासकरी प्रच्छेदको मतः ॥

शुभङ्करः

प्रच्छेदको भवेद्यत्र ज्योत्स्नासंतापविह्वलाः।
कामिन्यो यान्ति निर्व्रीडाः सापराधानपि प्रियान्।
नाट्यं पुंभावभूयिष्ठं समवृत्तविभूषितम् ॥

नृत्तरत्नावली

प्रतापललितः

प्रतापललितः प्रोक्त उद्ग्राहे स्थानदर्शनात्।
अनेकगमकोद्भूतः प्रभूतगमको मतः ॥
अल्पैस्तु गमकैः क्लृप्तः स्यादल्पगमकाभिधः।
मेलापकेन सन्त्यक्तो ध्रुवखण्डः स्यात्रिधातुकः ॥
त्रिधातुकाल्पगमकैः सुकरैर्दुष्कराः परे।
सप्तेति कथिता भेदास्ताले गारुगिनामनि ॥

मोक्षदेवः

प्रतापवर्धनलक्षणम्

पाटैः स्वरैः पदैस्तेनैर्विरुदैश्चान्वितो रसैः।
प्रतापवर्धनो वीरे पाटन्यासेन गीयते ॥

सोमराजदेवः

प्रतितालः

लाटदेशोद्भवं गीतं प्रतितालं बुधा विदुः।
ययोरन्योन्यवचनं यथा वादरता न हि ॥
पडितालमिति प्रायः प्रवदन्ति बुधा जनाः।
तदादि प्रतितालेन गीतसंबन्धितालकः ॥
तस्यैव प्रतितालेन प्रथमं पल्लवं मतम्।
नातिदीर्घं नातिखर्वं ... ... लके ॥
मध्ये न्यासस्ततो मन्द्रन्यासः स्यात्पल्लवे पुनः।
भारतीवृत्तिमाश्रित्य पादद्वयसमन्वितम् ॥
नर्तनं तु ... ... नामवाद्यं चक्रायुधे भवेत्।
आहु ... ... धि पाटवर्णानुवादि च।
व्यतिरिक्तविलम्बाभ्यां लयाभ्यां नयनं भवेत् ॥

सङ्गीतसूर्योदयः

प्रतिमण्ठकाः

तारश्च भ्रमरश्चैव विचारः कुन्दसंज्ञकः।
चत्वारः कथिताश्चैते प्रतिमण्ठास्तु शम्भुना ॥

गान्धर्ववेदे

प्रतिमुखरलक्षणम्

मुखरिणा मनोऽधीनः प्रोक्तः प्रतिमुखरी।

मोक्षदेवः

प्रतिवृत्तिः

यस्मिन्नानागते पूर्वैरुदीरितमपोहनम्।
प्रतिवस्तु तदावृत्तिरिति केचन मन्वते ॥

कुम्भः

प्रतिशीर्षम्

स्निग्धेन बिल्वकाष्ठेन प्रतिशीर्षोपयोगिनी।
द्वात्रिंशदङ्गुला कार्या घटीचीरसमाश्रया ॥
न स्थूला न कृशा नैव मृद्वी न कठिना तथा।
आच्छादयेत् बिल्वकल्पा द्रवार्द्रैश्चीरकैरिमाम् ॥
मृद्वातपने संशोष्योऽसौ पुनर्नाट्यवेदिभिः।
तस्यां ललाटपर्यन्ते कार्यं कोणत्रयं बुधैः ॥
ललाटपट्टकोणं तु विदधीत षडङ्गुलम्।
अथाङ्गुलप्रमाणं तु कटयोरुभयोरपि ॥
कटान्ते त्र्यङ्गुलं कार्यं तथा स्यात्कर्णरन्ध्रकम्।
अवटौ कोणकं कुर्यात्सुसमं द्वादशाङ्गुलम् ॥
तदूर्ध्वं मुकुटः कार्यो नानारत्नविचित्रितः।
प्रवीणशिल्पकश्चित्रो बहुरूपोपशोभितः।
एवं नाट्ये विधातव्यं नाट्यज्ञैः प्रतिशीर्षकम् ॥

वेमभूपालः

प्रत्यक्षाप्रत्यक्षाणामभिनयः

प्रत्यक्षांस्तानभिनयेदुद्वेगभयविस्मयैः।
प्रणामकरणैर्देवान् प्रत्यक्षांस्तु प्रदर्शयेत् ॥
अप्रत्यक्षानभिनयेत्चिह्नैरङ्गविचेष्टितैः।
निरूपणीया पूज्याश्च गुरवश्च प्रणामतः ॥
विटधूर्तजनाश्चैव सुखी परमभाजनं।
परिमण्डलिताख्येन हस्तेनैव प्रदर्शयेत् ॥

वेमभूपालः

प्रत्यन्तरम्

उद्दिष्टवस्तु रागादौ किञ्चिदाधिक्यचिन्तितम्।
तद्धातुममुनिष्पन्नं प्रत्यन्तरमितीरितम् ॥

गान्धर्ववेदे

प्रत्यायतम्

प्रत्यायतसनाहतम् ।

भरतकल्पलता

प्रत्याहारलक्षणम्

आतोद्यानां प्रविन्यासः प्रत्याहारः स चेदृशः ।
प्राङ्मुखः स्यान्मौरजिको रङ्गात्पश्चिमदेशतः ॥
गान्धर्वाचार्यको याम्ये रङ्गस्य स्यादुदङ्मुखः ।
मार्गं देशीं च यो वेत्ति स गान्धर्वो विधीयते ॥
गान्धर्वशिक्षाकुशलो गान्धर्वाचार्य उच्यते ।
वामेन वैणिकस्तस्य दक्षे सौषिरिको भवेत् ॥

त्रिप्रदासः

प्रथमकलासः

विधाय भ्रमरीं काञ्चित्संहतस्थानके स्थिता ।
अलपल्लवसंज्ञौ च कृत्वारालकरौ क्रमात् ॥
यत्राङ्गी तत्र तौ नीत्वा युगपत्क्रमतोऽपि वा ।
अङ्गं विधुन्वती चित्रं सचारीगुरुताविव ॥
मत्स्यमद्यार्थं वक्रवत्कृत्वा मुकुलहस्तकम् ।
मन्दं मन्दं पुरस्ताच्च पश्चाच्च प्रपदेन या ।
याति यस्मिन् कलासे सा विज्ञेया प्रथमाभिधा ॥

कुम्भः

प्रथमकलासभेदः

कट्यां वाम विधायाथ सखड्गं दक्षिणं करम् ।
कृत्वार्धचन्द्रमास्ते चेत्सकम्प भेद आदिमः ॥

कुम्भः

प्रथमद्वितीयप्लवौ

त्रिपताकौ पताकौ वा नाभौ कृत्वा करौ ततः ।
प्रयाति पद्भ्यां पश्चाच्चेत्तालस्यानुगुणं यदा ॥
नदायमाद्यभेदः स्यात्प्लवस्य मुनिसंमतः ।
त्रिपताकौ करौ कृत्वा वामपादं पुर सरम् ॥
हस्तेन वाममेवं स्याल्लघुमानेन वामतः ।
गत्वा तत्रासनं कृत्वा समं विषममेव वा ॥
ततः स्थानात्समुत्प्लुत्य गच्छेच्चेत्तुल्यपादिकाम् ।
मण्डूकस्य द्वितीयोऽयं भेदः प्रोक्तस्तदा बुधैः ॥

कुम्भः

प्रथमपताकम्

पताकं वामहस्तं तु नीत्वा दक्षिणकर्णगम् ।
दक्षं पुन कटीं वामां वामजङ्घां तथाविधाम् ॥
एतद्विपर्ययाद्धस्तद्वन्द्वं कृत्वा ततोऽनु च ।
मुखसंमुखमानीयो मेत्याद्यो भेद इष्यते ॥

कुम्भः

प्रथमयौवनस्वरूपम्

लीनाधरस्तनाभोगकपोलजघनोरुकम् ।
सुरतं प्रति सोत्साहं प्रथमे यौवने मतम् ॥

हम्मीरः

प्रथमहंसः

मकरं दक्षपार्श्वस्थं पताकं वामहस्तकम् ।
पुरतो यत्र हंसीव यायाद्भेदः स आदिमः ॥

कुम्भः

प्रधानगुणाः

तालो मृदङ्गस्तन्त्री च कचिदेकैकशः कचित् ।
युग्मीभूय प्रधानस्य गुणाः सर्वव्यपेक्षया ।
षट् ध्रुवाः क्रमतोऽत्र स्युः प्रधान्ये त्रितयस्य तु ॥

कुम्भः

प्रबन्धः

चतुर्भिर्धातुभिर्बद्धः षड्भिरङ्गैर्मनोहरः ।
गीतशास्त्रविदग्धेन प्रबन्धः स प्रकीर्तितः ॥

कुम्भः

प्रबन्धलक्षणम्

चतुर्भिः पञ्चभिः षड्भिः स्वरैरागनिरूपणम् ।

भरतकल्पलता

चतुर्भिर्धातुभिर्यस्मादङ्गैः षड्भिः प्रबध्यते ।
प्रबन्धः प्रोच्यते तस्माद्गीतविद्याविशारदैः ॥

मोक्षदेवः

प्रबन्धाङ्गानि

प्रबन्धस्य षडङ्गानि स्वरस्तालस्तथा पदम् ।
तेनः पाटश्च विरुदं क्रमाल्लक्ष्माभिदध्महे ॥

कुम्भः

प्रबन्धस्य षडङ्गानि स्वच्छायाविरुदं पदम् ।
तेनाकारं च वाक्यं च प्रबन्धः पुरुषो भवेत् ।
भवन्त्येवं षडङ्गानि मङ्गलान्ते प्रयुज्यते ॥

भरतकल्पलता

प्रबन्धावयवाः

प्रबन्धावयवो धातुः स चतुर्धा निगद्यते ।
उद्ग्राहः प्रथमस्तत्र ततो मेलापकध्रुवौ ॥
आभोगश्चेति तेषां च क्रमाल्लक्ष्मामिदध्महे ।
उद्ग्राहः प्रथमो भागस्ततो मेलापकः स्मृतः ।
ध्रुवत्वाच्च ध्रुवः पश्चादाभोगस्त्वन्तिमो मतः ॥

हम्मीरः

प्रमोदलक्षणम्

स्वरैः पदैश्च पाटैश्च तेन्नकैस्तालसंयुतः ।
प्रमोदाख्यः प्रबन्धोऽयं प्रमोदजननः सदा ॥

सोमराजदेवः

प्रयोगः

ध्रुवेन च प्रवेशे स्तः खञ्जनर्कुटकाभिधे ।
वस्तुप्रयोगप्रकृतिं रसं भावमृतुं वयः ॥
देशं कालमवस्थां च ज्ञात्वा तत्तद्विधा ध्रुवा ।
प्रयोक्तव्या प्रयोगज्ञैः प्रयोगः पुनरुच्यते ॥

वेमभूपालः

प्रयोगलक्षणम्

आदौ गीतमथो वाद्यं ततो नृत्तं च योजयेत् ।
एतेषां मेलनं यत्तु स प्रयोग उदाहृतः ॥

वेमभूपालः

प्ररोचकम्

प्ररोचकं च कर्तव्यं गुरुप्रायोऽक्षरान्वितम् ।
यथाक्षरेण त्र्यश्रेण सन्निपातैस्तथाष्टभिः ।
विविधैककसंयुक्तं कैशिकीजातिमाश्रितम् ॥

नाट्यशास्त्रे

प्ररोचना

प्रकृतस्यैव कार्यस्य सिद्धत्वस्यानुसूचकम् ।
उपायोपेयभावेन कार्यसिद्धिव्यपाश्रयम् ॥
कविनाम्नालङ्कृतं च वाक्यं यत्र प्रयुज्यते ।
सा स्यात्प्ररोचना नाम वस्तुप्रस्तावनाभिधा ॥

कुम्भः

प्रविचारलक्षणम्

याः प्रकृष्टा विचित्राश्च गतयस्सपरिक्रमाः ।
त एव प्रविचाराः स्युः शस्त्रमोक्षणगोचराः ॥

विप्रदासः

प्रविचारविधिः

भारते निगदिताः प्रविचाराः शस्त्रमोक्षणविचारगोचराः ।
वामकेन बिभृयात्फलकान्तं दक्षिणेन तु कृपाणमादरात् ॥
तौ करावुपसृतौ विनिधायाक्षिप्यतौ च तत एव शिक्षितः ।
भ्रामणं च फलकस्य विदध्यात्तूभयोरायसपार्श्वयोः ॥
भ्रामयेच्च परितः शिरसस्तत्खड्गिनं त्वथ शिरःकपोलयोः ।
अन्तरा च मणिबन्धतस्तयोर्द्विष्टयेच्च विधिना प्रयत्नवान् ॥
भ्रामणं च फलकस्य विदध्यात्संभ्रमेदुपरिमस्तकं यथा ।
भारते विधिरयं मुहुर्मुहुः शस्त्रपात उचितः कटीतटे ॥

कुम्भः

प्रवृत्तयः

नानाविधा देशभाषावेषाचारा यथोचितम् ।
प्रवर्तयन्ति व्यापाराः प्रवृत्तिः सा प्रकीर्तिता ॥

वेमभूपालः

प्रवृत्तिभेदाः

दाक्षिणात्या तथावन्ती पाञ्चाली चोढ्रमागधी ।
इत्येषा नाट्यचतुरैश्चतुर्धा परिकीर्तिता ॥

वेमभूपालः

प्रवृत्तिभेदविचारः

न तु देशास्तु बहवो दृश्यन्ते धरणीतले ।
चतुर्विधत्वमेतेषां कथङ्कारं प्रतीयते ॥
अत्रोच्यते बहुविधा देशाः सन्तु तथापि यत् ।
लोकानुकरणं नाट्यं चतुर्वृत्तिसमाश्रयम् ।
अतस्तद्विषयत्वेन चतस्रः स्युः प्रवृत्तयः ॥

वेमभूपालः

प्रवेशः—कलामानम्

अथ चाकुञ्चनं ज्ञेयं प्रवेशाख्यमधस्तलम् ।

दत्तिलः

प्रवेशकः

असूचितस्य पात्रस्य प्रवेशो नैव दृश्यते ।
ततः प्रधानपात्राणां सूचकः स्यात्प्रवेशकः ॥

शुभङ्करः

प्रसन्नः

शृङ्गाराद्भुतहास्येषु प्रसन्नो निर्मलो मतः ।

कुम्भः

प्रसन्नमध्यः

प्रसन्नमध्यो मध्ये तु प्रसन्नः स्यादुदाहृतः ।

नाट्यशास्त्रे

प्रसन्नान्तः

व्यस्तोच्चारित एवैष प्रसन्नान्तो विधीयते ।

नाट्यशास्त्रे

प्रसन्नाद्यन्तः

प्रसन्नं पूर्वमुच्चार्य शनैः सन्दीपयेत्स्वरम् ।
प्रसन्नादीर्भवेदेवं प्रसन्नान्तो विलोमतः ।
एवं प्रसन्नमध्यश्च प्रसन्नाद्यन्त एव च ॥

दत्तिलः

प्रसन्नादिः

क्रमेणोद्दीपितो यः स्यात्प्रसन्नादिः स कथ्यते ।

नाट्यशास्त्रे

प्रसन्नाद्यन्तः

आद्यन्तयोः प्रसमनात्प्रसन्नाद्यन्त इष्यते ।

नाट्यशास्त्रे

प्रसादः

प्रसन्नान्तः स्वरो यत्र प्रसादः स तु संज्ञितः ।

नाट्यशास्त्रे

प्रसारितम्—हस्तप्राणः

प्रसारितमिति ख्यातमङ्गुलीनां प्रसारणात् ।

भरतकल्पलता

प्रसारी

ग्रीवां तु भ्रामयन् यस्तु प्रसारी कथ्यते बुधैः ।

भरतकल्पलता

प्रसृतः

दीर्घः सशब्दनिष्क्रान्तो घ्राणतः प्रसृतो मरुत् ।
... ... प्रसृतः प्रसरान्वितः ॥

कुम्भः

प्रस्तावना

प्रकृतं यद्भवेत्कार्यं तस्य सिद्धत्वसूचकम् ।
सिध्युपायसमायुक्तं कवेर्नामानुकीर्तनम् ।
वाक्यं प्रयुज्यते यत्र सा स्यात्प्रस्तावनोदिता ॥

विप्रदासः

प्रस्थानलक्षणम्

कैशिकीवृत्तिबहुलं बहुताललयान्वितम् ।
दासादिनायकं त्र्यङ्कं दासीनायिकमेव च ॥
सीधुपानादिसंयुक्तं तथा हीनोपनायकम् ।
विटशृङ्गारसंयुक्तं प्रस्थानमिति कीर्तितम् ॥

शुभङ्करः

प्रहसनम्—रूपकम्

शृङ्गारहास्यबहुलं शान्त्यद्भुतरसान्वितम् ।
व्यक्तमारभटीहीनं प्राह प्रहसनं मुनिः ॥
प्रहस्यते अनेनेति भवेत्प्रहसनं त्विदम् ।
शुद्धं च विकृतं चैव संकीर्णमिति तद्त्रिधा ॥

शुभङ्करः

प्रहारः—पाटः

प्रहारपाटनिष्पत्तिस्तलाङ्गुष्ठामिघा ततः ।

यथा —

डें द्रां धोंदिगि त्रिगिदा – क्टिधों धो ॥

कुम्भः

प्राकृतजातयः

दाक्षिणात्या महाराष्ट्री बाह्लीकी चार्धमागधी ।
आवन्तिका तथा प्राच्या षोढा प्राकृतजातयः ॥

शुभङ्करः

प्राकृतनृत्तलक्षणम्

इदानीं प्राकृतं नृत्तं यथालक्षणमुच्यते ।
भवेद्भावाश्रयं नृत्तं पदार्थाभिनयात्मकम् ॥
गात्रविक्षेपणार्थत्वान्नृत्तं बहुलमाङ्गिकम् ।
विविधेन विलासेन क्षेपो विक्षेप उच्यते ॥

नृत्तरत्नावली

प्राकृतपाठ्यभेदाः

अथ च प्राकृतं पाठ्यं त्रिविधं परिकीर्तितम् ।
तद्भवं तत्समं देश्यमिति तल्लक्षणं पुनः ।
त्रैविक्रमादिशास्त्रेषु बोद्धव्यं बुद्धिशालिभिः ॥ वेमभूपालः

प्राकृते गुरोः लघोश्च विधानम्

उं इं एहिं पदान्ते च लघुत्वं प्राकृते गुरोः ।
पदमध्येऽथापभ्रंशो हुंहे उं ए सदा लघुः ॥

मोक्षदेवः

प्राणसंभवे रत्यादिविकाराः

अथ चेद्व्यतिरेकस्ते तेभ्यस्तेषामिमे यथा ।
रत्यादयश्चित्तवृत्तिर्निर्वेदात्पूर्वमेव तु ॥
निर्वेदनं प्रकुर्वन्ति ततः प्राणमथान्तरम् ।
तन्मांसविश्वरूपाभ्यां सत्वं कलुषयन्त्यतः ? ॥
अन्तःकरणसत्यस्य वायुराश्रयतां गतः ।
क्रोधाद्या अपि दृश्यन्ते विकाराः प्राणसम्भवाः ॥
प्राणसूत्रपरिप्रोते संविदभ्यासचित्रिते ।
विकारो जायते देहे तत्र चित्प्रत्ययेन च ॥
इत्यादिरप्रसरणस्य विभावः प्राणभूमिकाम् ।
अनुदिष्ठाय सहसास्तमेति स यदा पुनः ।
परामर्शालक्षणायामवधानधुरं भवेत् ॥

कुम्भः

प्रातरमृताशनम्

या सूचनाय रसभावविशेषवृत्तेः
प्रस्तावनेन पुटतो वितता विभाति ।
तौर्यत्रयामृतनिधानपिधानकल्पा
सा सर्वदा जवनिकास्तु मुदे नृपाणम् ॥

हम्मीरः

प्रावृट्कालाभिनयः

शिखण्डिभिस्ताण्डवितै. शाद्वलैः सेन्द्रगोपकैः ।
गर्जितैरपि मेघानां धारानिष्पतनैरपि ।
मुकुलैरपि नीपानां प्रावृषं संप्रदर्शयेत् ॥

वेमभूपालः

प्रावृतम्

उद्वृत्य चरणौ मूर्तिर्ललिता वलिता भवेत् ।
यत्र तत्प्रावृतं ज्ञेयं कामकेलिनिबन्धनम् ॥

कुम्भः

प्रावेशिकी

नानार्थरसार्थयुक्ता नृणां या गीयते प्रवेशेषु ।
प्रावेशिकी तु नाम्ना विज्ञेया सा ध्रुवा तज्ज्ञैः ॥

नाट्यशास्त्रे

—विनियोगः

गाने च रोदने चैव सम्भ्रमप्रेक्षणे तथा ।
उत्पाते विस्मये कार्या सैव प्रावेशिकी ध्रुवा ॥

वेमभूपालः

प्रेङ्खोलितः

गतागतप्रवृत्तो यः स प्रेङ्खोलित इष्यते ।

नाट्यशास्त्रे

फूत्कृतिगुणाः

नैबभ्र्यपीताचापि सुस्वरत्वं च शीघ्रता ? ।
माधुर्यमपि पञ्चामी फूत्कृतेस्तु गुणा मताः ॥

सङ्गीतनारायणे

प्रेरणा —ताण्डवम्

अङ्गबाहुल्यविक्षेपं तथाभिनयशून्यता ।
यत्र सा प्रेरणा प्रोक्ता महादेशीति लोकतः ।
प्रेरणा बहुरूपं च तदेवं ताण्डवं द्विधा ॥

सङ्गीतनारायणे

प्रेरितः—हस्तप्राणः

पश्चाद्भागे कुञ्चितो वा रेचितो वा प्रसारितः ।
यो हस्तः कथितस्सोयं प्रेरितः पूर्वसूरिभिः ।

भरतकल्पलता

प्रेरिता

तियुगूर्ध्वमधस्ताच्च वादकप्रेरितैः स्वरैः ।
प्रेरिता नाम विज्ञेया स्यायश्रुतिविशारदैः ॥

कुम्भः

प्रोषितप्रिया—नायिका

चिन्ताकुलां मलिनमंशुकमावहन्तीं
हिण्डीरपिण्डपरिपाण्डुरगण्डभित्तिम् ।
निर्भूषणां प्रियवियोमजदुःखतप्तां
तां प्रोषितप्रियतमां प्रवदन्ति सन्तः ॥

शुभङ्करः

प्लवकलासः

त्रिपताकं करं कृत्वोत्प्लुत्योत्प्लुत्य समे पदे ।
सर्वतो दधती चित्रं विषमासनमास्थिता ।
यत्र नृत्यति स प्रोक्तः कलासः प्लवसंज्ञकः ॥ कुम्भः

बकस्य तृतीयः

विधाय मुकुलं हस्तं क्षिप्रमग्रे शनैरनु ।
गच्छन्ननुपदं तद्वन्नटी स्खलति खिद्यति ॥
धृतमुक्ते यथा मीने बकेशानुपदं क्रमात् ।
तलपद्ममरालं च मुकुलं यत्र कुर्वती ।
नृत्ते चित्रमसौ भेदो बकस्य स्यात्तृतीयकः ॥

अशोकः

बककलासतुरीयकम्

उत्तानवञ्चितौ पाणी विदध्यादपि च चन्द्रकम् ।
कट्यां करं निवेश्याथ पादाग्राभ्यां नटी यदा ॥
रचयन्ती गता नाना यचत्पुरतोनु च ।
पादाङ्गुष्ठकरस्पर्शान्नृत्येद्वक्राकृतिस्तदा ।
तुर्यो भेदो बकाद्यस्य कलासस्सबुधैर्मतः ॥

अशोकः

बककलासकः

पार्श्वे विधुन्वती यत्र बकवत्सजलौ हृदौ ।
कुर्वती हस्तकांश्चैव सन्दंशान् मुकुलादिकान् ॥
आननं च ततोत्थानं गुरुमानेन तन्वती ।
नरीनर्ति नटी यत्रानल्परूपविशेषवत् ।
कलासो बकसंज्ञोऽयं विज्ञेयो नृत्यकोविदैः ॥

कुम्भः

बकी

यो बकी तुम्बिकाकारफुल्लगल्लस्तु गायकः ।

भरतकल्पलता

बङ्गालः

गत्रयेण मनोज्ञोऽसौ बङ्गालो रिविवर्जितः ।
पूर्णो मत्रययुक्तो वा कल्लिनाथमतं त्विदम् ॥

कुम्भः

बन्धकरणम्

स्वरैर्मुरजपाटैश्च यत्रोद्ग्राहध्रुवौ कृतौ ।
तद्बन्धकरणं प्राह भीमदेवतनूरुहः ॥

मोक्षदेवः

बन्धनापर्याया

मालिकामोहनादीनि प्रसिद्धा लक्ष्यदृष्टितः ।
अर्थौ तुडुकपर्यायौ नृत्तज्ञैः कथितौ यतः ॥
आलापे यत्र नृत्येतद्धरूणां यत्र नर्तनम् ।
स्वरपट्टिसमायुक्तं सुरूपं पदमेव च ॥
क्रमेण व्युत्क्रमेणाथ नर्तनं परिकीर्तितम् ।
बन्धनापरपर्यायाः कथिता नृत्तवेदिभिः ॥
तत्तत्कारादिभिः पाटैरेकताल्यादिभिर्युतम् ।
धात्वादिरहितं गीतमालापः परिकीर्तितः ॥

बन्धनीयम् (भूषा)

बन्धनीयं तदाख्यातं काञ्चीदामादिभूषणम् ।

वेमभूपालः

बन्धरूपकम्

यत्र पात्रे उभे नृत्ये नृत्येते करणैस्तदा ।
यदा मिथो भुजौ हस्तौ पादावपि तथा तयोः ॥
रमणीयाकृतिर्यद्वा त्रीणि चत्वारि वा तथा ।
यद्वा सुन्दररूपाणि पञ्चाङ्गानि च सप्त च ॥
पात्राणि यत्र नृत्यन्ते तन्नृत्यं बन्धरूपकम् ।
बन्धनृत्ये विलासिन्याः प्राधान्यं तु विशेषतः ॥

बहिः प्राणाः — (पात्रस्य)

मृदङ्गश्चानुतालश्च वेणुगीती ततः श्रुतिः ।
एकवीणा किङ्किणी च गायकश्च सुविश्रुतः ॥
इत्येवमान्वयज्ञेयैः पात्रप्राणा बहिः स्मृताः ॥

भरतकल्पलता

बहुत्वलक्ष्यम्

संस्पर्शनं स्वराणां यद्बहुत्वं प्रथमं मतम् ।
तदेव लङ्घनमिति प्रवदन्ति पुरातनाः ॥
पुनः पुनः स्वरावृत्तिर्बहुत्वं स्याद्द्वितीयकम् ।
इदमभ्यासनाम्ना च वदन्ति भरतादयः ॥
आद्यं बहुत्वं वादि स्यात्संवादि स्याद्द्वितीयकम् ।
वादिसंवादिनोरंशे बहुत्वं कार्यमेव तत् ॥

संगीतसूर्योदये

बहुरूपं — ताण्डवम्

छेदनं भेदनं यत्र बहुरूपी मुखावली ।
ताण्डवं बहुरूपं च वारुणिर्नाममुद्धृतम् ॥

सङ्गीतनारायणे

बाह्यस्वरलक्षणम्

असंबद्धस्वरं बाह्यं दोषाणां च उपक्रमः ।

भरतकल्पलता

बिन्दुः

क्वचित्स्वरेचितं स्थित्वा स्पृष्ट्वा तारं ततोऽग्निवत् ।
प्रत्यागच्छेत्तु तत्रैव बिन्दुरेषोऽभिधीयते ॥

दत्तिलः

—पाटः

वामेन पाणिना यस्मिन्नवष्टभ्य पुटं पुनः ।
तर्जनी कुरुते घातं तं पाटं बिन्दुमूचिरे ॥
दें दें गिदें गि (दें) गिरिगिदगिरिगिद ।

—हौडुक्किकपाटः

वामेन पाणिना यस्मिन्नवष्टभ्य पुटं पुनः ।
तर्जनी कुरुते घातं तं पाटं बिन्दुमूचिरे ॥ कुम्भः

बिन्दुनृत्तम्

यत्रोद्ग्राहध्रुवपदे बद्धे द्राविडभाषया ।
तद्गीतं बिन्दुसंज्ञं स्यादाभोगेन विवर्जितम् ॥

कुम्भः

बिब्बोकः

दयितावलोकने तदिष्टाष्टार्थाधिगतोऽपि च ।
अनादरकृतो गर्वात् बिब्बोक इति कथ्यते ॥

वेमभूपालः

बिरुदः

गाने त्रीणि पदानि स्युरन्ते तु बिरुदं स्वरः ।

भरतकल्पलता

बीभत्सरसः

मेदोमांसवसामलान्त्ररुधिरक्षोदश्मशानादिभिः
पूतीपायघृणात्मकैरधिगतो जाते जुगुप्साश्रितः ।
स्त्रीबालाधमभूमिकाश्रयमयोऽपस्मारशङ्काश्रयो
बीभत्सोऽयमुदाहृतो रस इह प्रख्यातनानागुणैः ॥

जगद्धरः

स्थायिभावस्वरूपायाश्चित्तवृत्तिर्घृणाकरा ।
जुगुप्सा नाम सा तज्ज्ञैः बीभत्सो रस उच्यते ॥

हम्मीरः

बृन्दम्

प्रवेशे रथरङ्गोर्वी सांप्रदायकबृन्दकम् ।
गातृवादकसंघातं बृन्दमित्यभिधीयते ॥

भरतकल्पलता

बृन्दकः—गायकः

बहुना सह गीतं तु करोति स च बृन्दकः ।

भरतकल्पलता

ततो हि वाद्ययुक्तेन कर्तव्यं नृत्तकोविदैः ।
चत्वारो मुख्यगातारो द्विगुणास्समगायनाः ॥
असौ च गायिनी प्रोक्ता तालधारिचतुष्टयम् ।
मार्दङ्गिकास्तु चत्वारो वांशिकानां चतुष्टयम् ॥
एषां चोत्तमबृन्दस्य कर्तव्यं च प्रयत्नतः ।
मध्यमं स्यात्तदर्धेन तदर्धेन लघु स्मृतम् ॥

बृन्दव्यवस्था

बृन्दं विद्यावतां प्रोक्तमुत्तमोत्तममुत्तमम् ।
मध्यमञ्चावराख्यं च कनिष्ठं चेति पञ्चधा ॥
मुख्या द्वादश गातारो द्वादशैव च गायिकाः ।
चितालिका भवन्त्यष्टौ षट् तथा वंशवादकाः ॥
ओताकाराः पुनः पञ्च त्रयः पाटहिका मताः ।
मृदङ्गवादिनो षट् च बृन्दं स्यादुत्तमोत्तमम् ॥
गातारः पञ्चमुख्याः स्युः सामगायनपञ्चकम् ।
गायनी षट् समाख्याता पञ्च स्युर्वंशवादकाः ॥
द्वावोतकारौ चत्वारः प्रोक्ताः पटहवादिनः ।
मार्दङ्गिकाश्च तावन्तो बृन्दं स्यादभिरुत्तमम् ॥
एकस्याद्गायनो मुख्यो त्रयः स्युः पक्षगायनाः ।
तिस्रो भवन्ति गायन्यो वदालश्च चितालिका ॥
यत्र स्यादोतकाराणां वांशिकानां पुनस्त्रयम् ।
भवेत्पाटहिकद्वन्द्वं मार्दङ्गिकचतुष्टयम् ॥
मध्यमं बृन्दमुद्दिष्टं तदेतद्बृन्दवेदिभिः ।
मुख्य एको भवेद्गाता द्वौ पुनः पक्षगायनौ ॥
गायिन्यौ द्वे वांशिकौ द्वावोतकारद्वयं तथा ।
एकः पाटहिको यत्र तथा मार्दङ्गिकद्वयम् ॥
अवरं नाम तद्बृन्दं वृद्धबृन्दारकैर्मतम् ।
मुख्यो गाता समंगाता गायनी वांशिकस्तथा ॥

ओताकारः पाटहिको भवेन्मार्दङ्गिकद्वयम् ।
गीतवेदिभिरुद्दिष्टं वृन्दमेभिः कनिष्ठकम् ॥
सोमराजदेवः

बृहस्पतिः—नवग्रहहस्तः

लांगूलतर्जनी वक्रा श्लिष्टा लांगूल इष्यते ।
बृहस्पतेरर्थभावे कथ्यते नाट्यकोविदैः ॥
शृंगारशेखरः

बोलावणी—पाटः

आदौ मध्येऽवसाने च प्राचुर्यं यत्र देङ्कृतेः ।
आद्ये खण्डे द्वितीये च तादृगेव यथा भवेत् ।
तत्र बोलावणी प्रोक्ता वाद्यविद्याविशारदैः ॥
दें दें दें धों धों दें दें दें ।
वाद्यान्तरेऽपि वाद्यं स्यादस्याः खण्डद्वयं यदा ।
तत्तद्वाद्यप्रधानार्थे पार्थक्येन प्रयोजितौ ॥
दें कृतिं दें कृतिस्थाने सचतुष्कायां च मर्दले ।
थों कृति तों त्रिवल्यां तु कृति तथा ... ... ॥
टें कृतिः करटायां स्यात्प्रधानाक्षरयोजना ।
एवमेव बुधैर्ज्ञेयाः पाटवाद्यान्तरेष्वपि ॥
कुम्भः

ब्रह्मग्रन्थिः

प्रणवो नादरूपः स्यात्तत्र ब्रह्मादयः सुराः ।
नाभिस्थानगतः साक्षाद् ब्रह्मग्रन्थिरिति स्मृतः ॥
कुम्भः

ब्राह्मणवर्णहस्तः

कराभ्यां शिखरं धृत्वा यज्ञसूत्रप्रदर्शने ।
दक्षिणेन कृते तिर्यग्ब्राह्मणानां प्रदर्शितः ॥
भरतकल्पलता

ब्राह्मम्

समस्थांघ्रिः परः पादः कुञ्चितीकृत्य पृष्ठतः ।
जानुसन्धिसमत्वेनोक्षिप्तं तद्ब्राह्ममुच्यते ॥
कुम्भः

भ

भगिनीहस्तः

दक्षिणे हंसपक्षं च वामे लाङ्गूलकं तथा ।
स्वसारं प्रतियुञ्ज्यैतेत्याज्ञनेयेन चोदितम् ॥
भरतकल्पलता

भजनम्

आरोप्यते प्रयत्नेन रागे योऽतिशयो बुधैः ।
तदुक्तं भजनं तेन युक्ताः स्युर्भजनस्य ते ॥
कुम्भः

भञ्जनलक्षणम्

रागस्यातिशयाधानं प्रयत्नाद्भञ्जनं मतम् ।
हम्मीरः

भञ्जावणलक्षणम्

श्रुतिभिर्भज्यते यत्र द्वित्रिभेदैः स्वरो मतः ।
अच्छिन्नोरङ्गभिस्सान्द्री बुधैर्भञ्जावणो मतः ॥
मोक्षदेवः

भट्टनायकमतम्

न व्यंग्यश्च न तत्पाद्यो न प्रत्याय्योऽपि युज्यते ।
स्वाद्येव भाव्यमानेन व्यापाराद्भावकत्वतः ।
सत्त्वोद्रिक्तप्रकाशेनानन्दप्राचुर्यसंविदः ॥
विश्रान्तिस्थानमातत्य भोगभोग्यो रसोऽथवा ।
इति नायकभट्टानां मतमेतदुदीरितम् ॥
कुम्भः

भट्टलोल्लटमतम्

शिक्षाभ्यासाच्चिरतरमङ्गाद्यैर्नाट्यकर्मणि ।
वासनाभिनयैस्तद्भट्टलोल्लटसम्मतम् ॥
कुम्भः

भद्रावतीलक्षणम्

ककुभस्तदुपाङ्गं वा तालः कङ्कालसंज्ञकः ।
वैदर्भी भारती चापि जुगुप्साभाव उच्यते ॥
वर्णः कृष्णोऽथ बीभत्सो रसोऽधिष्ठातृदैवतम् ।
वाराही शूद्रजातिश्च गणौ क्षितिजलाभिधौ ॥
सप्रासमङ्घ्रित्रितयं भवेद्भद्रावती तनौ ।
पञ्चकं रत्नगर्भाया एकः पाथोगणो मतः ॥
ऽ ऽ ऽ । ऽ ऽ । ऽ ऽ । ऽ ऽ ऽ । ऽ ऽ ऽ । ऽ ऽ ।
सोमराजदेवः

भद्रावत्याः—कामगणाः

प्रत्येकं पादयोरस्या अष्टौ कामास्तृतीयके ।
आदिमध्यान्तगाः प्रासाः त्रिषु पादेषु सङ्गताः ।
भद्रावती भद्रलेखा कर्णाटैरियमिष्यते ॥
मोक्षदेवः

भरतशब्दनिर्वचनम्

भकारो भावनैर्युक्तोरेफो रागेण मिश्रितः ।
तकारस्तालमित्याहुर्भरतार्थविचक्षणैः ॥

शृङ्गारशेखरः

भाणः —रूपकम्

एकाङ्कस्तु भवेद्भाण एकनायकमायिकः (?) ।
कैशिकीवृत्तिसंपूर्णो भूमिपूर्वप्रयोजितः (?) ॥
आकाशभाषितैरत्र कुर्यात्संबोधनं बहु ।
सूचयेद्वीरशृङ्गारौ शौर्यसौभाग्यसम्भवौ ॥
नाट्यालङ्कारसंपन्नो भूयसी तावतीरिह ।
भण्यन्तेऽस्मिन् गुणादेशा इति भाण इहोदितः ॥

यद्वा—

धूर्तानां दुश्चरित्रापरिचितमथवा स्वानुभूतं समृद्धा
वीरः शृङ्गारमङ्गी द्विजसचिवविटा यत्र सङ्कीर्तयन्ते ।
उक्तिप्रत्युक्तियोग्यो भवति च वचसावस्थितैरत्र शास्त्रैः
सन्ध्यङ्गो वीथिकायाः पुनरिहकथितो भारतीवृत्तिभाणः॥

शुभङ्करः

भाण्डग्रहाः

अथ ध्रुवाणां वक्ष्यामि ग्रहान् भाण्डसमाश्रयान् ।
गातस्य वीरवर्तैः स्यादेको भाण्डविवर्जितः ॥
चतुर्थे सन्निपातेऽस्य तज्ज्ञैर्भाण्डग्रहः स्मृतः ।
सन्निपातग्रहः कश्चित्कश्चित्स्यात्तर्जनीग्रहः ॥
अथाकाशग्रहः कश्चित् ध्रुवा गाने ... ... ।
ध्रुवायां तु प्रयोगः स्यात् कलाताललयान्विता ॥
भाण्डेन स तु कर्तव्यस्तज्ज्ञैर्गतिपरिक्रमे ।
उद्धतायाश्च शीर्षकयास्तर्जन्यास्तु ग्रहः स्मृतः ॥
विलम्बिताख्यास्थितयोर्ध्रुवयोः सन्निपातयोः ।
कृतिर्यत्तु विधातव्या सम्यग्भाण्डग्रहा बुधैः ॥
प्रासादिक्या अड्डितायाः नर्कुटस्य तथैव हि ।
स्यादाकाशग्रहस्तत्र सन्निपातः प्रकीर्तितः ॥
ग्रहो गानसमः कार्यो नैष्कामिक्यनुबन्धयोः ।
सन्निपातश्च शम्या च तालश्चाकाशजस्तथा ।
इति नर्कुटके यद्वा ग्रहाश्चत्वार ईरिताः ॥

वेमभूपालः

भारतन्यायस्य लक्षणम्

फलकं वामहस्तेन खड्गं दक्षिणपाणिना ।
गृहीत्वाप्रसृतौ कृत्वा करावप्यन्यकौ ततः ॥
फलकभ्रमणं कृत्वा पार्श्वयोरुभयोरथ ।
परितः शिरसः शस्त्रं भ्रमयित्वाथ खड्गिगनम् ।
करं शिरः कपोलान्तरुद्वेष्टय मणिबन्धतः ॥
फलकस्याप्युपशिरः परिभ्रमणमाचरेत् ।
विधिरेष सकृत्कक्ष्यां शस्त्रपातश्च भारतः ॥

विप्रदासः

भारती

भारत्यां वाचिकाः सर्वे वर्तन्तेऽभिनया इह ।
तिसृष्वन्यासु वर्तन्तेऽभिनया आङ्गिकाः पुनः ॥

कुम्भः

— वृत्तिः

भारत्यन्तर्हिता यत्र सा वृत्तिर्भारती स्मृता ।

विप्रदासः

भार्गवांकः —तालः

पताभ्यां भार्गवांकः स्यात् । ऽ ऽ ऽ ।

कुम्भः

भावदृष्टिलक्षणम्

शून्या स्तम्भेव चिन्तायां लज्जिता च तथा भवेत् ।
मलिना खेदवैवर्ण्ये श्रान्ता खेदे समेऽपि च ॥
ग्लानापस्माररोगादौ शङ्कायां शङ्किता भवेत् ।
विषादिनी विषादे स्यात्स्मृता तर्के च तर्किता ॥
मुकुला च मुखस्वप्ननिद्रादौ दृष्टिरिष्यते ।
स्यादर्धमुकुलादर्धगन्धस्पर्शसुखादिषु ॥
अभिप्लुता तु निर्वेदे अभिघातनिपातयोः ।
जिह्मात्वानस्य जाड्यादौ ललिता धृतिहर्षयोः ॥
कुञ्चिता सूचितानिष्टदुःखं प्रेक्ष्य यथादिषु ।
विभ्रान्ता सम्भ्रमावेगविभ्रमेषु प्रशस्यते ॥
करुणोन्माददुःखार्तिचपलादिषु विप्लुता ।
आकेकरा दुरालोके विच्छेदे च प्रवक्ष्यते ॥
त्रस्ता त्रासे भवेद्दृष्टिर्मदिरा तु मदे मता ।
विवेकगर्वमत्युग्रमतिषु स्याच्चिकीर्षिता ॥

सोमराजदेवः

भावलक्षणम्

वागङ्गसत्त्वाभिनयमुखरागोपशोभितैः ।
भावयन्नान्तरं भावं व्यापारो भाव उच्यते ॥

वेमभूपालः

रसा भावयन्तीति भावा भावयन्तीति वा स्मृताः ।
स्थायिनस्तु भवन्तीति भावयन्तीति चेतरे ।
लोके ये हेतवस्तेषां सीताचन्द्रोदयादयः ॥

विप्रदासः

—भाववक्तारश्च

रसान् भावयन्तीति भावाः ।
विरञ्चिर्नारदो रम्भाहुहुर्भरततुम्बुरू ।
षडेते नाट्यभावानां वक्तारो लोकविश्रुताः ॥

शुभङ्करः

भावजलक्षणम्—अभिनयः

एतदेव विना हस्तपादभेदक्रमं दृशा ।
संसूचता शिरोभेदैर्भावजाभिनयो मतः ॥

शृङ्गारशेखरः

भावशब्दः

अन्तर्गतं भावं बहिर्भावयन तद्रूपतामानयन् इति अन्तर्भावशब्दो अभिप्रायवाची भावयन्निति भाव शब्दस्तथावाची।

भावाः

सूलोथानामवलितं चर्णिका नाटकं तथा ।
एवं चतुर्विधा भावा उच्यन्ते पूर्वसूरिभिः ॥

भरतकल्पलता

यथामूलं रसाः सर्वे ततो भावा व्यवस्थिताः ।
आस्वाद्यत्वाद्रसे सिद्धे भावादिष्वर्पितं भवेत् ॥

कुम्भः

भावानामुपलक्षणता

अस्रादयो बाह्यधूमशीतादिकनिमित्तकाः ।
व्यजनग्रहणाद्येनाभिनयेनोपलक्षिताः ।
असात्त्विकेऽपि तन्मध्ये गणिता भवभूतिना ॥

कुम्भः

भावानां रसनिर्वृतिः

कुम्भकर्णः समाधत्ते भावेभ्यो रसनिर्वृतिः ।
दृश्यते च रसेभ्योऽपि रसानामुद्भवो यथा ॥
शृङ्गारप्रभवो हास्यः करुणो रौद्रसंभवः ।
अद्भुतो जायते वीराद्बीभत्साच्च भयानकः ॥
शृङ्गारानुकृतिर्या तां स तु हास्यरसो मतः ।
करुणः कथ्यते सद्भिः कर्म रौद्ररसस्य यत् ॥
कर्म यच्चापि वीरस्य सोऽद्भुतः सद्भिरुच्यते ।
भयानको भवेत्सोऽत्र यद्बीभत्सस्य दर्शनम् ।
एवं रसास्तु चत्वारः कस्यचित् संमता मताः ॥

कुम्भः

भाविकम्

कान्ते स्वप्नोपलब्धेऽपि यत्र कामवशी गता ।
विभावान्विविधान् यत्र कुर्याद्धि भाविकं हि तत् ॥
अद्याकर्णय नैशिकं सखि मया कान्तश्चिरं प्रोषितः
नेत्रा मुद्रितनेत्रयापि गमने साक्षादिवालक्षितः ।
सा या सङ्गमभङ्गभीरुतरयेवोन्मज्यलज्जाजलात्
कण्ठग्राहमनिन्दितः परिवृतः प्रोल्लासितो मोदितः ॥

कुम्भः

भावुकः

नीरसं सरसं कुर्यान्निर्भावं भावसंयुतम् ।
ज्ञात्वा श्रोतुरभिप्रायं यो गायेत्स तु भावुकः ॥

कुम्भः

भिन्नध्रुवायोगः

चतुरस्रे तथा त्र्यस्रे चित्रवार्तिकदक्षिणैः ।
मार्गैर्भिन्नध्रुवायोगात्षड्विधं केचिदूचिरे ॥

विप्रदासः

भिन्नशब्दार्थः

भवन्ति भिन्नाः पञ्चापि भिन्नषड्ज इहादिमः ।
भिन्नकैशिकसंज्ञश्च भिन्नकैशिकमध्यमः ॥
भिन्ननाम इति ख्यातः भवान्या भिन्नपञ्चमः ॥

सोमराजदेवः

भिन्नषड्जः

धैवतांशो मध्यमान्तः पञ्चमार्षभवर्जितः ।
षड्जवर्ज्योदीच्यवती भिन्नषड्जः स्मृतो बुधैः ॥

मतङ्गः

भीतकः—गायकः

भयेन सह गानं तु यः करोति स भीतकः ।

भरतकल्पलता

भीमः

विलासादिर्गिरा नृत्तकरणं तदुदाहृतम् ।
भीमसेनाभिधा यद्वद्भीम इत्येकदेशतः ॥

नृत्तरत्नावली

भूपाली

भूपाली सत्वयेनाढ्या मनोदितोषसि (?)।
रिपहीना मते केषां रसे शान्ते प्रयुज्यते ॥

कुम्भः

भूपालीरागः

षड्जग्रहांशकन्यासा भूपाली कथिता बुधैः।
मूर्छना प्रथमा यत्र सम्पूर्णा शान्तिके रसे ॥
कैश्चित्तु रिपहीनेयं औडुवा परिकीर्तिता।
गौरद्युतिः कुङ्कुमलिप्तदेहा तुङ्गस्तनी चन्द्रमुखी मनोज्ञा।
प्रियं स्मरन्ती विरहेण नूनं भूपालिकेयं रसकान्तियुक्ता।
सरिगमपधनिस — सगमधनिस ॥

संगीतदर्पणः

भूमिकाविभागः

अथ नाट्ये भूमिकानां विभागः क्रियतेऽधुना।
सत्त्वभावसुशीलैश्च गतिवागङ्गचेष्टितैः ॥
सम्यक् परीक्ष्य योक्तव्यं भूमिकानां निवेशनम्।
राक्षसानां देवतानां तथैव च तपस्विनाम् ॥
राजन्यानाममात्यानां कञ्चुकिप्रभृतेरपि।
नायकानां सभानां च वैश्यादीनां यथोचितैः ॥
रूपलीलावयोवेषवर्णवाग्गतिचेष्टितैः।
तत्तद्देशानुसारेण भूमिकाः संप्रयोजयेत् ॥
बहुबाहुमुखा ये च गजाद्याश्च भवन्ति ये।
आचार्यबुध्या ते कार्या मृदा काष्ठेन चर्मभिः ॥
अनुरूपा विरूपा च तथा रूपानुसारिणी।
इति स्वभावगुणिता भूमिका प्रकृतिस्त्रिधा ॥
यत्र स्त्री स्त्रीगते भावे पुरुषोऽपि च पौरुषे।
अनुकार्योचितवयःस्वभावकरणाश्रयाः ॥
नानावस्थाक्रिया नाट्यं समुद्योतयतेतराम्।
सा भूमिका तु नाट्यज्ञैरनुरूपेति कथ्यते ॥
बालस्य भूमिकां वृद्धो बालो वृद्धस्य भूमिकाम्।
संप्राप्य तत्तदुचितैर्भावैर्नाट्यं करोति चेत् ॥
सा भूमिका विरूपेति कथिता नाट्यवेदिभिः।
स्त्रीभूमिकां तु पुरुषः स्त्री वा पुरुषभूमिकाम् ॥
प्राप्य स्वच्छन्दतो नाट्यप्रयोगं वितनोति चेत्।
रूपानुसारिणीनामा भूमिका सा प्रकीर्तिता ॥

वेमभूपालः

भूमिचारीलक्षणम्

गुल्फक्षेत्रेऽन्यपादस्योद्वृत्योद्वृत्याङ्घ्रिं कुञ्चितम्।
किञ्चित्प्रसार्य चोत्क्षिप्य यथा प्रकृतिलोकवत् ॥
चतुस्तालाद्यन्तरेण ततोऽग्रेण निपातयेत्।
यत्र चारीमतिक्रान्तां हम्मीरस्तामकीर्तयत् ॥

हम्मीरः

भूमिपल्लवा

ताले ताले कुञ्चिता स्यात्तथैवाङ्कस्थिता सती।
कुञ्चिता या धृतस्पर्शा विज्ञेया भूमिपल्लवा ॥

कुम्भः

भूषणानि

यद्यद्रसोचितविभावादीनां प्रतिपादकाः।
दृश्यन्तेऽवयवाः शब्दास्तेऽपि यद्यदलङ्कृताः ॥
विज्ञेयास्तत्तदाहार्या लोकशास्त्रनिवेशिताः।
तत्तद्रसोचितविभावादीनां प्रतिपादकाः ॥

विप्रदासः

भूषालक्षणम्—तद्भेदाश्च

यथा तु भूष्यते गात्रं सा भूषेत्यभिधीयते।
एषा पुनश्चतुर्धा स्यादावेध्यं बन्धनीयकम्।
ततः प्रक्षेप्यमारोप्यमित्येषां रूपमुच्यते ॥

वेमभूपालः

भूषास्वरूपम्—आहार्याभिनयः

येनालं क्रियते देहं सोऽलंकारः प्रकीर्तितः।
स चाभरणमाल्यात्मा चतुराभरणं बुधैः ॥
आवेध्यबन्धनीयाख्यप्रक्षेप्यारोप्यभेदतः।
कर्णभूषणमावेध्यं कुण्डलादिभराकृतम् ॥
बन्धनीयं तु विज्ञेयं श्रोणीसूत्राङ्गदादिकम्।
रुचिकप्रमुखं क्षेप्यं हाराद्यारोप्यमिष्यते ॥

नृत्तरत्नावलिः

भृङ्गः—मण्ठकः

गुरुर्लघुद्वयं यत्र भृङ्गतालः स कथ्यते।
मङ्गलो मण्ठको ज्ञेयो रसे वाद्भुतसंज्ञके ॥

गान्धर्ववेदे

भृतच्छाया

भरणं रागरन्ध्राणां ये स्थायाः स्युर्भृतस्य ते।

कुम्भः

भूताः

ते च घनत्वांविज्ञेया येत्रान्तःसारसंभृताः ।

कुम्भः

भेदः—वाद्यम्

लयस्त्रैधाखिधा भेदः पाटैः स्यात्सर्ववाद्यजैः ।
कश्चिदन्याङ्गजः पाटः कश्चित्स्यात्तदुपाङ्गजः ।
कश्चिद्योगेन निष्पन्नस्तैर्मिश्रैः पादपूरणैः ॥

कुम्भः

भेरी

सार्धहस्तमितायामा वदने हस्तसंमिता ।
ताम्रेण निर्मिता कार्या वक्त्रयोर्वलये पुनः ॥

चर्मनद्धे छिद्रयुक्ते रज्ज्वा गाढं नियन्त्रिते ।
मध्ये बद्धा सूत्रबन्धैर्दक्षिणे वदने पुनः ॥

दक्षिणस्थेन कोणेन वामे वामेन ताडयेत् ।
बकारपाटवर्णाद्या भेरी भीरुभयंकराः ॥

गम्भीरोद्भटनिस्वाना वाद्या राजेन्द्रशासनात् ।
केचिद्भेरं घटान्पाटानत्रेच्छन्ति महाधियः ॥

कुम्भः

भैरवः

यदीयांशग्रहन्यासाः षड्ज एव निगद्यते ।
रिपास्तो भैरवो रागः प्राभाते स प्रगीयते ॥

कुम्भः

धैवतांशग्रहन्यासो रिपहीनो ध सान्तकः ।
भैरवः स तु विज्ञेया धैवताधिकमूर्छना ॥

विकृतो धैवतो यत्र भैरवः परिकीर्तितः ।
ध नि स ग म ध ... ... ॥

गान्धारकः शशिकलाकलितस्त्रिनेत्रः ।
सर्वैर्विभूषिततनुर्गजकृत्तिवासाः ॥

भास्वत्त्रिशूलकर एष नृमुण्डधारी ।
शुभ्राम्बरो जयति भैरव आदिरागः ॥

ध नि स ग म प म.

सङ्गीतदर्पणः

भैरव्यंशः

कार्ये रागांशको यो वै कारणे दृश्यते क्वचित् ।
स कार्यांशो भैरवेऽस्ति भैरव्यंशो यथार्थतः ॥

भौमः— नक्रमहहस्तः

मयूराभिधहस्ते तु मध्यमाकुञ्चिता तले ।
नाम्ना श्लिष्टमयूराख्यो भौमार्थे संप्रयुज्यते ॥

शृङ्गारशेखरः

भौमचारिकाः

समपादा स्थिरावर्ता शकटीस्यादि ... द्विधा ।
अध्यर्धिकाशेषगतिरेलकाक्रीडिता तथा ॥
स्पान्दिता च ... बद्धा च जनिताभिधा ।
समो सरितमत्तल्लिमतल्युत्स्यन्दितार्धता ।
उद्वृत्ते चेति कथिता भौम्यः षोडश चारिकाः ॥

सङ्गीतनारायणे

भ्रमरः

भ्रमरः सूरिभिः प्रोक्तः समस्ताङ्गुलिताडनात् ।

कुम्भः

—हौडुक्कपाटः

भ्रमरो भ्रमभङ्गीभिः सर्वाङ्गुलिसमाहतेः ।

यथा—

भोणं खु खुं णं खदृणं डें द्र डें द्रण इ ण वाकरें झ .

—प्रतिमण्ठकः

गुरुरेको भवेद्यत्र सन्निपातः स कथ्यते ।
भ्रमरः प्रतिमण्ठोऽसौ विद्वद्भिस्तेन गीयते ॥

सन्निपाततालः ऽ

गान्धर्ववेदे

आक्षिप्ता यत्र कुर्वाणः सममुद्वेष्टयन् करः ।
जङ्घयोः स्वस्तिकं कृत्वा कुर्वीत भ्रमरीं तलः ॥
उत्यणौ वा करावेव द्वितीयाङ्गे पुनर्विधिः ।
भ्रमरं तद्बुधैर्ज्ञेयमुद्धतस्य परिक्रमे ॥

नृत्तरत्नावली

भ्रमरीलक्षणम्

भ्रमर्या लक्ष्म चान्यत्र वक्ष्ये लक्ष्यानुसारतः ।
उत्प्लुतभ्रमरीचक्रभ्रमरी गरुडाभिदा ॥

अथैकपादभ्रमरी कुञ्चितभ्रमरी तथा ।
आकाशभ्रमरीचैव तथान्या भूचरीति च ।
भ्रमध्यक्षिप्रविज्ञेयः नाट्यशास्त्रविशारदः ॥

अशोकः

भ्रमितः

विधत्ते यो भ्रमं स्थायं स्वरेषु भ्रमितस्तु सः ।
निगद्यते स सूक्ष्मान्ते यः क्रमेणाल्पतां गतः ॥
कुम्भः

भ्रातृभगिनीहस्तः

सूचीहस्तस्त्वंसदेशे कुञ्चितो वीक्षितो यदि ।
भगिन्यां सोदरे चैव युज्यते भरतागमे ॥
भरतकल्पलता

भ्रान्तः

भ्रान्तः स भ्रान्तः (?) भ्रमणात्प्रथमे प्रियसङ्गमे ।
कुम्भः

म

मङ्गलः—तालः

-न द्वयम् ॥। ० ॥।
कुम्भः

मङ्गलारम्भलहरी

सङ्गीयते द्विरुद्ग्राहो ध्रुवाभागौ सकृद्यदि ।
पुंस्त्रीसकृत् ध्रुवोद्ग्राहौ मङ्गलारम्भ इत्यसौ ॥
मोक्षदेवः

मठताललक्षणम्

मठे लघुचतुष्कं स्याद्गणश्चेति चापरे (॥॥ऽ॥
गुरुर्लघु गुरुश्चात्र व्यवहारे तु दृश्यते (ऽ । ऽ)
सोमराजदेवः

मठ्यः—तालः

आद्यन्तयोर्लघू मध्ये द्रुतं च चतुरश्रकः ।
मात्रा दश जगुर्यत्र स मठ्यः परिकीर्तितः ॥
भरतकल्पलता

मणिबन्धगतागतम्

मणिबन्धे यदैकस्य करो विलुठितोऽपरः ।
बहिर्मण्डलतः स्थित्वा तथान्तर्मण्डलैस्तदा ।
यस्मिन् प्रवर्तते तस्यान्मणिबन्धगतागतम् ॥

मणिबन्धासिकर्षाख्यम्

हस्तावुभय युगपत्क्रमाद्वा स्कन्धयोर्यदि ।
विलोलनं विधायाथ कूर्परस्वस्तिकात्मना ॥
तत्रैव लोडयित्वाथ बहिरन्तश्च सुस्थितः ।
द्रुतं निविश्य लुठनाच्चक्राकृतिविडम्बिनः ॥
तदन्यस्मिन् क्रमाद्धस्ते ... ... ? ।
परस्य लीलया यत्र समुत्क्षेपो विधीयते ।
मणिबन्धासिकर्षाख्यं तदा सद्भिर्निरूपितम् ॥

मण्ठकतालभेदाः—तल्लक्षणानि च

जयप्रियः कलापश्च कमलो मङ्गलस्तथा ।
सुन्दरो वल्लभश्चैव मण्ठकाः षट् प्रकीर्तिताः ॥
जगणेन रसे वीरे मण्ठकः स्याज्जयप्रियः ।
कलापे स्याद्रसो हास्यो नगणः सविरामकः ॥
विरामान्तद्रुतद्वन्द्वाल्लघुना कमलो मतः ।
शृङ्गारे मङ्गलो मण्ठो भगणेन प्रगीयते ॥
सुन्दरः सगणेन स्याच्छृङ्गाररससंयुतः ।
करुणे वल्लभः प्राज्ञैः रगणेन प्रगीयते ।
लक्ष्म तन्मण्ठकादीनां शार्ङ्गदेवमतोदितम् ॥
मोक्षदेवः

मण्ठनृत्तम्

मण्ठस्य सत्कृद्वर्त्येदुद्ग्राहो मण्ठतालतः ।
द्वित्रिश्चतुर्वा ध्रुवक आभोगस्त्वसकृत्ततः ॥
विचित्रहस्तकैर्न्यासं ध्रुवादौ पुनराचरेत् ।
योऽयं तदा मण्ठनृत्तं सौष्ठवाधिष्ठितं मनः ॥

मण्डला

सकृद्रेचितहस्तश्चेत्त्यक्त्वा स्थानं च सम्भ्रमात् ।
मण्डला सा विनिर्दिष्टा द्विधान्या सा प्रकीर्तिता ॥
कुम्भः

मण्डलाभरणम्

अभ्यन्तरप्रवेशेन परिभ्राम्य तु चक्रवत् ।
पश्चाद्विलोड्य दोलावर्तिक्रयया पार्श्वयोर्यदा ।
प्रातिलोम्येन यद्वेदं मण्डलाभरणं तदा ॥

मण्डिडक्का

मण्डिडक्का तु ढक्केव सायामा षोडशाङ्गुला ।
अष्टाङ्गुलमुखी मध्यपरिधौ षोडशाङ्गुला ॥
वधार्गलाभ्यां रहिता भवेदुत्कक्षकं त्विह ।
मध्यमं च किकी द्वन्द्वमुत्कक्षं चाञ्चलीद्वयम् ॥

धृत्वा वामकराङ्गुष्ठान्यङ्गुलीभिर्निपीडय च ।
तर्जनीमण्डलीप्रान्तन्यस्तं दक्षिणपाणिना ॥
अथवा मणिबन्धोर्ध्वं क्षिप्त्वा कक्षाङ्गनीद्वयम् ।
कनिष्ठानामिकाङ्गुष्ठो युक्तस्यापीडयमङ्गुली ॥
तर्जन्या मध्यमाङ्गुल्या करेणान्येन वादयेत् ।
एतस्या वादनं प्राहुर्हस्तेन कुडुपेन च ॥
पाटैर्हुडुक्का डक्कोक्तैः शक्तिपूजासु पूजकैः ।
वादनीया मण्डिडकेत्यूचुर्वाद्यविदो जनाः ॥

कुम्भः

मण्डिका

सव्यापसव्यतो यत्र वामं तदितरं तथा ।
जानुसत्वरमासाद्य भूम्यङ्घ्रीस्थापयेद्यदा ।
मण्डिका सातदा प्रोक्ताशोकमल्लेन भूभुजा ॥

अशोकः

मण्डीडका

षोडशाङ्गुलदीर्घं स्यान्मुखे चाष्टाङ्गुलान्तरा ।
मध्यप्रदेशे कर्तव्या षोडशाङ्गुलवेष्ठना ॥
शेषं लक्ष्म हुडुक्कावत्कच्छागेळविवर्जितम् ।
पाटाक्षरं हुडुक्कावन्मण्डीडक्कासुकल्पितम् ॥
मण्डलीमध्यरज्जुं च वामहस्तेन पीडयेत् ।
सव्यजानुगतं वक्त्रं सव्यहस्तेन वादयेत् ॥
शक्तिदैवतपूजायां चर्यागानविधौ तथा ।
वादनीया प्रयत्नेन मण्डीढक्का विचक्षणैः ॥

सोमेश्वरः

मतङ्गोक्तरागत्रैविध्यम्

शुद्धश्छायालगः प्रोक्तः सङ्कीर्णश्च तथैव च ।

तत्र शुद्धरागत्वं नाम शास्त्रोक्तनियमाद्रञ्जकत्वम्; घनतालगरागत्वं नामान्यच्छायालगत्वेन रक्तिहेतुत्वम्; सङ्कीर्णरागत्वं नाम शुद्धच्छायालगमुख्यत्वेन रक्तिहेतुत्वम् ॥

सङ्गीतदर्पणः

मत्स्यकरणम्

कृत्वोत्प्लवनमावर्त्य मध्यं पार्श्वेन मत्स्यवत् ।
वामेन परिवर्तश्चेत्तन्मत्स्यकरणं भवेत् ॥

कुम्भः

मत्तावलिनृत्यम्

मत्तानां च तुरुष्काणामापेयास्वादनान्तरम् ।
यः प्रकारः स्थाननृत्यं विदुर्मत्तावलिं बुधाः ॥

सङ्गीतनारायणः

मदालसा

मत्तवद्यत्र चरणावितश्चेतश्च विह्वलौ ।
स्यान्येते यत्र तामाहुश्चारीमेतां मदालसाम् ॥

कुम्भः

मदालसम्

आसन्नं संश्रितश्चैकः परः किञ्चित्प्रसारितः ।
शिरः पार्श्वगतं यत्र तन्मदालसमीरितम् ।
विपदौत्सुक्यनिर्वेदमदेषु विरहेषु तत् ॥

कुम्भः

मधुपः

पादकुट्टनचारी तु लोके मधुपसंज्ञिका ।
तस्यास्तु बहवो भेदा दिङ्मात्रञ्चोच्यते मया ॥

कुम्भः

मध्यमम्

मध्यस्थानोद्भवत्वेन मध्यमः परिकीर्तितः ।

सङ्गीतसारः

मध्यमग्रामः

सोपान्ते पञ्चमस्त्रिस्रो धैवतस्य चतुः श्रुतिः ।
पञ्चमो धैवतश्चैवर्षभः संवादिरुच्यते ॥

सङ्गीतमकरन्दः

मध्यमग्रामजातिः—बीभत्से, भयानके

कैशिकी धैवतांशत्वात्तथा गान्धारपञ्चमी ।
प्रयोक्तव्ये बुधैः सम्यग्बीभत्से सभयानके ॥

नाट्यशास्त्रे

—अद्भुते

दार्मारवी तथा चान्ध्री निषादांशपरिग्रहात् ।
अद्भुते तु रसे कार्ये जातिगाने प्रयोक्तृभिः ॥

नाट्यशास्त्रे

—वीरे रौद्रे

मध्यमोदीच्यवा चैव गान्धारोदीच्यवा तथा।
षड्जर्षभांशोपपत्त्या वीरे रौद्रे च कीर्तिता॥

नाट्यशास्त्रे

गान्धारीमध्यमा चैव पञ्चमी च तथैव हि।
गान्धारोदीच्यवा चैव तथा गान्धारपञ्चमी॥

ततश्च रक्तगान्धारी मध्यमोदीच्यवा तथा।
आन्ध्री च नन्दयन्ती च कार्मारव्यथ कैशिकी।
एवमेकादश ज्ञेया मध्यमग्रामसंश्रयाः॥

मतङ्गः

—करुणे

गान्धारीरक्तगान्धार्यौ गान्धारांशोपपत्तितः।
करुणे तु रसे कार्यौ निषादांशे तथैव च॥

नाट्यशास्त्रे

मध्यमग्रामलक्षणम्

त्रिचतुःश्रुतिकौ यत्र पधौ संवादिनौ स्वरौ।
ऋषभस्य तु विद्वद्भिः स ग्रामो मध्यमः स्मृतः॥

हम्मीरः

मध्यमग्रामे श्रुतिनियमः

चतुःश्रुतिस्तु विज्ञेया मध्यमः पञ्चमः पुनः।
त्रिश्रुतिर्धैवतस्तु स्याच्चतुःश्रुतिक एव हि॥

निषादषड्जौ विज्ञेयौ द्विचतुःश्रुतिसंभवौ।
ऋषभस्त्रिश्रुतिश्च स्याद्गान्धारो द्विश्रुतिस्तथा॥

नाट्यशास्त्रे

मध्यमनायिकालक्षणम्

पुंसि स्वयंकामयति कामयेद्वा च तं वधूः।
सक्रोधे क्रुध्यति मुहुः सूनृते सत्यवादिनी॥

सापराधेऽपकर्त्री स्यात् स्निग्धे स्निह्यति वल्लभे।
एवमादिगुणोपेता मध्यमा सा प्रकीर्तिता॥

भरतकल्पलता

मध्यमव्रीडा—नायिका

नीवीबन्धोच्छ्वासनेऽच्छोतिच्छादिपेत्तरप्रान्तेऽथ मध्यं समीपे।
मन्दं मन्दं पाणिमध्ये व्यनक्ति या मध्या मध्यमव्रीडितेयम्॥

शुभङ्करः

मध्यमसाधारणम्

काकल्यन्तरयोस्तत्र लक्षणं ब्रूमहेऽधुना।
प्रथमं षड्जमुच्चार्य काकलीभवतो ततः॥

क्रमादुच्चारयेदेवं मध्यमं च ततः परम्।
अन्तरं ऋषभं तद्वत् समुच्चार्याथवा यदि॥

क्रमाध्वानि समुच्चार्य षड्जमुच्चारयेत्पुनः।
तत्परस्परसंरम्भे लोप्यं स्वरा प्रवादयेत्॥

एवं मध्यमगान्धारा क्रमादुच्चार्य मध्यमम्।
पुनः प्रचेत्परं च वर्ज्यं त्यक्त्वा विधानतः ?॥

व्याप्तिं कुर्यात्प्रयत्नेन संपूर्णादिक्रमात्ततः।
काकल्यन्तरयोः सर्वप्रयोगेष्वल्पता मता॥

स्वीकरोति निषादो यः षड्जस्याद्यां श्रुतिं यदा।
ऋषभस्त्वन्तिमां तस्य षड्जसाधारणं तदा॥

तथैव मध्यमस्यापि यथा गान्धारपञ्चमे।
आस्कंदतस्तदा मध्यमाख्यसाधारणं भवेत्॥

सङ्गीतसूर्योदये

मध्यमादिरागः

मध्यमादिश्च रागाङ्गा ग्रहांशन्यासमध्यमा।
सप्तस्वरैस्तु गातव्या मध्यमादिकमूर्छना।
संपूर्णा कथिता तज्ज्ञैः रिधहीना कचिन्मता॥

सत्या सहासं परिरम्य कामा
संचुम्बितास्या कमलायताक्षी।
स्वर्णच्छविः कुङ्कुमलिप्तदेहा
सा मध्यमादिः कथिता मुनीन्द्रैः॥

म प ध नि स रि ग म — म प ध नि स ग म.

सङ्गीतदर्पणः

मध्यमादिलक्षणम्

आरुह्य कुतपे काले चावरोहात्क्रमात्स्वरान्।
षड्जान्तात्स्थायिपर्यन्तं यद्वा हन्यात्तु धैवतम्॥

मध्यमादेः समाख्यातं स्वस्थाने प्रथमं तदा।
असम्भवे पूर्वपूर्वस्वरस्य तु परस्परम्।
क्रमेण स्वरमारोहेत् सर्वरागेष्विति स्थितिः॥

हम्मीरः

मध्यलुठिता

कुट्टयित्वा च विन्यस्य लुठितश्च निकुट्टितः।
सा मध्यलुठिता चेति कीर्तिताश्चर्यनामिका॥   कुम्भः

कुट्टितो स्थापितोऽङ्घ्रिश्चेल्लुठितश्च निकुट्टिता ।
समादिष्टा तदा मध्यलुठिता नृत्तवेदिभिः ॥

मध्यवक्रा

कुट्टयित्वा च विन्यस्य भ्रमयित्वा न्यसेत्ततः ।
निकुट्टयेत्ततः स्थाने मध्यवक्रा प्रकीर्तिता ॥

कुम्भः

मध्यस्थं वस्तु

न चातिमात्रसन्तुष्टो न चान्यं तु जुगुप्सितः ।
मध्यस्वभावमासाद्य मध्यस्थं वस्तु निर्दिशेत् ॥

वेमभूपालः

मध्यसाधारणम्

साधारणं तु गमयोः श्रुतियुग्मपरिग्रहात् ।
मध्यामाद्यन्तः संश्रित्य श्रुतियुग्मं मपौ स्वरौ ॥

गृहीतं तत्र विज्ञेयं मध्यसाधारणं बुधैः ।
यदत्र मध्यमस्योक्तं बुधाः साधारणं स्फुटम् ॥

तत्र मध्यम एव स्यात्तदिति प्राज्ञसंमतम् ।
स्वस्थानाद्यस्च्युतः स्वीयं स्थानमप्राप्तवान् स्वरः ।
साधारणं तु तद्भावो भावप्राधान्यतः स्मृतम् ॥

कुम्भः

मध्यस्थापनकुट्टिता

कुट्टितः प्रथमं पादः पुरः पश्चान्निवेशितः ।
मध्ये निवेशितश्चायं पुनस्तत्रैव कुट्टितः ।
मध्यस्थापनकुट्टाख्या चारी चान्वर्थलक्षणा ॥

कुम्भः

मध्यस्थांशः

परस्परं निरसदृशौ तावेव सदृशौ च यौ ।
मध्यस्थौ तौ तयोरंशो नट्टदेशाख्ययोर्यथा ॥

कुम्भः

मन्द्रगतिः

मन्द्रस्त्वंशवरो नास्ति न्यासे तु द्वौ व्यवस्थितौ ।
गान्धारे न्यासलिङ्गेतु दृष्टमृषभधैवतम् ॥

नाट्यशास्त्रे

मन्द्रतारः

तारमन्द्रप्रसन्नस्तु ज्ञेयो मन्द्रगतस्य च ।
लङ्घयित्वा परान्मन्द्रात्परांस्तारगतिं गतः ॥

मन्द्रस्वराः

चतुर्थ्यापि पुनस्तन्त्र्या मन्द्रमध्यमयुक्तया ।
षट्सु तास्वपि सारीषु भवेयुः क्रमशः स्वराः ॥

पतपः प्रथमः शुद्धपञ्चमस्तदनन्तरम् ।
शुद्धो दः शुद्धनिः पश्चान्निषाधः कैशिकी ततः ॥

षड्जः पतादिरित्येते प्रोक्ता मन्द्रस्वरा मया ।
पुरोदितानुसारीषु तन्त्रीभिश्च चतसृभिः ॥

अनुमन्द्रस्तथामन्द्राः प्रोद्दिष्टास्ते स्वयंभुवः ।
स्वीयकल्पनया नोक्ताः प्रामाण्यं तेषु विद्यते ।
गुरुणा मे यथोद्दिष्टा वीणायां सुप्रपञ्चिताः ॥

कुम्भः

मन्द्रादिस्थानानि

नृणामुरसि मन्द्रस्तु द्वाविंशतिविधो ध्वनिः ।
स एव कण्ठमध्ये स्यात् तारः शिरसि गीयते ॥

उत्तरोत्तरतारस्तु वीणायामधरोत्तरः ।
इति ध्वनिविशेषास्ते श्रवणाच्छ्रुतिसंज्ञिताः ॥

दत्तिलः

मन्मथताललक्षणम्

द्रुतद्वन्द्वं गुरुश्चैकस्ताले मन्मथसंज्ञके । (००।)

सोमराजदेवः

मरालः—नाट्याङ्गम्

प्रथमं दुग्गदिग्गिस्यादन्ते धों गुडुधों गुडुः ।
धीं तांकिटधणं मध्ये मरालस्तु प्रकीर्तितः ॥

भरतकल्पलता

मराललक्षणम्—देशीचारी

मन्थावर्तस्थयोरङ्घ्र्योः पार्ष्णिपादाग्ररेचनम् ।
पुरः प्रसारितौ यत्र सा मराला प्रकीर्तिता ॥

मोक्षदेवः

मन्थावर्तासनाङ्घ्री चेत्पार्ष्णी प्रपदरेचितौ ।
पुरः प्रसरितौ चारी मराला साभिधीयते ॥

कुम्भः

मर्दलभेदाः

वादको मुखरी चान्यः प्रतिमुखरिकस्ततः ।
गीतानुगश्चतुर्थस्तु बुधैर्मार्दलिको मतः ॥

मोक्षदेवः

मर्दलमुरजयोः भेदः

त्रयोदशाङ्गुलो वामे मुखे स्याद् द्वादशाङ्गुलः ।
दक्षिणे तु मुखे धीरैः मर्दलः परिकीर्तितः ॥

मुरजोऽष्टाङ्गुलो वामे दक्षे सप्ताङ्गुलो मुखे ।
अङ्गयोर्ध्वकालिङ्गयभेदात्सरिता परिकीर्तितः ॥

तदुक्तं भरतेन ।

हरीतक्याकृतस्त्वन्ते यवमध्ये तथोर्ध्वकः ।
आलिङ्गयश्चैव गोपुच्छसदृशः परिकीर्तितः ॥

सङ्गीतनारायणे

मलयः—तालः

वर्णैश्च सप्तदशभिरंघ्रिः शृङ्गारके रसे ।
कमलो मलयाख्ये चैवाग्रं वृद्धिकरः परः ।
मलयाख्यो भवेत्ताले गुरुर्लघुरथो गुरुः ॥

गान्धर्ववेदे

मल्लारीरागः

मल्लारी सपहीना स्याद्ग्रहांशन्यासधैवता ।
औडुवा पौरवीयुक्ता वर्षासु सुखदा सदा ॥
गौरीकृशाकोकिलकण्ठनादा गीतच्छलेनात्मपतिं स्मरन्ती ।
आदाय वीणां मलिना रुदन्ती मल्लारिका यौवनदूनचित्ता ॥

ध नि स रि ग म ध ·

सङ्गीतदर्पणः

मल्हारः

धैवतांशग्रहन्यासः षड्जपञ्चमवर्जितः ।
मल्हारो गीयते प्रातर्गानविद्याविशारदैः ॥

कुम्भः

मल्हारी

पञ्चयेण युता प्रातर्मल्हारी रिविवर्जिता ।
वर्षास्वपि विशेषेण प्रगेया सुखदायिनी ॥

कुम्भः

मसी

हरितालादिसामग्री मसी चैव तु वर्णिका ।
मुख्यता हरितालस्य वर्णिकायाः परिग्रहे ॥

हरितालविहीना तु नैव सिद्धप्रदा मसी ।
हकारः शङ्करः प्रोक्तो रेफो वह्निसखो मतः ॥

इकारश्च तकरश्च सर्वविघ्नविनाशनः ।
आकारो द्रुहिणश्चैव लकारो लय उच्यते ॥

एते देवगणा नित्यं हरिताले व्यवस्थिताः ।
वर्णिकाग्रहणे तस्या हरितालः प्रशस्यते ॥

मन्त्रोऽयं कथितो वेदे हरितालाभिमन्त्रणे ।
वर्णिकाग्रहणार्थस्त्वं निर्मितोऽसि धरातले ॥

सर्वसिद्धप्रदो नाट्ये सर्वदेवैश्च वन्दितः ।
सर्वविघ्नोपहः साक्षात्सर्वदेवमयस्तथा ।
तस्मात्प्रयच्छ संसिद्धिं हरिताल नमोऽस्तु ते ॥

जगदरः

महानादलक्षणम्

निस्साण इति विख्यातं महानादं भयंकरम् ।

मागधी—गीतिः

मात्राभिरष्टभिर्मार्गे वार्तिके सकलः पुनः ।
चतुष्कलः तृतीयस्यां कलायां दक्षिणे पथि ॥

प्रयोज्या मागधीगीतिरियमुक्ता महीभुजा ।
इति पक्षान्तरेणोक्ता मागधीगीतिरुत्तमा ॥

कुम्भः

तत्र स्यान्मागधी चित्रे पदैः समनिवृत्तकैः ।

दत्तिलः

मातुः

गीर्वाणमुखभाषाणां पदं मातुरितीरितः ।
धातुमातुसमुत्पन्नं गीतमित्युच्यते बुधैः ॥

सङ्गीतसूर्योदये

मातृकालक्षणम्

देशीमार्गगतैस्तालैर्मिश्रा सा गीयते सदा ।
निबद्धा चानिबद्धा च द्विविधा स्यात् त्रिधापि सा ॥

निबद्धा पद्यबन्धेन गद्यबन्धेन चेतरा ।
गातव्या गीतशास्त्रज्ञैर्जन्मद्वयशुभप्रदा ॥

वेदान्तन्यायमीमांसापुराणजननी यतः ।
अतोऽसौ गीयतेऽशेष मोहप्रत्यूहनाशिनी ॥

सोमराजदेवः

मातृहस्तः

वामे तु शिखरं कृत्वा दक्षिणे मृगशीर्षकम् ।
मात्रार्थे विनियुज्येत कीर्तितो भरतादिभिः ॥

भरतकल्पलता

माधवप्रियः

करणं वलितोरु स्याद्वलितं च ततःपरम् ।
पदापविद्धं च ततो दोलापादं समाश्रयेत् ॥
पार्श्वक्रान्तं परिवृत्तं सिंहविक्रीडितं ततः ।
एलकाक्रीडितं पश्चात्कटिच्छिन्नमतःपरम् ॥
नवभिः करणैरेभिर्निर्मितः कुम्भभूभुजा ।
माधवप्रियसंज्ञोऽयं प्रयुक्तो माधवार्चने ॥

कुम्भः

माधुर्यम्—(पुरुषस्य)

निकारहेतौ वहति विद्यमानेऽपि चेतसः ।
स्वाभाविकप्रसादोऽपि तन्माधुर्यमितीरितम् ॥

वेमभूपालः

मान्मथगणाः

प्राकृते त्रिगणाः पञ्च षट्चतुस्त्रिद्विमिताः ।
स्युः षट्पंच चतुस्त्रिद्विमिता मात्रायुताः कलाः ॥
अत्युक्तायास्तु चत्वारो भेदा रतिगणाः मताः ।
तत्र ये लघुपूर्वाः स्युस्तेषु प्रागधिकं लघु ।
अष्टौ मध्याभवा भेदाः प्रोक्तास्ते मान्मथा गणाः ॥

मोक्षदेवः

मारुतः

प्रबद्धस्खलितश्चैव निरस्तो विसितालसौ ।
उल्लासितो वियुक्तश्च प्रस्तुताख्यश्चुतौ परौ ॥
स्वस्थाविति नवोल्लासोल्लामनिश्वासनोदितौ ।
समौ भ्रान्तो विलीनश्चान्दोलितः कम्पितः परः ॥
स्तम्भितोल्लासनिश्वाससूत्कृतानि च सत्कृतम् ।
एवं दशविधः प्रोक्तो मारुतः कैश्चिदादृतैः ॥
सशब्दवदनाद्यस्तु प्रवृद्धः सन्निनिर्गतः ।
सप्रवृद्धस्तु निःश्वासः क्षमादिषु नियुज्यते ॥

कुम्भः

मारुती—(कला)

चतुर्विलासेषु शिरो निधाय नभोगतैर्यत्र कराङ्घ्रिपद्मैः ।
चक्राणि चोद्भ्रामयतो हि तैव प्रोक्ता कलेयं किल मारुतीति ॥

नागेन्द्रसङ्गीते

मार्गः

ब्रह्माद्यैः गदितां शम्भोः प्रयुक्तां भरतादिभिः ।
गान्धर्वं वादनं नृत्यं यन्मार्ग इति स स्मृतः ॥

सङ्गीतनारायणे

निबद्धश्चानिबद्धश्च मार्गोऽयं द्विविधो मतः ।
आलापादिनिबन्धो यः स च मार्गः प्रकीर्तितः ॥

मतङ्गः

नानादेशसमुद्भवाश्च ललनास्ताभिस्ततः शिक्षिताः
ताभ्योऽप्यत्र परंपरागतमिदं लोकप्रतिष्ठामगात् ।
पार्थायैवदुपादिशत्पुनरिदं गन्धर्वलोकाधिपः
श्रीमांश्चित्ररथस्तदेतदखिलं मार्गाभिधं तत्त्वतः ॥

कुम्भः

चित्रश्चित्रतरश्चित्रतमौ वार्तिकदक्षिणौ ।
अतिचित्रतमः प्रोक्तः तालमार्ग इति स्मृतः ॥

भरतकल्पलता

मार्गाः स्युस्तत्र चत्वारो ध्रुवश्चित्रश्च वार्तिकः ।
दक्षिणश्चेति तत्र स्यात् ध्रुवके मात्रिकाकला ॥
शेषेषु द्वे चतस्रोऽष्टौ क्रमान्मात्राकला भवेत् ।
ध्रुवकापतिता चित्रे वार्तिके त्वादिमे उभे ।
द्वे चान्तेऽपि प्रयोक्तव्ये क्रमादष्टौ च दक्षिणे ॥

कुम्भः

मार्गदर्शी

नन्वत्र प्रत्ययैकार्थे मार्गदेशीति का भिधा ।
उच्यतेऽत्र तदैक्येऽपि ये यत्र विनियुज्यते ।
विवक्षावशतो ब्रूते सर्वमप्येमिति स्थितम् ॥

कुम्भः

मार्गपटहः

सवितस्तिकरद्वन्द्वं दैर्घ्ये स्यात् परिधौ पुनः ।
षष्ट्यङ्गुलो मध्यदेशे पृथुः खदिरदारुणः ॥
उत्तमो बीजकाष्ठादिकृतो धातुमयोऽथवा ।
दक्षिणं वदनं तस्य स्यात्सार्धैकादशाङ्गुलम् ॥
वामं तु वदनं कार्यं सार्धैर्दशभिरङ्गुलैः ।
दक्षिणे वदने तस्य वलयं लोहनिर्मितम् ॥
वामे च वलयं वक्त्रे कार्यं वल्लीसमुद्भवम् ।
षाण्मासिकस्य वत्सस्य मृतस्यानाय्य पारिकाम् ॥
तयावगुण्ड्य वलयं वामं वल्लीसमुद्भवम् ।
अङ्कितं सप्तभिश्छिद्रैः शून्यभभूतरन्ध्रढम् (?) ॥
तत्र सप्तसु रन्ध्रेषु निक्षिप्तैः सूक्ष्मदोरकैः ।
कलशाः सप्त हेमादिधातुभेदविनिर्मिताः ॥

वियन्तव्या श्लथतरदैर्घ्येण चतुरङ्गुलाः ।
पटहस्य च वामास्य पंक्त्यङ्गुलचतुष्टयम् ॥

विस्तारतस्त्र्यङ्गुलया स्थूणादिकृतया ततः ।
वेष्टयेत्पटहं कण्ठे तया पत्रिकया दृढम् ॥

बाह्यं कायस्य यच्चर्म पशोस्तत्कवलं स्मृतम् ।
कृतान्तःसुषिरानेन घनेन वदनद्वयम् ॥

पिदध्यादस्य वदने दक्षिणे कवले पुनः ।
सर्वतो विहितः छिद्रं विदध्याद्वाद्यसिद्धये ॥

गुणैः सुषिरनिक्षेपैः गाढमाकृष्य यत्नतः ।
वामवल्कस्य वलये सप्तरन्ध्रनिवेशितान् ॥

गुणानाकृष्य सुदृढं यथास्थानं निवेश्य तत् ।
वामस्य कवलं तत्र सप्तछिद्रनिवेशितैः ॥

तैर्गुणैः स्वर्णकलशानावेष्ट्य विधिवत्सुधीः ।
दक्षिणास्यस्य वलये लोहे प्रक्षिप्य मध्यतः ॥

सम्यक्कृष्टैस्तु सुदृढैः वलयं गाढतां नयेत् ।
कलशेभ्यो बहिर्वामवल्लीवलयपल्लवे ॥

कच्छाकटीवेष्टनाय सांचलं बध्यते दृढा ।
इत्येवं मार्गपटहो लक्षितः शास्त्र मार्गतः ॥

कुम्भः

मार्गलक्षणम्—(अभिनयः)

नाट्यवेदप्रवृत्तत्वाद्भरतादिमहर्षिभिः ।
सद्भिः सञ्चारितत्वाच्च मार्गमाहुरिदं बुधाः ॥

नृत्तरत्नावली

मार्गस्वरूपम्

दक्षिणो वार्तिकश्चित्रो ध्रुवश्चित्रतरस्तथा ।
अतिचित्रतमश्चेति षण्मार्गाश्शास्त्रचोदिताः ॥

अनुघर्षणकश्चैव स्वरश्चापि प्रकीर्तितः ।
सर्वेषां मतमाश्रित्य मार्गा द्व दशधा मताः ॥

धर्मादिसाधनं नाट्यं सर्वदुःखापनोदकम् ।
अनुसेवध्वमृषयस्तस्योत्थानं तु नाटकम् ॥

वाग्भिरङ्गैर्मुखरसैर्यैः सत्त्वाभिनयेन च ।
कवेरन्तर्गतं भावं भावयन् भाव उच्यते ॥

मालवगौलः

शुद्धाः सरिमपाः शुद्धो धः पनादिसमध्यकौ ।
मेळे मालवगौळस्य रागस्यापि तदा भवेत् ॥

कुम्भः

मालवभाषा

नियोज्या दीपनादौ तु सङ्कीर्णत्वमुपेयुषी ।
निधहेत्वौडुवत्वेन विनाप्यल्पेन केनचित् ।
एषौडुवेन विज्ञेया नानामतविचारतः ॥

कुम्भः

मालवश्रीः

पूर्णा षड्जत्रयोपेता मालवश्रीः सदा भवेत् ।
रिधाल्पा रसशृङ्गारवर्धनी चित्तरञ्जनी ॥

कुम्भः

मालवी—विभाषा

तथा मतङ्गमुनिना भिन्नषड्जे समीरिता ।
संपूर्णांशग्रहन्यासा धैवता भूयसी पुनः ॥

सरिमैश्च प्रयोगार्हाः टक्कैशिकसंज्ञिनः ।
रागस्य साम्ययोगेन विभाषा मालवाभिधा ॥

कुम्भः

षड्जग्रामे टकरागे भाषा मालविका स्मृता ।
षड्जांशग्रहणन्यासा चार्षभेण विवर्जिता ॥

औडुवा षड्जगान्धारपञ्चमैर्दीप्तिमागता ।
भाषेयं मालवीनाम योज्या वाकलहे बुधैः ।
मालवादेः पञ्चमस्य टकरागस्य मिश्रणात् ॥

कुम्भः

माल्यम्

गर्भितं गुम्भितं चैव वेष्टितं लम्बितं तथा ।
माल्यं चतुर्धा केशान्तं दृश्याद्दृश्यं तु गर्भकम् ॥

केशोपरिश्रान्तप्रथितं पुष्पगुम्भितकं तु तत् ।
वेष्टितं यत्तु मालाभिः तत्तु वेष्टितमुच्यते ॥

विलम्बितं वेणिचूडाकण्ठेष्वालम्बितं तु तत् ।
गर्भितं तु द्विजातीनां विटादीनां च गुम्भितम् ॥

द्विजेतराणां धम्मिल्लभाजामावेष्टितं भवेत् ।
वेणिच्युताग्रकण्ठेषु लम्बितं स्याद्यथोचितम् ॥

गोपवेषहरेः केशी बहुगुञ्जादिभिर्युता ।
निष्पाशानां तु कर्तव्यं नीलचामरगुम्भितम् ॥

सङ्गीतनारायणे

मिथुनम्—(नक्षत्रहस्तः)

अन्योन्याभिमुखीभूतौ सूची मिथुनभाजने।

शृङ्गारशेखरः

मिथोऽसवीक्षायाह्यम्

एकः करश्चेदन्यस्य स्कन्धदेशमृजुर्गतः।
निवृत्तस्तन्निजे पार्श्वे क्रमाद्विहितमण्डलः।
मिथोऽसवीक्षायाह्यं तत्कथ्यते चालयं तथा॥

मिश्रकः

कृत्वा धने कल्पनं तु गायेन्मिश्रक ईरितः।

भरतकल्पलता

मिश्रकरणम्

स्वरैः पाटैस्तथा तेनैर्यत्रोद्ग्राहध्रुवौ कृतौ।
तन्मिश्रकरणं प्राह मोक्षदेवः स्फुरद्यशाः॥

मोक्षदेवः

मिश्रछाया

रागे रागान्तरच्छायां मिश्रयन्दोषवर्जितः।
प्रवीणत्वेन यो गायन् बुधैर्मिश्र उदाहृतः॥

कुम्भः

मिश्ररागाः

सारङ्गनाटसौराष्ट्रसावेरीशुद्धचौलिका।
मालवश्रीश्च तोडी च ततो घण्टारवोऽपि च॥

नादरामक्रिया सिन्धि मुखारी मेचबौलिका।
दशालरागाः कथिताः ततो मङ्गलकौशिका?॥

रागाङ्गैः केवला शुद्धवसन्तोऽपि प्रयुज्यते।
केदारगौलसामन्तौ पाडिस्थानं ततःपरं।
मधुमाधविका पश्चादुपरागा इति स्मृताः॥

शृङ्गारशेखरः

मीनम्—(राशिहस्तः)

त्रिपताकाह्वयौ हस्तौ चान्योन्यमुखमिश्रितौ।
स्थापितावग्रभागे तु मीनार्थे सुप्रयुज्यते॥

शृङ्गारशेखरः

मुकुन्दताललक्षणम्

लघुर्द्रुतचतुष्कं च गुरुरेको मुकुन्दके।
।००००ऽ

सोमराजदेवः

मुकुलः—हस्तः

मुकुलो विरलीभूतोऽप्यलपद्मकरश्च यः।
मन्त्रशक्तौ तथा सम्यग्भागवेयानुभुञ्जने॥

भरतकल्पलता

मुक्तजानु

मुक्तजानूत्कटस्यैव जान्वेकं भूमिसङ्गम्।
हवने सान्त्वने चैव सज्जने साधुकर्तृकं।
प्रसादने मानिनीनां विनियुक्तं महर्षिभिः॥

कुम्भः

मुक्ता

स्वराणां मोचनं व्याप्तं मुक्तेति परिकीर्तिता।

भरतकल्पलता

—मृदङ्गप्रहारभेदः

उभयोश्च परित्यागात्तथैकान्तरघाततः।
क्षणे क्षणे कलासश्च मुक्ताख्यस्य उदाहृतः॥

सङ्गीतनारायणे

—वृत्तमाला:

बुधैर्मुक्तावली ज्ञेया छन्दसा वर्जितैःपदैः।
निबद्धैः केनचिद्वृत्तबन्धेनावृत्तबन्धिनी॥
युग्मिनी वृत्तयुग्मेन निबद्धा परिगीयते।
ग्रन्थिता बहुभिर्वृत्तैर्वृत्तमाला स्मृता बुधैः॥

मोक्षदेवः

मुक्तावलिव्यतिरिक्तत्रयाणां टेङ्कीणां विभागः तल्लक्षणानि च

हित्वा मुक्तावलीं तिस्रो भवन्ति त्रिविधाः पराः।
गणिका वर्णिका चान्या मातृका परिकीर्तिता॥

गणिका गणितैर्वृत्तैर्वर्णैर्वर्णिका मता।
मात्रिका मातृकैर्वृत्तैरेव भेदा भवन्त्यमी॥ मोक्षदेवः

मुखगुम्फिनी—(कला)

असिं ललाटे दधती मुखान्तं नानाविधाय स्फुलिकाःसुमुक्ताः।
प्रभाति सूत्रेण स नृत्तपाणिर्येनाङ्गनोक्ता मुखगुम्फिनीयम्॥

नागेन्द्रसङ्गीते

मुखरागः

रसानुशायिनी सम्पत् पदार्थाः सम्प्रकाशते।
तामात्मस्थां व्यनक्त्यत्र मुखरागो रसे रसे।
स चतुर्धा स्मृतो रागः पूर्वः स्वाभाविकस्तथा॥ कुम्भः

मुखरीलक्षणम्

वाद्यप्रबन्धनिर्माता निष्णातो गीतवादने ।
स्वरेष्वन्तर्मुखत्वं च नृत्तशिक्षाविचक्षणः ॥

अर्धाङ्गमिव नर्तक्या वादयेद्रङ्गभूगतः ।
वादकैः प्रेक्षितमुखो वादनार्थं मुखर्यसौ ॥

मोक्षदेवः

मुडुपम्

मुडुपं प्रपदस्य स्यात्कम्पनं द्रुतरासतः ।

सङ्गीतमुक्तावली देवेन्द्रकृता

मुडुपचार्यः

अङ्गुलीपृष्ठभागं हि नृत्तज्ञा मुडुपं जगुः ।
चार्यते तेन मुडुपचारीत्यन्वर्थसंज्ञकम् ॥

निरुक्तिमेवं केप्याहुरन्ये संज्ञां डविद्धवत् ।
मुडुपोपपदाश्चार्यस्सन्ति यद्यप्यनेकशः ॥

तथाप्यमूर्मया काश्चिल्लिख्यन्ते लोहितोदिताः ।
पुरःपश्चात्सदाचारी तथा पश्चात्पुरस्सरः ॥

मध्यवक्त्राभिधा चारी तथैव पार्श्वकुट्टिता ।
पदद्वयनिकुट्टाऽन्या पादस्थितिनिकुट्टिता ॥

पुरक्षेपनिकुट्टा च पश्चात्क्षेपनिकुट्टिता ।
पार्श्वक्षेपनिकुट्टान्या चक्रकुट्टनिकापरा ॥

मध्यस्थापनकुट्या च चतुष्कोणनिकुट्टिताः ।
चारी त्रिकोणचारान्या तिरश्चीननिकुट्टिका ॥

अनुलोमविलोमा च प्रतिलोमानुलोमका ।
पुरस्ताल्लुठिता पृष्ठलुठिता चक्रकुट्टिता ॥

पार्श्वद्वयचरी मध्यलुठितास्या परा तथा ।
श्रीमतोऽशोकमल्लेनेत्युद्दिष्टाः पञ्चविंशतिः ।
इमा मुडुपचार्योऽथ लक्षणं प्रतिपाद्यते ॥

अशोकः

मुद्रा

संप्रदायानुसरणं मुद्रा हृदयरंजनी ।

मुद्राहस्तः

मध्यमाङ्गुष्ठयोर्योगः शेषाङ्गुल्यः प्रसारिताः ।
मुद्रा हस्तस्समाख्यातः करन्यासविचक्षणैः ॥

अणुरित्यर्थके धेनोराननं तृणभावने ।
चिन्मुद्रायां च चक्रवर्थे मुद्राहस्तो नियुज्यते ॥

[illegible]

मुनिस्तम्भलक्षणम्

योगाभ्यासजपादिषु मुनीनां निश्चलाङ्गत्वम् ।
मुनिस्तम्भः ।

[illegible]

मुरजकर्तरीचालयम्

अंसावधिस्तनक्षेत्राद्भ्रान्त्या मण्डलवृत्तितः ।
ततो वक्षःस्थलं प्राप्तौ मुहुर्निक्षिप्य पार्श्वतः ॥

अधस्तत्र व्रजत्येको द्वितीयो मण्डलभ्रमः ।
विलोडितो यदा पश्चादुभौ हस्तौ कटिस्थितौ ।
अन्योन्याभिमुखौ भ्रान्तौ तदा मुरजकर्तरी ॥

मुरजलक्षणम्

मुरजस्य त्रिभिर्वधैर्मध्ये गाढं प्रवेशयेत् ।
अस्योपकण्ठे कुण्डल्यौ बद्धव्ये धातुनिर्मिते ॥

तत्र वामास्यकुण्डल्यां स्निग्धां पट्टमयीं नवाम् ।
कच्छामष्टाङ्गुलायामां सांचलद्वितयां शुभाम् ।
निवेश्य दक्षिणास्येऽथ कुण्डल्यां तां निवेशयेत् ॥

कुम्भः

मुरजं त्वङ्गुलैरेकविंशत्या प्रमितायतिम् ।
कुर्यादासनकाष्ठस्य पृथुमन्तर्मनोहरम् ॥

पिण्डमर्धाङ्गुलं प्रोक्तमङ्गुलानि चतुर्दश ।
निर्द्वन्द्वस्य च वामास्ये दक्षिणास्ये त्रयोदश ॥

प्रत्येकमास्ययोश्चर्म कार्यमेकाङ्गुलादिकम् ।
चत्वारिंशच्च रन्ध्राणामङ्गुलव्यवधानतः ॥

कुर्याद्रोमत्रिकाबन्धे रन्ध्रनिक्षिप्तकर्करैः ।
मुरजे मध्यमेतस्य त्रिभिर्वध्रैस्तु बन्धयेत् ॥

कुण्डलीद्वितयं प्रान्ते कृत्वा कच्छां निबन्धयेत् ।
लेपयेद्वदनद्वन्द्वं भक्तिमिश्रेण भस्मना ॥

टकारश्च धिकारश्च थोङ्कारश्चेत्थकारकः ।
नकारश्च सदोङ्कारः पाटवर्णा मृदङ्गजाः ॥

सोमराजदेवः

मुरजवादकः

वादको मुखरी गीतानुगः प्रतिमुखर्यपि ।
इत्थं चतुर्विधत्वेन प्रोक्तः मौरजिको बुधैः ॥

अथैषां क्रमतो वक्ष्ये लक्षणानि समानतः ।
वादो जल्पो वितण्डेति वादभेदो द्विधा मतः ॥

वीतरागः कथावादः स च पक्षपरिग्रहः ।
स्वपक्षसाधनं तद्वत्परपक्षस्य दूषणम् ॥

विजर्गीपुकथा जल्पः प्रतिपक्षेऽप्यसाधिते ।
जल्प एव वितण्डः स्यादिति तल्लक्षणत्वतः ।
वादं रागप्रधानत्वादत्र सम्यक् प्रपञ्च्यते ॥

कुम्भः

मुरजस्य पाटाक्षराणि

कच्छां शुभानुगां न्यस्येत् द्विगुणत्वमुपागताम् ।
अथ वामेऽन्यवदने पिण्डकान्तरिताकृतिम् ॥

भक्तस्य भूतिमिश्रस्य मर्दनाच्चिक्कणीकृताम् ।
विवेश्य बोहणाख्येनास्य च दक्षिणं लिपेत् ।
एवं च प्रभवेन्नादो मेघध्वनिमनोहरः ॥

कुम्भः

मुरजादिजातिवाद्यानि

आदौ मध्येऽवसाने च प्राचुर्यं यत्र देंकृतेः ।
आद्ये खण्डे द्वितीये च तादृगेव यदा भवेत् ॥

तत्र बोल्लावणी प्रोक्ता वाद्यविद्याविशारदैः ।
वाद्यान्तरेऽपि वाद्यं स्यादस्याः खण्डद्वयं यदि ॥

तत्तद्वाद्यप्रधानार्थौ पार्थक्येन प्रयोजितौ ।
देंकृतिं देंकृतिस्थाने हुडुक्कायां च मर्दले ॥

देंकृतिः करटायां स्यात्प्रधानाक्षरयोजना ।
एवमेव बुधैर्ज्ञेयाः पाटवाद्यान्तरेष्वपि ॥

चल्लावणी तु सा यत्र मण्डली वाद्यते यदा ।
बहुवस्तु सकोणेन ललितेन प्रवादनात् ॥

तालहस्तेन वामेन पाणिना दक्षिणेन तु ।
स्वस्तिकेन तु हस्तेन खकारबहुताश्रितम् ॥

उद्दलीपिहितं वक्त्रं वाद्यते सा कुचुम्बिनी ।
बोल्लावण्येव विज्ञेया चारुश्रवणिका बुधैः ॥

क्रमाद्वा युगपत्पाटैः पाणिभ्यां सूरिभिः कृतैः ।
सा द्विधा च क्रमाद्ज्ञेया पाटोपाधिवशाद्यदा ॥

शुद्धैः पाटैः कृता शुद्धा चित्रैश्चित्रा मता सताम् ।
अस्पृष्टकुण्डलीं कोणघातेनालग्नको भवेत् ॥

परिश्रवणिका सोक्ता वाद्यते यत्र तु क्रमात् ।
कर्तरी समपाणिश्च वाद्यवादनकोविदैः ॥

समप्रहारो वाद्यं स्यात्कराभ्यां युगपद्धतः ।
कुडुपादुद्भवं यत्र पाटा ये वाद्यसंश्रयाः ॥

तद्वाद्यं वाद्यमाचख्युराद्यं कुडुपचारणम् ।
केवलैर्हस्तपाटैर्या वाद्या सा करचारणा ॥

हस्ताभ्यां क्रमतो द्वाभ्यां मृदुना दक्षिणेन च ।
वाद्यते तादृशैः पाटैः दण्डहस्तः स उच्यते ॥

पाटैर्निरन्तरैर्द्वाभ्यां पाणिभ्यां पाणिनाथ वा ।
कुर्याद्घनरवं वाद्यं निरन्तरघनध्वनम् ॥

कुम्भः

मुरजाडम्बरम्

गत्वा विदिशि तत्रैव भवेदादत्तमण्डलः ।
सव्यापसव्यतो यत्र पार्श्वयोर्वर्तनान्वितः ॥

दक्षिणस्तु ततो वामः स्कन्धदेशमुपाश्रितः ।
क्षिप्रं विदिशि यात्वाथ लुठितस्सव्यपार्श्वके ॥

ततोऽन्यस्मिन् करे तिर्यक् नाभिदेशसमर्पणे ।
लुठत्येतत्समादिष्टं मुरजाडम्बरं बुधैः ॥

मुष्टिः—हस्तः

अङ्गुल्यः स्थलमध्यस्थाः सयाङ्गुष्ठनिपीडिताः ।
तथैवाङ्गुष्ठगर्भा वा भवेयुः मुष्टिके करे ॥

एष प्रहारव्यायामे निर्दयस्तनपीडने ।
संवाहनेऽसियष्टीनां दण्डकुन्तमदे तथा ॥

अवधान प्राङ्मुखाङ्गुष्ठाश्चापेऽङ्गुष्ठनिपीडितः ।
दोडने मल्लयुद्धादौ मध्यगाङ्गुष्ठको भवेत् ।
रसवद्द्रव्यजातस्य रसनिष्पीडने तथा ॥

सङ्गीतनारायणे

मुष्टिकस्वस्तिकौ

लताख्यावलितौ ज्ञेयौ स्वस्तिकीकृतकूर्परौ ।
अथ मूर्ध्नि विवृत्तौ तौ मुष्टिकस्वस्तिकौ मतौ ॥

कुम्भः

मुष्टिकस्वस्तिकयोर्लक्षणम्

एकं वर्तनयारालं तथान्यमलपल्लवम् ।
हस्तं मुहुः क्रमात्कृत्वा क्रियते स्वस्तिकाकृतिः ॥

कटकामुखहस्तौ चेन्मुष्टिकस्वस्तिको तदा ।
कपित्थौ शिखरौ मुष्टावथवा स्वस्तिकाकृती ॥

हम्मीरः

मुष्टिवर्तना

व्यावृत्तक्रियया मुष्टिः कृत्वा चोद्भ्रामयेन्मुहुः ।
सव्यापसव्यतो मुष्टिवर्तना सद्भिरीरिता ॥

अशोकः

मुहरीलक्षणम्

मुहरी काहलाकारा दारवी शृङ्गजाथवा ।
चतुरङ्गुलसंयुक्ता हस्तायामा विधीयते ॥
गुञ्जाकृतिमुखछिद्रं तस्याधो रन्ध्रसप्तकम् ।
चतुर्भिरङ्गुलैः कार्यं वंशरन्ध्रप्रमाणतः ॥

सोमराजदेवः

मूर्छना

मूर्छा मोहसमुछाययोः —
मूर्छते येन रागो हि मूर्छनेत्यभिसंज्ञिता ।
आरोहणावरोहणक्रमेण स्वरसप्तकम् ।
मूर्छनाशब्दवाच्यं हि विज्ञेयं तद्विचक्षणैः ॥

मतङ्गः

शुद्धनट्टादयस्तस्माज्जायन्तेऽन्ये मनोहराः ।
शुद्धनट्टः स विज्ञेयो ग्रहांशन्यासषड्जक. ।
ग्रामकैर्गीयते सायं यस्याद्या मूर्छना भृता ॥

कुम्भः

मूर्छामोहसमूहे स्यान्निष्पत्तिर्मूर्छनापदे ।
येनैव मूर्छते रागो मूर्छनेत्यभिशङ्किता ॥
मध्यसप्तकसंस्थेन षड्जेनारभ्यतेऽग्रिमा ।
अधोगतैर्निषादाद्यैर्मूर्छना षट्परा मताः ॥

कुम्भः

स्वरः संमूर्छते यत्र रागता प्रतिपद्यते ।
मूर्छनामिति तामाहुः कवयो ग्रामसंभवाः ॥
ललिता मध्यमा चित्रा रोहिणी च मतङ्गजा ।
सौवीरी षड्जमध्या च षड्जमध्यमपञ्चमाः ॥
मत्सरी मृदुमध्याच शुद्धान्ता च कलावती ।
तीव्रा रौद्रा तथाब्राह्मी श्री वैष्णवी खेचरी सुरी ॥
नादावती विशाला च त्रिषु ग्रामेषु विश्रुताः ।
एकविंशतिरित्यत्र मूर्छनाश्चन्द्रमौलिना ॥

शुभङ्करः

—(मध्यमग्रामे)

सौवीरी हरिणाश्वाथ स्यात्कलोपनता तथा ।
शुद्धमध्या तथा चैत्र मार्गी स्यात्पौरवी तथा ॥
हृष्यका चेति विज्ञेया सप्तमी द्विजसत्तमाः ।
मध्यमग्रामजा ह्येता विज्ञेयाः सप्तमूर्छनाः ॥

नाट्यशास्त्रे

—(षड्जग्रामे)

आदावुत्तरमन्द्रा स्याद्रजनी चोत्तरायता ।
चतुर्थी शुद्धषड्जा च पञ्चमी मत्सरीकृता ॥
अश्वक्रान्ता तथा षष्ठी सप्तमी चाभिरुद्गता ।
षड्जग्रामाश्रिता ह्येता विज्ञेयाः सप्तमूर्छनाः ॥

नाट्यशास्त्रे

मूर्छनातानयोर्भेदः

ननु मूर्छनातानयोः को भेदः । उच्यते । मूर्छनातानयोरनुत्वान्तरत्वमिति विशाखिलः । एतच्चासङ्गतम् । भरतस्य संग्रहश्लोके तु मूर्छनातानयोर्भेदस्य प्रतिपादितत्वात् । तत्कथं । मूर्छनारोहक्रमेण तानोऽवरोहक्रमेण भवति भेदः ।

मतङ्गः

मूला—(नक्षत्रहस्तः)

पूर्वोक्तार्धपताके तु तर्जनीमध्यमापि च ।
फणीवद्वक्रताकारे मूलार्धे संप्रयुज्यते ॥

शृङ्गारशेखरः

मृगकलासकः

पादाङ्गुलीभिराक्रम्य भूमिमुत्थाय जानुनी ।
मुहुरापातयेद्यत्र मृगशीर्षकराञ्चिता ।
गर्भखिन्ना मृगीवेयं लास्याङ्गैर्नृत्यतः परा ॥
हरिणप्लुतयाचार्या गुरुमानेन चेन्नता ।
त्रिविधं प्लुतिमाधत्ते तदा मृगकलासकः ॥

कुम्भः

पादाङ्गुलीभिराक्रम्य भुवमुत्थाय जानुनी ।
मुहुर्मुहुर्सन्निपात्य गर्भखिन्नमृगीव चेत् ।
सालस्यगमनोपतां मृगशीर्षकरान्विता ॥

अशोकः

—द्वितीया

नर्तकीगुरुमानेन हरिणप्लुतया प्लुतम् ।
विदध्याद्द्विविधां यत्र कलासोऽसौ मृगादिकः ॥

अशोकः

मृगी—गतिः

मृगीव चकिताङ्गैर्या त्वनुरागमनोरमा ।
प्रोक्ता मृगगतिः सैव नित्यसौन्दर्यवर्धिनी ॥

सङ्गीतमुक्तावली देवेन्द्रकृता

मृतिः—व्यभिचारिभावः

शरीरात्प्राणसन्त्यागो मृतिर्भवेत् ।

शुभङ्करः

मृदङ्गः

बीजवृक्षशरीरोऽयं कर्करैस्सुदृढीकृतैः ।
चर्मबद्धतलोपेतो ब्रह्मणा निर्मितः पुरा ॥
एकविंशाङ्गुलायामो मध्ये किञ्चित्पृथुर्भवेत् ।
मन्वङ्गुलमुखं वामं दक्षिणास्य त्रयोदश ॥
एकाङ्गुलाधिके वक्त्री चर्मणी वर्तुले घने ।
मध्ये तयोश्च रन्ध्राणि चत्वारिंशत्पृथक् पृथक् ॥
प्रान्ते रन्ध्राणि कुर्वीत तेषामङ्गुलमन्तरम् ।
तेषु रन्ध्रेषु वध्रे च सावरी तु ततो न्यसेत् ॥
तस्मिन् वध्रे तु प्रोतव्या विवरात्ककरात्मिका ।
अधश्चोर्ध्वे च कर्तव्या दृश्योदरनिदर्शनी ॥
मध्ये विवेष्टयेत्प्राज्ञस्त्रिभिर्वध्रैर्दृढं ततः ।
तत्र गोमूत्रिकाबन्धं द्विरन्ध्रं संमुखं न्यसेत् ॥
प्रान्ते कुण्डलते कार्ये कच्छाबन्धनहेतवे ।
तत्र कच्छां विनिक्षिप्य सव्यतो द्विगुणं न्यसेत् ॥
प्रोतां द्विगुणितां कक्षां वध्रमध्यां द्विरंचलाम् ।
कुर्वीत यस्य तन्नाम मृदङ्ग इति कीर्तितम् ॥

मृदङ्गायतिः

मध्ये सूक्ष्मलया प्रान्ते स्थूलो ज्ञेया पिपीलिका ।
पिपीलिकाविपर्या स्यान्मृदङ्गायतिरुच्यते ॥

कुम्भः

मृदङ्गलक्षणम्

तत्रादावुच्यते लक्ष्म मृदङ्गस्य क्रमागतम् ।
रक्तचन्दनतो बीजवृक्षाद्वाखादिरादपि ॥
वर्णाक्तकांस्यतो वापि मृदङ्गः क्रियते बुधैः ।
एकविंशत्यङ्गुलः स्याद्दैर्घ्ये मध्ये पृथुर्महान् ॥
हरीतक्याकृतिः पिंडे स्यादर्धाङ्गुलसंमितः ।
अङ्गुलैर्मनुभिर्वामे वदने दक्षिणे पुनः ॥
वह्नीन्दुनिर्मितस्त्रिंशदङ्गुलो दैर्घ्यतस्तु यः ।
अङ्गुलो नमितः पिण्डे वामास्ये द्वादशांगुलः ।
दक्षिणलोकपिण्डेऽस्य सार्धैरेकादशाङ्गुलैः ॥

कुम्भः

पुरा मुरासुरं हत्वा भगवान भक्तवत्सलः ।
तत्कलेबरमादाय मर्दलं कृतवान प्रभुः ॥
रक्तचन्दनपिण्डेन खादिरस्य च वा पुनः ।
निर्दोषिणान्यजेनापि कारयेन्मर्दलं सुधीः ॥
अष्टचत्वारिंशदाहुरङ्गुलानि प्रमाणकम् ।
चतुर्दश तु वामास्ये दक्षिणे तु त्रयोदश ॥
मध्येऽर्धाङ्गुल्युन्नमितं कुर्याद्वृत्तं तु मर्दलम् ।
तन्मध्ये कोटरं वृत्तं रन्ध्राकारेण कारयेत् ॥
चर्मत्रययुतं चक्रे द्वे कृत्वा तु ततः परम् ।
एकस्य मध्यमे भागे च्छेदयेद्द्वादशाङ्गुलम् ॥
तत्रकं योजयेदन्यचर्मणा चक्ररूपिणा ।
चक्रान्तयोः प्रकुर्वीत द्वात्रिंशन्नेत्रवृन्दकम् ॥
तद्वामास्ये क्षिपेच्चक्रमन्यस्यार्धातिमाजनं
द्वादशाङ्गुलमात्रं तु वर्धयेद्वर्तुलाकृतिम् ॥
मेलयित्वा तु मध्येन चक्राकारेण चर्मणि ।
तद्दक्षिणास्ये निक्षिप्य चक्रबन्धं प्रकल्पयेत् ॥
त्र्यङ्गुलद्वयसेनाथ चतुर्धान्येन चर्मणि ।
चक्रद्वये दृढं गृह्णन्नेतेषु च यथाक्रमम् ॥
एकाङ्गुलप्रमाणेन तथान्येनाजिनेन च ।
चक्रं गोमूत्रिकाबन्धाकारेणावेष्टयेद्दृढम् ॥
तत्सन्नादविधानं यत्त संस्कारं प्रकल्पयेत् ।
एतल्लक्षणसंयुक्तं नन्दिकेश्वरदैवतम् ।
गीते नृत्ते मर्दलं तु वादयेत्तालकोविदः ॥

भरतकल्पलता

मृदङ्गस्वरूपम्

निर्दोषबीजवृक्षोत्थो मृदङ्गः परिकीर्तितः ।
रक्तचन्दनजो यद्वा खादिरो वाथ चान्दनः ॥
पिण्डमर्धाङ्गुलं तस्य पृथुमध्यं मनोहरम् ।
अङ्गुलैरेकविंशत्या दैर्घ्यमानमुदाहृतम् ॥
चतुर्दशाङ्गुलानि स्युर्वामास्ये तु त्रयोदश ।
दक्षिणास्ये द्वयोश्चर्म देयमेकाङ्गुलाधिकम् ॥

चत्वारिंशत्स रन्ध्राणि त्वङ्गुलव्यवधानतः ।
कार्यो गोमात्रिकाबन्धो रन्ध्रेषु प्रोतवध्रकैः ॥
भूशं दृढाय मध्यं तु त्रिभिर्वध्रैस्तु बन्धयेत् ।
कुण्डलीद्वितयं प्रान्ते कृत्वा कच्छानि बन्धयेत् ॥
मुखं विलेपयेद्वामं नक्तमिश्रेण भस्मना ।
दक्षिणं भोहणाख्येन कल्कां न्यसेत्सुवाससा ॥
सम्यग्निष्पादितो धीरगंभीरं तनुते ध्वनिम् ।
त्रिंशदङ्गुलिदीर्घो वा पिण्डस्त्वङ्गुलसम्मितः ॥
कार्यं वामाननं तस्य द्वादशाङ्गुलमानतः ।
दक्षिणं तु मितं सार्धैरेकादशभिरङ्गुलैः ॥
श्रीकण्ठेन समुद्दिष्टा देवता जगदीश्वरः ।
पाटाश्च तद्धि धोटने हैन्दमित्यत्रकेवलाः ॥
अत्यन्तत्वरितस्फुर...युगो वाद्ये प्रवीणोऽखिल-
वर्णव्यक्तिपरायणो यतिलयाभिज्ञः सुरेखः सुधीः ।
पाटोद्धट्टनतत्परः श्रमजयी मोक्षोऽपि दक्षो ग्रहे
श्रोतुर्मानसरञ्जको भुवि मतो मार्दङ्गिको नान्यथा ॥

कुम्भः

मेघरागः

मेघः पूर्णो मलयः स्यादुत्तरायतमूर्छनः ।
विकृतो धैवतो गेयः शृंगाररसपूरकः ॥
नीलोत्पलाभा वपुरिन्दुचेलः
पीताम्बरस्तृषितचारुतयाच्यमानः ? ।
पीयूषमन्दहसितो घनमध्यवर्ती
वारेषु राजति युवा किल मेघरागः ॥
ध नि स रि ग प म ध

संगीतदर्पणः

मेलापकः

उद्ग्राहध्रुवयोर्योगादिति मेलापकः स्मृतः ।
तस्मादन्वर्थनामत्वं ध्रुवस्य कथितं बुधैः ॥

सङ्गीतसूर्योदयः

मेलापकः पुरा प्रोक्तो मेलनादुभयोस्तयोः ।

सोमराजदेवः

मेलापनी

तिर्यक्पताके चोत्ताने त्वन्येनाच्छादिते सति ।
यथा भ्रमर्यां भ्रमरी प्रोक्ता मेलापनी बुधैः ॥

कुम्भः

मेषः—(राशिहस्तः)

करो मृगजामुखाभिख्यो मेषराशौ प्रयुज्यते ।
काङ्गूलश्चापि विज्ञेयो मेषराशौ गुरोर्मते ॥

शृङ्गारशेखरः

मैनवी—गतिः

कोपान्तर्गतमीनस्य विश्रान्तिरणिता गतिः ।
यथा तथैव नटति सा गतिर्मैनवी मता ॥

सङ्गीतमुक्तावली

मोटितः

एकः पादः समस्त्वन्यः कुञ्चितोर्ध्वतलाङ्गुलिः ।
अग्रतावूर्ध्वगौ हस्तौ कर्कटौ मोटिताभिधम् ।
कामावस्थासु सर्वासु विनियोगोऽस्य कीर्तितः ॥

कुम्भः

मोट्टायितः—(सात्विकभावः)

शरीरविकृतिर्लज्जादिकमङ्गादिमोटिकम् ।
मुरारेश्चरितं श्रुत्वा गोप्या मोट्टायितो यतः ॥

यद्वा—

दृष्ट्वा श्रुत्वाथवा कृष्णं गात्रभङ्गीविजृम्भणम् ।
कर्णकण्डूयनं गोपस्त्रीणां मोट्टायितो मतः ॥

शुभङ्करः

वल्लभस्तुतिसल्लापलीलाहेलादिभिर्यदा ।
तद्भावभावनं यत्तु तन्मोट्टायितमुच्यते ॥

वेमभूपालः

मोहः—(व्यभिचारिभावः)

दुःखावेशचिन्तनप्रभवचित्तविक्षेपो मोहः ।

शुभङ्करः

मौलिरेचितकम्

कटिदेशगतस्त्वेकोऽपरस्तु पुरतो गतः ।
अथैतौ केशपर्यन्तं लीलया लुठितौ यदि ।
तथाब सद्भिराख्यातं मौलिरेचितकं तथा ॥

मौळिः

मौळिस्तु त्रिविधो ज्ञेयः किरीटी पार्श्वकस्तथा ।
मस्तकी चेति तेषां तु विनियोगो निगद्यते ॥
उत्तमानां तु देवानां किरीटी मौळिरिष्यते ।
मध्यमानां मनुष्याणां मौळिः पार्श्वगतो मतः ॥

इतरेषां तु देवानां मस्तकी मौलिरिष्यते ।
उत्तमानां महीपानां कार्यो मौलिः किरीटवान् ।।
इतरेषां यथादेशस्वभावं परिकल्प्यते ।
मस्तके युवराजस्य तथा सेनापतेरपि ।
कर्तव्यमर्धमकुटं नाट्ये नाट्यविचक्षणैः ।।

य

यकलः—गायकः
एको गानं करोत्येव यकलः कथ्यते बुधैः ।
भरतकल्पलता

यद्रुपुः
त्रिस्थाने स्वरदीर्घं च व्याहं यद्रुपुरुच्यते ।
भरतकल्पलता

यतिः
कूटवर्णैरेकरूपै रचितोऽतिमनोहरः ।
विरावैरभिघातैश्च बहुभिश्छन्दसोज्ज्वलः ।
यावद्यतो वाद्यखण्डे यतिरित्यभिधीयते ।।
कुम्भः

यतिलक्षणम्
तालच्छन्दोऽभिरामो यो विरामः श्रुतिसौख्यदः ।
वाद्यते पाटरहितः सा यतिः परिकीर्तिता ।।
सोमराजदेवः

यतिप्रकरणे अङ्गलक्षणम्
पाटं विनैव या शुद्धा यतिरूपं तदुच्यते ।
सोमराजदेवः

यन्त्रकाकुः
वंशवीणादियन्त्रोत्था छाया या यत्र दृश्यते ।
रागे सा विबुधैर्ज्ञेया यन्त्रकाकुरिति स्फुटम ।
कुम्भः

यन्त्रच्छाया
वीणावंशादियन्त्रोत्था यन्त्रच्छाया स्मृता बुधैः ।

दृश्यन्ते यत्र मन्द्रोत्थरागेष्वेव विचक्षणैः ।
बाहुल्यात्ते तु विज्ञेया छाया यन्त्रसमुद्भवा ।।
कुम्भः

यन्त्रजश्रुतिविभागः
नादान्ता निःकला गूढाः सकला मधुरा तथा ।
ललितैकाक्षरा भृङ्गजातिश्च रसगीतिका ।।
रञ्जिका चापरा पूर्णा तथालङ्कारिणी मता ।
वैणिका ललिता चैव त्रिस्थाना सुस्वरा तथा ।।
सौम्या भाषाङ्गिका चाथ वार्तिका व्यापका तथा ।
प्रशंसा सुभगा चेति यन्त्रजाः श्रुतयः स्मृताः ।।
हम्मीरः

यमः—हस्तः
तर्जनीमध्यमे सम्यक्कुञ्चिते तलमाश्रिते ।
शेषाः प्रसारितास्सोऽयं नाम्नायं यमहस्तकः ।
प्राणायामे महायोगे यजमानस्य भावने ।।
भरतकल्पलता

यमलः—गायकः
गानं द्वितीयसहितः करोति यमलो मतः ।
भरतकल्पलता

यमलहस्तः—पाटः
दक्षिणः पीडयित्वाद्यं वादयेदितरः पुनः ।
अवष्टभ्य पुटं हन्यात् तदा यमलहस्तकः ।।
यथा—
कुं द २ थों हें तों हें डा . कुम्भः

यमलहस्तकः—हौडुक्किकपाटः
हस्ताभ्यां यत्र रेफाभ्यां ऊर्ध्वघातद्वयं पृथक् ।
विधीयते यतोः वाद्ये युगहस्तः प्रजायते ।।
दां दां कुम्भः

योगप्रदः
संश्लिष्टाग्रौ पताकौ चेद्धस्तौ योगप्रदस्तदा ।
मेलने प्रतियोगे च परस्परमयं मतः ।।
कुम्भः

योगिनामचञ्चलता
देहात्ममानिनां तेन नीचानां झटिति स्फुरन् ।
उत्तमानान्तु देहादिव्यतिरिक्तात्ममानिनाम् ।।
एकैकशीलिनां नीचान्तबहिर्दृश्यते क्वचित् ।
योगिनां सर्वथा नेति तैर्यथैकोपादिश्यते ।।
कुम्भः

योग्यभ्यासशिक्षा

न चातिव्यग्रमनसा तारकाया विलोलितम्।
शक्यक्रियं न वा योग्यभ्यासशिक्षात्र कारणम् ॥
स्तम्भादावपि सा तुल्ययोगक्षेमोऽत्र दृश्यते।
एकाग्रबुध्यवसाय शून्ये नाट्ये नर्तने च।
किञ्चिदप्यधुना कर्तुमशक्यं विद्यते क्वचित् ॥

कुम्भः

यौवतम्—लास्यम्

मधुराबद्धलीलाभिर्नटीभिर्यत्र नृत्यते।
वशीकरणविद्याभं तल्लास्यं यौवतं स्मृतम् ॥

सङ्गीतनारायणः

यौवनम्

पीवरोरुजघनं कठिनोच्चैः पीनमूलघनसंभ्रमस्तनम्।
मन्मथस्य मृतजीवनौषधं यौवनं निगदितं द्वितीयकम् ॥

कुम्भः

—प्रथमम्

यौवनत्रितयं पात्रे प्रथमादिविभेदतः।
नीचाधारस्तनाभोगकपोलजघनोरुजम्।
सुरतं प्रति सोत्साहं प्रथमं यौवनं मतम् ॥

—द्वितीयम्

पीनोरुजघनं पीनकठिनोच्चघनस्तनम्।
जीवितं यौवनस्योक्तं द्वितीयं यौवनं बुधैः ॥

—तृतीयम्

उन्मादकं प्रियाजुष्टं सम्पन्नरतिनैपुणम्।
कामशिक्षितभावं तु तृतीयं यौवनं विदुः ॥

सङ्गीतनारायणः

र

रक्तः

रक्तः स्यादठणो रौद्रे करुणेऽद्भुतवीरयोः।

कुम्भः

रक्तवांशिकलक्षणम्

स्थायकामिनयाभङ्गो गमकाढ्यः स्फुटाक्षरः।
शीघ्रहस्तकलाभिज्ञः वांशिको रक्त उच्यते ॥

सङ्गीतनारायणे

रक्षिजनस्थापनम्

तत्र रक्षिजनास्थाप्या अप्रमत्ताः समन्ततः।
एवं विधानसम्युक्ता नाट्यवेश्मभुवो विदुः ॥

कुम्भः

रङ्गकर्म

रङ्गशब्देन तत्कर्मोच्यते तौर्यत्रिकाश्रितम्।
तत्पूर्वभागे विद्वद्भिः पूर्वरङ्ग उदीरितः ॥

कुम्भः

रङ्गतालः

चतुर्द्रुतास्तु गुर्वन्ता रङ्गताले प्रतिष्ठिताः।

कुम्भः

रङ्गदेवतामन्त्राः

ओंकारमात्रयं दत्त विषादे सर्वसिद्धये।
प्रदेयेति नमोन्तो यं शृङ्गारे मन्त्रनायकः ॥
शृङ्गाररसदेवानामयं मन्त्रः प्रकाशकः।
ओं अं अं अं विद्महे सर्वसिद्धिप्रदाय नमः ॥
ओं हंकारमात्रयं दत्वा प्रमथाधिपतयेदं।
मां रक्ष युग्ममोन्नमो न हास्यमन्त्रोयमीरितः ॥
ओं हं हं हं प्रमथाधिपतये मां रक्षरक्ष ओं नमः।
ओं मिङ्कारत्रयमिन्द्राय वज्रपाताय इत्यपि।
रक्ष रक्षेति हं फट् मन्त्रो वीररसे मतः ॥

ओं इं इं इ इन्द्राय वज्रपाणये रक्ष रक्ष हुंफट्। इति वीररसे ओं ब्रह्मणो वास्तुपुरुषाय सर्वलोकपितामहाय नाट्याधिपतये वायमो चमोन्तोद्भुतोनमः ?।

ओं ब्रह्मणे वास्तुपुरुषाय सर्वलोकपितामहाय नाट्याधिपतये नमः। ओं हुं कारद्वयं सर्वविघ्नविनाशाय च।

चण्डरूपाय च ततः सकामप्रदाय च।
हुं अघोराय पदं मूर्तये इति पदं ततः।
महाकालाय नमोऽन्तो बीभत्समन्त्र ईरितः ॥

ओं हु हुं सर्वविघ्नविनाशनाय चण्डरूपाय सर्वकामप्रदाय हुं अघोराय मूर्तये महाकालाय नमः इति बीभत्से। ओं नमो भूतपतये प्रेतपरिवृताय च।

भूतहृदयाय पदं कालरूपिण इत्यपि।
ठकारयुगलं चान्ते मन्त्र एष भयानके ॥

ओं नमो भूतपतये प्रेतपरिवृताय भूतहृदयाय सकलरूपिणे ठठ इति भयानके । ॐ नमो भगवते रुद्राय ततः । कोवेश्वराय च नमो ज्योतिःपतंगाय सिद्धिरुद्रायाज्ञापयति सिद्धिं देहि स्वाहा इति रौद्रे । ॐ यमाय दण्डहस्ताय सर्वसमाय हुं त्रयं । यं त्रयं करुणे मन्त्रो नमोऽन्तोयं प्रकीर्तितः । ॐ यमाय दण्डहस्ताय सर्वसमाय हुं हुं हुं यं यं यं नमः । ततो विघ्नविनाशार्थं जर्जरं पूजयेत्पुनः ।

सङ्गीतसर्वस्वम्

रङ्गप्रतिष्ठा

श्रीरङ्गमण्डपे चास्मिन् सरसं सर्वरञ्जकम् ।
यथोक्तरसोपेतं प्रेक्षणीयं प्रकुर्वते ॥

कारयान्त्युपशृण्वन्ति ते धन्याः पृथिवीतले ।
असारे खलु संसारे तेषामेव तनूभृताम् ।
जीवितं च धनं जन्म सारभूतं प्रकीर्तितम् ॥

हम्मीरः

रङ्गभूमिः

विलम्बितलयोऽभीष्टमानसासारितस्य तु ।
कलाकलापसम्युक्तो पोहनस्यार्थभागितः ॥

समाश्वतस्रश्चतुरा नर्तक्यः पुष्पपाणयः ।
अन्तर्धानमथाकृत्यालंकुर्यू रङ्गभूमिकाम् ॥

तत्रावकीर्य पुष्पाणि नमस्कुर्युः क्रमेण ताः ।
इन्द्रादिलोकपालेभ्यः परिवृत्य चतुर्दिशम् ॥

वन्दनानि प्रकुर्वन्ति चतस्रः परिवर्तनान् ।
उपोहनार्थाभिनयमङ्गहारैः प्रयुज्यताम् ।
पिण्डीं बध्नन्ति तत्रस्थाः कनिष्ठासारिताश्रये ॥

कुम्भः

रङ्गभूमिपूजा

अवधाय ततः कार्यं रङ्गभूमिप्रपूजनम् ।
पश्चिमाभिमुखी नटरम्याणां भूषणाम्बरैः ॥

नायकाभिमुखीनां तु गायन्तीनां परस्परम् ।
ताले कृतावधानानां नटीनामुपवेशनम् ॥

पार्श्वयोरुभयोस्तासां मृदङ्गानां चतुष्टयम् ।
दक्षिणे मुरजस्तापं पृष्ठे यवनिकान्तया ॥

तन्मध्ये मण्डलस्थाने नेपथ्यं तत्र नीयते ।
तत्रोपविश्य पात्रैस्तु कर्तव्यं मण्डलादिकम् ॥

मुक्षेताम् मुरजस्यात्र तेनागीतस्य नाटके ।
ताभ्यां विनोपहासाय नाटकं जायते किल ।
वर्णिकावरणार्थाय बुधैर्यवनिका मता ॥

जगद्धरः

रङ्गभूषणताललक्षणम्

गुरुद्वये लघुद्वन्द्वं लुप्तैको रङ्गभूषणः ऽ ऽ ॥ ऽ

सोमराजदेवः

रङ्गमण्डपम्

प्रेक्षार्थं स्निग्धरम्यायां भूमौ श्रीरङ्गमण्डपम् ।
प्रकृष्टं चतुरस्रं च शस्तं च परिकल्पयेत् ।
प्रमाणत्रयमेतस्य श्रेष्ठं मध्यं तथाऽधमम् ॥

हम्मीरः

रङ्गमण्डलम्

दूतीदर्शितमार्गस्तु प्रविशेद्रङ्गमण्डलम् ।
तस्याद्य प्रकृतिं ज्ञात्वा भावं कार्यं च तत्त्वतः ॥
गतिप्रचारं विभजेन्नानावस्थान्तरात्मकम् ।
म्लेच्छानां जायते यस्तु पुलिन्दाद्याः द्विजोत्तमाः ॥
तेषां देशानुरूपेण कार्यं गतिविचेष्टितम् ।
पक्षीणां श्वापदानां च पशूनां च द्विजोत्तमाः ॥
स्वस्थजातिसमुत्थेन भावेन प्रतियोजयेत् ।
सिंहश्वाननराणां च गतिः कार्या प्रयोक्तृभिः ॥
या कृता नरसिंहेन विष्णुना प्रभविष्णुना ।
अलातस्थानकं कृत्वा गात्रं तस्यैव चानुगम् ॥
जानूपरिकरं त्वेकमपरं चैव खस्थितम् ।
अवलोक्य दिशः सर्वाश्चिबुकं बाहुमस्तके ॥
गन्तव्यं विक्रमैर्विप्राः पञ्चतालान्तरोत्थितैः ।
शेषाणामर्थयोगेन गतिं स्थानं प्रयोजयेत् ॥
शेषं स्थानं प्रयोगेषु रङ्गावतरणेषु च ।
एवमेते प्रयोक्तव्या नराणां गतयो बुधैः ॥
आतोद्यैर्वाद्यमानेषु यतिप्रहरणादिषु ।
रुद्रभक्ताः स्त्रियो यद्वा पुमांसः सौष्ठवान्विताः ॥
रुद्राक्षवलयं भस्मत्रिपुण्ड्रः शिवरूपिणः ॥

कुम्भः

रङ्गस्थलदैवतानि

शरच्चन्द्रप्रतीकाशाथवा बालार्कसंनिभा ।
नानावर्णाथवा रत्ननिकरैः खचिता नवा ॥

कोणेषु परितश्चापि मुक्ताजालपरिष्कृता ।
चिह्निता देवतैस्तत्तत्स्थानभागनिवेशितैः ॥
मध्ये महेश्वरः पार्श्वे चतुर्मुखचतुर्भुजौ ।
सूर्याचन्द्रमसौ तेषां सव्यदक्षिणपार्श्वयोः ॥
तारकाः स्युस्तत्परितो देव्यस्तत्कोणगाः स्मृताः ।
वामे सरस्वती ह्रीं तारकावीशकोणगा ॥
भैरवी नैऋतेः कामगामिनी दक्षिणे पुनः ।
गोरक्षः सिद्धनाथस्तु पश्चिमे पूर्वदिग्गतः ॥
मीननाथ उत्तरस्यां चतुरङ्गं क्रमादिमाः ।
देवताः पूजयेत्पूर्वं स्थानेषूक्तेषु मन्त्रवत् ॥

कुम्भः

रङ्गश्रमविधिः

नृत्ये च तालरूपेण सिद्धिर्नान्येन रूपतः ।
चार्वधिष्ठानवन्नृत्तं नृत्तमन्यद्विडम्बनम् ॥
विघ्नेशं भारतीं देवीं ब्रह्मविष्णुमहेश्वरान् ।
रङ्गं तद्देवतास्तालं वाद्यभाण्डानि च क्रमात् ॥
उपाध्यायं नृत्तकन्यां स्तम्भयुग्मं च दण्डिकाम् ।
कस्तूरिकाचन्दनाद्यैः सामोदैरनुलेपनैः ॥
शुभ्रैः सुगन्धिभिः पुष्पैर्धूपैरागात्रिकैरपि ।
नैवेद्यैर्वस्त्रैस्ताम्बूलैर्वालिभिस्तथा ? ॥
अर्चयित्वा शुभे लग्ने प्रारभेत श्रमं सुधीः ।
स्तम्भद्वयोपरि न्यस्यत्कन्यां हृदयसंमिताम् ॥
हस्तमाह्यां तिरश्चीनामवष्टम्भामदण्डिकाम् ।
विदित्वा चोलनं रेखातालसाम्यं लयानपि ॥
अङ्गादीनि पुरोक्तानि लास्याङ्गान्यखिलान्यपि ।
गीतवाद्यानि सुमनः शिक्षेत सुमनाः सती ॥

हम्मीरः

रङ्गाङ्गानि

अस्तोकलोकव्यापारभारजर्जरितात्मनाम् ।
विश्रामाय कृतं राज्ञां सङ्गीतं ब्रह्मणा पुरा ॥
अङ्गानि तस्य सप्त स्युः सभासभ्याः सभापतिः ।
उपाध्यायो गायकाश्च वादकाश्च नर्तकी ॥

हम्मीरः

रञ्जकः

मनो हरति गीतेन विदित्वा श्रोतुराशयम् ।
रङ्गं गीते विधत्ते यो रञ्जकः सोऽभिधीयते ॥

कुम्भः

रतितालक्षणम्

रतितालो लघुर्गुरुः (। ऽ)

सोमराजदेवः

रतिलेखाया लक्षणम्

रुद्रसङ्ख्या कला आद्ये पादे तद्वद्द्वितीयके ।
मात्रा दश तृतीयेऽह्नि रतिलेखा रते गणः ॥

मोक्षदेवः

रतेः स्थायिता

प्रारम्भात् फलपर्यन्तां व्यापिनी स्मरसंभृता ।
संविदोरैक्यसंपत्त्या क्रोडातः स्थायिनी रतिः ॥

हम्मीरः

रथचक्रचारीलक्षणम्—(देशी चारी)

चतुरस्रस्थितौ पादौ संहतौ परिसर्पतः ।
पुरतः पृष्ठतो यद्वा रथचक्रा तदोदिता ॥

मोक्षदेवः

रथचक्रा—गतिः

चतुरश्रस्थितौ पादौ भलग्नौ चेत्प्रसर्पतः ।
परतः पृष्ठतः पार्श्वे रथचक्रा तदोदिता ॥

संगीतमुक्तावली देवेन्द्रकृता

चतुरश्रगमं कृत्वा संलग्नौ चेत्प्रदर्शयेत् ।
पादावग्रेच पृष्ठे वा रथचक्रा तथा स्मृता ॥

कुम्भः

रथनेमिसमम्

आदिमध्यावसानेषु दधतौ स्वस्तिकाकृती ।
तथा चक्रकृती तिर्यगेकदा क्रमतोऽथवा ।
हस्तौ विलुठितौ यत्र रथनेमिसमं विदुः ॥

रथोद्धतं नर्कुटम्

चत्वारश्चेष्टुभाः प्रोक्तं नर्कुटं तद्रथोद्धतम् ।
मुनिना भरतेनाह तदुदाहरणं ब्रुवे ॥
शारदामितनवचन्द्रशेखरं भालवह्निकवलीकृतस्मरम् ।
वामभागकृतकामिनीवरं भावयन्तु यमिनं महेश्वरम् ॥

विप्रदासः

रसदृष्टिलक्षणम्

जातहर्षप्रसादाभ्यां दृष्टिः कान्तासमं तथा ।
सभ्रूक्षेपकटाक्षा च रसे शृङ्गारसंज्ञिके ॥
क्रमेणाकुञ्चितपुटा किञ्चिद्विभ्रान्ततारका ।
कुहकाभिनया दृष्टिर्हास्य हास्यरसे मता ॥
प्रभ्रष्टोष्ठपुटा सा भ्रूशोषमन्थरतारका ।
नासाग्रनिहिता दृष्टिः करुणा करुणे रसे ॥
विमुद्धपुटतारा तु क्रूरा रूक्षा तथारुणा ।
भ्रूभङ्गकुटिलो धृत्वा क्षौद्री रौद्ररसे भवेत् ॥
क्षुब्ध्या विकसिता दीप्ता गम्भीरा समतारका ।
उत्फुल्लमध्या दृष्टिः स्याद्वीरा वीररसाश्रये ॥
उद्भ्रान्तादिस्फुरत्तारास्तब्धयोद्वृत्तपुटद्वया ।
दृष्टिर्भयान्तका प्रोक्ता भयानकरसे मता ॥
संश्लिष्टस्थिरपक्ष्मा तु घृणोपप्लुततारका ।
निकुञ्चितपुटोपान्ता बीभत्सा दृष्टिरिष्यते ॥
सौम्या विकसिता तारा साश्रयोद्वृत्ततारका ।
समाकुञ्चितपक्ष्माग्रा दृष्टिः स्यादद्भुताद्भुते ॥

सोमराजदेवः

रसविकल्पनम्

अष्टावेव रसा इति केचित्, केचिन्नवेति, दशेत्यपरे । तेन संशयलोलानां प्रीतये किञ्चिदुच्यते । तथाहि–विभावादिभिः स्वादतां नीयमानो भावः स्थायी रस इति प्रत्यज्ञायि । स च स्वादानन्दलक्षणो, वस्तुत एकोऽपि, उपाधिभेदादनेकधा भिद्यते । उपाधिरपि चिद्भूमिकैव । ताश्च प्राधान्याच्चतस्रः, विकासो, विस्तरः, क्षोभो, विक्षेप इति । तत्र विकासोपाधिकः स्वादः शृङ्गारः । विस्तारोपाधिको वीरः । क्षोभोपाधिको बीभत्सः । विक्षेपोपाधिको रौद्रः । हास्याद्भुतभयानककरुणेष्वपि विकासादिरेवोपाधिरिति हास्यादीनां चतुर्णां शृङ्गारादिजन्यत्वम् । यदुक्तं—

स्वादुकाव्यार्थसंभेदादात्मानन्दसमुद्भवः ।
विकासविस्तरक्षोभविक्षेपैस्स चतुर्विधः ॥
शृङ्गारवीरबीभत्सरौद्रेषु मनसः क्रमात् ।
हास्याद्भुतभयोत्कर्षकरुणानां त एव हि ।
अतस्तज्जन्यता तेषां मत एवावधारणम् ॥

अत्र विकासादिचित्संभेदाभेदेन हेतुहेतुमद्भाव एव रसानां विवक्षितः, न तु कार्यकारणभावः, तेषां प्रत्येकं विभावादिकारणभेदस्य दृष्टत्वात् ।

शृङ्गारानुकृतिर्या तु स हास्य इति संज्ञितः ।
वीरस्य चापि यत्कर्म सोद्भुतः परिकीर्तितः । इति भरतः ॥

तेषां सात्त्विकादिसंभेदैक्यमेव स्फुटं विभाव्यते । शृङ्गारहास्ययोर्विकासः, वीराद्भुतयोर्विस्तरः, बीभत्सभयानकयोः क्षोभः, रौद्रकरुणयोर्विक्षेप इति । तेषां द्वयोर्द्वयोः संभेदैक्येऽपि नास्त्येव साङ्कर्यम्, प्रतिरसं नियतभावादेरेव विकासादिरूपविशेषस्यापि सिद्धेः । शृङ्गारविभावादेरन्य एव हास्यविभावादिः । अतस्तज्जन्येऽपि विकासरूपेऽपि उभयौ कोऽपि विशेषः काव्ये कल्प्यः, येन भेदः सिद्ध्येत् ।

तयोर्हेतुहेतुमद्भावोऽपि सिद्धः । तत्र हेतुत्वं तत्प्रयोजकमेव । एतदुक्तं भवति । धाराधिरूढ इव शृङ्गारे, प्रत्यासीदति च हास्ये, तदुन्मेषहेतोर्विकासात्मिकायाश्चित्तभूमेस्समुद्भावनप्रवीणकारण - कलापव्यापारस्य स्वकार्यनिर्वहणसिद्धेः पूर्वोत्तरायास्तथाविधाया भूमिकायाः शृङ्गारानुगुणाया हास्यंप्रत्यनुकूलत्वाच्च, समानाकारयोः परस्परोपात्तकार्यकारणप्ररूढप्रागल्भ्ययोः, अन्योन्यसङ्कलनसातत्यप्रत्यस्तमितभेदवादयोः, तुल्याधिकारयोः, समरसीभूतयोः, चित्तभूमिकयोरेकात्मतायाः प्रतीतेः शृङ्गारबीजस्य हास्यं प्रति निमित्तत्वप्रतीतिसिद्धौ सिद्धैवेयं वाचोयुक्तिः "शृङ्गाराद्धि भवेद्धास्य" इति । इयमेव प्रक्रिया वीराद्भुतादिद्वयेष्वपि द्रष्टव्या । एतच्च विकासादिसंभेदचतुष्टयस्यैव रसभेदोपाधिकत्वेन सङ्ग्रहात् ।

रसविवेकः

रसस्वरूपविचारः

ननु कोऽयं रसो नाम पदार्थस्तद्विचार्यते ।
रस्यते वा सहृदयैः स्वयं वा रस्यते रसः ॥
सामाजिकान् रसयति ते वायं रसयन्ति च ।
रसनं वा नटेनाथ चित्तवृत्तिर्नटस्य यः ॥
रसतीति रसो वा स्यात् रसयत्यथवा रसः ।
रामः स्याद्वा न वेत्यादिप्रतीतिं नटसंश्रिताम् ॥
अथवा रस्यते सभ्यै रामोऽयमिति तत्त्वतः ।
इत्यादिपक्षस्तद्विद्भिरादृता रसरूपणे ॥

कुम्भः

रसस्वरूपे लोल्लटमतम्

विभावैर्जनितो भावोऽनुभावैरनुबोधितः ।
व्यभिचारिभिरास्फीतो रस इत्यभिधीयते ॥
स चानुकार्ये रामादौ वर्तते मुख्यवृत्तितः ।
तद्रूपतानुसन्धानान्नर्तकेऽपीति लोल्लटः ॥

व्यावर्त्य सम्यमिथ्याभ्यां कोटिद्वयविलम्बतः ।
ज्ञानात्तत्सदृशाकारप्रतीतेश्च निरासतः ॥
तत्तद्विलक्षणास्थानाच्चित्ररूपकवन्नटः ।
सेयमित्येष सर्वासमाह्यः सामाजिकैरिह ॥

कुम्भः

रसहेतुविचारः

नन्वत्र भारते सूत्रे विभावाद्या रसस्य हि ।
हेतुत्वेन समादिष्टाः कविवासनया पुनः ॥
रसेभ्यो भावनिष्पत्तिर्वैपरीत्यमिदं भवेत् ।
नैवमत्र स एव स्यात् कश्चिदर्थः प्रवर्तते ॥
न रसेन विनालैवं संमतिस्तस्य दृश्यते ।
परस्परकृता सिद्धिस्तयोरभिनयो भवेत् ॥

कुम्भः

रसाः

शृङ्गारहास्यौ करुणो रौद्रो वीरो भयानकः ।
बीभत्सश्चाद्भुतः शान्तो नवधेति रसो मतः ॥
शान्तस्य शमसाध्यत्वात् नटे च तदसम्भवात् ।
अष्टावेव रसा नाट्येष्विति केचिदचूचुदन् ॥

हम्मीरः

रसानां जन्यजनकभावः

साम्या ह्यधिरसो ह्यवा विभावा व्यभिचारिणाम् ।
बीभत्से सति भीरूणामुत्पद्येत भयानकः ।
अन्योन्यजन्यजनकाः भवन्त्येवमिमे रसाः ॥

हम्मीरः

रसानां निश्चयकारणम्

फलं बन्धुवधो रौद्र विभावो वारयोश्च सः ।
जगदुस्तद्विदो रौद्रमतः कारणकारणम् ॥

हम्मीरः

रसानां सङ्करे स्थाय्यैकत्वम्

एक एव रसः स्थायी रसानां यत्र सङ्करः ।
अन्ये चास्योपकाराय जायन्ते व्यभिचारिणः ॥

जगद्धरः

रसाश्रयः

तत्प्रधानप्रबन्धानामनुपादेयता यतः ।
सर्वोऽपि प्रेक्षकादेव रसः पर्यवसीयते ॥

कुम्भः

रसेषु वृत्तयः

कैशिकीवृत्तिराख्याता रसे शृङ्गारनामनि ।
मुख्ये वीरे सात्त्वती स्यात्तथा रौद्रेऽद्भुते क्वचित् ॥
नियतारभटीवृत्ती रसे रौद्रसमाह्वये ।
भयानके च बीभत्से वीरे चापि भवेत्क्वचित् ॥
भयानकेऽद्भुते हास्ये करुणे चापि भारती ।
सूच्यमाने रसाभासे बीभत्सेऽपि क्वचिद्भवेत् ॥

वेमभूपालः

रसोत्पत्तिदेशाः

शम्भोः पश्चिमवदनाद्वाम्यशृङ्गारसंभवः ।
उत्तराद्वदनादेव वीरसञ्ज्ञो रसोऽभवत् ॥
भयानकश्च बीभत्सो दक्षिणाद्वदनादभूत् ।
पूर्ववक्त्राच्च सञ्जातौ रौद्राद्भुतरसावुभौ ॥
पञ्चमाद्वदनाज्जातः करुणः शान्त इत्यपि ।
विभावभावहीनोऽयं नवमो रस इष्यते ॥

संगीतसर्वस्वम्

रागः

स्वरवर्णविशेषेण ध्वनिभेदेन वा पुनः ।
रज्यते येन यः कश्चित् स रागः सम्मतः सताम् ॥

अथवा —

योऽसौ ध्वनिविशेषस्तु स्वरवर्णविभूषितः ।
रञ्जको जनचित्तानां स च राग उदाहृतः ॥
सामान्यं च विशेषश्च लक्षणं द्विविधं मतम् ।
चतुर्विधं तु सामान्यं विशेषश्चांशकादिकम् ॥
इत्येवं रागशब्दस्य व्युत्पत्तिरभिधीयते ।
रञ्जनाज्जायते रागो व्युत्पत्तिः समुदाहृता ॥
अश्वकर्णादिवद्रूढो यौगिको चापि वाचकः ।
योगरूढोऽथवा रागो ज्ञेयः पङ्कजशब्दवत् ॥

मतङ्गः

रागकदम्बकः

नन्द्यावर्तः स्वस्तिकश्च द्विधा रागकदम्बकः ।

हम्मीरः

रागकाकुः

सा रागकाकुर्विज्ञेया छाया रागस्य योनिजा ।

कुम्भः

रागच्छाया

या रागस्य निजच्छाया रागच्छायां तु तां विदुः ।

कुम्भः

रागाप्राधान्यम्

दृष्ट्या हि सूचितो भावः पश्चादङ्गैर्विभाव्यते ।
न ह्यङ्गाभिनयान् कश्चिद्दते रागः प्रवर्तते ।
सर्वस्य सहजो रागः सर्वो ह्यभिनयोऽर्थजः ॥

कुम्भः

रागमेला

रन्ध्रेषु मध्यतारेषु स्थानेषु निखिलैः स्वरैः ।
युक्ता यदि तदा सर्वरागमेला प्रकीर्तिता ॥

कुम्भः

रागरङ्गः

उपक्रम्य यथारागो मेलनं सममिश्रकम् ।
पुनस्तन्मार्गगमकं रागरङ्गः प्रकीर्तितः ॥

सङ्गीतमकरन्दे

रागरागिण्यः

श्रीरागोऽथ वसन्तश्च भैरवः पञ्चमस्तथा ।
मेघरागो बृहन्नाटः षडेते पुरुषाः स्मृताः ॥
मालवी त्रिवणी गौरी केदारी मधुमाधवी ।
ततः पाहाडिका ज्ञेयाः श्रीरागस्य वराङ्गनाः ॥
देशी देवगिरी चैव वैराटी तोडिका तथा ।
ललिता चाथ हिन्दोली वसन्तस्य वराङ्गनाः ॥
भैरवी गुर्जरी चैव रेवा गुण्डकरी तथा ।
बङ्गाली बहुली चैव भैरवस्य वराङ्गनाः ॥
विभासश्चाथ भूपाली कर्णाटी बडुहंसिकौ ।
मालवश्रीः पठमञ्जर्या सहैताः पञ्चमांगनाः ॥
मालारी सोरठी चैव सावेरी कौशिकी तथा ॥
गान्धारी हारशृङ्गारा मेघरागस्य योषितः ।
कामोदी चैव कल्याणी आभीरी नाटिका तथा ।
सारङ्गी नट्टहम्मीरी नट्टनारायणाङ्गनाः ॥

संगीतदर्पणः

रागलक्षणम्

यैस्तु चेतांसि रज्यन्ते जगत्त्रितयवर्तिनी ।
ते रागा इति कथ्यन्ते मुनिभिर्भरतादिभि ॥

शुभङ्करः

योऽयं ध्वनिविशेषस्तु स्वरवर्णविभूषितः ।
रञ्जको जनचित्तानां स रागः कथितो बुधैः ॥

सङ्गीतदर्पणः

रागलिप्ता

रागलिप्ता ततो नादः स्वररागसमाश्रिता ।

भरतकल्पलता

रागवेलाः

मधुमाधवी च देशाख्या भूपाली भैरवी तथा ।
वेलावली च मल्लारी बङ्गाली सामगुर्जरी ॥
धन्यश्री मालवश्री च मेघरागश्च पञ्चमः ।
देशकारो भैरवश्च ललितश्च वसन्तकः ॥
एते रागाः प्रगीयन्ते प्रातरारभ्य नित्यशः ।
गुर्जरीकैशिकश्चैव सावेरी पटमञ्जरी ॥
रेवागुणकरश्चैव भैरवा रामकर्यपि ।
सोरठी च तथा गेया प्रथमप्रहरोत्तरम् ॥
वैराटी तोडिका चैव कामोदी च कुडाइका ।
गान्धारी नागशब्दी च तथा देशी विशेषतः ॥
शङ्कराभरणो गेयो द्वितीयप्रहरात्परम् ।
श्रीरागो मालवाख्यश्च गौडी त्रिवणसंज्ञकः ॥
नटः कल्याणसंज्ञश्च सालङ्गनटके तथा ।
सर्वे नाटाश्च केदारी कर्णाटाभीरिका तथा ॥
चण्डहंसपहाडी च तृतीयप्रहरात्परम् ।
अर्धरात्रावधिगेया रागा एते सुखप्रदाः ॥
यथोक्तकाला एवैते गेयाः पूर्वविधानतः ।
राजाज्ञया सदा गेया न तु कालं विचारयेत् ॥

सङ्गीतदर्पणः

रागस्वरूपः

वैलक्षण्यमुभयस्य न साक्षाद्दीक्ष्यतेऽपि च ।
न चानुभावं जनयेत्तु तमब रसः स तु ॥
प्रभाव्यमाने सहसा तस्य चान्यगतस्य च ।
अन्वयव्यतिरेकाभ्यां सम्यग्भावनमिष्यते ॥
परानन्दस्य जनको नित्यस्यानतिशायिनः ।
प्रवृत्तिरपि तत्रैव घटते हि मनीषिण ॥

कुम्भः

रागहस्ताः

नाभेरुद्धोत्थितो ज्ञेयो सर्वरागविवेचने ।
हस्तानामत्र कलनाभिन्नत्वं प्रतिपाद्यते ॥

भूपाले त्वलपद्मः स्यान्नाभेरुद्वेष्टितश्चली ।
भैरवे त्रिपताकः स्यात्तथैव गुणमाश्रितः ॥

श्रीरागे कर्तरीहस्तो तथा चेष्टागुणान्वितः ।
उद्वृत्तासिधहस्तौ तु तथाऽसौ रागपञ्जरे ॥

वसन्ते विप्रकीर्णाख्यास्तद्वद्भूसमुपाश्रिताः ।
मालवेऽपि तथा भूतौ शिखराभिधहस्तकः ॥

बङ्गाली च तथा ज्ञेया हस्तोऽयं च पताककः ।
नाटाभिधानरागे तु सूचिरेवं प्रयुज्यते ॥

करोऽयं श्लिष्टमुकुले वेलावल्यां प्रयुज्यते ।
योज्ये मलहरीरागे तालो लाङ्गूलहस्तकः ॥

धोर्ल्यां भ्रमरहस्तोऽपि मूर्धन्यंवक्रियामत ।
मेघरागे ताम्रचूडः कुरङ्ग्यां चतुराभिधः ॥

हिन्दोल्यामर्धचतुरं माधुर्यां मकरः करः ।

(माधुरीः माळववसन्तः)

धोलाख्यां शुकतुण्डाख्यः सन्दंशः शिवभूषणे ॥

देशयामर्धपताकोऽपि ललितायां लताकरः ।
बाणो रामक्रियायां च वराल्यां श्लिष्टकर्तरी ॥

कैशिक्यां पद्मकोशाख्यं चक्रो गुण्डक्रियाविधौ ।
गुर्जर्यां युक्तसूची स्यात् गौलायां युक्तचन्द्रकः ॥

मृगशीर्षश्च कर्णाटगौळरागविवेचने ।
नारायणाख्यगौळे च हंसास्योऽपि तथाविधः ॥

देशाक्ष्यामर्धमुकुलश्चाभीर्यामपविद्धकः ।
सारङ्गनाटरागेऽपि करः संयमनामकः ॥

सौराष्ट्रे हंसपक्षोऽपि सावेर्यां ज्ञानहस्तकः ।
संकीर्णाख्यपताकस्तु शुद्धबौलीविवेचने ॥

मालवश्रीप्रभेदेऽपि करः कलशनामकः ।
तोड्यां च वरमानौ तु रेखः घण्टारवे तथा ॥

नादनामक्रियायां च सूचिकाहस्तमिष्यते ।
हेज्जुज्यामर्धचन्द्राख्यो मुखार्यां नागबन्धकौ ॥

मेचबौल्यां दण्डपक्षादौ आळ्यौ वैष्णवौ करौ ।
करौ मङ्गलकौशिक्यां करटी त्वस्तिकाह्वयः ॥

अञ्जलिश्च करो ज्ञेयो वसन्ते शुद्धपूर्वके ।
पाडिस्थाने सिंहमुखो मधुमाधविकाकमे ।
केदारगौलरागेऽपि विज्ञेयौ रेचितौ करौ ॥

शृङ्गारशेखरः

रागाः

चतुर्णामपि वर्णानां योगा रागास्तु शोभनाः ।
स सर्वो दृश्यते येन तेन रागा इति स्मृताः ॥

दशलक्षणलक्षितं गीतं रागशब्दाभिधेयम् ।

मतङ्गः

सामभ्यः स्वरसम्भवः स्वरभवग्रामाश्रयः संमताः
षड्जो मध्यम इत्युभौ क्षितिगतौ गान्धारमाहुर्दिवि ।
ग्रामैस्त्रिभिः दशजातयः स्युरखिला रागाश्च जात्युद्भवाः
भाषारागसमुद्भवाश्च कथिताश्चित्रवृन्दारकैः ॥

सोमराजदेवः

ओडवः पञ्चभिः प्रोक्तः स्वरैः षड्भिस्तु षाडवः ।
सम्पूर्णाः सप्तभिश्चैवं त्रिधा रागा बुधैर्मताः ॥
रागास्ते त्रिविधाः प्रोक्ताः शुद्धाश्छायालगास्ततः ।
सङ्कीर्णाश्च पृथक् तेषां लक्षणं प्रतिपाद्यते ।

कुम्भः

रागाङ्गलक्षणम्

रागच्छायानुकारित्वाद्रागाङ्गमिति कथ्यते ।

सङ्गीतदर्पणः

रागाङ्गादिनिरूपणम्

नवरोजादिरागानां देशभाषादिकीर्तनात् ।
काकुच्छायादियुक्तानां ज्ञानं स्यादनया दिशा ॥

हम्मीरः

रागाङ्गानि

तन्त्रीतानक्रियायोगात्क्रियाङ्गं कथ्यते बुधैः ।
अथ प्रसिद्धरागाणामुद्देशं व्याहरामहे ॥
रागाद्यो मध्यमादिस्त्रिपुररिपुमुखोद्भवो मालवश्री
श्रीरागो दीपकाद्यस्तदनुनिगदितः शुद्धबङ्गालसंज्ञः ।
धन्नासी स्याद्वराटी प्रथितगुणगणा देशिहिन्दोलतोड्यो
देशाख्या गूर्जरी च श्रवणसुखकरी देशिकोलाहलाख्यौ ॥

सोमदेवः

रागाध्याये सोमरागलक्षणम्

ग्रहांशन्याससन्मन्द्रतारयोर्निगयोर्बहुः ।
श्रीरागाङ्गं सोमरागः पूर्णो वा वीरसंश्रयः ॥

सोमराजदेवः

रागाणां गेयकालः

प्रातर्गेयास्तु देशाक्षी ललितप्रथमञ्जरी ।
विभाषा भैरवी चैव कामोदी गोण्डकिर्यपि ॥
एका वराटी मध्याह्ने सायं कर्णाटमालवौ ।
नाटश्चैव विशेषेण शेषा गेयास्तु सर्वदा ॥

शुभङ्करः

रागाणां संख्या

रागाः षडेव तु प्रोक्ता रागिण्यस्त्रिंशदेव हि ।

शुभङ्करः

रागान्तरच्छाया

रागे रागान्तरच्छाया सैव स्यादस्य रागता ।

कुम्भः

रागार्णवमतम्

भैरवः पञ्चमो नाटो मल्लारो गौडमालवः ।
देशाख्यश्चेति षड्रागाः प्रोच्यन्ते लोकविश्रुताः ॥
बङ्गाली च गुणकरी मध्यमादिर्वसन्तकः ।
धनाश्री चेति पञ्चैते रागभैरवसंश्रिताः ॥
नट्टनारायणः पूर्वगान्धारो मालवस्तथा ।
ततः केदारकर्णाटौ पञ्चैते नाटसंश्रिताः ॥
मेघमल्लारिका माला कौशिकः पटमञ्जरी ।
असावरीति विज्ञेया रागा मल्लारसंश्रिताः ॥
भूपाली च कुडारी च कामोदी नाटिका तथा ।
वेलावली च विज्ञेया रागा देशाख्यसंश्रिताः ॥

सङ्गीतदर्पणः

रागोत्पत्तिप्रकारः

पञ्चास्यात्पञ्चरागाः स्युः षष्ठस्तु गिरिजामुखात् ।
श्रीरागः सद्योवदनाद्वामदेवाद्वसन्तकः ॥
अघोराद्भैरवो जातस्तत्पुरुषात्पञ्चमोऽभवत् ।
ईशानाख्यान्मेघरागो नाट्यारम्भे शिवादभूत् ।
गिरिजाया मुखाल्लास्ये नट्टनारायणोऽभवत् ॥

सङ्गीतदर्पणः

राघवतालः

विरामान्ते लघुः प्रान्ते राघवेऽपि प्रकीर्तितः ।

कुम्भः

राजतालः

राजतालाभिधाने तु लघुद्रुतौ लघुस्ततः ।
अनेन तु समायुक्तो मकरन्दाह्वतालकः ॥

गान्धर्ववेदे

राजनारायणः—तालः

द्द्वयं जगणो गुरुः । राजनारायणे ताले ।
० ० । ऽ । ऽ

कुम्भः

राजविद्याधरः—तालः

लघुवक्रे द्रुतौ । । ऽ ० ०

कुम्भः

रामक्रीडम्

हास्यप्रायं प्रेरणं तु स्यात्प्रहेलिकयान्वितम् ।
ऋतुवर्णनसंयुक्तं रामक्रीडं तु भाष्यते ॥

वेमः

रासः

स्वराद्यं पाटपूर्वं च बन्धाद्यं च पदाभिधम् ।
तेनाद्यं विरुदाद्यं च चिलाद्यं मिश्रपूर्वकम् ॥
इत्यष्टौ करणानि स्युः क्रमाल्लक्षणमुच्यते ॥
उद्ग्राहगमकौ सान्द्रस्वरैर्बद्धौ यदा पुनः ।
आभोगाख्यः पदैर्बद्धो गातृस्वाम्याख्यया युतः ॥
तालो रासश्च विज्ञेयः कड्णं स्वरपूर्वकम् ।
अन्यान्यपि तथैव स्युः स्वभेदः किञ्चिदुच्यते ॥

कुम्भः

रासकम्

नर्तनं यन्मया प्रोक्तमासारिताभिधं पथि ।
चारीभिर्मण्डलैश्चापि लास्याङ्गैरुपबृंहितैः ॥
देशितालैश्च संयोज्य तच्चेदत्र प्रवर्तते ।
तदा रासकसंज्ञं स्यादिति नृत्यविदो विदुः ॥

कुम्भः

राहडीलक्षणम्

बहुभिश्चरणैर्यत्र रसे वीरे प्रगीयते ।
स्तुतिः सङ्ग्रामविजये वर्ण्यस्य राहडी मता ॥

मोक्षदेवः

रीतीनां लक्षणानि

अस्पृष्टदोषमात्राभिः समग्रगुणगुम्फिता ।
विपञ्चीस्वरसौभाग्या वैदर्भी रीतिरुच्यते ॥

या समस्तोद्भटपदा ओजःकान्तिगुणान्विता ।
गौडीयामिति गायन्ती रीतिं रीतिविचक्षणाः ॥
आश्लिष्टश्लथभावा तु पुराणच्छाययाश्रिता ।
मधुरा सुकुमारा च पाञ्चाली सा च कथ्यते ॥
लाटीया रीतिरिन्द्राण्याः प्रीत्यै वीररसाश्रिता ।
प्रतितालेन सा गेया रागे मालवकैशिके ॥

हम्मीरः

रुन्धकः

सरतो युगपद्यत्र प्रपदेन तु रुन्धकः ।

कुम्भः

रूढा

घर्घरा गृह्यते सर्वा रूढा रेखात्र सा मता ।

कुम्भः

रूपकनृत्तम्

रूपकेन यदोद्ग्राहाभोगयोर्गीयते द्रुतम् ।
ततो नृत्ते ध्रुवे गीतं द्रुतादिलयसंयुतम् ।
तदा रूपकनृत्तं स्यात्तालेरूपकसंज्ञकम् ॥

रूपकः—ताल:

द्रुतं त्वेकं लघुश्चैको मात्राषट्कं च यत्र सः ।
रूपकश्चतुरश्रः स्यादित्याहुस्तालवेदिनः ॥

भरतकल्पलता

रूपकगायकः

आलप्तेरपि यद्गीतं भवेदतिमनोहरम् ।
उक्तो गायकभेदज्ञैः सोऽयं रूपकगायकः ॥

कुम्भः

रूपकलक्षणम्

स्वरैः पदैश्च तालैश्च गणैर्वर्णैरलङ्कृतम् ।
विचित्राभोगमुद्ग्राहं रूपकं कथ्यते बुधैः ॥

मोक्षदेवः

उद्ग्राहश्चान्यधातुः स्यात् ध्रुवकश्चान्यधातुकः ।
मेलापकश्चान्यधातुराभोगश्चान्यधातुकः ।
चतुर्धातुकमेतद्धि रूपकं कीर्त्यते बुधैः ॥

गान्धर्ववेदे

रूपकालप्तिलक्षणम्

रूपकस्थेन रागेण तालेन च विधीयते ।
प्रोक्ता सा रूपकालप्तिः सा पुनर्द्विविधा भवेत् ॥

हम्मीरः

रूपकालप्तिभेदः लक्षणं च

प्रतिग्राहणिकेकान्या भञ्जनीत्यभिधीयते ।
विधाय स्थायमालप्ते रूपकावयवो यदि ॥
प्रतिगृह्यते सा प्रोक्ता प्रतिग्राहणिका बुधैः ।
भञ्जनी तु द्विधा प्रोक्ता स्थायरूपकभञ्जनात् ॥

हम्मीरः

रूपलिप्ता

रूपलिप्ता च नादैश्च रागस्वरसमाश्रिता ।

भरतकल्पलता

रेखा

या शिरोऽघ्रिकरनेत्रपङ्कजाद्यङ्गमेलनविधौ सति स्फुटम् ।
केचिदत्र दिशि मनोहरा सास्थितिर्निगदितात्र रेखिका ॥

कुम्भः

शिरोनेत्रकरादीनामङ्गानां मेलने सति ।
कायस्थितिर्मनोनेत्रहारि रेखा प्रकीर्तिता ॥
अथवा अङ्गप्रत्यङ्ग सन्निवेशो यथोचितः ।
रेखोक्ता जनताचित्तनयनानन्ददायिनी ॥
कज्जलेन यथाशोभं रेखाः शृङ्गारिणो भवेत् ।
कपोलफालनेत्रान्ते वलनं मसृणं समम् ॥
ललाटे तिलकं कार्यं शुद्धं कज्जलनिर्मितम् ।
रेखां दद्याच्च नेत्रान्ते ललाटे तिलकं लिखेत् ॥
भ्रुवोः कण्ठे च रेखा च समाः शृङ्गारिणो भवेत् ।
गौरिकैवलये...त्वै वरे गौरिकलेखिका ॥
विद्वेषके रावणादौ भृङ्गादौ बहुधोदितम् ।
नालेख्ये तन्मया पात्रविशेषात्तत्तदुन्नयेत् ॥

सङ्गीतनारायणे

रेखालक्षणम्

शिरोनेत्रकरादीनां युगपन्मेलके सति ।
कार्या स्थितिर्मनोनेत्रहरा रेखाः प्रकीर्तिताः ॥

हम्मीरः

रेचकविभागः तल्लक्षणं च

अमीषामङ्गहाराणां सम्यङ्निर्दिश्य लक्षणम् ।
चतुरो रेचकान्वक्ष्ये नाट्यनृत्योपयोगिनः ॥
पादरेचक एकःस्यादपरः कररेचकः ।
ग्रीवारेचक उक्तोऽन्यश्चतुर्थः कटिरेचकः ॥
पार्ष्ण्यङ्गुलाग्रयोरन्तर्बहिश्च सततं गतिः ।
नमनोन्नमनोपेतः प्रोच्यते पादरेचकः ॥
परितो भ्रमणं तूर्णं हस्तयोर्हंसपक्षयोः ।
यत्पर्यायेण रचितं स भवेत् कररेचकः ॥
विरलः प्रसृताङ्गुष्ठाङ्गुलेस्तिर्यक् भ्रमेण वा ।
ग्रीवाया विधुतभ्रान्तिः कथ्यते कण्ठरेचकः ॥
सर्वतो भ्रमणं कट्याः कटिरेचकमूचिरे ।
अङ्गहाराङ्गमध्यानो जनयन्ति पृथक् फलम् ॥

हम्मीरः

रेचितः—पाटः

अङ्गुष्ठतर्जनीघातः स्कन्धप्रस्फुरणं तथा ।
यत्र प्रान्तं गता वाद्ये पाटं पाठान्तरे विदुः ॥

यथा—दें दें थां थां दें दें न न ण झें ।

अङ्गुष्ठतर्जनीघातः स्कन्धप्रस्फुरणं तथा ।
यत्र प्रान्तं गता वाद्ये पाटं तं रेचितं विदुः ॥

कुम्भः

रेचितलक्षणम्

प्रसारितोत्तानतलावुच्यते रेचितौ करौ ।
अथवा रेचितौ प्रोक्तौ हंसपक्षौ द्रुतभ्रमौ ॥
यद्वा रेचितयोर्लक्ष्मलक्षणे मिलिते इमे ।
प्रयोज्यौ तौ नृसिंहस्य दैत्यवक्षोविदारणे ॥

हम्मीरः

रेफः

रेफस्स्यात्स्कन्धसंचेन समस्तोऽङ्गुलिनाततः ।

कुम्भः

—हीडुक्ककपाटः

तदा पाटो रेफसंज्ञः प्रजायते ।
स्कन्धसङ्गेन सर्वाभिः प्रहाराऽङ्गुलिभिः सदा ॥

यथा– नहथों जे जे रे डें टें

कुम्भः

ल

लक्ष्मीपूजा

क्षीरसागरसम्भूते विष्णुवक्षःस्थलाश्रिते ।
वन्दिता पूजितासि त्वं रङ्गभूमौ स्थिरा भव ॥

जगद्धरः

लक्ष्मीशताललक्षणम्

लक्ष्मीशे तु विरामान्तौ द्रुतौ ह्रस्वद्वयं प्लुतः ।
० ० । । ऽ

सोमराजदेवः

लङ्घितजाङ्घिका

स्याल्लङ्घितजाङ्घिका ।
खण्डसूच्यभिधे स्थाने तिष्ठन्नाङ्घ्रिस्तु वेगतः ।
आकृष्य लङ्घ्यतेऽन्येन चरणेन तदा तु सा ॥

कुम्भः

लघुकिन्नरी

तिस्रः किंनरवीणाः स्यु बृहद्देशीसमाश्रिताः ।
बृहती मध्यमा लघ्वी त्वथासां लक्षणं ब्रुवे ॥
अत्राङ्गुलं निस्तुषैः स्यात्पङ्क्तिस्तिर्यग्यवोदरैः ।
पञ्चाशदङ्गुलो दैर्घ्ये परिणाहे षडङ्गुलः ॥
वैणवः खादिरो वाथ रक्तचन्दनजोऽथवा ।
कांस्यजा वा भवेद्दण्डो ऋजुः श्लक्ष्णो व्रणोज्झितः ॥
दण्डमानं दधद्गर्भे सुषिरं पृथुलं समम् ।
शाकजः ककुभस्तस्य दण्डो दैर्घ्ये षडङ्गुलः ॥
ककुभस्य शिरस्तत्र दीर्घे स्याच्चतुरङ्गुलम् ।
चतुरङ्गुल विस्तारमुच्छ्राये द्व्यङ्गुलं मतम् ॥
ककुभस्य तु दण्डन्तु वीणादण्डान्तरे क्रियेत् ।
परिशेषश्च दण्डांशस्तावान् यावति शोषितः ॥
ककुभस्य शिरोमध्यवीणादण्डान्तमध्यतः
तन्त्रीभागस्तुरीयांशाधिकत्र्यङ्गुलको भवेत् ।
इति लघ्वी समादिष्टा किन्नर्यथ परोच्यते ॥
एतस्या अधिका दैर्घ्ये द्वादशाङ्गुलमानतः ।
परिणाहेऽगुलेनापि तन्त्री स्नायुमयी भवेत् ॥
आलापिन्या यथा पूर्वमुक्तं तुम्बं तृतीयकम् ।
तथास्यामपि कर्तव्य मेवमेषा त्रितुम्बिका ॥
लघ्वावदस्या विज्ञेयं लक्ष्मशेषं विजानता ।
विदध्यात्काकुभे मूर्ध्नि श्लक्ष्णां कूर्मवदुन्नताम् ॥

परितोऽर्धाङ्गुलन्यूनां पत्रिकामायसीं समाम्।
नादातिशयसिद्ध्यर्थं वीणावादनकोविदः॥
सार्धाङ्गुलद्वयं त्यक्त्वा वीणादण्डस्य मूर्धतः।
अर्धाङ्गुलपरीणाहं विध्यात्सुषिरं ततः॥
अधस्तात्तिर्यगपरं रन्ध्रं सोभयतो मुखम्।
अधस्तादूर्ध्वरन्ध्रस्य सार्धद्वयङ्गुलकं भवेत्॥
मेरुः सकलरन्ध्रेण कर्तव्यो वान्वितो भवेत्।
मेरुरन्ध्रस्य वीणाया दण्डस्य च तथान्तरम्॥
द्व्यङ्गुलं सयत्नं हि मेरुरङ्गुलमुच्छ्रितः।
सार्धाङ्गुलान्तरे शङ्कुः स्थिरो मेरोः पुरो भवेत्॥
अत्र तिर्यग्भवेद्रन्ध्रं चलशङ्कुस्तदायतम्।
सिन्दूरेणाथवा वस्त्रकज्जलेनाथवा युतम्॥
श्लक्ष्णेष्टिकायाश्चूर्णेन मर्दयन्मर्दनं घनम्।
विमिश्रान्तेन कर्तव्याः सारिकास्युश्चतुर्दश॥
अष्टादशाथवा दण्डपृष्ठेन्यस्ता यथायथम्।
ताश्चतस्रो निवेश्यास्तु तारसप्तकसिद्धये॥
मन्द्रसप्तकसिद्ध्यर्थं सारिद्वन्द्वं परे जगुः।
एवं त्रिस्थानसंशुद्धरागव्याप्तिर्भवेदिह॥
आमन्द्रसप्तकान्मध्यसप्तकावधियुक्तितः।
सार्धाङ्गुलपरीणाहास्तथा सार्धाङ्गुलायताः॥
गृध्रवक्षोऽस्थिनलिका यद्वा तच्चरणास्थिजा।
आयस्यकांस्यमय्यो वा नलिकाः सारिका मताः॥
मेलोर्ध्वतन्त्रिकापार्श्वतन्त्र्योर्द्वे षड्जगे यदि।
ह्रस्वा पञ्चमगा चेत् स्यात् षड्जग्रामो भवेदियम्॥
ऊर्ध्वतन्त्री यदि भवेन्मध्यमस्वरयोगिनी।
तत्पार्श्वे तन्त्रिकाद्वन्द्वं षड्जमध्यमगं यदि।
मध्यमग्रामगा ज्ञेया तदियं किंनरी बुधैः॥

कुम्भः

लघुनृत्तम्

उपैति करणैरल्पैः रञ्जितानैः लघु स्मृतम्।

सङ्गीतनारायणे

लघुशेखरः

नानाविधौ स्वस्तिकौ हि करावत्र प्रकीर्तितौ।
विरामान्तेन लघुना तालः स्याल्लघुशेखरः॥

सङ्गीतमुक्तावली देवेन्द्रकृता

—तालः

लघुर्गुरुश्च भवति लघुशेखरतालके।
शंकाजमरतालश्च गीयते सत्कुकोविदैः?॥

गान्धर्ववेदे

लज्जा—व्यभिचारिभावः

धाष्टर्यनाशो लज्जा।

शुभङ्करः

लताक्षेपः

पश्चादन्यस्य पुरस्ताच्च चरणश्चेत्प्रसार्यते।
भूमिं निकुट्टयेत्तेन लताक्षेपस्तदा भवेत्॥

कुम्भः

लताकरलक्षणम्

पताकौ दोलिनौ तिर्यक् प्रसृतौ तौ लताकरौ।
अनयोः करयोः केशबन्धयोश्च नितम्बयोः।
त्रिपताकाकृतिं केचिदाचार्याः प्रतिजानते॥

हम्मीरः

लतावृश्चिकम्

वृश्चिके चरणौ यत्र वामहस्तो लताभिधः।
तल्लतावृश्चिकं प्रोक्तं गगनोत्पतनेषु च॥

सङ्गीतमुक्तावली देवेन्द्रकृता

लतावेष्टितम्

अन्तर्बहिः करावूर्ध्वं वलित्वोद्वेष्टितौ यदि।
पार्श्वयोः क्रमतस्तत्र तिर्यग्लुठति चैककः।
लुठितोऽन्यः करो यत्र तल्लतावेष्टितं तदा॥

लयः

अङ्गभूता हि तालस्य यतिपाणिलयः स्मृता।
बन्धोऽक्षरविदानां हि समत्वं यत्प्रकीर्तितम्।
कला कलान्तरकृतः स लयो नाम संज्ञितः॥

नाट्यशास्त्रे

लयलयविचित्रितम्

यवन्या भाषया युक्तं यत्र गीतं धृतांचलम्।
कौलादिगजरोपेतलास्यांगेन विराजितम्।
विदध्यान्नर्तनं नाम लयलयविचित्रितम्॥

ललाटतिलकम्

अङ्गुष्ठो वृश्चिकाङ्घ्रेश्चेल्ललाटतिलकं लभेत् ।
तदा ललाटतिलकं विद्याधरगतौ मतम् ॥

सङ्गीतमुक्तावली देवेन्द्रकृता

ललितः—तालः

ताले ललितसंज्ञे स्यात् द्रुतद्वन्द्वं लघुर्गुरुः ।

०० । ऽ

कुम्भः

ललितम्—पौरुषः

ललितं स्यान्निर्विकारं शृङ्गाररसचेष्टितम् ।

वेमभूपालः

अनुल्बणश्च मधुरो दृष्टिभ्रूविभ्रमान्वितः ।
सुकुमारोऽङ्गविन्यासस्त्रीणां ललितमुच्यते ॥

वेमभूपालः

पल्लवौ शीर्षदेशस्थौ ललितौ कलितौ बुधैः ।
चतरश्रीः भजन्तौ तौ शिरःस्थावचलौ करौ ॥
ललितौ च परे प्राहुरन्ये च खटकामुखौ ।
शनैः प्राप्य शिरोऽन्योन्यलग्नाग्रौ ललितौ विदुः ॥

हम्मीरः

ललितगाढः

स एव मृदामितः ।
प्रोक्तो ललितगाढस्तु

कुम्भः

ललिता भाषा

तथैव ललिता भाषा ग्रहांशन्यासधैवता ।
रिगमैर्भूरिभिस्तारमन्द्रैर्युक्तार्धमन्द्रभाक् ।
रितारा भिन्नषड्जोत्था रिलोपात् षाडवा मता ॥

कुम्भः

मतङ्गस्य मते पूर्णा ।

ललिता—रागः

टक्कभाषेवललिता ग्रहापन्यासषड्जभाक् ।
पञ्चमर्षभहीना च तारगान्धारधैवता ॥
षड्जातु मन्द्रा बहुला मध्यस्वरविराजिता ।
ललिता ललितैः स्यान्नैर्ललितैरुत्कटस्वरैः ॥
षाडवा याष्टिकमते ऋषभैकविलोपतः ।
सङ्ग्रामे विनियोक्तव्या वीरोत्साहविवर्धनी ॥

कुम्भः

टक्कभाषैव ललिता ललितैरुत्कटैः स्वरैः ।
षड्जांशग्रहणन्यासा षड्जमन्द्रा रिपोज्झिता ॥

हम्मीरः

लहरीचक्रसुन्दरम्

एकस्मिन्नाभिदेशस्थे तिर्यग्लुठति हस्तके ।
ततोवामं सपर्यन्तं परं प्राप्य पराङ्मुखम् ॥
कर्मणां दोलने नाडीं प्रसार्य............ (?) ।
क्षिप्रमनन्तरमाक्षिप्य शिरसः पार्श्वयोर्द्वयोः ॥
विलोक्य पार्श्वयोस्तोकं यद्विलासेन जायते ।
तदवादि तदार्मद्भिर्लहरीचक्रसुन्दरम् ॥
नाभिक्षेत्रसमीपस्थो तिर्यग् लुठति चैकके
अपरं तु पराचीनमान्दोलितसमर्पणाम् ॥
नीत्वा वामांसपर्यन्तं बहिरेव प्रसार्य च ।
करमन्तः प्रसार्यैकमर्धसव्यापसव्ययोः ॥
विलोक्य पार्श्वयोर्मन्दं विलासेन तु यद्भवेत् ।
प्रकीर्तितं तु तद्धीरैः लहरीचक्रसुन्दरम् ॥

सङ्गीतमुक्तावली देवेन्द्रकृता

लहरीभेदाः

लहरी त्रिविधा ज्ञेया मङ्गलारम्भसंज्ञका ।
आनन्दवर्धिनी कीर्तिस्तासां ब्रूमोऽथ लक्षणम् ॥

मोक्षदेवः

लावकी—गतिः

कुञ्चिताभ्यां पदाभ्यां चेद्द्रुतमानेन वेगतः ।
पार्ष्णिश्च संस्पृशेद्भूमिं गच्छेत्सा लावकी गतिः ॥

सङ्गीतमुक्तावली देवेन्द्रकृता

लावणी

समपादजनितं पात्रे कटौ न्यस्यार्धचन्द्रकम् ।
पञ्चमेन कटेरूर्ध्वं भ्रामयेल्लावणी तदा ॥

लासः

लासः स्त्रीपुंसयोर्भावः तत्राहीये तु तद्धिते ।
सा चार्थे लास्यशब्दः कामोल्लासनहेतुकः ॥

कुम्भः

लासस्वरूपम्

भावः स्त्रीपुंसयोर्लासहेतु मृदङ्गहारवत् ।
देव्यैरेवोपदिष्टत्वात्प्रायः स्त्रीभिः प्रयुज्यते ॥

नृत्तरत्नावलिः

लास्यम्

सुकुमारैः स्त्रीरचितैः प्रयोगैर्लास्यमुच्यते ।

विप्रदासः

लास्यं तु सुकुमाराङ्गं मकरध्वजवर्धनम् ।
स्फुरितं यौवतं चेति तवर्गाद्द्विविधं मतम् ॥
स्फुरितलास्यं यौवतलास्यं चेति द्विविधमित्यर्थः ।

सङ्गीतनारायणे

प्रयोगैस्सुकुमारैर्यत्साधितं लास्यमत्र तत् ।
लासः स्त्रीपुंसयोर्भावस्तत्र ह्यीयेतु तद्धिते ।
लाधात्वर्थे लास्यशब्दः कामोल्लासनहेतुकः ॥

कुम्भः

नियतो हस्ततो दृष्टिर्यतो दृष्टिस्ततो लयः ।
यतो लयस्ततो भावो यतो भावस्ततो रसः ॥
अङ्गैर्व्यावर्तते गीतं पादाभ्यां तालदर्शनम् ।
दृष्टिभ्यां भावयेद्भावं लास्यं नृत्यं तदुच्यते ॥

हम्मीरः

लास्यमण्डलिका

लास्ये तु या भुवस्त्यक्त्वा वस्तु गृह्णातु पण्डितः ।
मुहुर्मुहुर्भ्रमी या सा लास्यमण्डलिका मता ॥

कुम्भः

लास्याभरणम्

बाह्याश्चास्या भवन्त्वेताः सव्यजा अपसव्यजाः ।
लास्येनैव समुद्भूता धन्यास्ता अन्यतोऽधमाः ॥
एते राजपुरन्ध्रीणामुद्दिष्टं यन्मयाधुना ।
नात्र ग्राम्यकृता भावा योज्यास्ते शिल्पकोविदैः ॥

कुम्भः

लास्ये गेयपदम्

लसनाल्लास्यमित्युक्तं स्त्रीपुंभावसमाश्रयम् ।
एकार्थं पृथगर्थं च तदङ्गैस्तु प्रकीर्तितम् ॥
भाणवच्चैकहार्यं स्याद्द्व्यवस्तु तथा भवेत् ।
तत्र गेयपदं तावत्प्रथमं परिकीर्तितम् ॥
स्थापिते भाण्डविन्यासे पटे चैवापकर्षिते ।
ब्राह्मणाः स्वेषु पार्श्वेषु चासने संप्रकल्पिते ॥
मार्जितेषु मृदङ्गेषु प्रयुक्ते च त्रिसामनि तु ।
मार्गासारितकं कुर्यात्तन्त्रीवेणुविभूषितम् ॥
भाण्डवाद्येन संयुक्तं ततश्चासारितं बुधैः ।
परिवृत्तैस्त्रिभिर्युक्तं ततश्चोपोहनं भवेत् ॥
त्र्यश्रेण द्विकलेन स्यात्ततश्च परिधानकम् ।
प्रयोक्तव्यः प्रयोगज्ञैः परिवर्तनमेव च ॥
परिवर्तनके चैव पुंवाक्यं प्राक् प्रयोजयेत् ।
पुरुषोऽत्र त्रिवाक्यः स्याच्चतुर्वाक्याङ्गना स्मृता ॥
कार्यं तथा निर्वहणं प्रत्यर्थं परिधानके ।
इत्येतत्प्रथमं त्वङ्गं लास्ये गेयपदं बुधैः ॥

नाट्यशास्त्रे

लीनः

लीनः स्यान्मूर्च्छिते वायुः ।

कुम्भः

लीलालक्षणम्

हर्षातिशयसम्भूतैर्हैवैर्वागङ्गचेष्टितैः ।
वल्लभानुकृतिर्या तु सा लीलेत्यभिधीयते ॥

वेमभूपालः

लुलितः

घूर्णनामृदुतायुक्तो लुलितः परिकीर्तितः ।

कुम्भः

लोकदुष्टस्वरलक्षणम्

यत्र गीतस्वरालोकदुष्टस्तु लयवर्जितः ।

भरतकल्पलता

लोकधर्मी

लोकधर्मी नाट्यधर्मी चेति धर्मी द्विधा मता ।
स्वभावभावोपगतस्वभावाभिनयाश्रुतम् ॥
शुद्धं च विकृतिं चैव लोकवार्ताक्रियान्वितम् ।
अङ्गलीलाविरहितं नानास्त्रीपुरुषाश्रयम् ।
एवं विधं तु यन्नाट्यं लोकधर्मीति सा मता ॥

वेमभूपालः

लोकनाट्ययोः पन्थाः

लोकवृत्तानुसारेण चोह्यतामनया दिशा ।
नेत्रभ्रूमुखरागाद्यैरुपभोगैश्च संहता ॥

हम्मीरः

लोकशास्त्रानुसरणिः—शब्दप्रयोगः

अनेकार्था यथा शब्दा व्यापारा आङ्गिकास्तथा ।
द्योतयन्ति बहूनर्थान् प्रयोगाच्चार्थनिर्णयः ॥

प्रयोगस्यापि शरणं लोकाः शास्त्रमपि क्वचित् ।
लोकशास्त्रानुसारेण तस्मादेषां विनिर्णयः ॥

विप्रदासः

लोहडी

कृत्वालगं निपत्योर्व्यामुत्तानोरस्तलं स्थितः ।
पृष्ठतः शिरसाश्रोणिं स्पृशंश्चेदन्तरालगम् ॥
यत्र कृत्वा समौ पादौ विवृत्य त्रिकमुत्प्लुतेत् ।
तिर्यक् तल्लोहडी संज्ञं लोहडीलुलितं भुवा ॥

कुम्भः

लोहडीकरणम्

यत्रोर्द्ध्वं समपादस्य कुर्यात् त्रिकविवर्तनम् ।
गततिर्यक् समुत्पाद्य लोहडीकरणं तु तत् ॥

सोमराजदेवः

लोहडीकरणभेदाः लक्षणानि च

पादानेकेनासेवस्यादिकपादारलोहडी ? ।
विहितो स्वस्तिकाङ्घ्रिभ्यां भवेत्कूर्वरिलोहडी ? ॥
स्थानका वैष्णवी स्थित्वा यत्र तिर्यक् त्रिपद्यते ? ।
जल्पन्ति दर्पसरणं करणं तन्मनीषिणः ॥
कृत्वा तु दर्पसरणं यदिस्याज्जलशायितत् ।
करणं प्रोच्यते तत्तु जलशायी तु नामतः ॥
विधाय दर्पसरणं करणं प्रथमं यदि ।
नागबन्धं निबध्नाति नागबन्धाभिधा तदा ॥
विधाय समपादं च भुवं संस्पृश्य मौलिना ।
भ्राम्यते यत्र करणं कपालचूर्णनं तु तत् ॥
कपालचूर्णनं कृत्वा प्रोत्तानहृदयाननम् ।
स्थीयेत यत्र करणं तत् स्याद्वंकालसंज्ञिकम् ॥
वामपार्श्वे यदोत्प्लुत्य तमस्यात्परिवर्तनम् ? ।
विदधाति तदा प्राहुः करणं मत्स्यदामकम् ॥

सोमराजदेवः

लंघनम्

स्वरात्स्वरान्तरं गच्छन् गाता तन्मध्यवर्तिनम् ।
मनाक् स्पृशति तत्प्रोक्तं लङ्घनं पूर्वसूरिभिः ।
लङ्घनं वर्जनं प्राहुः केचिद्गीतविशारदाः ॥

कुम्भः

लंघितजङ्घिका

पुरः प्रसार्य चरणं लङ्घयेदपराङ्घ्रिणा ।
सूत्पूर्वं तदान्वर्था प्रोक्ता लङ्घितजङ्घिका ॥

व

वक्षःस्वस्तिकलक्षणम्

चतुरश्रौ पुरःक्षेत्रे भवतो यत्र रेचितौ ।
व्यावृत्तक्रियया भुग्नौ वर्जितौ स्वस्तिकौ करौ ॥
पादौ च स्वस्तिकौ जङ्घागुल्फस्य वलनान्मिथः ।
तद्वक्षःस्वस्तिकं प्रोक्तं लज्जानुशयगोचरम् ॥
उत्प्लुत्य घटयेत्पाणिपादेन स्वस्तिकाविति ।
ऊचे कीर्तिधराचार्यः किञ्चिल्लक्ष्यनिरीक्षणात् ॥

नृत्तरत्नावली

वक्रः

विद्युल्लतेव कुटिलप्रचारो वक्र उच्यते ।

कुम्भः

वक्रकुट्टनिका

कुट्टयित्वा च विन्यस्य भ्रमितो लुठितस्ततः ।
कुट्टितः स पुनः स्थाने वक्रकुट्टनिकाभिधा ॥

कुम्भः

वक्री

वक्रीकृतगलो गायन् धीरैर्वक्रीत्युदाहृतः ।

भरतकल्पलता

वज्रलेपः—लेपः

ओदनं छागविड्भस्म भस्म चापि पुरातनम् ।
लोहविण्मूषयोश्चूर्णं समभागं सुपेषयेत् ।
लेपयेद्दक्षिणे भागे लेपोऽयं वज्र ईरितः ॥

सङ्गीतनारायणे

पुरातनं भस्मेति बहुदिनमेकत्रस्थितं यत्किञ्चिद्भस्म मूषा इति ताम्रपात्रं ।

वनमाली—तालः

प्लुतमेकं द्रुतौ द्वौ च वनमालिनि तालके ।
निःशङ्कस्त्वद्रुतालः स्याद्बुधैस्तेनैव गीयते ॥

गान्धर्वतन्त्रे

वनमालिनी—तालः

चतुर्द्रुतौ लघू द्वौदौ गुरुश्च वनमालिनी ।
०००० । । ००ऽ

कुम्भः

वरदाभयदौ—हस्तः

वरदाभयदावर्धचतुरस्रावितिं द्वयम् ।
अन्यच्छिरोमणिः प्राह तत्ते द्वात्रिंशदीरिताः ॥

सङ्गीतनारायणे

—रासकः

लघुद्रुतौ गुरुर्यत्र तालोऽयं गजलीलकः ।
वरदो रासकत्वेन श्रोतॄणां च सुखावहः ॥

गान्धर्ववेदे

वामदक्षिणभागस्थौ वरदाभयदौ करौ ।
अरालौ कटिपार्श्वस्थौ कथितौ वरदाभयौ ॥

कुम्भः

वरदाभयदौ हस्तौ वामदक्षिणभागगौ ।
अरालौ वा कटीदेशे कथितौ वरदाभयौ ।
इत्युक्ता विप्रदासेन द्वात्रिंशन्नृत्यहस्तकाः ॥

विप्रदासः

पृथक् दक्षिणवामौ चेद्वरदाभयदौ करौ ।
अरालौ कटिपार्श्वस्थौ तदोक्तौ वरदाभयौ ॥

हम्मीरः

वामः पताकोर्ध्वभागे दक्षिणश्चाप्यधोमुखः ।
भुजे कुक्षौ क्रमात्कृत्वा वरदाभयहस्तकः ॥
क्षित्याः प्रदर्शने सम्यग्वेङ्कटेशनिरूपणे ।
ताराणां पतने चैव तस्य रूपणमुच्यते ॥

भरतकल्पलता

वराटीरागः

षड्जग्रहांशकन्यासा वराटी कथिता बुधैः ।
प्रथमा मूर्छना यस्यां संपूर्णा कीर्तिवाहिनी ॥
विनोदयन्ती दयितं सुकेशी
सुकङ्कणा चामरचालनेन ।
कर्णे दधाना सुरवृक्षपुष्पं
वराङ्गनेयं कथिता वराटी ॥
स रि ग म प ध नि स .

सङ्गीतदर्पणः

वराहः—हस्तः

मृगशीर्षेत्वन्यकरस्तेन श्लिष्टस्थितो यदि ।
कनिष्ठाङ्गुष्ठयोर्योगाद्वराहकर ईरितः ॥

भरतकल्पलता

वर्गाः

अकवर्गे पदे विप्रश्चटवर्गे च क्षत्रियः ।
तपवर्गपदे वैश्यो यशवर्गे च शूद्रकः ॥

शुभङ्करः

वर्गेषु ग्रहदेवताः

अवर्गे स्याद्देवगुरुः कवर्गे भार्गवः स्मृतः ।
चवर्गे चन्द्रमाः ख्यातः टवर्गे कुजशुक्रकौ ॥
तवर्गे च बुधः प्रोक्तः शनिः सङ्गीतकोविदैः ।
यशवर्गे राहुकेतू वर्गेषु ग्रहदेवताः ॥

शुभङ्करः

वर्णप्रबन्धलक्षणम्

वर्णे कर्णाटभाषायां विरुदैर्वर्णतालतः ।
वर्णयन्ति त्रिधा वर्णं तालत्रैविध्यतो बुधाः ॥

सोमेश्वरः

वर्णभेदाः

वर्णास्तु मातृकोद्भूता मातृका द्विविधा मताः ।
स्वरव्यञ्जनरूपेण ।

मतङ्गः

वर्णसरकलक्षणम्

स्वरः पदं च पाटश्च तेन्नकश्च यदृच्छया ।
बध्यते यत्र तालेन स वर्णसरको मतः ॥
स्वरादिभिस्तेन्नकान्तैः क्रमादादौ निवेशितैः ।
चत्वारो वर्णसरकाः कथिता सोमवर्मणा ॥

सोमराजदेवः

वर्णाः

पदवाक्यस्वरूपेण वाक्यार्थवहनेन यत् ।
वर्णो यत्र जगत् सर्वं तेन वर्णाः प्रकीर्तिताः ॥

मतङ्गः

वर्णाढ्या—गीतिः

गुर्वक्षरैस्तु पृथुला वर्णाढ्या दक्षिणे सदा ।

दत्तिलः

वर्णानां मध्यविलम्बितत्वम्

विकृष्टमुक्तमुच्चाराद्द्रुते मध्ये विलम्बितः ।
नीचोच्चयोश्च वर्णानां सुश्राव्यं श्लाघ्यमुच्यते ॥

कुम्भः

वर्णैलाभेदाः

रागेण येन केनापि या रसेन च गीयते ।
प्रक्रान्तवर्णनियमा वर्णैला साभिधीयते ॥
षड्वर्णादारभ्यानन्दाधिकविंशतिर्भवति पादः ।
यस्यां सा वर्णैला भेदैश्चतुरधिकविंशत्या ॥
तत्रादौ मधुकरिकास्तु स्वराकरणी ? ।
सुरसापि प्रगातव्या प्रभञ्जन्यपि चापरैः ॥
कामवती सोमवती कथ्यतेऽन्या प्रभावती ।
मालिनी ललिताश्चैव प्रोक्ता भोगवती परा ॥
अतः कुसुमवत्याख्या ततः कान्तिमती मता ।
ज्ञेया सोमप्रभानाम कालिका स्यादनन्तरम् ॥
कमला विमला चान्या नलिनी स्यादनन्तरम् ।
कालिन्दी विपुला चैव प्रोक्ता विद्युल्लता तथा ॥
विलासा सरला नाम विज्ञेया तरलापि च ।
इति क्रमेण निर्दिष्टं वर्णैलानां कदम्बकम् ॥

सोमराजदेवः

वर्णैलाया भेदाः लक्षणानि च

सा भवेत् त्रिविधा शुद्धा सङ्कीर्णा विकृता परा ।
शुद्धा चतुर्विधा नादावती हंसावती तथा ॥
मन्दावती च भद्रावत्यथासां वेद्मि लक्षणम् ।
गणवर्णादिनियमः पाटखण्डद्वयाश्रितः ॥
नादावती पञ्चभिः स्याद्भगणैर्नगणेन च ।
टक्करागोऽत्र निर्दिष्टस्तालो मण्ठाभिधो बुधैः ॥
ऋग्वेदप्रभवा शुभ्रा प्रीत्यर्थं शशिनः सदा ।
रगणैः पञ्चभिर्हंसावती स्यात्सगणेन च ॥
द्वितीयताले हिन्दोलः यजुर्जा कुङ्कमप्रभा ? ।
क्षत्रियारभटीं वृत्तिं लटीरीतिं च संश्रिताम् ॥
रौद्रे च देवता चण्डी तत्प्रीत्यै गीयते बुधैः ।
नन्दावती स्यात्तगणैः पञ्चभिर्जगणेन च ॥
सा मता प्रतितालेन रागे मालवकैशिके ।
पीता वेश्या च गौडीयारीतिं वृत्तिं च सात्वतीम् ॥
संश्रिता देवतेन्द्राणी वीरे स्यात्प्रीतिहेतवे ।
पञ्चभिर्मगणैर्भद्रावती स्याद्यगणेन च ॥
ककुभेऽथ वर्णो जाता कृष्णा कङ्कालतालकः ।
शूद्रा च भारतीं वृत्तिं वैदर्भीरीतिमाश्रिता ।
वाराही देवता प्रीत्यै बीभत्से गीयते रसे ॥

मोक्षदेवः

वर्तना

अस्याश्च कथिता सप्त वर्तना नृत्यवेदिभिः ।
वर्तना शिखरस्याद्या द्वितीये तेलकस्य च ॥
वर्तना नागबन्धः स्यात्सा सिंहमुखवर्तना ।
वैष्णवीयेकानलमुखे सप्त स्युः कलशाभिधा ।
नाम मात्रप्रसिद्धास्तैरेवं स्युर्न च लक्षणाः ॥

कुम्भः

वर्तनाभरणम्

एकः करो यदा कर्णदेशगोऽन्यस्तु वर्तितः ।
उत्सार्योद्वेष्टितेन स्याद्वर्तनाभरणं तथा ॥

वर्तनास्वस्तिकम्

एकस्य वलने पार्श्वे विद्युदाकृतिधारिणः ।
अन्वक्षरेण हस्तेन यो गच्छेच्च्युतिपूर्वकः ॥
असकृद्यत्र तत्प्रोक्तं वर्तनास्वस्तिकं तदा ।
अथवेदं त्रिखण्डोक्तं वर्तनामिभेवेदिति ॥

वर्तिनीलक्षणम्

यस्यामावृत्तिरुद्राहे ध्रुवाभोगौ सुसंयुतौ ।
ध्रुवके स्यात्ततो मुक्तिर्वर्तिनी साभिधीयते ॥
कङ्कालप्रतितालौ च कुडक्कद्रुतमण्ठकान् ।
संत्याज्येतरतालैश्च स्वरैश्च परिगीयते ॥
मन्तव्योऽत्र सदा भेदः वर्तिन्याः करणस्य च ।
सविलम्बस्वरैरेव वर्तिनी कथिता बुधैः ॥
वर्तिन्यां वा विवर्तिन्यामालापस्तालवर्जितः ।
आदावारोप्यते यस्याः स स्यादालापपूर्विका ॥

सोमराजदेवः

वर्धमानः

द्वारवातायनादीनां कवाटोद्घाटने मतः ।
श्रीमत्कीर्तिधराचार्यो द्वितयं निषधं करम् ।
वर्धमानाभिधं प्राह विनियोगस्तु पूर्ववत् ॥

कुम्भः

बाले नवकलं ज्ञेयं दश सप्तलयान्तरम् ।
मध्यमं तु लयस्त्रिंशत्पञ्चषष्टिस्तथोत्तरम् ॥
कलानां वृद्धिमासाद्य त्वक्षराणां च वर्धनात् ।
लयस्य वर्धनाच्चापि वर्धमानकमुच्यते ॥
वर्णताललयग्रन्थवाद्याभिनयबन्धनात् ।
पात्राणां वृद्धियोगाच्च वर्धमानकमुच्यते ॥

नाट्यशास्त्रे

उत्पत्तिं लक्षणं चास्य गदतो मे निबोधत ।
निहत्य दानवं घोरं रुद्रेणामिततेजसा ।।

नृत्तमुत्पादितं पूर्वं चित्रं ताण्डवसंश्रितम् ।
अथ भूतगणैः सर्वैस्तस्मिन् काले महात्मभिः ।।

वर्धमानमिदं दृष्टं पिण्डीबन्धैर्विभूषितम् ।
परितुष्टश्च तद्दृष्ट्वा समस्तीको वृषध्वजः ।।

प्रददौ च परं श्रेष्ठं सहदेव्या गणाधिपैः ।
लक्ष्यलक्षणसंपन्न्या मार्गयुक्तिविधिक्रमैः ।
वर्धमानप्रयोक्तारो यास्यन्ति शिवगोचरम् ।।

नाट्यशास्त्रे

वर्धमानासारितभेदः

वर्धमाने शरीरस्य भवेदासारितस्य च ।
कार्यकारणभावेन परस्परविकल्पनम् ।।
यथा वृक्षाद्भवेद्बीजं बीजाद्वृक्षस्य सम्भवः ।
अन्योन्यहेतुसंयोगात्प्रत्येतव्यस्तदेह तु ।।

नाटयशास्त्रे

वलितम्—पाटः

पटहादिषु वाद्येषु समुद्भवेषु कल्प्यते ।
अङ्गुष्ठतर्जनी पूतो यत्र तं वलितं विदुः ।।

यथा—

खुं खुं दं दं धों दां धों गि धों गि .

कुम्भः

अपक्रामति देहस्य क्षेपात्सूचीमुखे करे ।
सूचीपादेऽप्यपक्रामेत्तद्विको भ्रमरी ततः ।
पुनरङ्गान्तरेणैव यत्र तद्वलितं मतम् ।।

नृत्तरत्नावली

मुष्टिकस्वस्तिकौ मूर्ध्नि विवृतौ वलिताविति ।

नागेन्द्रसङ्गीते

अथ वान्योन्यलग्नाग्रावूर्ध्वयोरनुकूर्परौ ।
पृष्ठतः खटकावक्त्रौ वलितौ गदितौ करौ ।।

कुम्भः

वल्लभः—तालः

वल्लभो मगणद्वन्द्वं मध्यगे लघुनि स्मृतः ।
ऽ ऽ ऽ । ऽ ऽ ऽ

कुम्भः

—मण्ठकः

मलयाख्यो भवेत्तालो गुरुर्लघुस्ततो गुरुः ।
वल्लभो मण्ठको ज्ञेयस्तालेऽस्मिन करुणे रसे ।।
मलयतालः ऽ । ऽ

गान्धर्ववेदे

वल्लिः—हौडुक्किकः

त्रिविधोत्पद्यते वल्लिः सोल्लासा स्वरवाद्यगा ।
स्कन्धस्य कुडपस्याथ चालनात् .... ।।

कुम्भः

वल्लिपाटः—पाटः

वल्लिपाटस्तथावल्यामर्धं वार्धद्वयं तथा ।
स्वैः स्वैः पाटैः कृतं संयोजनं वाथ वियोजनम् ।।

कुम्भः

वसन्तः

षड्जत्रययुतः पूर्णो वसन्तो वा रिपोज्झितः ।

कुम्भः

—तालः

समौ वसन्ततालः स्यात् ।
। । ∪ ऽ ऽ ऽ

कुम्भः

वसन्तकालाभिनयः

असह्यवायुस्पर्शेन रूपयेद्दतु............ ।
उपभोगैर्बहुविधैर्विविधैः कुसुमैरपि ।
वसन्तस्त्वभिनेतव्यः सौरभैश्च मनोहरैः ।।

वेमभूपालः

वसरम्—नाट्याङ्गम्

क्षंतद्वयाक्षराण्यादौ धणकुहणमध्यमे ।
इदं तु वसरं नाम प्रोच्यते पूर्वसूरिभिः ।।

भरतकल्पलता

वस्तूत्थापनम्

कपटादिकृतं कर्म वस्तूत्थापनमुच्यते ।

वेमभूपालः

कार्यं विभज्यते यत्र सविद्रुतमविद्रुतम् ।
अनेकरससंयुक्तं तद्वस्तूत्थापनं मतम् ॥

कुम्भः

वस्त्वैलालक्षणम्

तत्तल्लक्ष्म यदा तासु पादस्तुर्यो निबध्यते ।
तदेता गदिता सर्वाश्छन्दस्त्रयः पुरातनैः ॥
आद्यमङ्घ्रियुगं प्रासवर्जितं गीयते यदा ।
तृतीयाङ्घ्रिः ध्रुवाभागे स्वल्पप्रासा भवन्त्यमी ॥
उद्ग्राहादित्रये कार्या पृथक्कं यतिचतुष्टयी ।
वर्णैलावत् शेषः स्याद्वस्त्वैला सा प्रकीर्तिता ॥

मोक्षदेवः

वहनी

गमकं युवतिर्नाम योक्तव्यं विधरूपिणी ।
वहनी नाम सा ज्ञेया यन्त्रवादनकोविदैः ।
येषु रागेषु तच्छाया वहन्यास्ते प्रकीर्तिताः ॥

कुम्भः

वंशः

वंशस्य विनियोगः—

अथ वंशविशेषस्य विनियोगोऽत्र दर्शितः ।
कामिनीनिर्जितानां च प्रवासं समुपेयुषाम् ॥
शोकार्तानां पुरो योज्यो मृदुमध्यलयध्वनिः ।
द्रुतादिललितध्वानो वंशः शृङ्गारिणां पुरः ॥
क्रोधाभिमानयुक्तानां पुरो वंशो निगद्यते ।
कम्पितस्फुरितध्वानस्तथा द्रुतलयाश्रयः ॥

कुम्भः

वंशलक्षणम्

वञ्जुलः सरलश्चैव पर्वदोषविवर्जितः ।
वैणवः खादिरो वापि रक्तचन्दनतोऽथवा ॥
श्रीखण्डजोऽथ सौवर्णो दन्तिदन्तमयोऽथवा ।
कनिष्ठाङ्गुलितुल्येन गर्भरन्ध्रेण शोभितः ॥
शिल्पविद्याप्रवीणेन वंशः कार्यो मनोहरः ।
तत्र त्यक्त्वा शिरो देशादयो निर्मितमञ्जुलम् ॥
फूत्कारन्ध्रं कुर्वीत ... ... मङ्गुलिपर्वणा ।
पञ्चाङ्गुलानि सन्त्यज्य पररन्ध्राणि कारयेत् ॥
कुर्यात्तत्रान्यरन्ध्राणि सप्तसंख्यानि कौशलात् ।
बदरीबीजतुल्यानि सन्त्यज्यार्धार्धमङ्गुलम् ॥

प्रान्तयोर्वन्धनं कार्यं स्वर्णाद्यैः नादहेतवे ।
सिक्थकेन कला देया ते सुस्वर ... भवेत् ॥

कला – कलभा । स्वर्णादिमुखरन्ध्रे स्थिरीकरणं सिक्थकेन सम्पादनीयमिति भावः । अयमुक्तप्रकारो वंशो नाम्ना पञ्चाङ्गुलः । एवं फूत्काररन्ध्रात् यावत्यङ्गुलानि परित्यज्य पररन्ध्राणि कारयेत् तानि तन्नामानि भवन्ति । यथा षडङ्गुलित्यागे षडङ्गुलनामा वंशरीत्यष्टादशपर्यन्तम् । तदुक्तम् —

पञ्चाङ्गुलोऽयं वंशः स्यादेकैकाङ्गुलवर्धतः ।
षडङ्गुलादि नाम स्याद्यावदष्टाङ्गुलं पुनः ॥
फूत्कारपररन्ध्रस्य यावदङ्गुलमन्तरम् ।
तदेव नाम वंशस्य वांशिकैः परिकीर्तितः ॥

तत्र त्याज्याङ्गुलमाह —

एकाङ्गुलो द्व्यङ्गुलश्च त्र्यङ्गुलश्चतुरङ्गुलः ।
अतितारतरत्वेन वांशिकैः समुपेक्षते ॥
त्रयोदशाङ्गुलो वंशोऽपरः पञ्चदशाङ्गुलः ।
निन्दितो वंशतत्त्वज्ञैः तथा पञ्चदशाङ्गुलः ॥

फूत्काररन्ध्रदेवत्ताङ्गुलत्यागेन पररन्ध्रे तु कार्यमित्यर्थः ।

तत्राप्यङ्गुलिविशेषत्यागेन श्रैष्ठ्यमाह —

महानन्दस्तथानन्दो विजयस्तु जयस्तथा ।
चत्वार उत्तमा वंशा देवतामुनिसम्मताः ।

ततः कथमेषां महानन्दादिकं संज्ञेत्याह—

दशाङ्गुलो महानन्दो नन्द एकादशाङ्गुलः ।
द्वादशाङ्गुलमानस्तु विजयः परिकीर्तितः ॥
चतुर्दशाङ्गुलमितो जय इत्यभिधीयते ।

एतेन दशैकादशद्वादशचतुर्दशाङ्गुलाः श्रेष्ठाः । पञ्चादिनवाङ्गुला मध्या एकद्वित्रिचतरश्रयो दशपञ्चदशाङ्गुलानि न दातव्या तद्दोषाच्छादनं तथा—

वांशिकस्य गुणा एते मया संक्षिप्य दर्शिताः ।
गातृणां स्थानदातृत्वं गायकानां विनोदनम् ॥

सङ्गीतनारायणे

अर्धाङ्गुलान्तराणि स्युः रन्ध्राण्यन्यानि सप्त वा ।
तस्याग्रे बदरीबीजसङ्काशानि भवन्ति हि ।
एष पञ्चाङ्गुलो वंशः कथितो वंशवादकैः ॥

कुम्भः

वंशवाद्यलक्षणम्

त्वक्सारदन्तवादरशिंशुपारक्तचन्दनैः।
निर्ग्रन्थिनिर्व्रणः कार्यो वंशः सरलवर्तुलः ॥
कनिष्ठाङ्गुलिमानेन तस्यान्तः सुषिरं भवेत्।
द्वे त्रीणि चत्वारि शिरोदेशे त्यक्त्वाङ्गुलानि तु
फूत्काररन्ध्रं तस्य स्यात्तुल्यमङ्गुष्ठपर्वणा।
कुर्वीत शररन्ध्रं तु विहायाङ्गुलिपर्वकम् ॥
बदरीबीजसंकाशान्यङ्गुलार्धान्तराणि च।
कल्पयेत्ताररन्ध्राणि सप्त तस्येतराणि तु ॥
एष पञ्चाङ्गुलो वंशः कथ्यते वंशवादकैः।
षड्ङ्गुलादिरारभ्य यावदष्टादशाङ्गुलम् ॥
एकैकाङ्गुलवृत्ताः स्युर्वंशाः पञ्चाङ्गुलादयः।
त्र्यङ्गुलक्रमवृद्धया च वंशानां दैर्घ्यकल्पना ॥

सोमराजदेवः

वंशस्य विनियोगः

अथ वंशविशेषस्य विनियोगोऽत्र दर्शितः।
कामिनीनिर्जितानां च प्रवासं समुपेयुषाम् ॥
शोकार्तानां पुरो योज्यो मृदुमध्यलयध्वनिः।
द्रुतादिललितध्वानो वंशः शृङ्गारिणां पुरः ॥
क्रोधाभिमानयुक्तानां पुरो वंशो निगद्यते।
कम्पितस्फुरितध्वानस्तथा द्रुतलयाश्रयः ॥

कुम्भः

वंशस्वरूपे मतङ्गमुनिमतम्

मुखरन्ध्राद्धवेत्तारं स्वररन्ध्रं मनोहरम्।
एकाङ्गुलान्तरं तत्तु मतङ्गमुनिसम्मतम् ॥

कुम्भः

वंशे वैदिकस्वरनिर्णयः

श्रुतिसंख्या स्वरेषु स्यादेवमङ्गुलिकर्मभिः।
उदात्तश्चानुदात्तश्च स्वरितश्चेति नामतः ॥
अत एव स्वराः सप्त विज्ञेया गीतवेदिभिः।
अनुदात्ताः स्वरास्तत्र चतुःश्रुतियुतास्त्रयः ॥
त्रैग्रामिकेऽपि ते वेणौ विमुक्ताङ्गुलयो मताः।
उदात्तौ चात्र विज्ञेयौ श्रुतिद्वययुतौ स्वरौ ॥
तौ भवेतामर्धमुक्ताङ्गुली ग्रामत्रयेऽपि च।
स्वरिताख्यौ स्वरौ चात्र त्रिश्रुती परिकीर्तितौ ॥

स्वरसाधारणं षड्जे प्राहुरर्धाङ्गुलीकृतम्।
मध्यमस्य श्रुतिं याति गान्धारो यद्वदन्ति तम् ॥
अन्तरस्वरजात्यैव कम्पमानाङ्गुलिं तदा।
मध्यमग्रामिके वेणौ षड्जमध्यमधैवताः ॥
विमुक्ताङ्गुलयो ज्ञेयाः चतुःश्रुतियुतास्त्रयः।
ऋषभः पञ्चमश्चापि त्रिश्रुती भवतः स्वरौ ॥
कम्पमानाङ्गुली चैतावुभौ ज्ञेयौ मनीषिभिः।
निषादश्चैव गान्धारः विज्ञेयौ द्विश्रुतिस्वरौ।
एतावप्यत्र कथितावर्धमुक्ताङ्गुली तदा ॥

नान्यः

वाक्यम्

पदैस्तु निर्मितं वाक्यं क्रियाकारकसंयुतम्।

मतङ्गः

स्वरश्च गीतरागौ च नाभेरूर्ध्वं तु वाक्यता।

भरतकल्पलता

वाक्यलक्षणम्—पाठ्यम्

अनियुक्तात्मकं वाक्यं साकाङ्क्षमिति कथ्यते।
वाक्यं तादृग्विधं स्वल्पवर्णालङ्कारयोजनम् ॥
तारेणारभ्य मन्द्रान्तं प्रयुञ्जीत विचक्षणः।
वाक्यं तत्स्यान्निराकांक्षं युक्तार्थं नितरां तु यत् ॥
तादृग्भूतमिदं भूरि वर्णालङ्कारयोजितम्।
मन्द्रेणारभ्य तारान्तं प्रयुञ्ज्यात् पाठ्यकर्मणि ॥
छन्दोवशादर्थवशात् प्रयोजनवशादपि।
वाक्यार्थस्य समाप्त्या च तथा प्राणवशेन च।
तथा पदावसाने च विरामस्तु विधीयते ॥

वेमभूपालः

वागुपकारगुणाः

शब्दानुशासनज्ञानमभिधानप्रवीणता।
गणछन्दोऽनुबन्धत्वमलङ्कारेषु कौशलम् ॥
तौर्यत्रितयचातुर्यंहृद्यशारीरपालितम्।
लयतालकलाज्ञानं विवेकोऽनेककाकुषु ॥
देशीरागेषु विज्ञत्वं वाक्यदुरुत्वं सभाजयः।
इति वागुपकारस्य गुणाः प्रतिनिरूपिताः ॥

गान्धर्ववेदे

वागुपकारभेदाः

अधमो धातुकारश्च मातुकारश्च मध्यमः।
धातुमातुक्रियाकार उत्तमः परिकीर्तितः ॥

अधमो लक्षणेन स्यान्मध्यमो लक्ष्यमाचरेत् ।
लक्ष्यलक्षणसंयुक्त उत्तमः परिकीर्तितः ॥

गान्धर्ववेदे

वाग्गेयकारकः

प्रभुतिप्रतिभोद्भेदभाक्त्वं सुभगगेयता ।
द्रुतगीतविनिर्माणं पदान्तरविदग्धता ॥
देशीरागेष्वभिज्ञत्वं देशगीतिषु चातुरी ।
परचित्तपरिज्ञानं वाक्पटुत्वं सभाजयः ।
गुणैरेतैः समायुक्तो वरो वाग्गेयकारकः ॥

हम्मीरः

सर्वभाषाभिधानज्ञः छन्दोलक्षणवेदिता ।
रसालङ्कारभावज्ञस्तौर्यत्रितयकोविदः ॥
कलाशास्त्रेषु कुशलो हृद्यशारीरशालिनः ।
देशस्थितिषु चतुरो लयतालकलादिषु ॥
सर्वकाकुसुविज्ञानी परचित्तपरीक्षकः ।
देशीरागेषु विज्ञाता वक्ताभ्यस्तसभाजयः ॥

मोक्षदेवः

वाग्गेयकारस्य गुणाः

सर्वजन्तुषु मैत्रीवानीषद्द्वेषविवर्जितः ।
प्रगल्भो दृढनिर्बन्धो नव्योक्तिपदपङ्क्तिकृत् ॥
त्रिस्थानगमकालप्तिस्तूर्णगीतिनिरूपकः ।
सावधानो गुणैरेभिर्वीरो वाग्गेयकारकः ॥

मोक्षदेवः

वाङ्निष्ठा

वाङ्मयानीह शास्त्राणि वाङ्निष्ठानि तथैव च ।
तस्माद्वाचः परं नास्ति वाचः सर्वस्य कारणम् ॥

कुम्भः

वाचिकमार्गाः

अथोच्यते वाचिकस्य मार्गा द्वादश ते पुनः ।
आलपश्च प्रलापश्च विलापश्चानुलापकः ॥
सल्लापश्चापलापश्च सन्देशो व्यपदेशकः ।
उपदेशश्चापदेशो निर्देशश्चातिदेशक ॥

वेमभूपालः

वाचिकमार्गाणां लक्षणानि

आभाषणं स्यादालापः प्रलापो वागनर्थकः ।
विलापः करुणं वाक्यमनुलापो मुहुर्वचः ॥
सल्लापोऽन्योऽन्यभाषा स्यादपलापस्तु नी ··· ।
इदं ब्रूहीति सन्देशो व्याजोक्तिर्व्यपदेशयुक् ॥
विधिर्वागुपदेशः स्यादपदेशः परार्थवाक् ।
निर्देशः स्यादयमिति सोऽतिदेशस्तु कथ्यते ।
त्वदुक्तमेवास्मदुक्तमिति यत्रातिदिश्यते ॥

वेमभूपालः

वाचिकाभिनयः

गीतानां च प्रबन्धानां वाक्यानां वृत्तसंसदाम् ।
द्विपदी चूर्णिकानां च श्लोकानां गीतसंसदाम् ॥
अन्येषां गीतबन्धानामेषां च नटनक्रमात् ।
वाचिकाभिनयः प्रोक्तो भरतार्थविवेकिभिः ॥

शृङ्गारशेखरः

वाचिकाभिनयस्वरूपम्

वागात्मा वाचिको द्वेधा संस्कृतप्राकृताश्रयः ।
नामाख्यातादिभिर्भेदैश्च विस्तरमश्नुते ॥

नृत्तरत्नावली

वाञ्छितः—निःसारुकः

लघुत्रयं द्रुतद्वन्द्वं ताले शरभलीलके ।
अयं निःसारुको ज्ञेयो वाञ्छितो वाञ्छितप्रदः ॥

गान्धर्ववेदे

वाणलेखायाः लक्षणम्—वाणलेखा

द्वात्रिंशत्प्रतिपादं तु मात्रा यत्र भवन्ति हि ।
वाणलेखा मतङ्गोक्ता गणैर्ज्ञाणाद्ध्यैः कृता ॥

मोक्षदेवः

वादकलक्षणम्

स्वपक्षपोषणे दक्षः परपक्षप्रदूषणे ।
वादपक्षपरिग्राही वादकृत्याच्च वादकः ॥

मोक्षदेवः

वादनप्रकारः

एकहस्तं द्विहस्तं च कुटुम्बाधानजं तथा ।
कोणकाहननञ्चैव धनुराकर्षसंभवम् ।
फूत्कारजनितं चान्यद्वादनं बहुभङ्गिकम् ॥

सोमेश्वरः

वादनमार्गः

अद्रिताख्या विकृष्टा च गोमुख्यालप्तिका तथा।
वादनस्य चतुर्मार्गाः कथिताश्चन्द्रमौलिना॥

संगीतसारः

वाद्याः

कलामो विकलासश्च ढाकी चाद्धटकाकली।
जोलाटकालिकाचैव गोमूत्री मुरजस्तथा॥
पलमानो दण्डमानो वादिविस्वावलान्वितः ?।
धूमकेतुरिति प्रोक्ता दशवादा मनोहराः॥

सङ्गीतसारः

वादिप्रभृतिपूपचारः

ते वादिनः स्युर्वदनात्समस्ताः संवादिना संवदनात्प्रविष्टाः।
तथानुवादा अनुवादिनश्च विवादिनस्तत्र विवादभावात्॥

हम्मीरः

वादिमत्तगजाङ्कुशः—देशीतालभेदः

चत्वारो गुरवो लौ द्वौ गलौ पश्च गुरू तथा।
लद्वयं गुरवश्चाष्टौ तथा द्रुतचतुष्टयम्॥
ततो वकश्च लद्वन्द्वं द्रुतानां चैव पञ्चकम्।
ज्ञेयमेतद्यथा शंभ वादिमत्तगजाङ्कुशे॥
ऽऽऽऽ।। ०० ऽ।ऽ ऽऽ।। ऽऽऽऽऽऽऽऽ ०००० ऽ।। ०००००

हम्मीरः

—कस्यचिद्ग्रन्थस्य नाम

अयं ग्रन्थः भरतकृत इति ग्रन्थ एव वर्तते। शतत्रयश्लोकप्ररिमितोऽप्ययं बहुविषयप्रतिपादकः। यथा जीमूतादिकाः ग्रामाख्यः, एकोनपञ्चाशत्तानाः तेषां लक्षणं, द्विपञ्चाशत्प्राकृतादिभाषाणां, उदाहरणानि च नामानि सन्ति। अस्य मातृका पुण्यपत्तने नेपालराजभाण्डागारे च वर्तते।

वाद्यम्

ततं वाद्यं च देवानां गन्धर्वाणां च सौषिरम्।
आनद्धं राक्षसानां च मानवानां घनं विदुः॥

सङ्गीतनारायणे

वाद्यपृथक्ता

पृथग्वाद्यं भवेदेकं द्वितीयं गीतसंगतम्।
नृत्तानुगं तृतीयं च तुरीयं गीतनृत्तगम्॥

सोमेश्वरः

वाद्यप्रकरणे उपाङ्गानि

उपाङ्गानां च केषांचिद् वाद्यप्रकरणेऽप्यहम्।
आलापवीणयालापाश्च वक्ष्ये तन्मात्र दर्शिता॥

मोक्षदेवः

वाद्यप्रकरणे मङ्गलाचरणम्

वितन्वाने विष्णौ पटुपटहपाटप्रकटनं
मृदङ्गव्यासङ्गं रचयति विरञ्चौ भगवति।
कृतानन्दे नन्दिन्युरुडमरवादिन्यवतु वः
शिवः कुर्वन्नाद्यं सुरवरचमत्कारचतुरम्॥

सोमराजदेवः

वाद्यप्राधान्यम्

वाद्येनय...जते गीतं तन्नृत्तं वाद्यवर्जितम्।
तस्माद्वाद्यं प्रधानं स्याद्गीतनृत्तक्रियाविधौ॥

सोमेश्वरः

वाद्यभेदाः

ततं चानद्धसुषिरघना इति चतुर्विधम्।
ततं वीणादिकं वाद्यमानद्धं मुरजादिकम्।
वंशादिकं तु सुषिरं कांस्यं तालादिकं घनम्॥

सङ्गीतनारायणे

वाद्यभेदाः तेषां लक्षणानि

तन्त्रीयन्त्रविभेदेन ततं प्रोक्तमनेकधा।
विपञ्ची वल्लकी ज्येष्ठा नकुलोष्ठी च किन्नरी॥
शततन्त्री जया चित्रा हस्तिका परिवादिनी।
कुब्जिका कच्छपी घोषवती सारङ्गिका तथा॥
उदुम्बरी च त्रिसरा ढक्कयालापनी ततः।
प्रोक्ता रावणहस्तश्च षट्कर्णा आदिकं मतम्॥
कार्यः सुवृत्तो वीणायाः दण्डः खादिरदारुणा।
सदैर्घ्यषड्वितस्तिः स्यात् परिधौ द्वादशाङ्गुलः॥
सार्धाङ्गुलपरीणाहो गर्भे च सुषिरोऽखिलः।
छिद्दस्य न संयुक्तस्तुम्बबन्धनहेतवः ?॥
दण्डाघोष्टाङ्गुलायामाश्चतुरङ्गुलपार्श्वकः।
मध्येच कच्छपोत्तुङ्गपत्रिकाधारगर्तवान्॥
अधस्तान् मध्यभागे तु सुश्लक्ष्णः किञ्चिदुन्नतः।
पार्श्वतोरुभयोलिम्नो दण्डतः द्वारसंयुतः ?॥
दण्डरन्ध्रप्रमाणेन शङ्कुना च विराजितः।
कर्तव्यः ककुभो वीणा वादकैश्चारुदारुणा॥

षडयङ्गुलपरीणाहवृत्तं त्र्यङ्गुलनाभिकम् ।
तुम्बं स्यात्तन्मुखं छिन्द्याद्विस्तारद्वादशाङ्गुलम् ॥

वीणादण्डशिरोभागादधः सप्तदशाङ्गुले ।
अलाबुबन्धनकृते कुर्वीत विवरद्वयम् ॥
तत्र रन्ध्रद्वये तन्त्रीप्रोतां द्विगुणितां दृढाम् ।
तुम्बस्य नाभिच्छिद्रेण मध्ये निःकासयेत्ततः ॥
आकृष्य नारिकेलीयं कर्परच्छिद्रमध्यतः ।
भ्रामयेत्कीलकेनैतां यावत्तुम्बो दृढीभवेत् ॥
तुम्बादूर्ध्वमतिश्लक्ष्णसूत्ररज्जुविनिर्मितः ।
क्रियते नागपाशस्तु तेन तन्त्रीं नियन्त्रयेत् ॥
कार्या स्नायुमयी श्लक्ष्णा सुदृढा सा मनोरमा ।
वेष्टयेन् ककुभे गाढं तथा निष्पीड्य पत्रिकाम् ॥
तन्त्रीपत्रिकयोर्मध्ये न्यासजीवां जवायतां ।
स्थापयेद्ङ्गुलां दैर्घ्ये सा जीवा नादजीवनात् ॥
तुम्बस्याधो विधातव्या रज्जुसन्मन्द्रसिद्धये ।
सारणा वैणवी कार्या प्रमाणे द्वादशाङ्गुला ॥
आसां समस्तवीणानां एकतन्त्री गरीयसी ।
दृष्टा श्रुतापि च नृणां पापव्यूहमपोहति ॥ सोमराजदेवः

वाद्यानामुपयोगः

गीतं नृत्तं च वाद्येन धत्ते शोभां यतस्ततः ।
देवयात्राविवाहादौ वाद्यमादौ प्रयुज्यते ॥
हस्ताभ्यामेकहस्तेन गुलिकाकोणफूत्कृतैः ।
रञ्जनाय जनस्यैतद्वाद्यते वाद्यकोविदैः ॥ सोमराजदेवः

वामदक्षतिरश्चीनम्

वामदक्षिणयोस्तिर्यग्लुठनं करयोर्यथा ।
स्वस्तिकाकारयोर्यत्र तत्तदा तण्डुना मतम् ।
वामदक्षतिरश्चीनं तदाप्यन्वर्थनामकम् ॥

वामदक्षिणहस्तः

स्वपुटं पीडयेद्वामस्तदा पाण्यन्तरो भवेत् । कुम्भः

वालव्यजनचालः—चालकभेदः

उत्प्रकोष्ठावुभौ हस्तावंसदेशादयोगतौ ।
पर्यायमण्डलाकाराद् भ्रमणं कुरुते यदि ।
वालव्यजनचालाख्यश्चालकस्समुदाहृतः ॥ वेमः

पर्याये ...... त्प्रकोष्ठ चेत्कंठदेशान्तरं गतौ ।
करौ विलुठितौ भूत्वाधोगतौ चक्रमावतः ।
यत्र तत्र तदादिष्टं वालव्यजनचालयम् ॥

वासकसज्जा—नायिका

या रम्यवेश्मनि सुकल्पिततल्पमध्ये
ताम्बूलपुष्पवसनैश्च समं सुसज्जी ।
कान्तस्य सङ्गसमयं समवेक्ष्यमाणा
सा कथ्यते कविवरैरिह वाससज्जी ॥

शुभङ्करः

वांशिकगुणाः

स्वस्थानत्वं सुस्वरत्वमङ्गुलीसारणत्रिधा ।
समस्तगमकज्ञानं रागरागाङ्गवेदिता ॥
क्रियाभाषाविभाषासु दक्षता गीतवादने ।
स्वस्थाने चापि सुस्थाने नादनिर्माणकौशलम् ॥
गातॄणां स्थानदातृत्वं तद्दोषाच्छादनं तथा ।
वांशिकस्य गुणा एते मया संक्षिप्य दर्शिताः ॥

शुभङ्करः

वांशिकदोषाः

बहुकृत्वशिरःकम्पः स्वस्थानप्राप्तिरेव च ।
वृथा प्रयोगबाहुल्यः वा......गीतवादने ।
एभिर्दोषैर्युतोतीव निन्दितो वांशिको मतः ॥

सङ्गीतनारायणे

विकटम्

विरूपवेषावयवव्यापारं विकटं मतम् ।

कुम्भः

विकृतम्—मण्डलभेदः

दक्षिणो विच्यवीभूत्वा स्पन्दितोऽनन्तरं भवेत् ।
पार्श्वक्रान्तो दक्षिणाङ्घ्रिर्वामस्तु स्पन्दितस्ततः ॥
उद्वृत्तो दक्षिणोऽलातो वामस्सूची तु दक्षिणः ।
पार्श्वक्रान्तस्तु वामोऽङ्घ्रिराक्षिप्तीभूय दक्षिणः ॥
भ्रान्त्या सव्यापसव्येन दण्डपादत्वमागतः ।
वामः क्रमेण सूची स्याद् भ्रमरश्चाथ दक्षिणः ।
भुजङ्गत्रासितो वामोऽतिक्रान्तो विकृताभिधे ॥

(विप्रदास)

विहृतमेव विकृतं विहित विद्रुतं इत्यादर्शेषु दृश्यते । लक्षणेऽपि क्रियाप्रारम्भे भेदो दृश्यते । विच्यवस्पन्दितः उद्वृत्तः । सूचीत्यादिस्थलेषु तत्तचारीगतपादो विवक्षितः । अन्ते चार्यैव ।

विकृतः—सात्त्विकभावः

सम्प्राप्तावसरं वाक्यं मुच्यते यत्र लज्जया ।
विकृतं तं विजानीयादिति नाट्यविदां मतम् ॥

यद्वा—

मुग्धादीनामङ्गनानां यद्विपर्ययमीरितम् ।
कुमुन्तिवलीलानां स चैव विकृत उच्यते ? ॥

शुभङ्करः

विकृतैलानां लक्षणानि—तत्र वासवीलक्षणम् संगतालक्षणञ्च

वासवी सङ्गता त्रेता चतुराबाणसंज्ञका ।
एलानां विकृताः पञ्च जातयः प्रथिता इमाः ॥

एकद्वित्रिचतुःपञ्च गणानां विकृतौ क्रमात् ।
गणस्याद्यस्य विकृतेरेला समामिधा भवेत् ॥

द्वितीयगणविकाराद्भवेदेला मनोरमा ।
तृतीयस्य गणस्यात्र विकृतेरुन्नता मता ॥

शान्तिस्तुर्यगणस्याथ विकारः कीर्त्यते बुधैः ।
नागरा विकृतेर्ज्ञेया पञ्चमस्य गणस्य च ॥

इति पञ्चविधा प्राहुर्वासवी लक्ष्मवेदिनः ।
स्यादाद्यस्य द्वितीयस्य रमणीया विकारतः ॥

आद्यतृतीयविकृतेरुच्यते विषमा च सा ।
प्रथमस्य तुरीयस्य विकृतेः कथिता समा ॥

आद्यपञ्चमयोर्लक्ष्मीर्गणयोर्विकृतौ भवेत् ।
द्वितीयस्य तृतीयस्य विकारात्कामुकी मता ॥

द्वितीयतुर्यगणयोर्विकारान्मदनोत्सवा ।
पञ्चमस्य द्वितीयस्य विकृतेर्नन्दिनी मता ॥

तुर्यतृतीयगणयोर्भवेद्गौरी विकारतः ।
पञ्चमस्य तृतीयस्य सौम्याख्या विकृतेर्मता ।
तुर्यपञ्चगयोः प्रोक्ता रतिदेहा विकारत. ॥

मोक्षदेवः

विकोशा

विकोशा सा विकसितपुटद्वन्द्वविकासिनी ।

सङ्गीतमुक्तावली देवेन्द्रकृता

विक्षेपः—कलामानम्

सस्य दक्षिणतः क्षेपो विक्षेपः परिभाषितः ।

दत्तिलः

विक्षेपा

मुहुः प्रसार्य चरणमग्रतो गगनाङ्गणे ।
आकम्पयेत्तदा प्रोक्ता विक्षेपा नाम चारिका ॥

कुम्भः

विचित्रसुरता—नायिका

शृङ्गाररससंसिद्धा कान्ता केलिकलान्विता ।
नानाबन्धविधानज्ञा विचित्रसुरता मता ॥

शुभङ्करः

विचित्रनृत्तम्

मध्ये मध्ये भ्रमरिका प्रयोगं चालकान्वितम् ।
गीत्वा कलासेनालापं लसद्धारयाङ्गसुन्दरम् ॥
विविधं नर्तनं कुर्यादेकतालयानुगं यदा ।
नृत्तं विचित्रया रीत्या तदा जनमनोहरम् ॥

विच्छित्तिः—सात्विकभावः

शृङ्गारस्याथ विच्छेदो विच्छित्तिरिति कथ्यते ।

यद्वा —

प्रियापराधमालोक्य कुपितायाः सखीजनैः ।
प्रसादनं विलसिन्या विच्छित्तिरिति कथ्यते ॥

शुभङ्करः

विच्छित्तिलक्षणम्

माल्याङ्गरागवसनभूषणादेरनादरात् ।
विन्यासो यो विलासस्य स्वल्पीयानपि भूयसीम् ।
शोभां प्रकाशयत्यङ्गे सा विच्छित्तिरिति स्मृता ॥

वेमभूपालः

विच्छुरितः—पाटः

शुद्धेन करसङ्गेन घातनाङ्गुष्ठहेतुना ।
क्रमादुत्पद्यते स्त्रीणां पाटो विच्छुरिताभिधः ॥

यथा—

रुद्रं २ डें गिगिडि २ न गिरिगिडिन ।
एतेषु पाटवर्णेषु स्वराः सप्त प्रकीर्तिताः ।
अ आ इ ई उ ए ओ च वाद्यविद्याविशारदैः ॥

कुम्भः

विच्यवा

भवेत्स्वस्तिकरूपेण संवेधो जंघयोर्मिथः ।
ततो वलनमूरुभ्यां यस्यां बद्धेतिसामृता ॥

अस्यां स्वस्तिकविश्लेषे यावत्पादतलाग्रयोः ।
मण्डलभ्रमणात्स्वस्वपार्श्वयोर्गमन........ ।
इत्यूचुर्ललनायुक्तं केचिदूचुर्विपश्चितः ? ॥

उज्जायनः

विजयः

शीलो विजय इत्येव त्वावङ्गुलौ स्मृतौ यथा ?।
द्रुतद्वयं विरामान्तं लघुनैकेन संयुतम् ॥

हम्मीरः

—प्रबन्धः

निरूप्यतेऽथ विजयः तालोऽत्र विजयाभिधः ।
गीयन्ते तेन्नकाः पाटाः पदानि प्रकटस्वराः ।
आभोगस्तु पदैरन्यैः न्यासस्तेन्नैर्विधीयते ॥
लक्षणं विजयस्यैतत् ।

हरिपालः

विजयाभिधतालेन तेन्नपाटपदस्वरैः ।
विजयो यत्र वीराणां गीयते विजयाभिधः ।
आभोगोऽन्यपदैरस्य तेन्नैर्न्यासो विधीयते ॥

जग-मल्लः

विजयानन्दः—तालः

लद्वयं गत्रयं ताले विजयानन्दसंज्ञके ।
॥ ऽऽऽ

कुम्भः

वितालकः

लयलुप्तश्च विज्ञेयो वितालस्तालविच्युतः ।

भरतकल्पलता

विदारणकला—कला

यदि नो निधने हानिरतिमित्रो हृदो भयम् ।
संदेहदिग्धहृदया कुर्यात् पूगीविदारणम् ॥
धृत्वा भूमौ करौ या चरणयुगमपि प्राप्य कर्ण्यान्तमूलं
कुर्यात्पश्चात्प्रदेशेऽन्नमितगति लघुन्यस्य तद्दारिकाम्रे ।
पूगी चातो भिनत्ति युगततनुलता वक्षसा यात्र सोक्ता
वक्षः प्राग्यक्षनेत्रीत्यमितगुणकला नागमध्यक्षितीशैः ॥

नागेन्द्रसङ्गीते

विदारी

पदवर्णसमाप्तिस्तु विदारीत्यभिसंज्ञिता ।

नाट्यशास्त्रे

विदूषकः—उपनायकः

हास्यप्रधानवाक्येन विनोदं प्रतनोति यः ।
नायकस्य सदा प्रीतो विदूषक इति स्मृतः ॥ यद्वा—
आप्तः पुरश्चरो राज्ञां नर्ममाली विदूषकः ।

शुभङ्करः

विद्धा

चरणौ स्वस्तिकीकृत्य किञ्चिदान्दोलयेत्पुरः ।
कुञ्चितं चरणं यत्र सा विद्धा परिकीर्तिता ॥

कुम्भः

विद्युत्कलासः—कलासभेदः

यस्मिन्नूर्ध्वमधोऽधः पताकमायान्ति हस्तकाः सततम् ।
विद्युदिव सञ्चलास्तं वदन्ति विद्युत्कलासमिह ॥
वर्षासु जलदराशिषु सचमत्कारं यथा चिरविलासात् ।
विलसति तथा पताकप्रमुखैः प्लुतमनास्तिर्यक् ॥

कुम्भः

—प्रथमः

वामं करं पताकाख्यं नीत्वा दक्षिणकर्णगम् ।
तथापरं करं वामां कटीं वामां च जङ्घिकाम् ॥
एतद्व्यत्यासनेनापि कृत्वा पाणिद्वयं ततः ।
सम्मुखं रचयेद्विद्युद्भेद आद्यो भवेदसौ ॥

अशोकः

—द्वितीयः

विधाय दक्षिणं पाणिमर्धचन्द्रं स्वसम्मुखम् ।
विनीय च नटी कुर्यात् धनुराकृति जानु चेत् ।
तदा भेदो द्वितीयः स्याद्विद्युदाद्यकलासजः ॥

—तृतीयः

समदृष्टिर्नटीहस्तमञ्जलिं प्रविधाय चेत् ।
अस्याङ्गुलीः प्रसार्याथ पुरतश्शिखरं करम् ।
कृत्वा प्रसारयेद्बाहू तदा भेदस्तृतीयकः ॥

—चतुर्थः

केशबन्धौ करौ कृत्वा क्रमादलिकमूर्धगौ ।
करौ दक्षिणवामौ चेन्निधाय द्वौ पताककौ ।
कुर्यात्तदा भवेद् भेदः चतुर्थश्च पुरोदितः ॥

—पञ्चमः

कृत्वा पुष्पपुटं पाणिमुष्टिस्तं द्विर्निरीक्ष्य च।
तदनूत्सङ्गमारच्य चरणे दक्षिणं द्रुतम् ॥

स्पृशेद्दक्षिणहस्तेन वामाङ्घ्रिं वामपाणिना।
यत्रासौ पञ्चमो भेदः कलासङ्ज्ञैरुदीरितः ॥

—षष्ठः

प्लुतमानकृताङ्घ्रिश्चेदथो हि मकरं करम्।
कृत्वा नृत्यति पाणिभ्यां षष्ठो भेदस्तदोदितः ॥

अशोकः

विद्युद्भ्रान्तम्

पृष्ठतो भ्रामितं पादं सर्वतो मण्डलत्वतः।
भ्रामितं च शिरःक्षेत्रे विद्युद्भ्रान्तं तदोच्यते ॥

संगीतमुक्तावली देवेन्द्रकृत

विद्युद्भ्रान्ता

पुरस्तादङ्घ्रिमुत्क्षिप्य नामयित्वा त्रिकं द्रुतम्।
भूमौ चेन्न्यस्यते प्रोक्ता विद्युद्भ्रान्ता तदा बुधैः ॥

कुम्भः

विद्युद्भेदः

मेघपंक्तौ यथा विद्युच्चकास्ति सचमत्कृतिः।
तदा यत्र पताकादीन् प्लुतमानकृताकरान् ॥

तिर्यगूर्ध्वमधोदश्चेदारादातन्वती नटी।
विभाति विद्युदाद्यस्तु कलासस्स तदोदितः ॥

वामं करपताकाख्यं नीत्वा दक्षिणकर्णगम्।
तथापरं करं वामं कटिं वामां च जङ्घिकाम् ॥

एतद्व्यत्यासनेनापि कृत्वा पाणिद्वयं ततः।
सम्मुखं रचयेद्विद्युद्भेद आद्यो भवेदसौ ॥

अशोकः

विद्युद्विलासः—पाटः

विद्युद्विलसितः पाटो वलिताधार्धहस्ततः।
तर्जन्यङ्गुष्ठघातेन जायते राजशासनात् ॥

यथा—

तेण तेण तिटडें डिहि…।

कुम्भः

विनिवर्तना

परिवर्तनतोऽङ्गानां पृष्ठतो विनिवर्तना।

कुम्भः

विन्यासभेदाः

विन्यासभेदाः पाटानां वाद्यन्ते मुरजादिषु।
बोलावणी च चल्लाच रासवश्च कुचुम्बिनी ॥
चारुश्रवणिकालग्नः परिश्रवणिका ततः।
समप्रहारः कुडुपं चारिणी करणा तथा।
दण्डहस्तो घननखस्तानि द्वादशधावदन् ॥

कुम्भः

विन्यासलक्षणम्

विदारी भोगरूपस्य पदस्यान्ते यदा कचित्।
विन्यस्यते तदा ह्येष विन्यासोऽर्थविवादवान् ॥
पाशायां रक्तगान्धार्यां मापाधापापमाधपा।
मगेति ब्रह्मणा पूर्वं प्रयोगोऽत्र प्रदर्शितः ॥

मोक्षदेवः

विपञ्ची—वीणा

एषैवतु विपञ्ची स्याद्विशेषो विनिगद्यते।

एषा रुद्रवीणेत्यर्थः

तन्त्रीद्वयस्य स्थित्यर्थं वामभागे तु काकुभे।
उभोद्वयङ्गुलदलं लोहपत्रिसमन्वितम् ॥

मन्द्रतन्त्र्यर्थसंसिध्यै दातव्ये पदिके इह।
बृहत्यौ सारिके न्यासः तयोरपि च कथ्यते ॥
मन्द्रपञ्चकमासाद्योभयतस्तिष्ठतो यथा।
रमन्त्यावनुरागिण्यौ कान्तमेकान्तवर्तिनम्।
इत्यादि लक्षणोपेता रौद्रीवत्तु विपञ्चिका ॥

सङ्गीतनारायणे

विप्रकर्षप्राधान्यम्

संभोगो विप्रलम्भेन विना न रतिकारकः।
कषायते हि वस्त्रादौ भूयान् रागो यतो भवेत् ॥
विप्रयोगोऽनुरागो नु यूनोरेकमनस्कयोः।
पारतन्त्र्येण दैवाद्वा विप्रकर्षादसङ्गमः ॥

कुम्भः

विप्रलब्धा—नायिका

अहरहरथ रागाहूतिकां प्रेष्य पूर्वं
मदभयमभिजाताकापि सङ्केतदेशे।
स मिलति खलु यस्यावस्थलोदीरयोगा-
त्कथयति भरतस्तां नायिकां विप्रलब्धाम् ॥

शुभङ्करः

विप्रलब्धाः खण्डिताश्च कलहान्तरिता अपि ।
इत्थं प्रदर्शयेन्नाट्ये तथा प्रोषितभर्तृकाः ॥
विचित्रमण्डनैर्हर्षैः वेषैर्नानाविधैरपि ।
तथातिशयशोभाभिर्दिशेत्स्वाधीनभर्तृकाः ॥
एवं वासकसज्जापि निर्देश्या नाट्यकोविदैः ।
नियुज्यन्ते बुधैरेतेऽभिनयाभावसंयुताः ॥
या यस्य नियता लीला गतिश्च स्थितिरेव च ।
तस्य रङ्गप्रतिष्ठस्तां नटस्तावद्विनिर्दिशेत् ॥
यावन्न निर्गतो रङ्गादिति सामान्यतो विधिः ।

विप्रलम्भशृङ्गारः

स्वदतेऽतीवसंभोगाद्विप्रलम्भो विनाकृतः ।
विप्रलम्भे य विच्छिन्नः संभोगस्य मनोरथः ॥
न संभोगरसास्वादप्रत्याशा यत्र कामिनोः ।
तद्विप्रलम्भः शृङ्गारः तत्रान्यः करुणो रसः ॥
शङ्कासूयाश्रमौत्सुक्यनिर्वेदग्लानिमृत्यवः ।
उन्मादव्याध्यपस्मारविबोधजडतास्तथा ॥
दैन्यं निद्रा तथा स्वप्नसुप्तचिन्तादयश्च ये ।
तदीयैरनुभावैस्तु विप्रलम्भोऽभिधीयते ॥

हम्मीरः

विप्रलम्भस्य विधिः

दशां वा भाविनिधनां सूचयेन्न त्विमां वदेत् ।
ननु दुःखात्मकः कस्माद्विप्रलम्भो रसो मतः ॥
मैवं रत्यनुसन्धानं विप्रलम्भे च दृश्यते ।
विप्रलम्भोद्भवा शङ्का संभोगे दुस्त्यजा ध्रुवम् ॥
शोको हि करुणे स्थायि विप्रलम्भे रतिर्मता ।
स्थायिभेदाद्धि भागोऽतस्तयोरुत्तमपूरुषे ॥
नरे वीरे तु माल्यादिविभावानामसम्भवात् ।
इत्यभावो विप्रलम्भः शृङ्गारो जायते कथम् ।
अतः स्यात्करुणः स्पष्टस्तत्रेष्टविरहोद्भवः ॥

हम्मीरः

विभावः

विभाव्यन्ते वितन्यन्ते वागङ्गाभिनयवि सा ।
एभिरेव च यत्तस्माद्विभावा इति भाषिताः ॥

शुभङ्करः

रसान प्रमुखते ते स्युर्विभावस्तद्विभावनात् ।

हम्मीरः

विभावलक्षणम्

उपादानं निमित्तं च काव्यशब्दैः समर्पिताः ।
नाट्ये नटैस्तदाकारानुकृत्यालक्ष्यतां गताः ।
भावान् विभावयन्तीति ते विभावास्तथा स्मृताः ॥

विप्रदासः

विभ्रमः—सात्त्विकभावः

स्त्रीरङ्गसङ्गमाप्राप्तैस्त्वरया परिवर्तनम् ।
अलङ्कारविशेषाणामिति योषित्सु विभ्रमः ॥

शुभङ्करः

विभ्रमलक्षणम्

प्रियासन्दर्शनोद्भूतस्त्वरया परिकल्पितः ।
वागङ्गभूषणानां तु विन्यासो विभ्रमो भवेत् ॥

वेमभूपालः

विमुक्तः

निरुद्धश्चिरमामुक्तो विमुक्तः कथ्यते मरुत् ।
प्राणायामे तथा ध्याने योगो चैष नियुज्यते ॥

कुम्भः

विरसः

रसहीनं तु विरसो विरसश्चेति विश्रुतः ।

भरतकल्पलता

विलम्बः—प्रतिमण्ठः

लघुद्वन्द्वं विरामान्तं ताले कन्दुकसंज्ञके ।
धिरागो गीयते तेन विलम्बश्च लयो भवेत् ॥

कन्दुकतालः ।

गान्धर्ववेदे

विलम्बितः

प्रबन्धाङ्कं सतालं च पदद्वन्द्वं पृथक्ततः ।
द्विर्गीत्वा गायते यत्र प्रयोगोऽपि विलम्बितः ॥

हम्मीरः

विलासाधिरोहणकला

परस्परासक्ततलोन्नतेषु
धृत्वेलुरः स भ्रूविलासकेषु ।
योऽक्षिप्य पादौ खलु पृष्ठभागे
ततो विधत्तेऽप्युचितौ शिरोऽधः ॥

नीत्वा ततः कांस्यमयं च ताल्यां
पात्रं सतोयं कुरुते च मूर्ध्नि।
पुरःस्थितं यत्र च चक्रकानि
विधुन्वती हस्तपदाङ्गुलैश्च ॥
निराश्रया नृत्यविधिप्रवीणा
विभासयन्ती त्रिदिशश्चतस्रः।
मुग्धा श्वसन्ती मधुराक्षराणि
सा सुभ्रुवो लोकमणि प्रदिष्टा ? ॥

नागेन्द्रसङ्गीते

विलासः

नायकालोकनादौ तु विशेषो हि क्रियासु यः।
शृङ्गारचेष्टासहितो विलासः स निगद्यते ॥

सङ्गीतनारायणे

—सात्त्विकभावः

माधवविलोकनादौ विशेषो हि क्रियासु यः।
शृङ्गारचेष्टासहितो विलास इति कीर्तितः ॥

यद्वा—

वीक्षणभ्रमणे यत्र विकारः प्रियदर्शनात्।
कोपे हि स्मितमात्सर्ये विलासः स निगद्यते॥

शुभङ्कर

—पौरुषः

गतिर्गजोपमा दृष्टिस्तृणीकृतजगत् त्रया।
स्मितपूर्वं वचो यत्र विलासः सोऽभिधीयते ॥

वेमभूपालः

सुश्लिष्टस्थानगमनहस्तभ्रूनेत्रकर्मणाम्।
विशेषो यस्य चलनैर्विलास इति कथ्यते ॥

वेमभूपालः

विवर्तनम्

दक्षिणाङ्गेषु वामाङ्गे स्वरपाटगतं यदि।
नृत्तं विवर्तनाख्यं स्यादङ्गोपाङ्गसमन्वितम्।
ध्रुवतालेन यन्नृत्तं सर्वलोकमनोहरम् ॥
ठिठिंठिंणकषविण काधाढेंगा ढेंण्ढां गिणढोंगा ढोंगा।

विवर्तितम्

करं चरणमाक्षिप्य यत्र त्रिकविवर्तनम्।
करोऽपरो रेचितश्चेत्तद्वदन्ति विवर्तितम् ॥

सङ्गीतमुक्तावली देवेन्द्रकृता

विवर्त्तिन्योर्लक्षणम्

द्विरुद्ग्राहो ध्रुवाभोगो सकृद्गीत्वा ध्रुवे न्यसेत्।
विलम्बितलयश्चास्यां वर्तिनी कीर्त्यते बुधैः ॥
कङ्कालश्च द्रुतो मण्ठः प्रतितालकडुचकः।
वर्तिन्यां न भवन्त्येते एभिरेव विवर्त्तिनी ॥

मोक्षदेव

विवधः

एककं तु विदार्यैका ते चोभे विवधः स्मृतः।
षट्पदं त्र्यवरं वाऽपि विदार्यावृत्तमिष्यते ॥

नाट्यशास्त्रे

विविधस्थायः

ये भजन्ते च विचित्रकारिणीं भङ्गिमञ्जसा।
रागे नानाविधोल्लासैः स्थायास्ते विविधत्वजाः ?।

कुम्भः

विशालादिखण्डिकाः

विशाला सङ्गता चैव सुनन्दा सुमुखी तथा।
पञ्चप्रभृत्येकवृद्धाः कलास्तासामुपोहनम् ॥

दत्तिलः

विशुद्धनट्टः

निगौ त्रिश्रुतिकौ यत्र पताद्यौ षड्जमध्यमौ।
विशुद्धनट्टमेलोऽसौ शुद्धाः षड्जमपञ्चमाः ॥

कुम्भः

विश्रृङ्गाटकबन्धाख्यम्

प्रतिलोमानुलोमाभ्यां भवेदेतस्य या क्रिया।
विश्रृङ्गाटकबन्धाख्यं तद्विदः स्वरवादिषु ? ॥

विश्लिष्टवर्तितम्

विधाय स्वस्तिकौ तत्र तिर्यगोर्वविलोडितः।
अपरा पार्श्वपर्यन्ता शीर्षमूर्ध्वमधस्तका।
लोडितस्स्यात्तदाख्यातं सद्भिर्विश्लिष्टवर्तितम् ॥

विश्लिष्टा

विश्लिष्य पार्ष्णिविद्धायाश्चरणावुपसर्पतः।
यद्वापसर्पतः प्रोक्ता विश्लिष्टा च रिका बुधैः ॥

कुम्भः

—गतिः

पार्ष्णिविद्धयुतावंघ्रीचेद्विश्लिष्टोपसर्पतः ।
यथापसर्पतो वासौ विश्लिष्टा तु तदोदितम् ॥

सङ्गीतमुक्तावली देवेन्द्रकृता

विशेषलक्षणम्

यमत्वेऽप्यनयोः कश्चिद्विशेषः स च कथ्यते ।

कुम्भः

विशेषिताः

योगप्रदालिङ्गनाख्यौ हस्तौ द्विशिखरोऽपरः ।
कलापकः किरीटश्च चषकश्चेति संयुतान् ।
तान् षडन्यान् विप्रदासो हस्तकान् प्रत्यपीपदत् ॥

विप्रदासः

विषमः

पताककम्पनं यत्र चलनं मणिबन्धतः ।
पादकम्पोऽथ जनकः कथितो विषमे यथा ॥

कुम्भः

—पाटः

हस्तवैषम्यविन्यासादपाटो विषमो भवेत् ।
यथा—खें दथरि २ थो गि थरि खेखे खरकटा ॥

कुम्भः

—हस्तपाटः

चलनं मणिबन्धस्य पताकस्य तु कम्पनम् ।
कम्पनं चरणस्याथ परोऽत्र विषमो यथा ॥
दहें खुंखुं धहें । तकि २

कुम्भः

विषमकर्तरी—हस्तपाटः

विषमकर्तरी द्वाभ्यां ताडनात्क्रमतो मता ।
रि रि टि रि थो दि गि द कि टि रे घ रे घं न कि

कुम्भः

विषमनृत्तम्

विषमं तत्समुद्दिष्टं यद्रज्जुभ्रमणादिकम् ।

सङ्गीतनारायणे

विषमम्

स्यादत्रोत्प्लुतिपूर्वं यत्करणं विषमं हि तत् ।

कुम्भः

विषमपाणिः—हस्तपाटः

तमाहुर्विषमं पाणिं व्यत्ययाद्वथाप्तौ करौ ।
साङ्गुष्ठाङ्गुलिभिर्वाद्यं यस्मिन् क्रमतया हतः ॥
दा दां गिड गिड दां दां

कुम्भः

विषमसूची

तिर्यग्भवेतां चेत्स्थानं समसूचि तदोदितम् ।
युगपत्पुरतः पश्चात्सूचीपादौ प्रसारितौ ॥
पृथग्वा कथितं स्थानं प्राच्यैर्विषमसूचि तत् ।
चरणौ भूमिसलग्नजानुगौ तु कचिन्मतम् ॥

कुम्भः

विषादः—व्यभिचारिभावः

कर्तव्येष्ववाप्तिदैवव्यापत्तिकृतसत्त्वनाशो विषादः ।

शुभङ्करः

विष्कम्भः

कुपितो स्वेच्छया प्राप्तः सङ्गतो नोभयोरपि ।
विष्कम्भकः स विज्ञेयः कथार्थस्यापि सूचकः ॥

शुभङ्करः

विष्कम्भितम्

नेत्रे निमीलिते पादौ यत्र विस्तारिताञ्चितौ ।
भुजौ विस्फारितौ पूर्वे विष्कम्भितमिदं मतम् ।
भटासनेत्वनाविष्टे नियुक्तं ध्यानयोगयोः ॥

कुम्भः

विष्णुभक्तः

कनिष्ठाङ्गुष्ठयोर्योगाच्छेषाङ्गुलिविवर्तनात् ।
कोणाहतो हस्तपाटो विष्णुभक्तोऽदितो यथा ॥

कुम्भः

विस्तारः—धातुः

सङ्घातजोऽथ समवायजश्च विस्तारजोऽनुबन्धकृतः ।
ज्ञेयश्चतुष्प्रकारो धातुर्विस्तारसंज्ञश्च ॥

नाट्यशास्त्रे

विस्मयः

चमत्कारि च यत्कर्म तस्य श्रवणदर्शनैः ।
चित्ते या विकृतिः स्वल्पा स विस्मय उदाहृतः ॥

विस्मितः

मनस्यन्यपरे कस्माद्वर्तमानस्तु विस्मितः ।
चिन्तायामद्भुते चार्थे विस्मये च प्रवर्तते ॥

कुम्भः

विहृतलक्षणम्

व्रीडाठ्याजात्स्वभावाद्वा क्रियते यदभाषणम् ।
प्राप्तेऽपि काले वचसां विहृतं तदुदाहृतम् ॥

वेमभूपालः

वीणादितन्त्रीभेदाः

वीणाघोषैकतन्त्र्या स्यात्तन्त्रीभ्यां नकुलाभिधा ।
त्रितन्त्रीभिस्त्रितन्त्राख्या चित्रा सप्तभिरेव च ॥
विपञ्ची नवभिः ख्याता रम्या स्यान्मत्तकोकिला ।
तन्त्रीणामेकविंशत्या स्थानत्रयविभूषिता ॥

कुम्भः

वीणादेहः

वीणादेहं प्रवक्ष्यामि तदङ्गानि यथाक्रमम् ।
शिरांसि त्रीणि देहस्य ग्रामत्रयमुदाहृतम् ॥
मन्द्रमध्यमताराख्यमुखानि त्रीणि कथ्यते ।
सानुपादाय चत्वारो गीतजिह्वा प्रकीर्तिता ॥
वादी स्वराणां राजा स्यान्मन्त्री संवादिरुच्यते ।
स्वरो विवादी वैरी स्यादनुवादी च भृत्यवत् ॥
तेषां मार्गास्तु चत्वारः सुषिरं घनतन्तुवत् ।
देशीशुद्धमृदङ्गाद्या उपाङ्गा अङ्गमार्गकाः ॥
सहास्त्राणि नेत्राणि गीतदेहस्य सप्त वै ।
द्वाविंशच्छ्रुतयो जाता नारदेन विवक्षिता ॥
षड्जमध्यमपञ्चैते चत्वारः श्रुतयो मताः ।
निषादगान्धारौ द्वे द्वे त्रिस्त्रि ऋषभधैवतौ ॥

सङ्गीतमकरन्दे

वीणाभेदाः

कच्छपी कुब्जिका चित्रा वहन्ती परिवादिनी ।
जया घोषवती ज्येष्ठा नकुलीष्टति कीर्तिता (?) ॥
महती वैष्णवी ब्राह्मी रौद्री कूर्मी च रावणी ।
सारस्वती किन्नरी च सैरन्ध्री घोषका तथा ॥
दशवीणास्समाख्यातास्तन्त्रीविन्यासभेदतः ।
षट्त्रिंशदङ्गुली वीणा विस्तारः षड्भिरङ्गुलैः ॥

सङ्गीतमकरन्दे

वीणावादकलक्षणम्

वीणावाद्यं नृपात्पञ्च शुद्धतालकसप्तमे ।
दशहस्ते कथागीतं विंशहस्ते च नाटकम् ॥
त्रिंशद्धस्ते च कोल्हाटा इति गानादिर्नातिका ।
यो वीणावादनं वेत्ति तत्त्वतः श्रुतिजातिवत् ॥
तालालापकलाभिज्ञः स क्लेशान्मोक्षमृच्छति ।
तस्माद्वीणा निषेव्येति याज्ञवल्क्यादयोऽब्रुवन् ॥

हम्मीरः

वीणास्वराः

दारव्यां समवायस्तु वीणायां समुदाहृताः ।
स्वराः ग्रामावलङ्कारा वर्णाः स्थानानि जातयः ।
साधारणे च शारीर्यां वीणायामेष सङ्ग्रहः ॥

नाट्यशास्त्रे

वीरभल्लटोक्तदेशनिर्णयः

तथापि धनुजाचार्यमतमालोक्य धीमता ।
वीरभल्लटनाम्ना हि निर्मितो देशनिर्णयः ॥
देशानां निर्णयविधौ ख्यातौ प्रेरितपुंखितौ ।
पताकश्च ततश्चोर्ध्वमङ्गदेशे निरूप्यते ॥
मुख्यहस्तोऽपि चलितो वङ्गदेशे निरूप्यते ।
कलिङ्गे कर्तरी भूयात् प्रेरितत्वमुपाश्रितः ॥
काशीदेशे च लाङ्गलो मुखाभिमुखरीकृतः ।
कटकामुखहस्तः स्यात् काम्भोजं देशमाश्रितः ॥
कर्णाटे च मयूरः स्यात् दक्षिणां समुपाश्रितः ।
करहाटे चक्रहस्तो वक्षःस्थलमुपाश्रितः ॥
हंसास्यः कुरुदेशस्य ललाटेऽतिनमिश्रियः (?) ।
कुरोः केतुकरो भूयात् कोङ्कणस्यावरालकः ॥
टेंकणे शुकतुण्डः स्यात्त्रिगर्ते मुष्टिरीरितः ।
पाञ्चाले मुकुलो भूयात् चर्चरे शिखरो मतः ॥
कपित्थो मालवे ज्ञेयो नेपाले सूचिरीरितः ।
मलयाले पाद्मकोशश्चोले च चतुरः करः ॥
लाटे तु बाणहस्तः स्यात्मृगशीर्षो मराटके ।
सन्दंशोऽपि च सौराष्ट्रे गुर्जरे ताम्रचूडकः ॥
विदेहे विप्रकीर्णः स्यादर्धचन्द्रो विदर्भके ।
द्रविळे सिंहवक्त्रः स्याद्यवने मकरो भवेत् ॥
अञ्जलिः स्यात्समाख्यातो मुखान्ध्रकमुपाश्रितः ।
पौण्ड्रे कपोतो विख्यातो पाण्ड्यार्थे गजदन्तकः ॥

उद्वृत्तौ च पुलिन्दस्य गान्धारे पक्षवञ्चितः ।
शाल्मल्यां चतुरस्रः स्याच्चेयां च करिहस्तकः ॥

उत्संगो गौडदेशे तु घूर्जरे नागबन्धकः ।
निषधे डमरुः प्रोक्तो घुरुकले दण्डपक्षकः ॥

शृङ्गारशेखरः

वीरश्रीलक्षणम्

निबद्धैरनिबद्धैश्च पदैश्च विरुदैश्च यम् ।
गायन्त्येकेन तालेन स वीरश्रीरिति स्मृतः ॥

सोमराजः

वीरावतारः शृङ्गारतिलकश्च

ततो मङ्गल्यवचनमालापे न्यासमादिशेत् ।
वीरशृङ्गारभेदाभ्यां प्रबन्धोऽयं द्विधा भवेत् ॥

वीरावतारो नाम्नैकः शृङ्गारतिलकोऽपरः ।
श्रीरागः कौशिकी तोडी नट्टा शुद्धवराटिका ॥

वेलाकुली च हिन्दोलो मालवश्रीरिति स्फुटम् ।
गेया रागाः प्रबन्धेऽस्मिन्नन्येऽपि च रसाश्रयाः ॥

प्रबन्धतालशृङ्गारवीरवैचित्र्ययोगतः ।
वहन्ति ब्रह्मवैकुण्ठरुद्रविद्याधरा मुदम् ॥

सोमराजदेवः

वीरुढबन्धनम्

अनुसृत्य त्रिकोणत्वं करौ यत्र विलोड्यते ।
पुरतः पार्श्वयोरन्तर्यद्वामण्डलवृत्तितः ।
चालकज्ञास्तदा प्राहुरिदं वीरुढबन्धनम् ॥

वृश्चिकः—हस्तः

कपिरास्ययदाङ्गुष्ठो मध्यमोपरि पीडितः ? ।
तदुक्तो वृश्चिकस्तेन कुशाङ्कुशकुठारकम् ।
कुद्दालं लाङ्गलं शस्त्रं प्रेरणादि च दर्शयेत् ॥

सङ्गीतनारायणे

—— (राशिहस्तः)

पूर्वोक्तकर्कटे हस्ते मध्यमाऽपसृता यदि ।
किञ्चिद्रेचितगश्चेत्तु वृश्चिको वृश्चिके भवेत् ॥

शृङ्गारशेखरः

वृत्तयः

उपाङ्गतावमीषां स्यात्पृथग्वृत्तेरभावतः ? ।

व्यञ्चितं—हस्तप्राणः

पुरोभागे कुञ्चितो वा रेचितो वा प्रसारितः ।
यो हस्तस्तु पताकाख्यो नाम्नाऽसौ व्यञ्चितो भवेत् ॥

भरतकल्पलता

तथा हि त्रितयेऽप्यस्मिंश्चतस्रो वृत्तयः स्मृताः ।

कुम्भः

कैशिक्यारभटी चैव सात्त्वती भारती यथा ।
चतस्रो वृत्तयः प्रोक्ता माल्यसंभवकारकाः ॥

शुभङ्करः

वृत्तिरित्युच्यते सा तु चतुर्धा परिकीर्तिता ।
कैशिकी भारती चैव सात्त्वत्यारभटीति च ॥

वेमभूपालः

कैशिक्यारभटी वृत्तिः सात्त्वती भारतीति च ।
वर्तन्तेऽभिनया काश्चित्येतासामेव वृत्तिताम् ।
अकुर्वतां क्रियां कांचिच्छोभामात्रोपयोगिनाम् ॥

विप्रदासः

वृत्तलक्षणम्

छन्दोऽनुगेन तालेन येन केनचिदिच्छया ।
स्वरैर्हीनमहीनं वा वृत्तं गायन्ति गायनाः ॥

एकैकं चरणप्रान्ते वृत्तप्रान्तेऽथवा पुनः ।
गेयाः स्वरयुते रागे स्वरा वृत्ते गणास्त्वमी ॥

मस्त्रिगुरुस्त्रिलघुर्न स्यादादिगुर्भो य आदिलः ।
मध्यगुर्जो लमध्यो रः सोऽन्तगुस्तोऽन्तलः स्मृतः ॥

सोमराजदेवः

वृत्तीनां लक्षणानि

भारत्यभ्यर्हिता यत्र वृत्तिः सा भारती मता ।
वृत्तिः सा कैशिकी या तु कैश्यवत्सौक्ष्म्यशालिनी ।
अभिनेयपरां शोभां काञ्चित्सम्पादयन्त्यपि ॥

कुम्भः

वृषभः—हस्तः

अनामिका कनीयस्या विपर्यङ्गुष्ठपीडने ।
शेषयन्त्रोर्ध्वविरले कुटिले वृषभः करः ॥

गोमहिष्यादयः शृङ्गाः युजान्ये श्वापदाश्च ये ।
दर्शनीया मुनिश्रेष्ठ धनुर्द्वौ खटकामुखौ ॥

तथा वत्सतरी वत्सावर्धचन्द्रावधोमुखम् ।
जानुनो निकटं कृत्वा अभिनेयौ सुबुद्धिना ॥

सङ्गीतनारायणे

—(राशिहस्तः)

खरौ च पुष्टवदनौ योज्यौ वृषभराशिके ।

शृङ्गारशेखरः

वेगस्वरूपः

अत्यन्तं त्वरितं भ्रमिं वितनुते किं वाच्यमत्यद्भुतं
साङ्क्षेपाङ्गविभागवेदनमहो तन्व्यास्तदा जायते ।
किञ्चेयं किल सम्मुखं च विमुखं सव्यापसव्यप्लुतं
पोक्तं यद्भरतेन तत्प्रकुरुते तूर्णं निमेषादपि ॥

कुम्भः

वेण्वङ्गानि

पादस्सन्धिर्मोषघातवस्त्रांशश्लिष्टं तथा ।
एकैकं चतुरस्रं च तथा चैवोपवर्तनम् ॥
उपपातः प्रवेणी च द्वयङ्गं संहरणं तथा ।
अङ्गानि द्वादशाङ्गस्य स्मृतान्यो वेणुकस्य हि ॥

नाट्यशास्त्रे

यत्रोत्क्षिप्त ....वेतिक्रान्तेति तां विदुः ।
अनुक्तत्वाद्विशेषस्य मुनिना तस्य चित्तवित् ॥
पादस्य पार्श्वे एवेति न्याय्यात्कीर्तिधरोऽब्रवीत् ।
ऊरुक्षेत्रो द्वितीयस्य यावदुत्क्षिप्य पातयेत् ॥
पादमुन्.........कस्य नाम कीर्तिधरोऽब्रवीत् ।
तत्राब्रवीत् पार्ष्णिचण्डघातेति किल लोकतः ॥

ज्यायनः

वेपथुव्यञ्जकम्

लुवनेत्येकरीतिर्व्यङ्गामिदेशगते सति ।
ततोऽन्यदेशवचनं यन्मञ्जुलरसोज्ज्वलम् ।
हस्तयोस्तत्समाख्यातं वेपथुव्यञ्जकं तथा ॥
तिर्यङ्मार्श्रे विधायैकं पश्चादस्यैव चेद्बहिः ।
अन्तश्च लीलयान्यस्मिन् लुठिते सेति हस्तयोः ॥
पुरस्तात् त्रिस्तिर्यक् पर्यायेण तदीरितम् ।
पुरोदण्डभ्रमाख्यं तच्चालयं पूर्वसूरिभिः ॥

वेशभेदाः

शुद्धो विचित्रो मलिनः त्रिविधो वेश उच्यते।

सङ्गीतनारायणे

वेश्मद्वारम्

पूर्वतो द्वारमेवं स्यात्तत्र द्वारद्वयं श्रुतम् ।
नेपथ्यमन्दिरे तत्र रङ्गशीर्षं प्रकल्पयेत् ॥
षड्दारुकयुतं तस्य विधिरत्र प्रपञ्च्यते ।
पूर्वद्वारस्य पार्श्वस्थं कर्तव्यं स्तम्भयुग्मकम् ॥
तदधश्चोर्ध्वतश्चापि दारुद्वन्द्वं मनोहरम् ।
विचित्ररचनं कार्यमेवं षड्दारुकं भवेत् ॥
ब्राह्मणादिचतुःस्तम्भा ह्यन्तराले यदीरितम् ।
रङ्गपीठं च तत्कार्यं नात्युच्चं नातिनिम्नकम् ।
समन्तादष्टहस्तं तदादर्शतलसन्निभम् ॥

कुम्भः

वेश्मबलिः

तादृशस्तत्र दातव्यो बलिर्मन्त्रपुरस्कृतः ।
सितरक्तनीलकृष्णपीतधूम्रोऽरुणामलम् ॥

कुम्भः

वेष्टितम्

एकमन्येन पादेन वेष्टयेद्वेष्टनं तदा ।
तदेव चलनं प्राहुर्नृत्यवर्गणकर्मठाः ॥

कुम्भः

वैतालिकलक्षणम्

नर्मज्ञोऽखिलरागराजिषु परं वेदी पुनःकिङ्किणी-
वाद्ये चापि वृतोऽत्र नर्तकगणैर्द्राक्षामृतश्चारणः ।
भाषाशेषविशेषलिप्तसुमतिर्लोकापवादे नृणाम्
सर्वेषामपि नर्मशर्मकरणे दक्षोऽत्र वैतालिकः ॥

कुम्भः

वैभविकलक्षणम्—लासः

दृष्ट्वा स्वप्ने प्रियं यत्र मदनानलतापिता ।
करोति विविधान् भावान् तद्वैभविकमुच्यते ॥

नृत्तरत्नावली:

वैशिकलक्षणम्

वेश्याबहुलसंभोगसमासादितगौरवः ।
वित्तव्ययी विलासी च वैशिकः परिकीर्तितः ॥

भरतकल्पलता

वैश्यवर्णहस्तः

वामे करे तु हंसास्यो दक्षिणे खटकामुखः ।
वैश्यहस्तोऽयमाख्यातो भरतागमवेदिभिः ॥

भरतकल्पलता

वैष्णवः—हस्तः

श्लिष्टाङ्गुष्ठौ पताकौ चेत्सकरो वैष्णवः स्मृतः ।
समूहे दम्पतीयोगे चक्रवाकस्य भावने ।
संघर्षे युज्यते सोऽयं वैष्णवाभिधहस्तकः ॥

भरतकल्पलता

वैष्णवम्

एकं कृत्वा समं पादमीषदन्यच्च कुञ्चितम् ।
पुरः प्रसारितं तिर्यगेतत्स्याद्वैष्णवं तदा ॥

कुम्भः

—स्थानकम्

ततस्तु वैष्णवं स्थानं प्रोक्तमाविद्धवक्रकम् ।
धुतमत्र शिरः प्रोक्तं कान्ता दृष्टिस्तु तत्र हि ॥
एकः पादः समस्त्वन्यः वक्षस्तु त्र्यश्रतां गतः ।
सार्धतालान्तरस्थश्च स्त्रीर्द्धयुन्नमितसन्धिकम् ।
सौष्ठवाधिष्ठितं विष्णुदैवतं वैष्णवं मतम् ॥

सङ्गीतमुक्तावली देवेन्द्रकृता

वैष्णवलक्षणम्—तलपुष्पपुटम्

वक्षःक्षेत्रे विधातव्यो लताहस्तस्तु दक्षिणः ।
चतुरश्रत्वहेतुत्वाद्वैष्णवं केचिदूचिरे ॥
चरणाभिनयेष्वेव हस्तौ वा चरणोऽथवा ।
प्राथम्याद्दक्षिणः प्रोक्तो विशेषो यत्र सूच्यते ॥

नृत्तरत्नावली

व्यञ्जनम्

व्यञ्जनत्वं तु सर्वेषां कादिवर्गेषु संस्थितम् ।
शक्त्यभिव्यक्तिमात्रेण व्यञ्जनं शिवतां गतम् ॥

मतङ्गः

व्यञ्जनः—धातुः

व्यञ्जनधातोः पुष्पं करतलनिष्कोटितं तथोद्धृष्टम् ।
रेफोऽनुवन्धसंज्ञोऽनुस्वनितं बिन्दुरवमृष्टम् ॥

नाट्यशास्त्रे

व्यभिचारिदृष्टयः

मलिना शङ्किता ग्लाना जीवशून्या विषादिनी ।
लज्जिता मुकुला श्रान्ताभितप्ताकुञ्चिता तथा ॥
आकेकरा विनाशार्धमुकुला च वितर्किका ।
विभ्रान्ता विप्लुता त्रस्ता ललिता मन्थरेति च ।
विंशतिर्व्यभिचारिण्यो दृष्टयः कथिता इमाः ॥

सङ्गीतनारायणे

व्यभिचारिभावलक्षणम्

ये तूपकर्तुमायान्ति स्थायिनं भावमुत्तमम् ।
उपकृत्य च गच्छन्ति कथ्यन्ते व्यभिचारिणः ॥

शुभङ्करः

व्यस्तोप्लुतिनिवर्तकम्

यत्र पार्श्वमुखौ पूर्वं निस्सृतौ त्वरया करौ ।
तीक्ष्णौ कूर्परकौ स्यातां श्लिष्टपूर्वमुखौ ततः ।
धाराभिमुखतौ तौ स्याद्व्यस्तो प्लुतिनिवर्तकः ॥

व्यादीर्णं

जृम्भा हास्यादिषु प्रोक्तं व्यादीर्णं दूरनिर्गतम् ।

कुम्भः

व्यापकस्वरः

ऊर्ध्वनाडीप्रयत्नेन सर्वभित्तिनिघट्टनात् ।
मूर्छितो ध्वनिरामूर्ध्नः स्वरोऽसौ व्यापकः परः ॥

मतङ्गः

व्यावृत्ताभिधः

चतुःस्वरैरिवमाद्या रिगमाद्याः कलास्ततः ।
चतुस्स्वराः प्रोक्तरूपाश्चेद्व्यावृत्ताभिधस्त्वसौ ।
स ग रि म स रि म ग प रि ग प म ध ग म ध प नि स म.

श

शङ्कितः—गायकः

देहस्सर्वस्समायाति कम्पनं यस्य शङ्कितः ।

भरतकल्पलता

शङ्खः

कृत्वाऽङ्गुष्ठं करे वामे कुरुते शिखराकृतिम् ।
शाखायोगस्तदङ्गुष्ठो कृतः शङ्खो विधीयते ॥

नागेन्द्रसङ्गीते

शङ्खलक्षणम्

शङ्खं निर्दोषमादाय निधायोत्थापनाभिकम् ।
अर्धाङ्गुलमुखे रन्ध्रं तस्य स्यान्माखमात्रकम् (?) ॥
ग्रामहीनां कलां कुर्यात्तदग्रे धातुशिल्पकम् ।
हस्तद्वयेन धृत्वाऽमुं मितैरेकादशाङ्गुलैः ॥
शनैः शनैः प्रकुर्वीत श्वासेनापूरितोदरम् ।
द्रुतं नादं करोत्येष वर्णैस्त्रोदगदैर्युतम् ॥

सोमराजदेवः

शठः—नायकः

तनोति पुरतः प्रीतिं पश्चाच्चरति विप्रियम् ।
कृतदोषोऽपि निःशङ्कः शठः स परिकीर्तितः ॥

शुभङ्करः

शब्दः—वाचिकः

शब्दं स्ववचसा चार्या नर्तकेन समं नटी ।
ढकप्रणवहीत्यादि शब्दजालानुरञ्जितम् ॥

शृङ्गारशेखरः

शब्दगतौ ढाललक्षणम्

द्रावकत्वात्समुल्लासो रागे ढालः प्रकीर्तितः ।

मोक्षदेवः

शम्भुपूजा

नमस्तुभ्यं सहस्राक्ष प्रकाशितजगत्त्रय ।
शम्भवेऽत्र प्रसीद त्वं कुरु नाटकरक्षणम् ।
प्राच्यमेवं विधातव्या पूजा विघ्नप्रशान्तये ॥

जगद्धरः

शम्भुवदनप्रभवत्वं रसानाम्

शम्भोः पश्चिमवदनाद्धास्यशृङ्गारसम्भवः ।
उत्तराद्वदनादेव वीरसंज्ञो रसोऽभवत् ॥
भयानकश्च बीभत्सो दक्षिणाद्वदनाद्भवेत् ।
पूर्ववक्त्राच्च सञ्जातौ रौद्राद्भुतरसावुभौ ॥
पञ्चमाद्वदनाज्जातः करुणः शान्तरसोऽपरः ।
विभावभावहीनोऽयं नवमो रस इष्यते ॥
उन्मीलन्नवमीलनीरजवपुः सौन्दर्यसारोदयः
खेलन् खंजनलोचनः सुललितः कन्दर्पलीलालयः ।
ज्ञेयः षोडशहायनप्रविरसन् पीताम्बरः कुण्डली
साक्षाद्विष्णुरयं सहारवलयश्शृङ्गारनामा रसः ॥

जगद्धरः

शम्याताल: सन्निपातश्च

सर्वहस्तनिपातः स्याच्छम्यातालश्च वामतः ।
हस्तयोस्तु समः पातः सन्निपात इति स्मृतः ॥

नाट्यशास्त्रे

शम्या दक्षिणपातस्तु तालो वामस्तु कीर्तितः ।

दत्तिलः

शरत्कालाभिनयः

स्वास्थ्यात्सर्वेन्द्रियाणां च प्रसन्नेन मुखेन च ।
विचित्रकुसुमं लोकैः शरत्काले निरूपयेत् ॥

वेमभूपालः

शरसन्धानकम्

पराङ्मुखे लुठत्येक करे सति विलासतः ।
परः करो मूर्धदेशपर्यन्तं वेगतागतः ।
पुनस्तन्मुख एव स्यात् शरसन्धानकं तदा ॥

शरीरम्

यतस्तु वाचिको नाट्यशरीरत्वेन चोदितः ।
अतः कृतं वाचिकस्य शरीरव्यपदेशनम् ॥

वेमभूपालः

शरीरभेदे वाक्यलक्षणम्

अथ शरीरभेदानां क्रमाल्लक्षणमुच्यते ।
नानारसार्थसंयुक्तैर्नानावृत्तिनिबन्धनैः ॥
अनिबद्धपदैश्चापि पाठ्यैः प्राकृतसंश्रितैः ।
विविधैर्विहितो वाक्याभिनयः परिकीर्तितः ॥

वेमः

शरीराङ्गानि

शिरः करोऽथ हृदयं जठरं पार्श्वयुग्मकम् ।
कटिश्चेति षडङ्गानि कथितानि शरीरिणाम् ॥

शुभङ्करः

शस्त्रपातनम्

वार्षगण्यविषयोऽपि दृश्यतेऽप्येवमेव फलकं समन्त्रवत् ।
पृष्ठतो निगदितस्त्विहाधिकं स्कन्धदेश अथ वक्षसि स्फुटम् ॥
शस्त्रहस्तविषयो तथा किलोद्दिष्टं निगदितं तथा पुनः ।
हृत्प्रदेशविषयं च तद्विदा शस्त्रपातनमिहोदरीकृतम् ॥

कुम्भः

शस्त्रपातविधिः

सत्त्वतेऽपि विधिरेष शस्यते पृष्ठतो भ्रमणमत्र शस्त्रगम् ।
शस्त्रपातविधिरत्र पादयोः कीर्तिता भरतमुख्यसूरिभिः ॥

कुम्भः

शस्त्रमोक्षणन्यायाः

भारते न गदितस्तु कैशिकः शस्त्रपातनविधिस्तु मूर्छने ।
सौष्ठवान्वितततनुः सुशिक्षितो न्यायवर्गमयमाश्रितो नटः ॥
शक्तितो मरशिरश्शासनादिकान्यायुधान्यपिसमाचरेत्सुखम् ।
सौष्ठवे वरमुशन्ति तद्विधो येन तेन हि विनाकृतः परम् ॥
युद्धकर्मणि च नर्तनोऽपि येन नैव भान्तिनिखिलाः प्रविचाराः।
न प्रहारविधिरत्र वास्तवः संज्ञयैव निखिलो विधीयते ॥
तं प्रहारमथवाऽत्र दर्शयेदैन्द्रजालिकमधात्र मायया ।
एतेन्यायाः प्रयोक्तव्याश्चारीभिश्शस्त्रमोक्षणे ॥

कुम्भः

शाखाङ्कुरनृत्तानां लक्षणानि

शाखाङ्कुरं च नृत्तं च प्रधानं तेष्वनुक्रमात् ।
शाखा स्यान्नृत्तहस्तानां वैचित्र्यात्मविवर्तना ॥
अङ्कुरः सूचना रूपो भूतवाक्यैकगोचरः ।
भविष्यद्वाक्यविषयः स तु सूचीति कथ्यते ॥

नृत्तरत्नावली

शान्तस्य परमावधिः

यथा प्रधानं महतः कारणं लोकवर्त्मनि ।
लभ्यते महतः कश्चिन्न हेतुः परमार्थतः ॥
प्रधानसाम्यावस्थायां लयं यान्ति यथा गुणाः ।
तथा शान्ते विलीयन्ते रसाः सम्यगुपासिताः ॥
आत्मारामस्वरूपायावस्था तस्यामितो रसाः ।
प्रलीयन्ते ततो नैव रसः शान्तः पृथक् भवेत् ॥

कुम्भः

शान्तस्य शमस्थायिकत्वम्

शमस्थायी भवेच्छान्तः सर्वत्र समदर्शनः ।
तत्त्वज्ञानावृतेच्छोः स तमोरागपरिक्षयात् ॥

कुम्भः

शान्तो रसः

न यत्र दुःखं न सुखं न चिन्ता न द्वेषमोहौ न च काचिदिच्छा । रसस्तु शान्तः कथितो मुनीन्द्रैः सर्वेषु भावेषु समान एव ॥

कुम्भः

शान्तरसः

निर्वेदतो भवति सर्वविहीनरूपः
सम्यगाक्रोशजनितोऽपि च रागहीनः ।
शान्तोऽवमुत्तमजनप्रकृती रसो यो
इत्यादिष्ट इह चापि तमोविहीनः ॥

वैराग्यजाततत्त्वैकज्ञानाच्छास्त्रार्थचिन्तनात् ।
साधुदौर्गत्यसन्दर्शोदाममश्रवणादपि ॥
इष्टदेवतानुग्रहणे दमस्थैर्यादिभिः सदा ।
सत्यादिशीलनादेषु रसः शान्तः प्रजायते ॥
मुखनेत्रप्रसादेन स्मितपूर्वप्रियोक्तिभिः ।
स्थिरालोकनवैराग्यश्लाघासर्वाश्रमधरैः ॥
विविक्तदेवस्थानादिवासैर्वात्सल्यशान्तिभिः ।
परनिन्दादिदानाद्यैः शान्तस्याभिनयो भवेत् ॥
शून्यदृष्टिर्निरालम्बो ध्यानधारणतत्परः ।
समः सर्वेषु भावेषु भवेच्छान्तरसो नवः ॥
धृतिर्मतिर्जुगुप्साऽवहित्थो निद्रा स्मृतिः क्षमा ।
अविरोधग्लानिलज्जाश्च वितर्कौत्सुक्यसंमदा ।
स च शान्ते प्रयोक्तव्या एते भावा मनीषिभिः ॥

षष्ठ्याऽद्भुतोऽधिकवया हरिदैवतोऽपि
निर्वेदभावजनितोऽपि च रागहीनः ।
शुद्धान्ववायजनितो विमलाङ्गयष्टिः
शान्तो रसः सकलसज्जनताश्रयश्च ॥

जगद्धरः

शान्तस्वरूपम्

नाटकेऽभिनये नास्ति शान्तस्य व्यभिचारिभिः ।
अन्येषां तु कुतश्शक्तिः शान्तस्य परिपोषणे ॥
अङ्गीकुर्वन्ति चेत्केचिद्रसं शान्तं मनीषिणः ।
करिष्ये कथनं तस्य रसानां प्रविचारणे ॥
स्वीयं निमित्तमासाद्य शान्तादुत्पद्यते रसः ।
पुनर्निमित्तापाये च शान्त एव प्रलीयते ॥

कुम्भः

शाबरनृत्यम्

नृत्यन्ति शबरा यत्र गायन्तो निजभाषया ।
तदिदं शाबरं नृत्यमित्याहुर्नृत्यकोविदाः ॥

सङ्गीतनारायणे

शारीरम्

रागव्यक्तिनिबन्धः स्यादभ्यासेन विना यदा ।
सहोत्पन्नं शरीरेण शारीरं तन्निगद्यते ।।

कुम्भः

अभ्यासमन्तरेणापि रागव्यक्तिं करोति यत् ।
शरीरसहजं प्राहुः शारीरं तच्च पुण्यजम् ।।

सोमराजदेवः

शारीरलक्षणम्

ध्वनेर्यदश्रमेऽपि स्याद्रागाभिव्यक्तिशक्तिता ।
शारीरेण सहोत्पत्तेस्तच्छारीरं जगुर्बुधाः ।।

मोक्षदेवः

शारीरगुणाः

तारानुध्वनिमाधुर्यरक्तिगाम्भीर्यमार्दवैः ।
घनता स्निग्धता कान्तिप्राचुर्यादिगुणैर्युतम् ।
सुशारीरमिति प्रोक्तं लक्ष्यलक्षणवेदिभिः ।।

मोक्षदेवः

शारीरदोषाः

अनुधानविहीनत्वं रूक्षत्वं व्यक्तिरक्तता ।
निःसारता विस्वरता काकित्वं स्थानविच्युतिः ।
कार्श्यं कार्कश्यमित्याद्यैः कुशारीरं नु दूषणैः ।।

मोक्षदेवः

शारीरभेदः

करालं मधुरं मिश्रं पेचलं बहुभङ्गिकम् ।
शारीरं पञ्चधा चेति प्राहुर्भीमतनूरुहः ।।

मोक्षदेवः

शारीरस्वराः

स्वरग्रामौ मूर्छनाश्च तालाः स्थानानि वृत्तयः ।
शुष्कं साधारणे वर्णा ह्यलङ्काराश्च धातवः ।
श्रुतयो यतयश्चैव नित्यं स्वरगतात्मकाः ।।

नाट्यशास्त्रे

शार्ङ्गदेवः—तालः

द्रुद्वयं गपगा पश्चाल्लघुश्चेति क्रमादमी ।
० ० ऽ ऽ ऽ ऽ ।

कुम्भः

शावरीरागलक्षणम्

मध्यग्रहांशा धन्या साममन्द्रा ककुभोद्भवा ।
रङ्गस्याङ्गं च तारा च शावरी स्यात्पवर्जिता ।।

सोमराजदेवः

शिखर-कपित्थ-सूचीमुखवर्तनाः

शिखरस्य कपित्थस्य तथा सूचीमुखस्य च ।
भवन्ति वर्तना मुष्टिवर्तनोक्तप्रकारतः ।।

अशोकः

शिखिसारसादिपक्षीणामभिनयः

शिखिसारसहंसाद्या स्थूला ये च पतत्रिणः ।
तेषामभिनयः कार्यः करणै रेचकान्वितैः ।।

वेमभूपालः

शिरिपिटी

भूलग्नतलपादस्य सरणं वस्तु गो भवेत् ।
तथाऽपसरणं पश्चान्मुहुः शिरिपिटी भवेत् ।।

कुम्भः

शिरिहिरं

विधायैकं समं पादमङ्घ्रेरन्यः पुरो यदि ।
प्राहुः शिरिहिरं धीरा नटाः केचन तद्विदः ।।

कुम्भः

शिरेधारणा—(कला)

भूमौ लुठन्ती दधती च कांस्यपात्रं शिरोऽग्रे सजलं हि यत्र ।
नटी समं भ्रामयते कराङ्घ्रिपद्मौ तु चक्राण्यथ सा तरन्ती ।।

नागेन्द्रसंगीते

शिरोभ्रमरी

सा शिरोभ्रमरी ज्ञेया शिरसैव भुवि स्थिता ।
पादावूर्ध्वकृतौ बिभ्रत्तिकभ्रमणतो द्रुतम् ।।

कुम्भः

शिवस्तुतिः

नानामार्गलयाद्यत्र यतीनां स्यात्कलानिधौ ।
तं दक्षिणं शिवं नौमि चित्तवृत्तिमयं ध्रुवम् ।।

संगीतशिरोमणिः

शीर्षकीध्रुवाया विनियोगः

आश्चर्यदर्शने रोषे विषादे सम्भ्रमे तथा ।
उत्पातविस्मये चैव प्रत्यक्षावेदने तथा ।।

वीरे भयानके रौद्रे कार्या द्रुतलया ध्रुवा ।
प्रसादने याचने च वाक्ये सातिशये ... ॥

नूतने सङ्गमे हर्षे शृङ्गारेषु द्रुता स्मृता ।
शीर्षकी च ध्रुवा कार्या तज्ज्ञैर्मध्यलयाश्रया ॥

प्रायः शृङ्गारसंपूर्णा मृदुवर्णपदान्विता ।
या चोत्तमाश्रया सेयं शीर्षकी परिकीर्तिता ॥

वेमभूपालः

शीर्षपल्लवद्वयं

ललाटे च पताकः स्याद्द्वेदन्यः प्रसारितः ।
बाह्वोः प्रसारणं कृत्वा करौ स्यातां द्रुतभ्रमौ ।
नर्तनाच शिरोदेशे द्वितीया शीर्षपल्लवा ॥

कुम्भः

शुद्धजातिः

तद्‌ग्रहा तदपन्यासा तदंशा च यदा भवेत् ।
मन्द्रन्यासा च पूर्णा च शुद्धा जातिस्तथोच्यते ॥

मतङ्गः

शुद्धनेरिः

शुद्धस्यैव पताकस्य विच्छिन्नावर्तयोर्यदि ।
रथचक्रागतिर्यत्र विलम्बादादितालतः ।
शुद्धनेरिरसौ प्रोक्ता नटैर्नृत्तविचक्षणैः ॥

सङ्गीतमुक्तावली देवेन्द्रकृता

शुद्धपद्धतिः

प्रबन्धे चापशामाङ्गे वाद्यमानेऽपि वादकैः ? ।
प्रक्षिपेद्रङ्गपीठान्तः पात्रं पुष्पाञ्जलिं यतः ॥

मध्ये रङ्गभुवं देवोऽधिष्ठितः कमलासनः ।
नृत्येदुपशमेनैव धात्रं हर्षसमन्वितं ॥

पादमाता च कथिता मलपाठश्च काविति ।
रेङ्गिणी मुडपैरेभिः प्रबन्धैर्नियतक्रमैः ॥

क्रमैः स्वेच्छाकृतैर्यद्वा वाद्यमानैः समन्ततः ।
कोमलैर्विषमाङ्घ्रैर्वोभयैर्वा नृत्तमाचरेत् ॥

अथ शुद्धप्रभेदैर्वा गीयमानैर्यदृच्छया ।
विविधं नर्तनं कृत्वा पात्रं त्यागं समाचरेत् ॥

शुद्धपद्धतिरित्युक्ता एका परवद्धिर्मता ।
जगदुः प्राक् प्रवेशेऽन्ये मद्दलस्य च वादने ॥

समहस्तादिभिः पादैः सर्वातोद्यैस्त्रिमौ भवेत् ।
स्थानेन समपादेन प्रवेशं नन वक्ष्यते ॥

सोक्षदेवः

शुद्धप्रहसनम्

शुद्धं च तदिह प्रोक्तं परिव्राट्तापसाश्रयं ।
सङ्कीर्णं च यदा बद्धं वेशचेटीविटादिभिः ।
मुखनिर्वहणे चात्र संज्ञितो यो मनीषिभिः ॥

शुभङ्करः

शुद्धमेलाः

अन्तरे कथिता नैव सारी काकलिनि स्वरे ।
साङ्कर्यं जायते यस्मान्नानुकूल्यं भजेत्ततः ॥

अन्तरस्य स्वरस्यापि सूक्ष्माः काकलिनो ध्वनिः ।
विचार्यो विज्ञवर्येण पतादिषड्जमध्ययोः ॥

पतादिसमयोः सर्वाधैकैकश्रुतिवर्जिते ।
अन्तरः काकली स्यातां तयोः प्रतिनिधी च तौ ।
शुद्धमेला मया प्रोक्ता मध्यमेलाधुनोच्यते ॥

कुम्भः

शुद्धसूडलक्षणम्

एलादिः शुद्ध इत्युक्तो ध्रुवादिः सालगो मतः ।

हम्मीरः

शुद्धसूडमते तालभेदाः

हेलाकरणढेङ्केति वर्तिन्या घोम्बडेन च ।
लम्भरासैकतालीभिः शुद्धसूडोऽष्टभिर्मतः ॥

कुम्भः

शुष्कापकृष्टा

यत्र शुष्काक्षरैरेव ह्यपकृष्टा तु या ध्रुवा ।
यस्मादभिनयान् सूत्री प्रथमं ह्यभिसार्यते ।
तस्माच्छुष्कापकृष्टेयं जर्जरश्लोकदर्शिका ॥

कुम्भः

शुष्कावकृष्टकलक्षणम्

नव गुर्वक्षराण्यादौ लघवः षड्गुरुत्रयम् ।
अष्टादशाक्षरात्मैकपादयोरियमिष्यते ॥

विप्रदासः

शृङ्गारभेदाः

अन्योन्यालोकनाश्लेषचुम्बनादिविभेदतः।
अन्याभिलाषविरहेर्ष्याप्रवेशाख्यशापकैः॥

हेतुभिः पञ्चधा भिन्नो नायिकानायकस्तथा।
एतयोराश्रयः प्रोक्तो यथालक्षणलक्षितौ।
प्रकाश्यते तयोर्भेदः क्रमाच्छास्त्रानुसारतः॥

कुम्भः

शृङ्गाररसः

सविलासाङ्गविक्षेपमधुराक्षरजल्पनैः।
स्वाङ्गेऽनुभूयमानैश्चानुभावैरेवमादिभिः॥

अनालस्यजुगुप्साद्यैर्भावैश्च व्यभिचारिभिः।
अभिव्यक्तोऽथ चित्तस्य चर्वणीयत्वमागतः॥

स्थायिभावो रतिर्नाम युवस्त्रीपुंसहेतुकः।
सम्भोगविप्रलम्भात्मा शृङ्गारो रस उच्यते॥

हम्मीरः

शृङ्गारः शुचिरुज्ज्वलः स्मरकला निर्वेदसंयोगतो
ह्यावार्थान् समुपद्यते निरुपमाद्भावात्सुखैकाश्रयः।
नारीनायकयोः परस्परभवत्संश्लेषविश्लेषजः
सम्भोगः स च विप्रलम्भ इति च द्वेधा समुत्कीर्तितः॥

भ्रूविक्षेपकटाक्षवीक्षणकलाश्वेदास्यरोमाञ्चितै-
रन्यैश्चापि विलासचेष्टितलयैरेषाडेभिनयो नटैः।
सम्भोगस्त्वथ विप्रलम्भनविधावश्रुप्रपातानना-
न्मेयस्य श्रवणोपतापिवचनक्ष्मातल्पसंसेवनैः॥

जगद्धरः

शृङ्गाररसलक्षणम्

विभावैर्वरकान्ताद्यैः स्वकाले कविगुम्फितैः।
साक्षात्कारमिवाभीतैर्नटेन स्वप्रयोगतः।
नीतो रतिः स्थायिभावः सदस्य रसमीयताम्॥

हम्मीरः

शृङ्गाररसानुभावाः

कान्ता दृष्टिः कटाक्षाख्यं तारकाकर्म शर्मकृत्।
चतुरे च भ्रुवौ चारुगोचरा मधुरा गिरः॥

रोमाञ्चमुखरागादिरुचितः सात्त्विकोत्करः।
अनुभावा भवन्त्येते शृङ्गाररसपोषिणः॥

हम्मीरः

शृङ्गारादिरसेषु स्वराः

तत्र तु स्वरितोदात्तौ हास्यशृङ्गारयोर्मतौ।
उदात्तकम्पितौ योज्यौ वीरे रौद्रेऽद्भुते तथा॥

करुणे चापि बीभत्से तथा चैव भयानके।
रसेऽनुदात्तस्वरितकम्पितान् संप्रयोजयेत्॥

वेमभूपालः

शृङ्गारेऽभिनयः

चारुलोचनलीलाभिर्भ्रूक्षेपैः कण्ठकादिभिः।
स्मितैरलक्ष्यदन्ताग्रैर्ललितैरङ्गहारकैः॥

एभिः सम्भोगशृङ्गारे द्रष्टव्याभिनये क्रिया।
शङ्काऽसूये मदे ग्लानिनिर्वेदैर्मूर्च्छनादिभिः॥

निद्रालज्जाविलापाद्यैरौत्सुक्योन्मादविस्मितैः।
विप्रलम्भाख्यशृङ्गारे कर्तव्योऽभिनयो बुधैः।
शृङ्गारद्विविधे चैवं भरतेऽभिनयः कृतः॥

जगद्धरः

शेखरः

दशखण्डाभिधायादौ भिन्नभिन्नानुवाद्यकान्।
शेखराख्यो भवेद्वाद्यो रञ्जको भिन्नपाठकः॥

कुम्भः

शैथिलगाढे

विशिष्टसन्धिराधेयः तथाऽन्ते दृढबन्धवान्।
प्रोक्तः शैथिलगाढोऽसौ निराधारः स उच्यते।
नापेक्षते वह्न्यादि यः स्वनिर्वाहसिद्धये॥

कुम्भः

शैवम्

समस्थाङ्घ्रिस्तु सव्यस्य जानुशीर्षसमः परः।
उद्धृतो दक्षिणः पादः कुञ्चितं शैवमव तत्॥

कुम्भः

शोकः

इष्टवस्तुवियोगेन या ह्यल्पा विकृतिर्भवेत्।
चेतसो भावतत्त्वज्ञैः स शोक इति संज्ञितः॥

शोभा—पौरुषः

उत्साहे दक्षिता शाठ्यकुत्सानिन्द्येषु वस्तुषु।
स्वसागुणेपूतमेषु यत्र शोभेति सा मता॥

वेमभूपालः

श्मश्रुकर्म

शुद्धं श्यामं विचित्रं च तथा पिङ्गलमेव तु ।
चतुर्धा श्मश्रुकर्म स्यात् पुनश्च त्रिविधं मतम् ।
श्मश्रुलं मध्यमं लिप्तं विनियोगस्य कथ्यते ॥

शुद्धं शुक्लं । श्यामं कालं । विचित्रं श्यामशबलम् । पिङ्गलं प्रसिद्धं । श्मश्रुलं दीर्घश्मश्रुयुक्तम् । मध्यमं च दीर्घं । लिप्तं चर्मलग्नम् ।

सङ्गीतनारायणे

श्यामः

श्यामो यथार्थो विज्ञेयः बीभत्से च भयानके ।

कुम्भः

श्यामश्मश्रुकाः

दिव्या ये पुरुषाश्चैव सिद्धविद्याधरादयः ।
पार्थिवाश्च कुमाराश्च ये च राजोपजीविनः ॥

शृङ्गारिणो ये च मर्त्या यौवनोन्मर्दिनश्च ये ।
श्यामं लिप्तं श्मश्रु तेषां भरतादिभिरीरितम् ॥

सङ्गीतनारायणे

श्रीकण्ठः

लघुर्गुरुर्लघुद्वन्द्वं श्रीकण्ठे तु प्रतिष्ठितम् ।

कुम्भः

श्रीकण्ठकविवर्णनम्

द्वारावत्याः समीपे नवनगरपुरे क्ष्मापितः पूर्वभागे
जामिः श्रीशत्रुशल्यः सकलजनमनोरञ्जकः पुण्यराशिः ।
श्रीकण्ठस्तत्सभायां कविरमलमतिर्विद्यते विप्रवर्य-
स्तेन प्रौढप्रमेयव्यतिकरसुभगं रच्यते काव्यमेतत् ॥

श्रीकण्ठीभाषा

धैवतांशग्रहन्यासा त्यक्तपा धैवतालिपका ।
गतारमन्द्रधा चापन्यासेनर्षभभाषिता ॥

श्रीकण्ठी भिन्नषड्जोत्था भवेदुत्कण्ठिते जने ।
याष्टिकः पुनराचष्ट रिलोपात् षाडवामिमाम् ॥

श्रीकान्यकुब्जकाश्मीरदेश्यौ पञ्चममध्यमौ ।
महाराष्ट्रचोलदेश्यौ स्वरावृषभधैवतौ ॥

गान्धारश्च निषादश्च गौडनेपालदेशगौ ।
षड्ज उत्तरदेशीयः स्वरो देशा अमी मताः ॥

ऋचुर्गीतविदश्शाखां माध्वीमृषभषड्जयोः ।
गान्धारमध्ययोश्शाखश्शस्तो माध्यंदिनी विदुः ॥

मध्यमो धैवतश्चैतौ स्वरौ कौथुमशाखिनौ ।
काण्वशाखा निषादस्य स्वरशाखाः क्रमादमूः ॥

षड्जो द्वादशवर्षस्यादृषभः षोडशा द्विकः ।
सुरकर्मणि षड्जस्स्यादृषभो ध्यानिकर्मणि ॥

गान्धारदेशसत्कारे स्वरकर्मणि मध्यमः ।
उत्सवे पञ्चमो ज्ञेयः क्षात्रकर्मणि धैवतः ।
विनोदकर्मणि बुधैः निषादः कथितस्स्वरः ॥

श्रीशङ्कुकमतम्

वासनाभावितस्वीयकार्यप्रकटनेन च ।
विभावाद्यैर्नटैनैर्वोद्भासितैरनुमापितः ॥

रसनीयत्वमासाद्य लक्षण्यात्परस्य च ।
संभाव्यमानो रत्यादि स्थायित्वेन तदा त्विह ॥

असन्नपि प्रेक्षकाणां चर्व्यमाणो रसः स्मृतः ।
इति श्रीशङ्कुकाचार्यो रसव्यक्तिं न्यवेदयत् ॥

कुम्भः

श्रीहनुमन्मतम्

भैरवः कौशिकश्चैव हिन्दोलो दीपकस्तथा ।
श्रीरागो मेघरागश्च षडेते पुरुषाः स्मृताः ॥

मध्यमादिर्भैरवी च बङ्गाली च वराटिका ।
सैन्धवी च पुनर्ज्ञेया भैरवस्य वराङ्गनाः ॥

तोडी खम्बावती गौरी गुणक्री ककुभा तथा ।
रागिण्यो रागराजस्य कौशिकस्य वराङ्गनाः ॥

वेलावली रामकरी देशाख्यापठमञ्जरी ।
ललिता सहिता एता हिन्दोलस्य वराङ्गनाः ॥

केदारी कानडादेशी कामोदी नाटिका पुनः ।
दीपकस्य प्रियाः पञ्च ख्याता रागविशारदैः ॥

वसन्ती मालवी चैव मालश्रीश्च धनाश्रिका ।
असावरी च विज्ञेयाः श्रीरागस्य वराङ्गनाः ॥

मल्लारी देशकारी च भूपाली गुर्जरी तथा ।
टक्कश्च पञ्चामी भार्या मेघरागस्य योषितः ॥

सङ्गीतदर्पणः

हृदूर्ध्वधमनीस्यूता नाड्यो द्वाविंशतिस्थिताः ।
तिरश्च्यो जनयन्त्येतान् ध्वनीन् वायुताडिताः ॥

नादस्य भेदास्ते ज्ञेयाः श्रवणाच्छ्रुतयो मताः ।
मन्द्रादिस्थानसंभूताः समकालनियन्त्रिताः ॥

द्विगुणः किल मानेन पूर्वः स्यादुत्तरोत्तरः ।
हृदूर्ध्वधमनीस्यूता नाड्यो द्वाविंशतिस्थिताः ॥

श्रुतिभ्यो जायमानो यः स्वनोऽनुरणनात्मकः ।
रञ्जयन्मानसं श्रोतुः स स्वरो गीयते बुधैः ॥

आद्याक्षरैस्सरिगमपधनीतिक्रमोदितैः ।
अन्यापि दृश्यते संज्ञा स्वराणां प्राक्तनैः कृताः ॥

चतुर्थ्यादिश्रुतिः पूर्वपूर्वश्रुत्युपबृंहिताः ।
स्वराणां कारणमिति न पूर्वासामहेतुता ॥

श्रुतयः

विवक्षमाणः पुरुषः प्राक्प्रेरयति मानसम् ।
मनः कायगतिं वाह्निं हन्त्यसौ प्राणमारुतम् ।
ब्रह्मग्रन्थिस्थितं सोऽस्माद्गच्छन्नूर्ध्वपदे क्रमात् ॥

श्रुतिः

श्रु श्रवणे चास्य धातोः क्तिप्रत्ययसमुद्भवः ।
श्रुतिशब्दः प्रसाध्योऽयं शब्दज्ञैर्भावसाधनः ॥

श्रवणेन्द्रियग्राह्यत्वात् ध्वनिरेव श्रुतिर्भवेत् ।
सा चैकापि द्विधा ज्ञेया स्वरान्तरविभागतः ॥

नियतश्रुतिसंस्थानात् गीयन्ते सप्त गीतिषु ।
तस्मात् स्वरगता ज्ञेयाः श्रुतयः श्रुतिवेदिभिः ॥

अन्तः श्रुतिविवर्तिन्यो ह्यन्तरश्रुतयो मताः ।
एतासामपि वैचित्र्यं क्रियाग्रामविभागतः ॥

मतङ्गः

श्रुतितादात्म्यादिविकल्पः

तादात्म्यं च विवर्तत्वं कार्यत्वं परिणामिता ।
अभिव्यञ्जकता चापि श्रुतीनां परिकथ्यते ॥

विशेषस्पर्शशून्यत्वात् श्रवणेन्द्रियग्राह्यता ।
स्वरश्रुत्योस्तु तादात्म्यं जातिव्यक्त्योरिवानयोः ॥

नराणां च मुखं यद्वत् दर्पणे तु विवर्तितम् ।
प्रतिभाति स्वरस्तद्वत् श्रुतिष्वेव विवर्तितः ॥

श्रुतीनां श्रुतिकार्यत्वमिति केचिद्वदन्ति हि ।
मृत्पिण्डदण्डकार्यत्वं घटस्येह यथा भवेत् ॥

श्रुतयः स्वररूपेण परिणमन्ति न संशयः ।
परिणमेत् यथा क्षीरं दधिरूपेण सर्वथा ॥

षड्जादयः स्वराः सप्त व्यज्यन्ते श्रुतिभिः सदा ।
अन्धकारस्थिता यद्वत् प्रदीपेन घटादयः ॥

इति तावन्मया प्रोक्तं श्रुतीनां च विकल्पनम् ।
इदानीं संप्रवक्ष्यामि विकल्पस्य च दूषणम् ॥

भेदः स्वरलक्षणत सामान्येनान्यवस्तुवत् सिद्धः ।
तद्धि विशेषैः शून्यं भवति नभः शशसङ्काशम् ॥

नानाबुद्धिप्रसाध्यत्वात् स्वरश्रुत्योस्तु भिन्नता ।
आश्रयाश्रयिभेदाच्च तादात्म्यं नैव सिद्ध्यति ॥

यदभाणि विवर्तत्वं श्रुतीनां तदसङ्गतम् ।
विवर्तत्वे स्वराणां हि भ्रान्तिज्ञानं प्रसज्यते ॥

कार्यकारणभावस्तु स्वरश्रुत्योर्न सम्भवेत् ।
श्रुतीनामिह सद्भावे प्रमाणं नैव विद्यते ॥

मतङ्गः

श्रुतिभेदाः

मन्द्रा चैवानुमन्द्रा च घोरा घोरतरा तथा ।
मण्डला च तथा साम्या समिनापुष्करा तथा ? ॥

शंकिनी चैव नीला च उत्फुल्ला चानुनासिका ।
घोषावती कीरनादा आवर्तिन्यपि चापरा ॥

रणवा चैव गम्भीरा दीर्घतारा अतिनादिनी ? ।
(मं) द्रजानुप्रसन्ना च ननदामन्द्रसप्तके ॥

नादान्ता निष्कला गूढा सकला मधुरा तथा ।
एकाक्षरा भृङ्गजातिरजनीसुरशीर्षका ॥

पूर्णालङ्कारिणी चैव वासिका वैनिका तथा ।
त्रिस्थाना सुस्वरा सौम्या भाषाङ्गी वर्तिका तथा ॥

संपूर्णा च प्रसन्ना च सर्वव्यापिनिका तथा ।
द्वात्रिंशतिसमाख्याता श्रुतयो मध्यसप्तके ॥

ईश्वरी चैव कौमारी सवराकी तथा परा ।
भोगादित्या मनोरामा सुस्निग्धा च तथाऽपरा ॥

दिव्यदेहानुललिता विश्रामा च तथाऽपरा ।
महाकाली शङ्खिनी च कालजाता तथापरा ॥

रामसूक्ष्मातिसूक्ष्मा च पुष्टा चैव सुपुष्टिका ।
विस्पष्टा काकली चैव कराली च तथाऽपरा ।
विस्फोटान्तर्भेदिनी च इत्येतास्तारसप्तके ॥

सङ्गीतसूर्योदये

नामिकाधर्वणी धस्ता चतुर्थेति च कंबली ।
श्रविका सरली नाली रसनी रञ्जनी तथा ॥

घ्राणिनी पधनी मन्दा मौर्धावी कम्बिभाषिणी।
स्वरन्तीति तथा प्रोक्ता अष्टादश श्रुतिस्मृताः॥
नाभिकाधर्षणीघस्ताः षड्जस्वरसमाश्रिताः।
चतुर्यतिचधा चैव ऋषभस्वरमाश्रिते॥
कम्बली श्राविका नाली गान्धारे सरलीति च।
रसनी रञ्जनी चैव मध्यमस्वरमाश्रिते॥
घ्राणिनी पधनी मन्दा पञ्चमस्वरमाश्रिताः।
मौर्धावी कम्बिनी चैव धैवतस्वरमाश्रिते।
भाषिणी च स्वरन्ती च निषादस्वरमाश्रिते॥

भरतकल्पलता

श्रुतिशब्दनिष्पत्तिः

श्रुश्रवणे चास्य धातोः क्तिप्रत्यये सुसङ्गते।
श्रुतिशब्दः प्रसाध्योऽयं शब्दज्ञैर्भावसाधने॥

कुम्भः

श्लक्ष्णगुणः

नीचोच्च द्रुतमध्यादौ नूतनं श्लक्ष्णमुच्यते।

भरतकल्पलता

श्वशुरहस्तः

पताकस्य पृष्ठभागस्तिर्यक् चैव प्रदर्शितः।
श्वशुरार्थे नियुज्येत नन्दिना परिकीर्तितः॥

भरतकल्पलता

श्वश्रूहस्तः

पताकमुदरे कृत्वा वामे चाप्यलपद्मकम्।
श्वश्रां च परियुज्येत कथितो भरतादिभिः॥

भरतकल्पलता

श्वसितम्

अधस्तादञ्चलं स्रस्तं श्वसितं वीक्षितेऽद्भुते॥

कुम्भः

श्लिष्टकर्तरी—नवसंख्याहस्तः

कर्तरी मुखहस्ते तु मध्यमाङ्गुष्ठमेव च।
मध्यमा तर्जनी मध्यं श्लिष्टं चेत् श्लिष्टकर्तरी।
बुधार्थे नवसंख्यायां कथ्यते श्लिष्टकर्तरी॥

शृङ्गारशेखरः

ष

षट्काकुलक्षणम्

श्रुतिन्यूनाधिकतया रागस्वरस्य कस्य चित्।
या कृत्या दृश्यते तां तु स्वरकाकुं जगुर्बुधाः॥
या रागस्य निजां छायां रागकाकुं तु तां विदुः।
रागे रागान्तरछाया काकुः स्यादन्यरागजा॥
देशछायोद्भवा रागे देशकाकुर्निगद्यते।
रागस्योत्पत्तिभूः क्षेत्रं शरीरं जगदुर्बुधाः॥
तस्यैवानुकृतित्वाच्च क्षेत्रकाकुरिति स्मृता।
वीणावंशादियन्त्रोत्था यन्त्रकाकुः स्मृता बुधैः॥

मोक्षदेवः

षट्तालः—तालः

षट्तालसंज्ञके ताले द्रुतषट्कं निरन्तरम्।
० ० ० ० ० ०

कुम्भः

षड्जकपालम्

यत्र स्यात्पञ्चमो न्यासो बहू मध्यमधैवतौ।
गान्धारर्षभकावल्पौ तरां तद्धैवती भुवम्।
षाड्ज्या इह कपालिकं कपालं समुदीरितम्॥

कुम्भः

षड्जकपालः

व्याघ्रचामरभूपालकुलालङ्करणं विभुः।
शुद्धजातिभुवां लक्ष्म कपालानां ब्रवीत्यथ॥
यद्यया जन्यते जात्या कपालं तत्र चेष्यते।
रागस्तज्जातिवत्शेषा राजराजस्य संमतिः॥
यस्मिन्नंशो ग्रहषड्जोपन्यासश्च तथा बहू।
गान्धारपञ्चमौ चाथ निषादर्षभधैवताः॥
पञ्चमश्चाल्पकालंघ्य ऋषभश्च तथोदितः।
कला द्वादशसंख्याका गान्धारे न्यसनं तथा॥
षाड्ज्या जातेः कपालं तत् ब्रवीति स्वरकोविदः।
अन्याऽथ प्रोच्यते राज्ञा ब्रह्मप्रोक्ता पदावलिः॥

कुम्भः

षड्जग्रामः

षड्जग्रामः पञ्चमश्च धैवतश्च श्रुतिक्रमात्।
मध्यमः पञ्चमः शुद्धषड्जसंवादिरुच्यते॥

संगीतमकरन्दः

तिस्रो द्वे च चतस्रश्च चतस्रस्तिस्र एव च।
द्वे चतस्रश्च षड्जाख्ये ग्रामे श्रुतिनिदर्शनम् ॥

नाट्यशास्त्रे

षड्जश्रुतिनिर्देशः

दक्षिणेनालपद्मेन वामेन चतुरेण तु।
परिमण्डलितेनाथ मयूरललितेन च।
एवं विनिर्दिशेत्षड्जं कोविदो नाट्यनृत्तयोः ॥

षड्जसाधारणम्

एवं काकल्यन्तरौ द्वौ षड्जग्रामे यदा तदा।
षड्जसाधारणं प्रोक्तं भरतज्ञेन भूभुजा ॥

तथैवान्तरकाकल्याद्यौ मध्यमगतौ यदि।
तदा मध्यमपूर्वं स्यात्साधारणमिह स्फुटम् ॥

कुम्भः

षड्जस्वरोत्पत्तिः

सर्वसन्धिषु जायन्ते क्रमात् षड्जादयः स्वराः।
कण्ठोरुस्तालुनासाभ्यां जिह्वया दशनादपि।
षड्जस्संजायते तेन षड्जस्वर इहोच्यते ॥

षड्जादिस्वराभिनयः

दक्षिणेनालपद्मेन वामेन चतुरेण च।
परिमण्डलितेनाथ मयूरललितेन च ॥

वीराख्यया तथा दृष्ट्या शिरसोद्वाहितेन च।
एवं विनिर्दिशेत्षड्जं कोविदो नाट्यनृत्तयोः ॥

अशोकः

षड्जादिस्वरादिनिर्णयः

मयूरचातकौ छागक्रौञ्चौ कोकिलदर्दुरौ।
गजश्च षड्जप्रमुखाननुस्वरन्ति क्रमात्स्वरान्।
षड्जमध्यमगान्धाराः स्युर्देवकुलसंभवाः ॥

षष्ठं पताकम्

अधो मकरमाधाय हस्ताभ्यां यत्र नृत्यति।
सप्लुतैश्चरणाभ्यासैर्भेदः षष्ठोऽयमीरितः ॥

कुम्भः

षाडवा, ओडुविता, धारिणी

सा पूर्णा तत्र विज्ञेया गीयते सप्तभिः स्वरैः।
या गीयते स्वरैः षड्भिः षाडवां तां प्रचक्षते ॥
ओडुविता तथाऽऽख्याता पञ्चभिर्गीयते स्वरैः।
काकल्यन्तरसंयुक्ता ज्ञेया सा धारिणीति सा ॥

कुम्भः

षिद्गकः

सदस्याः समक्षं भर्तुर्यदुद्धतं नृत्तमुच्यते।
मसृणं च क्वचिद्धूर्तचरितं षिद्गकश्च सः ॥
(अस्वाल्पसुकुमारमुद्धतप्रचुरं नृत्तं प्रविधातव्यम्)

वेमः

स

सकलनिष्कलवाद्यम्

सकलं निष्कलं चेति द्विविधं वाद्यमीरितम्।
एकतन्त्र्यास्त्वयं भेदः कथितश्शंभुना पुरा ॥
जीवालग्ना प्रकर्तव्या यथा नादोऽभिजायते।
स्थूलो ध्वनिर्मवेद्यत्र वाद्यं तत् सकलं भवेत् ॥
कलाहीना प्रकर्तव्या बिन्दोरुत्पातहेतवे।
तर्जनीमूलसंलग्ना तन्त्रीवै निष्कलं भवेत् ॥

सोमेश्वरः

सङ्कीर्णं

सङ्कीर्णं तद्भवेन्नित्यं यदेतत्त्रयसङ्करात्। कुम्भः

सङ्कीर्णनेरिः

असंयुतैस्संयुतैश्च नृत्तहस्तैस्तथैव च।
सङ्कीर्णनेरिं तं प्राहुः नृत्तं नृत्तविशारदाः ॥
संयुतासंयुतैर्यत्र हस्तश्चातिमनोरमः।
सङ्कीर्णनेरिरुक्तः स्यादादितालश्च तद्द्वये ॥

सङ्गीतमुक्तावली देवेन्द्रकृता

सङ्घोटना

गुरुणी लघून्यष्टौ दीर्घं द्विगुणं तथा च कर्तव्यम्।
लघुदीर्घे लघु च पुनश्चतुर्गुणं संप्रकर्तव्यम् ॥
पुनरष्टौ ह्रस्वानि स्युरिह तथा नैधनं च कर्तव्यम्।
संघोटनवस्तुविधौ ह्रस्वगुरुविधिः समुद्दिष्टः ॥

नाट्यशास्त्रे

संक्षिप्तकः

अन्वर्थकल्पसंयुक्तो बहुपुस्तवचोयुतः।
संक्षिप्तवस्तुविषयो ज्ञेयः संक्षिप्तको बुधैः ॥

कुम्भः

संख्यानियमेऽपवादः

शुद्धसालगसङ्कीर्णैर्धातुमातुविचारतः ।
देशभाषाविशेषैश्च रागसंख्या न विद्यते ॥

शुभङ्करः

सङ्करजातयः

षड्जाया मध्यमायाश्च संसर्गात् षड्जमध्यमा ।
षड्जायाश्चैव गान्धार्या जायते षड्जकैशिकी ॥

तयोरेव सधैवत्योः षड्जोदीच्यवती भवेत् ।
आसां समध्यमानां तु गान्धारोदीच्यवा भवेत् ॥

गान्धार्या मध्यमायाश्च पञ्चम्याश्चैव सङ्करात् ।
सधैवतानामासां तु मध्यमोदीच्यवा भवेत् ॥

आसां स्यात् रक्तगान्धारी नैषादी चेच्चतुर्थिका ।
आर्षभ्यास्तु भवेदान्ध्री गान्धार्याश्चैव सङ्करात् ॥

अनयोस्तु सपञ्चम्योर्नन्दयन्ती प्रजायते ।
सनिषादा स्वगान्धार्याः कुर्युः कार्मारवीमिमाम् ॥

गान्धारी पञ्चमी चैव तथा गान्धारपञ्चमी ।
आर्षभी धैवती वर्ज्याः कैशिकीमिति सङ्करः ॥

मतङ्गः

सङ्गीतप्रशंसा

अणोरणीयान् महतो महीयान् सोऽयं ध्वनिः स्वरग्राममूर्छनाः । तानः श्रुतिमयं ब्रह्माहं तस्मान्मनोलयं भवति सोऽमृतत्वं गच्छति इति गन्धर्वोपनिषदि । रामार्चनचन्द्रिकायां गीतनृत्तादित्यानि कुर्वीत द्विजो देवाग्नितुष्टये । भारते तु—

नृत्यगीते तु यः कुर्यात् विप्रः स्वाभाविकेऽपि च ।
स्वाभाविकोऽपि भगवान् प्रीणातीत्याह शौनकः ॥

पञ्चमसारसंहितायां—

सङ्गीतकेन रम्येण सुखं यस्य न चेतसि ।
मनुष्यवृषभो लोके विधिनैव स वञ्चितः ॥

यो वित्तलोभेन सुखेन वापि शाठ्येन वा गायति गीतमात्मम् ।
सञ्जायते वर्षसहस्रमीशपूः सदा सर्वगणाग्रणीशः ॥

सङ्गीतविद्यां मुरलीं स्वयं कृष्णो हि सेवते ।
शम्भुना गीयते गीतं नारदेन महात्मना ॥

अन्ये च योगिनः सर्वे संगीतयोगतत्पराः ।
तस्मात्सर्वप्रयत्नेन गानयोगं समभ्यसेत् ॥

भरतसंहितायां—

संसारदुःखदग्धानां उत्तमानामनुग्रहात् ।
प्रभुणा शङ्करेणात्र गीतविद्या प्रकाशिता ॥

गीतं पीनपयोधरा समदना वापी विचित्रा कथा
रम्यं हर्म्यतलं सुधांशुकिरणप्रोद्दीपिता यामिनी ।
चित्तज्ञाः सुहृदः सतां सुमनसो भक्ताः पुनः सेवकाः
शुद्धं गीतफलं कवित्वमतुलं संसारसारा मताः ॥

सङ्गीतसारः

सङ्गीतरत्नाकरे स्वरलक्षणम्

श्रुत्यनन्तरभावी यः स्निग्धोऽनुरणनात्मकः ।
स्वतो रञ्जयति श्रोतृचित्तं स स्वर उच्यते ।
सुव्यक्तमेव वीणायामस्यार्थस्य निदर्शनम् ॥

हम्मीरः

सङ्गीतलक्षणम्

सुस्वरं सरसं चैव सुरागं मधुराक्षरम् ।
सालङ्कारप्रमाणं च षड्विधं गीतलक्षणम् ॥

गान्धर्ववेदे

सङ्गीतस्याङ्गानि

अङ्गानि तस्य सप्त स्युः सभा सभ्यः सभापतिः ।
उपाध्यायो गायकाश्च वादका नर्तकी तथा ॥

सोमराजदेवः

सङ्घातः

सर्वाङ्गुल्यप्रघातश्च सर्वाङ्गुलिविवर्तनम् ।
यस्य निःपादकं सोऽत्र संघातः कथितो यथा ।
दरगिड दरगिड दिदोणकिटमटटकुसं भ्रान्तः ॥

कुम्भः

सङ्घः—पाटः

सङ्घो विच्छुरितश्चेति पाटावलगसंज्ञकौ ।
अर्धाङ्गुल्यप्रघातेन तत्र सङ्घः प्रजायते ॥

यथा—थुकर थुकरगिण णगि । कुम्भः

स्कन्धस्य मणिबन्धस्य कूर्पराङ्गुष्ठयोस्तथा ।
वामस्य चरणस्यापि कम्पनं सङ्घ उच्यते ॥

कुम्भः

सञ्चारी

मन्द्रे च मध्यमे तारे सञ्चारीति स्वरः स्फुटम् ।

भरतकल्पलता

सञ्चारिणः

अथ सञ्चारिजान्भूयः कीर्त्यमानान्निबोधत ।
मन्द्रस्तथा प्रसन्नादिर्बिन्दुः प्रेङ्खोलितस्तथा ॥

संनिवृत्तप्रवृत्तश्च रेचितः कम्पितः स यः ।
कुहरश्चैव वेणुश्च रञ्जितो ह्यवलोकितः ।
आवर्तितपरावृत्तौ ज्ञेयाः सञ्चारिणस्तथा ॥

नाट्यशास्त्रे

सञ्चारिता

यदान्येनाङ्घ्रिणान्योऽङ्घ्रिरुत्क्षिप्योत्क्षिप्य कुञ्चितः ।
युज्यते तिर्यगन्यस्तु सर्पन् सञ्चारिता तदा ॥

कुम्भः

सजीवलक्षणम्—(आहार्याभिनयः)

सजीवं प्राणिनां रङ्गे प्रवेशः परिकीर्तितः ।
द्विचतुश्चरणौ पादरहितश्चेति स त्रिधा ॥

द्विपादस्तत्र विज्ञेयो देवमानुषपक्षिणः ।
चतुष्पादस्तु पशवः पादहीना भुजङ्गमाः ॥

नृत्तरत्नावली

सञ्जीवः—(प्रवेशः)

प्रवेशः प्राणिनां नाट्ये सञ्जीव इति कथ्यते ।
भृत्यहस्तितुरङ्गाद्या मुख्यपात्रोपकारकाः ।
नाट्ये प्रवेशयोग्याश्च प्राणिनस्त्वत्र संमताः ॥

वेमभूपालः

सत्कृतं

शीतक्लेशे प्राह्णवायौ शब्दानुकरणेऽपि च ।
नखक्षते मृगाक्षीणां निर्दयाधरखण्डने ॥

कुम्भः

सत्त्वलक्षणम्

अव्यक्तमयसत्वं च रसभावसमाश्रयम् ।
रोमाञ्चाश्रुप्रभृतिभिर्भेदैर्बोद्धव्यमञ्जसा ।
तस्मात्सत्त्वमिदं प्रोक्तं तज्ज्ञैर्नाट्यस्य जीवितम् ॥

वेमभूपालः

सन्दष्टः—गायकः

सन्दष्टदशनोष्ठो यः सन्दष्टः परिकीर्तितः ।

भरतकल्पलता

सन्दिग्धस्वरलक्षणम्

सन्दिग्धलक्षणं यत्र पदसन्दिग्धमुच्यते ।

भरतकल्पलता

सन्देशहारकः—(दूतः)

सन्देशं हरते यस्तु यावद्वाचिकमात्मकम् ।
नापरं किमपेक्ष्येत तस्मात्सन्देशहारकः ॥

यथोक्तं यो वदत्यर्थं समासात्तूभयोर्वशे ।
कार्यजाते मूनीन्द्रेण प्रोक्तः सन्देशहारकः ॥

शुभङ्करः

सन्दंशः

अरालस्य यदाङ्गुष्ठतर्जन्यग्रौ सुसङ्गतौ ।
तलमध्यो मनाङ्निम्नः स सन्दंशाभिधः करः ॥

अग्रजो मुखजश्चैव पार्श्वजश्चेत्ययं त्रिधा ।
प्राङ्मुखोऽग्रज इत्युक्तः संमुखो मुखजो मतः ॥

पार्श्वजः स्यात्पार्श्वमुखस्त्रयाणां कर्म कथ्यते ।
सूक्ष्मे प्रसूनावचये कण्ठकोद्धरणे तथा ॥

कुसुमोद्धरणे वृन्तादग्रसन्दंश इष्यते ।
वर्त्यञ्जनशलाकादिपूरणेष्वग्रजो मतः ॥

पुष्पाणां ग्रथने केशपर्णसूत्रग्रहेषु च ।
वस्त्रान्तालम्बनश्चैव मुखसन्दंश इष्यते ॥

धारणे यज्ञसूत्रस्य गुणनिक्षेपणे तथा ।
मणिमुक्ताप्रवालानां छेदेन तत्त्वभाषणे ॥

चित्रकर्मण्यलक्तादिनिःपीडादौ च पार्श्वजः ।
पार्श्वाभिमुखहस्ताभ्यां निर्धनत्वनिरूपणम् ॥

विप्रदासः

सन्निपातः—कलामानम्

उभयोर्हस्तयोः पातः सन्निपात इति स्मृतः ।

दत्तिलः

सन्निपाताः

चत्वारः सन्निपाताः स्युः प्रावेशिक्यां प्रकीर्तिताः ।
शेषाः प्रत्येकमाख्याताः सन्निपातद्वयान्विताः ।

अधिकाः सन्निपाताः षट्‌शीर्षक्यां परिकीर्तिताः ॥

वेमभूपालः

सप्तविधस्वरयोगनामानि

आर्चिकं, गाथिकं, सामिकं, स्वरान्तरं, औडुवं, षाडवं, संपूर्णं चेति ।

मतङ्गः

सभापतिः

पात्रापात्रविवेकज्ञः प्रसन्नः कीर्तिलोलुपः ।
गम्भीरभावो वाग्मी च तूर्यत्रितयकोविदः ॥

कलाकलापकुशलश्चतुरश्च बहुश्रुतः ।
प्राज्ञो गुणलवस्यापि ग्राहको रसिकस्तथा ।
भावको धारणे युक्तः सभापतिरुदाहृतः ॥

वेमभूपालः

सभापतयः

शश्वद्राजकुलोद्भवाः सुनिपुणा नित्यानुरक्ता नृपे
नो भिन्ना न च संहिता परिगतान्योन्यानुरागस्पृहाः ।
स्पर्धाबन्धमनोहरा परिगतानेकास्त्रविद्योद्धुरा-
स्तिष्ठेयुः परितोऽस्य रक्षणविधावुद्यत्समस्तायुधाः ॥

कुम्भः

सभापतिस्वरूपम्

राजाद्युत्तमनायकप्रतिनिधिः स्वस्थः कुलीनो युवा
पात्रापात्रविशेषवित्स्थिरतरप्रेमा कलाकोविदः ।
गीतज्ञः सकलागमार्थनिपुणो विद्वत्प्रियः सत्यवान्
स्वाधीनाखिलसेवको बहुधनोऽभीष्टार्थदानोद्धुरः ॥

रूपेण स्मरचित्रविद्गुणगणग्राही कृतज्ञो गुणी
धर्मिष्ठो रसभावविज्जनमनोहारी सुवेषः सुखी ।
शृङ्गारी बहुदोऽनपेक्ष्यविभवः कीर्तिप्रियः कामुकः
प्राप्तौचित्यविशेषविच्छुचिमतां प्रोक्तस्सभाधीश्वरः ॥

कुम्भः

सभापतिस्थानम्

पुरतो रङ्गपीठस्य मध्यपङ्क्तौ सुलोष्टके ।
पञ्चमे वाथ षष्ठे वा स्थाने कार्यं सभापतेः ॥

कुम्भः

सभालक्षणम्

क्रमेण लक्षणं तेषां संक्षेपेणाभिधीयते ।
सम्यक् प्रणीतमालोक्य मतङ्गादिमहर्षिभिः ॥

चारुचन्द्रोदयेऽनल्पपुष्पप्रकरशोभिते ।
कर्पूरागुरुकस्तूरीधूपदीपाधिवासिते ॥

राज्यलक्ष्मीविलासैकस्थानमास्थानमण्डपे ।
न्यसेत्सिंहासनं राज्ञः प्राङ्मुखं वाप्युदङ्मुखम् ॥

तस्मिन्नुपविशेद्राजा राज्ञी तस्याथ वामतः ।
तिष्ठेदुभयतस्तं च चामरग्राहिणीद्वयम् ॥

पार्श्वयोश्च विलासिन्यो दक्षिणे मन्त्रिमण्डलम् ।
मन्त्र्याद्या मण्डलाधीशाः प्रधानानि तु पृष्ठतः ॥

तिष्ठेयुर्दक्षिणे पार्श्वे विद्वांसः कवयोऽपि च ।
वामे वाग्गेयकाराद्या निषीदन्ति महीपतेः ॥

परमण्डलिनः पश्चात्तत्पृष्ठे मागधादयः ।
गान्धर्ववृन्दं पुरतः पाश्चात्याभङ्गरक्षकाः ॥

प्रतीहाराः पुनर्द्वारे सुभटाः पार्श्वयोर्द्वयोः ।
यथौचित्यमथान्यापि निविशेरन् सभोचिताः ॥

पृष्ठभागं परित्यज्य द्वारं कुर्याद्यदृच्छया ।
इत्थं भवति भूपानां सभोच्चैः संवृतायता ॥

सोमराजदेवः

चारुचन्द्रोदये तल्पे पुष्पप्रकरसुन्दरे ।
कर्पूरागरुकस्तूरिधूपधूमादिवासिते ॥

राज्यलक्ष्मीविलासैकस्थाने श्रीरङ्गमण्डपे ।
न्यसेत्सिंहासनं राज्ञः प्राङ्मुखं वाप्युदङ्मुखम् ॥

तस्मिन्नुपविशेद्राजा राज्ञी तस्याथ वामतः ।
तिष्ठेयुर्दक्षिणे पार्श्वे विद्वांसः कवयोऽपि च ॥

वामे वाग्गेयकाराश्च निषीदन्ति महीपतेः ।
परिमण्डलिनः पश्चात्तत्पृष्ठेमागधादयः ॥

गन्धर्ववृन्दं पुरतः परिधावङ्गरक्षकाः ।
प्रतीहारा पुनर्द्वारे सुभगाः पार्श्वयोर्द्वयोः ॥

यथोचित्यमथान्येऽपि तिष्ठेयुर्ये विचक्षणाः ।
विलासिनो विलासिन्यः परितोऽन्तःपुरस्य च ॥

पुरतोऽपि नृपस्य स्युः पृष्ठभागेऽपि भूपतेः ।
चारुचामरधारिण्यो रूपयौवनसंभृताः ॥

स्वकङ्कणझणत्कारनिर्वाणजनमानसाः ।
पृष्ठभागं परित्यज्य द्वारं कुर्याद्यदृच्छया ॥

सन्निवेश्य सभामेवं राजा सङ्गीतमीक्षते ।
सा सभा यत्र सङ्गीतं सा सभा यत्र पण्डिताः ।
सा सभा यत्र शास्त्राणां कथानादविजृम्भणम् ॥ हम्मीरः

सभासदः

अध्वस्ताः सावधानाश्च वाग्मिने न्यायवादिनः ।
अमर्त्या रसभावज्ञाः तौर्यत्रितयकोविदाः ॥

दृष्टिताटितामिज्ञा असदादिनिषेधकाः ।
सानन्दा रसभावज्ञा गुम्फिनस्युः सभासदः ॥

सङ्गीतनारायणे

सभ्याः

मध्यस्था वाग्मिनश्चैव तूर्यत्रितयवेदिनः ।
उचितानुचिताभिज्ञा रसभावविवेचकाः ।
सुमुखाः सावधानाश्च सभ्यास्तज्ज्ञैरुदीरिताः ॥

वेमभूपालः

समः

समाद्या वायवोऽन्यार्थसमानः किन्तु कथ्यते ।
विनियोगः समो ज्ञेयः सहजे कर्मणि स्थितः ॥

कुम्भः

समकर्तरी—हस्तपाटः

समघातात्कर्तरीभ्यां कराभ्यां समकर्तरी ।
ढनकिट वनरकिटंकिट झें थो दिगिदतिरिटिरिकिट ।

कुम्भः

समग्रहः—हस्तपाटः

सममेव तलाभ्यां वै करयोः पुटघातनम् ।
समग्रहं परेऽप्याहुर्व्यङ्गुष्ठाङ्गुलिके तले ॥
तकट तकट ।

कुम्भः

समनखः—पाटः

यत्राङ्गुलीनखाघातैर्दश्यते समता बुधैः ।
पाटवर्णसमा हस्तपाटाः समनखस्तु सः ॥

यथा—

दरहरतरकिटिधि कणट तकिधिकिधिकि दर न न गिरगि ।

कुम्भः

समनखस्य विनियोगः

नृत्यप्रवेशनारम्भे विनियोगोऽस्य संमतः ।
भयादिविषये प्रोक्तो विचारविमुखैः परैः ॥

प्रलम्बिताविति प्रोक्तौ भरतेनात्र यौ करौ ।
तौ डोलाविति मन्यन्ते यत्र केचिन्न सांप्रतम् ।
शोकैकविषयावेताविति मन्यामहे वयम् ॥

नृत्तरत्नावली

समपाणिः—हस्तपाटः

अङ्गुष्ठाङ्गुलिसंहत्या पीडयेतां करौ यदा ।
युगपत्पुटयोर्द्वन्द्वं समपाणिस्तदा मतः ॥
दां गिड गिडदां दां ।

कुम्भः

—पाटः

समपाणिश्च विश्रान्तविरलाङ्गुलिघातनम् ।

यथा—

नन गिन गंदें गैथों गिनड्जों डकरजें ।

कुम्भः

समपादा

स्थित्वैव समपादेन भौमीमाकाशिकीमपि ।
यतः कुर्यात्ततश्चायं समपादा निगद्यते ॥
श्लिष्टपार्ष्णिनखन्निष्ठन्त्येकैकशो व्रजेत् ।
समं पादद्वयं स्यात्तत् समपादेति संस्मृता ॥
मुनेराशयमज्ञात्वा कैश्चिच्छास्त्रविधायिभिः ।
समपादयुगस्थानमात्रेणैषः प्रकीर्तितः ॥
यद्येवं करणे न स्यात् भिन्ना समनखात्कथम् ।
अस्याश्चलनशीलत्वात् पादैरित्यब्रवीन्मुनिः ॥

जायनः

समपादा—(चारी)

यत्र पादौ समनखौ निरन्तरकृताङ्गुलिः ।
स्थानकं समपादाख्यमास्थाय धरणौ क्रमात् ॥
संहत्य चरतः सोऽयं समपादेति कथ्यते ।
अजानानो मुनिमतं केचिदुत्तानबुद्धयः ॥
एतस्यां समपादायामभ्ययुः केवलां स्थितिम् ।
तदज्ञानस्य साम्राज्यं यतस्तेषां मते पुनः ॥
अस्याश्चार्यैः समनखकरणस्याश्रिताभिधा ।
चारीयोग्यत्वमात्रेण भेदश्चेदुभयं समम् ॥
किञ्चात्र समपादायां क्रियायोगममन्यत ।
पादैरिति प्रियं जानो बहुत्वं भरतो मुनिः ।
स्थित्वाऽऽदौ समपादायां सर्वचारीं प्रयोजयेत् ॥

वेमभूपालः

समपादनिकुट्टा

विपरीतप्रचारा सा प्रतिलोमानुलोमिका ।
निकुट्टितौ तथा पादौ स्थितौ चाङ्गुलिपृष्ठयोः ।
समपादनिकुट्टा च कीर्तितावर्थलक्षणा ॥

कुम्भः

समप्रहारः—पाटः

समप्रहारो वाद्यं स्यात्कराभ्यां युगपद्धतेः ।

कुम्भः

समरः—(निःसारुकः)

लघुद्वयं विरामान्तं ताले कन्दुकसंज्ञके ।
समरो गीयते तेन मध्यमोऽत्र लयो भवेत् ॥

गान्धर्ववेदे

समलक्षणम्

स्वाभाविकं मतं शीर्षं स्वभावाभिनये समम् ।

हम्मीरः

—(शिरः)

प्रकृतिस्थं समं प्रोक्तं यतो भेदाविति स्मृतं ।
तस्मात्समं जपध्यानस्वभावाभिनयादिषु ॥

नृत्तरत्नावली

समस्खलतिका

युगपच्चरणौ यत्र पुरतः पृष्ठतोऽपि च ।
तिर्यक् स्खलतिका प्रोक्ता समस्खलतिका तदा ॥

कुम्भः

सम्फेटः

शस्त्रप्रहारबहुलो युद्धसंरम्भसङ्कुलः ।
सम्फेटो नाम विज्ञेयो निर्भेदकपटाकुलः ॥

कुम्भः

—(प्रकीर्णम्)

क्रुद्धयोर्यः समापातः स सम्फेट इति स्मृतः ।

वेमभूपाल.

सम्भाविता—गीतिः

वृत्तौ लघ्वक्षरप्राया गीतिः सम्भाविता स्मृता ।

दत्तिलः

सर्ववाद्याश्रगाः पाटाः

अथ प्रतिस्वगान् वर्णानधिकान् मुरजादिषु ।
दर्शयामो मतङ्गादिमतमाश्रित्य तत्त्वतः ॥

मुरजे तदिथोटेहं नं दें सप्त प्रकीर्तिताः ।
केषांचन मते पाठा दटक्तादधला इति ॥

परेषां गभमा वर्णाः वर्ण्यन्ते धिकतामिता ।
तत्र मध्यादयः सप्त केवलाः शुद्धसंज्ञकाः ॥

ते कार्येर्व्यापकैर्मिश्राः कूटा इत्यभिसंज्ञिताः ।
शुद्धाः कूटविमिश्राश्च खण्डपाटाः प्रकीर्तिताः ॥

आवजे त्वधिकावुक्तौ मजकारौ मनीषिभिः ।
इहः स्युः प्रथमे वर्णाः दङ्कारेण विना कृताः ॥

करटायां पुनः पाटा अधिकाः करटा इति ।
टिरिकिः करटिश्चैव तत्र पाटद्वयं मतं ॥

गोङ्कारो घटने प्रोक्तो ढेङ्कारो डवने मतः ।
डक्कायामपि ढेंकारः क्रेङ्कारः कुडवागतः ॥

घेङ्कारवर्जिता पूर्वे रुञ्जा रुङ्कारवर्णिका ।
ढवर्णौ डमरौ प्रोक्तः भरटा इति पाटजा ॥

डकारढङ्कारबहुला निर्गोकखरटाश्रया ।
बंधुं तु भमिमे पाटाः डकुली वाद्यसंश्रयाः ॥

सेलुकायां धिधीपाटौ त्रिवल्यां तटधा इति ।
ते दोंदेति वर्णास्तु द्रोंकारो दुन्दुभौ तदा ॥

भेर्यां गेधधटाः पाटाः निःस्साणे परिकीर्तिताः ।
पाटाः घनकटाः प्रोक्ताः कांस्यताले मनीषिभिः ॥

टणत्कारोत्कटा घण्ठा जयघण्ठाऽथ कथ्यते ।
देंकारपाटबहुला कम्रा किरिटिकाक्षरा ॥

शुक्तिः किरिटिका पाठाः पट्टघट्टरठाः कपौ ।
धुक्कारबहुलं शृङ्गं हुंभुव्यादिगिदित्वतः ।
पाटवर्णाः स्मृताः शंखे मुनित्रयसुसंमते ॥

कुम्भः

सर्वार्थस्वीकृतिः

उदयास्तमयौ तत्तद्धर्मैर्व्यक्तैः प्रदर्शयेत् ।
तर्जनाभ्रमणाच्चापि दृष्टेः परिगमादपि ।
पीडनाच्चलपद्मस्य सर्वार्थस्वीकृतिर्भवेत् ॥

वेमभूपाल.

संप्रविष्टः

संप्रविष्टः स विज्ञेयो योऽवरोहे स्वरो घनः । कुम्भः

संभ्रान्तः—हस्तपाटः

सर्वाङ्गुल्यग्रघातेन सर्वाङ्गुलिविवर्तनम् ।
यत्र पाठे भवेत्सोऽत्र संभ्रान्तः कथितो यथा ।
दरगिड २ दरगिड २ दणकिर मदटकु इति ॥

कुम्भः

संयुतहस्तः

शिखरद्वन्द्वसंयोगात्करो द्विशिखरो मतः ।
शयनार्थेऽङ्गुलिस्फोटे स्त्रीणामनुनये तथा ।
नास्त्यर्थे तूपसंभुज्य वियुक्तं शिखरद्वयम् ॥

हम्मीरः

संलापलक्षणम्

हास्यश्रृङ्गारकरुणहीनः पाषण्डनायकः ।
त्र्यङ्कोऽथ चतुरङ्को वा कैशिकीभारतीच्युतः ॥
पुरोऽवरोधसंग्रामविद्रवैः कपटैर्युतः ।
अमर्षप्रतिमुख्याभ्यां हीनः संलाप उच्यते ॥

शुभङ्करः

संस्कृतपाठ्यभेदाः

निबद्धमनिबद्धं चेतीत्येतद्‌द्विविधं भवेत् ।
पादविच्छेदसहितं प्रमाणनियताक्षरम् ॥
छन्दोभिर्बहुभिर्युक्तं निबद्धं पाठ्यमुच्यते ।
छन्दोविरहितं पादविच्छेदपरिवर्जितम् ।
उत्प्रेक्षितपदं पाठ्यमनिबद्धं निगद्यते ॥

वेमभूपालः

संहतम्

अङ्गुष्ठौ च तथा गुल्फे पादयोश्चेन्मिथो युतौ ।
देहे स्वाभाविके तत्स्यात्संहतं स्थानकं वरम् ।
विनियोगोऽस्य कथितः पुष्पाञ्जलिविसर्जने ॥

कुम्भः

संहतलक्षणम्

कनिष्ठाङ्गुष्ठकौ यत्राधो गतौ संहतं पुनः
तर्जन्यादित्रयं स स्यान्मेलने द्रवचूर्णयोः ॥

कुम्भः

संहितम्

संहितं मीलितमुखं निश्चलं मौनकर्मणि ।

कुम्भः

संहितः

तारान्मन्दस्थितिं यावत् घण्टानादवता यतः ।
संहितः परिविज्ञेयाः ... ... ॥

कुम्भः

साक्षेपकीध्रुवा

प्रक्रान्तं लयमुल्लङ्घ्य गीयते यद्रुते लये ।
प्रस्तुतार्थसमाक्षेपात् ज्ञेया साक्षेपकी ध्रुवा ॥

वेमभूपालः

साची दृष्टिः

स्वस्थाने तिर्यगाकारमपाङ्गचलनक्रमात् ।
साची दृष्टिरिति ज्ञेया नाट्यशास्त्रार्थकोविदैः ॥

भरतकल्पलता

सात्त्वतविधिः—(न्यायः)

प्रविचारः सात्त्वतेऽपि कार्यो भारतवद्बुधैः ।
किन्तु खड्गभ्रमाः कार्याः केवलं पृष्ठभागतः ।
खड्गपातश्चरणयोः कर्तव्योऽत्र विचक्षणैः ॥

वेमभूपालः

✓ सात्त्वतीवृत्तिः

सत्त्वस्वेदनमस्यास्मिन्निति सत्त्वं मनोऽस्य सा ।
वृत्तिः सा सात्त्वती यस्यां सामुख्या साऽत्र सात्त्वती ॥

विप्रदासः

✓ सात्त्विकभावलक्षणम्

अत्यन्तस्थिरचित्तत्वात्तत्त्वमुत्पद्यते गुणः ।
तेन सत्त्वेन निर्वृत्ताः सात्त्विकाः परिकीर्तिताः ॥

शुभङ्करः

✓ सात्त्विकभेदाः

चतुर्धा च त्रिधा द्वेधैकधा सात्येवमप्ययम् ।
चतुर्विधो भुवो भर्ता लक्ष्यते लक्ष्मविन्मुदे ॥
शाखानृत्ताङ्कुरोपाधिभेदात्तत्राङ्गिकास्त्रिधा ।
वर्तनाकरयोः शाखास्तत्र वैचित्र्यचित्रिताः ॥
अङ्गोपाङ्गक्रियैस्तत्र स्वस्थानैरुपबृंहितैः ।
करणैरङ्गहारैश्च निष्पन्नं नृत्तमुच्यते ॥

कुम्भः

भावो हावश्च हेलाचेत्यङ्गजाः कथितास्त्रयः ।
लीला च हासो विच्छत्तिर्विभ्रमः किलकिञ्चितं ॥

मोट्टायितं कुट्टिमितं बिब्बोकं ललितं तथा ।
विहृतं चेति विख्याता दश स्त्रीणां स्वभावजाः ॥

वेमभूपालः

सात्त्विकरसनिर्णयः

अत्र दुःखमदुःखेन सुखञ्चासुखिनेन च ।
नाभिनेतुं क्षमं तस्माद्दुतयाभिसृतेन च ।
द्रष्टव्यावश्रुरोमाञ्चाविति सात्त्विकनिर्णयः ॥

कुम्भः

सात्त्विकलक्षणम्

सत्त्वं रजस्तम इति प्रथिता गुणा ये
चित्तं तदात्मकमिहोपदिशन्ति सन्तः ।
सत्त्वोत्कटं मनसि ये प्रभवन्ति भावा-
स्ते सात्त्विका निगदिता मुनिभिः पुराणैः ॥

कुम्भः

शुद्धं स्यात्त्वन्मते सत्त्वं केषाञ्चन मते पुनः ।
बीजस्थानीयमव्यक्तरूपं सत्त्वमुदीरितम् ॥
मनसा सहितं चास्मत्तत्त्वमेव क्वचिन्मते ।
सत्त्वशब्दाभिधेयं यत्स्थानं तत्सात्त्विकं मतम् ॥

कुम्भः

सात्त्विकाः

नृत्यका आङ्गिकेष्वेव पर्यवस्यन्ति तत्त्वतः ।
नटस्यातत्स्वरूपस्य किं तादात्म्यमतो न हि ।
स्तम्भादीनां सात्त्विकत्वं केवलानामिहोदितम् ॥

कुम्भः

सात्त्विकानां प्रचारकारणम्

एवं तथाविधे बुध्द्यध्यवसायेऽष्टकस्य तु ।
मानसैकाग्र्यहेतुत्वे यौगपद्योदयान्वितः ॥

बाह्यबाष्पाद्यष्टकस्य यौगपद्यादयोऽपि च ।
तत्र सामग्र्यन्तरं चेत्क्रिमवान्तरकल्पनः ॥

कुम्भः

सात्त्विकानां मानसो हेतुः

तस्मादनन्यमनसो जायन्ते ते तु सात्त्विकाः ।
स्तम्भादीनां न चैवं स्यात्समाधीनान्तु मानसम् ॥

हेतुः समानकालीनोऽष्टकाद्येन निमित्ततः ।
तद्बाष्पश्च नटे यं यो नटबुद्ध्यवसायकाः ॥

ते स्युर्नटगतानां तु बाह्यबाष्पादिहेतवः ।
एवं ते सात्त्विकाः सत्येनादृताः संसदि स्फुटम् ॥

कुम्भः

सात्त्विकादीनामाङ्गिकप्रसिद्धिः

अत्र प्रयत्ननिर्वर्त्ये समाने भाववर्गगे ।
अतिप्रसक्तिमुख्येषु दोषरूपस्थितेषु च ॥

सात्त्विका आङ्गिकेष्वेवमुच्यन्त इति साम्प्रतम् ।
तस्मान्मुख्याभिनयने वागङ्गप्रभुका मता ॥

कुम्भः

साधनप्रकारः

तैलाभ्यक्तेन गात्रेण लब्धाहारो निजतश्रमः ।
स्तम्भे वा भित्तिदेशे वा निस्तन्द्रः तत्तदभ्यसेत् ॥

रूक्षाहारं शाकमम्लं सकण्टकरुषात्तपि ।
वर्जयेत्साधने तेषां भोजनोपरि नाभ्यसेत् ॥

न्यायाश्च शार्ङ्गदेवोक्ता भरतादिश्चतुर्विधः ।
परं युद्धे प्रयोज्यरस इति नात्र मयोदितः ॥ तदुक्तम्

युद्धे परास्तशस्त्राणां क्रमाद्धारणपातने ।
विधातुमुचिता गात्रवलनान्याय उच्यते ॥

नाट्याङ्गानि मयोक्तानि परमुद्देशमात्रतः ।
विशेषलक्षणान्येषां ज्ञायन्तां तत्तदाकरात् ॥

ज्ञेयानभिनयैरेव यान्न केवललक्षणैः ।
तन्नालेखिषतैतानि मया बाहुल्यभीरुणा ॥

सङ्गीतनारायणे

साधारणम्

अत्र साधारणं केचिद्वदन्ति स्वरकोविदाः ।
षड्जगं मध्यमं चापि केशाग्रवदणुत्वतः ॥

कैशिकं नाम तद्गाता कश्चिद्गायति वा न वा ।
साधारणं तु षड्जस्य निरिभ्यामुपजीवनात् ॥

साधारणं मध्यमस्य गपाभ्यामुपजीवनात् ।
इतो तद्द्विविधं षड्जमध्यमाभ्यां विशेषणात् ।
ग्रामसाधारणं केचिदवादिषुस्तद्विदः ॥

कुम्भः

कटिदेशगतौ हस्तौ तिर्यग्यदि विलोडितौ ।
ततोऽन्तर्मण्डलभ्रान्तावथवा बहिरेकदा ।
यस्य साधारणमदश्चालयं कथितं तथा ॥

साधारणकृता—मूर्छनाः

क्रमयुक्ताः स्वराः सप्त मूर्छनास्त्वभिसंज्ञिताः ।
सत्पञ्चकस्वरास्तासां षाडवौडुविता स्मृताः ॥
साधारणकृताश्चैव काकलीसमलंकृताः ।
अन्तरस्वरसंयुक्ता मूर्छना ग्रामयोर्द्वयोः ॥

नाट्यशास्त्र

साधारणता

स्वरसंयोगतो जातिसंयोगात्तत्पुनर्मतम् ।
चतुर्धार्य तु निसग मध्यमाश्रयतो भवेत् ॥
श्रुतिद्वयस्य ग्रहणान्निसयोस्स्वरयोरिह ।
काकलीसाधारणं स्यात् षड्जसाधारणं पुनः ॥
निषादर्षभाभ्यां च षड्जाद्यन्त श्रुतिद्वयम् ।
परिगृहीते भवति तथान्तरविशेषितम् ॥
साधारणं तु गमयोः श्रुतियुग्मपरिग्रहात् ।
मध्यमाद्यन्तःसंश्रित्य श्रुतियुग्मं मपौ स्वरौ ॥
गृह्णीत तत्र विज्ञेय मध्यसाधारणं बुधैः ।
यदत्र मध्यमस्योक्तं बुधाः साधारणं स्फुटम् ॥
...... मध्यम एव स्यात् तदिति प्राज्ञसंमतम् ।
स्वस्थानाद्वयच्युतस्त्वीयं स्थानमप्राप्तवान् स्वरः ॥
साधारणं तु तद्भावो भावप्राधान्यतः स्मृतम् ।
अत्र साधारणं केचिद्वदन्ति स्वरकोविदाः ॥
षड्जगं मध्यमं चापि केशाग्रवदणुत्वतः ।
कैशिकं नाम तद्गाता कश्चिद्गायति वा न वा ॥
साधारणं तु षड्जस्य निरिभ्यामुपजीवनात् ।
साधारणं मध्यमस्य गपाभ्यामुपजीवनात् ॥
इतो तद्द्विविधं षड्जमध्यमाभ्यां विशेषणात् ।
ग्रामसाधारणं केचिदवादिषुरतद्विदः ॥
ग्रामे तु मध्यमे नूनं चतुःश्रुतिसमाश्रयात् ।
पंचमे षड्जतानास्ते षड्जग्रामिकलक्षणे ॥
चतुःश्रुतिकताग्रास्ते धैवते मध्यमाभिधाम् ।
षड्जे गते भवेल्लक्ष्म षड्जग्रामस्य यत्र तु ॥
एकप्रयोगे दृश्येते ग्रामे साधारणत्वतः ।
तुल्यक्षयतया तत्र ग्रामसाधारणं मतम् ॥
श्रिते विकारेऽनंशत्वमन्यत्वं वागनीश्वरौ ।
प्रयुज्येते यथा काकल्यन्तरत्वे तथोच्यते ॥

उच्चयिप्रथमं षड्जं काकली धैवतौ वदेत् ।
यद्वा षड्जं समुच्चार्य ततः काकलिनं वदेत् ॥
पुनः षड्जं प्रोच्चरेच्च प्रयोगः क्रममाश्रितः ।
धकाकल्योरन्यतमं प्रोच्चरेत्स्वरतत्त्ववित् ॥
उच्चार्य मध्यमं पूर्वं प्रयुंजीतान्तरर्षभौ ।
यद्वा मध्यममुच्चार्य प्रयुंजीतान्तरस्वरम् ॥
ततश्च मध्यमो ग्राह्यस्तत्पदान्यतमोऽपि च ।
अत्रेषदर्थे काशब्दः कलेरविकलः स्मृतः ॥
एतौ धर्मौ यत्र शब्दे विद्येते काकलीति सः ।
अत्र साधारणं षड्जं षड्जग्रामेऽनुसम्भवि ॥
साधारणं मध्यमस्य मध्यमग्राम एव हि ।
षड्जग्रामे काकली हि विद्यते नान्तरस्वरः ॥
स चेदत्रापतेत्तर्हि काकलीस्वरसंश्रयात् ।
अन्तरो मध्यमग्रामे नित्यमेवावतिष्ठते ॥
तत्रचेत्काकली कापि दृश्यते सांतराश्रयात् ।
अत औडुवकृत् षड्जग्रामे काकलशान् स्वरः ॥
प्रयुक्ते षाडवं नैव कालजिद्रूपसंमतात् ।
मध्यमे त्वौडुवाशंसी काकली नैव कर्हिचित् ॥
तनोति षट्स्वरं गीतमिति गीतविदो विदुः ।
एवं काकल्यन्तरौ द्वौ षड्जग्रामे यदा तदा ॥
षड्जसाधारणं प्रोक्तं भरतज्ञेन भूभुजा ।
तथैवान्तरकाकल्यौ द्वौ मध्यमगते यदि ॥
तदा मध्यमपूर्वं स्यात्साधारणमिह स्फुटम् ।
यत्कैश्चिदेते संप्रोक्ते कैशिके सूक्ष्मदृष्टिभिः ॥
साधारणेन यद्राजराजसम्मतिमर्हति ।
यतोऽभिनवगुप्तोक्तिरदृश्यज्ञः क्षमाधिपः ॥
अन्यथैतद्वचो गुम्फयुक्तिव्याकरणं व्यधात् ।
कैशिकी षड्जकैशिक्यां यैतस्तत्वज्ञसंमते ॥
एते कैशिकमाश्रित्य प्रवृत्तेऽत्र निशम्यताम् ।
अल्पप्रयोगता योक्तन्तरकाकलिनोरिह ॥
सान्यथाभूतयोरत्र बहुत्वस्योररीकृते ।
इति चेदुच्यते विद्वन् त एव तु तथाविधे ॥
तत्र वास्तु तयोर्नाम बहुत्व कांक्षितस्तु मे ।
नैवं लोपविधेरत्र निरर्थत्वप्रसंगतः ॥
उत्तरोत्तरदोषाणां प्रसंगादश्रुतामुखम् ।
क्षेत्रराजमतादेतत्स्वरसाधारणं स्फुटम् ॥

कालसेनेन विभुना विवृतं तत्त्वविन्मुदे ।
जातिसाधारणमधो यथोद्देशं प्रतन्यते ॥

एकांशोपचितास्वेकग्रामजेषु च जातिषु ।
यद्गानं समतामाप्तजातिसाधारणं तु तत् ॥

दन्तिलाद्याः पुनरिदं रागानेव प्रचक्षते ।
भिन्नग्रामभवास्वेतत्केषांचन मते मतम् ॥

एकांशतादिवसदो न तत् सर्वजनप्रियम् ।
यत्र श्रुतिसमुत्कर्षात्स्वरोऽन्यस्वरदेशगः ॥

विलुप्त इव तत्त्वज्ञैर्गीयते तत्र केचन ।
श्रुतिसाधारणं नाम वदंतत्रोच्यते द्विदम् ॥

धैवतर्षभयोश्चैवात्र गान्धारनिषादयोः ।
सांकर्ये संनिकर्षेण स्वरव्यक्तेरभावतः ॥

परिशेषेण निगयोः स्थितौ तत्र तयोः पुनः ।
श्रुतिद्वयोत्कर्षवशात्काकल्यन्तरता स्थिता ॥

उत्कृष्ये तु यदेकां तु श्रुतिं तत्कैशिकं भवेत् ।
एकश्रुतिसमुत्कर्षात् षड्जमध्यमपञ्चमाः ॥

पञ्चश्रुतिकतायोमात्र ते रक्तिप्रदा मताः ।
श्रुतिसाधारणं तस्माद्यदुक्तं षण्मुखादिभिः ॥

काकल्यन्तरयोश्चैव कैशिकाच्च न तत् पृथक् ।
षड्जमध्यमयोश्चैवमपि त्रिश्रुतियोगतः ॥

एतद्भिन्नं कुतो न स्यादिति चेदुच्यते त्वया ।
प्रज्ञोत्कर्षवशादेवं श्रुत्युत्कर्षविधानवित् ॥

भवान् केन निवार्येत गान्धर्वस्यापकर्षणात् ।
पण्डितंमन्यमानैश्च कैश्चिदत्रोपवर्णितम् ॥

तानसाधारणं तत्र युक्तिलेशो न विद्यते ।
षाडवौडुवयोर्हेतुभूता ये तानगाः स्वराः ॥

लोप्यतामावतस्तेषां विशेषानाश्रयादिह ।
अन्तर्भावाद्यभिमतो न पृथिक्तदतः स्मृतम् ॥

इति साधारणं नाम सविशेषं निरूपितम् ।
असाधारणकर्तैदमाश्रितानां महीभुजा ॥

केचिदन्ये वदन्त्यत्र द्विस्वरान्तरितौ स्वरौ ।
विवादिनोर्तन्मते स्यात्समयोस्तु विवादिता ॥

तथा हि पञ्चमेऽशत्वमासन्ने बहुधा तथा ।
तस्य सन्यासविन्यासयोग्यताऽपि न युज्यते ॥

समश्रुतिकता येन हेतुः संवाद ईरिता ।
षड्जग्रामेण संवादस्तन्मते गपयोर्भवेत् ॥

सा चैतयोः सुप्रसिद्धा दृश्यते तद्विदां वरैः ।
अत्र प्रतिसमाधानमीर्यते पृथिवीभुजा ॥

नाभेरूर्ध्वं चरन्वायुः स्पृशन्स्थानचतुष्टयम् ।
चतुःश्रुतीर्जनयति समदाषड्जपंचमौ ॥

ननु यस्यां स्वरो वृत्तिः श्रुतौ संताडिते तया ।
स्वरेऽन्यश्रुतिसंघाता स्वरोत्पत्तिः प्रदृश्यते ॥

रक्तिहानिकरत्वेन न स्थानं स्पृशते क्वचित् ।
किं वा वायुशरीरान्तः श्रुतिस्थानानि संस्पृशन् ॥

क्रमेण हि प्रतिस्थानं स्वरानुत्पादयन् स्वतः ।
अन्त्यस्वरस्य संस्थाने स्वस्वाप्तः श्रुतिसंज्ञकः ॥

स चाल्पश्रुतिसंभूतः स्वरोऽल्पः स्यात्तथा बहु ।
बहुश्रुतिसमारब्धो नैवं हि घटनामियात् ॥

यतः स्वरस्य बहुताऽल्पता वा क्वापि दृश्यते ।
स्वकारणश्रुतीयत्ताहेतुका न हि कोविदैः ॥

किन्तु प्रयत्नातिशयजनिता सा प्रतीयते ।
तथाहि शिखिनाजातः षड्जकुंजरसम्भवम् ॥

निषादं द्विश्रुतिमपि नास्तीतिस्वमहत्तधा ।
तर्ह्यस्तु श्रुतिबाहुल्यं स्वराणां रक्तिकारणम् ॥

नासमश्रुतिकत्वेऽत्र कल्प्यमानेऽस्ति कारणम् ।
तद्वयादिकसंसिद्धौ प्रागेव भणितं मया ॥

अन्तरालश्रुतिस्थानाद्यथा वायुः स्पृशन्नपि ।
तेषु स्वतानजनमतस्वरं जनयतीति चेत् ॥

नैतत्कारणता वाऽस्य तत्स्पर्शः कथ्यते कथम् ।
अत्र वायोरन्तरालश्रुतिस्थाने वहन्नपि ॥

स्पृशन्विना भिद्यते नाद्यश्रुतौ जनयेत्स्वरम् ।
अन्तरालश्रुतिस्पर्शाज्जायते यो ध्वनिः कियान् ॥

सोऽतिसूक्ष्मत्वतायोगि गम्यः प्रागेवकीर्तितः ।
एवं यस्मिन् स्वरे यावत् श्रुतिस्थानं प्रकीर्तितम् ॥

तावत् श्रुतिक एवायं स्वरस्संपद्यते ध्रुवम् ।
चतुश्श्रुतिस्त्रिश्रुतिश्च द्विश्रुतिश्च क्रमात् स्वराः ॥

षड्जश्च ऋषभश्चैव गान्धारश्चेति ते त्रयः ।
अत्र वेदश्रुतेः सम्यक् वादिनो द्विश्रुतिर्भवेत् ॥

विवादिगस्त्रिश्रुतिरनुवादी तु मध्यगः ।
एकश्रुत्यैव च कथं षड्जगान्धारकौ स्वरौ ॥

विलक्षणौ वादिनश्च स्वरस्यर्षभसंज्ञिनः ।
विवादी द्विश्रुतिश्चैकोऽनुवाद्यन्यश्चतुश्श्रुतिः ॥

कथं च वादिनो गम्यः सरी अप्यनुवादिनौ ।
सङ्गमेतद्यतत्यलोके हीने नैवं गुणाधिका ॥

विवदेत्तं च विवदत्यन्यस्योत्कर्षहेतवे ।
जनश्रुतिकतायां तु सत्यां षड्जस्य रिस्वरः ॥

उभयोर्मध्यवर्तित्वादनुवाद्येव संमतः ।
लोकेऽपि मध्यवर्ती स्यादुभयोरनुवादवान् ॥

कालसेन महीन्द्रेण लोकवृत्तानुसारतः ।
वाद्यादिसंज्ञा लोकानुसारिण्यः संप्रवर्तिताः ॥

एवमुक्ततयाख्याता सरिगा यत्र ते स्वराः ।
स धनित्वेन तेषां हि मध्यमेऽवधिमाश्रितः ॥

यद्भाणि स्वरस्थानश्रुतेरन्तरगोचराः ।
अस्पृशन्नेव जनयेत्स्वरवायुः श्रुतेरिह ॥

तदचारु यतो दारुवीणायां सारणाविधौ ।
प्रवृत्तातुलहुंकारप्रयोगेऽध्यक्षगोचरः ॥

अन्तरालश्रुतिस्थानस्पर्शः संजायते स्फुटः ।
स तु प्रथममञ्जर्याः श्रीरागच्छाययाऽपि च ॥

कामोदाभीरिकयोश्च छायया दृश्यते बुधैः ।
अत्रोदाह्रियते श्रीमन् मातृगुप्तवचो यथा ॥

गीयमाने स्वरः श्रोतुः स्वसंवेद्योऽणुशः क्रमः ।
श्रूयमाणः पुनर्नाद एक एवान्यरञ्जकः ॥

संप्रदायविधानातः परं श्रुत्यपकर्षगम् ।
अलङ्कारकृताभ्यासैः शरीरेऽपि श्रुतिक्रमः ॥

कम्पितान्दोलनकृतौ स्वराणां दृश्यते स्फुटः ।
षड्जमध्यमयोः कार्यं कार्यरक्तिविशेषकृत् ॥

काकलित्वादिना येन यस्यया गृह्यते श्रुतिः ।
सा तु तस्यैव तानस्य यतस्तत्क्षेत्रगोचरः ।
तस्मादन्तरकाकल्यौ समयोर्न पृथङ्मते ॥

कुम्भः

साधारणविधिः

साधारणं नामान्तरस्वरता । कस्मात् । द्वयोरन्तरे योऽर्थो भवति स साधोरणः ।

नाट्यशास्त्रे

साधारणस्वरूपः

शिशिरस्य वसन्तस्य मध्यस्थस्समयो यथा ।
साधारणस्तयोरेव गीते साधारणस्वरः ॥

तद्वद्द्वेधा भवेत्तावत् स्वरसाधारणं परम् ।
जातिसाधारणमिति तयोराद्यं चतुर्विधम् ॥

काकल्यन्तरषड्जश्च मध्यमेन विशेषणात् ।
यदा श्रुतिसमुत्कर्षात् स्वनो लुप्तश्च न स्फुटः ॥

गीतज्ञैः गीयते गेयं स्वरसाधारणं तदा ।
अत्युत्कर्षस्तु सपयो न भवेद्द्वियोरपि ॥

वैस्वर्याद्यवधानाच्च श्रुतीनां तेन जायते ।
गन्योस्ताभ्यां तु सांकर्ये स्वरव्यक्तिर्न लभ्यते ॥

पारिशेष्यादतो गन्योः श्रुत्युत्कर्षस्फुटो भवेत् ।
गान्धारो वा निषादो वा विकृतो यत्र गीयते ॥

तत्र श्रुतिसमुत्कर्षाद्ज्ञातव्योऽसौ मनीषिणा ।
काकलीसंयुतो यश्च यश्च स्यादन्तरान्वित. ॥

सगन्योरप्रयोगोऽपि प्रोक्तो वेसरषाडवः ।
मतङ्गीनां स्वरत्वेऽपि प्रयोगोऽस्त्यनयोस्ततः ॥

निषादः काकली रूपो गान्धारश्चान्तरात्मकः ।
न स्वरो गण्यते तज्ज्ञैरनंशत्वाल्पतावशात् ॥

षड्जस्याद्ये श्रुतीक्रामन् निषादः काकली भवेत् ।
निषादषड्जयोरेव यतस्साधारणः स्मृतः ॥

अस्यास्साधारणत्वं स्याद्धर्मस्साधारणं हि तत् ।
मध्यमाद्ये श्रुतीक्रामन् गान्धारस्त्वन्तरो भवेत् ॥

साधारणोऽयं गमयोरस्य धर्मस्य यो भवेत् ।
साधारणं तु तद्ज्ञेयमत्र साधारणं बुधैः ।
पूर्वं षड्जं समुच्चार्य काकलीद्वैतौ ततः ॥

सानुलोमविलोमा

त्रिकोणचारी या चारी त्वनुलोमविलोमगा ।
स्वस्थाने स्थापितपदा ततस्तत्रापि कुट्टिता ।
सानुलोमविलोमाख्या चारीयं परिकीर्तिता ॥

कुम्भः

सामान्याभिनयः

अथ ब्रवीमि सामान्यविचित्राभिनयौ क्रमात् ।
यश्च वागङ्गसत्वैस्तु सामान्येनोपकारिभिः ॥

निष्पाद्योऽभिनय. सोऽयं सामान्याभिनयः स्मृतः ।
स भवेत्त्रिविधस्तत्र सत्त्वभूयिष्ठ उत्तमः ।
समसत्त्वो मध्यमः स्यात्सत्त्वहीनोऽधमः स्मृतः ॥

वेमभूपालः

साम्बकः

घनध्वनिरिवागयन्नूर्ध्ववक्त्रोक्षरैः स्खलन् ।
हीनस्वरेण संयुक्तः स साम्बक इति स्मृतः ॥

भरतकल्पलता

सारङ्गी—वीणा

गम्भीरा पानसी वाऽपि सारदारुभवापि वा ।
त्रिवितस्तिमिता दैर्घ्ये शिरः पञ्चदशाङ्गुलम् ॥

तत्तु सर्पफणाकारं तन्मध्ये शिखरो भवेत् ।
गलभागे क्रमान्न्यूनं तस्मादुद्वन्तकर्णिका ॥

अस्मा अधः स्थितो दण्डो दैर्घ्ये सप्तदशाङ्गुलः ।
स्थूलमूलः कृशाग्रश्च क्रमेण वलितो भवेत् ॥

दण्डस्य शिरसश्चैव गर्भं शून्यं च कारयेत् ।
दण्डस्य पृष्ठदेशे तु शिरसः क्रोडतस्तथा ॥

सारीगृहं भवेदस्याः सारङ्ग्याश्चतुरश्रकम् ।
दैर्घ्ये षडङ्गुलं प्रोक्तं प्राशस्त्ये चतुरङ्गुलम् ॥

शून्यो गर्भश्च तस्याथ गाम्भीर्ये चतुरङ्गुलः ।
तिस्रस्तस्यैव मोटिन्यो विन्यस्यास्तद्बिलत्रये ॥

अग्रं तत्र सुचूडं स्यात् यथा देवकुले तथा ।
अस्याः शिरः पिधातव्यं कच्छप्या इव चर्मणा ॥

स्थाप्या मकरिका तत्र रेखाङ्गुष्ठविनिर्मिता ।
दशाग्रे कलिका देया साचिरेका स्थिता भवेत् ॥

तिस्रः तन्त्र्यः पट्टसूत्रभवाः स्थाप्या अनुक्रमात् ।
निर्माय्येवं धनुर्वंशपृष्ठस्य त्रिंशदङ्गुलम् ॥

अश्वपुच्छसमाकृष्टः वालैरस्य गुणो मतः ।
तं घृष्ट्वा सालनिर्यासैः तेन तंत्रीस्तु वादयेत् ।
एषा सारङ्गिका वाद्या तद्ज्ञानामुपदेशतः ॥

सङ्गीतनारायणे

सालगसूडभेदाः

केचित्सालगसूडस्य भेदमन्यं प्रचक्षते ।
ध्रुवो मण्ठो रूपकं चाट्टतालो यतिरेव च ॥

प्रतितालस्तथाचैकतालीत्येवं स सप्तभिः ।
तत्र कल्प्यस्तथा तालो ग्रहन्यासाभिधानकौ ॥

यो पदादौ पदान्ते वा ह्यतीतः स्पर्शरञ्जितः ।
स कल्पो भण्यते विद्भिः पदाद्यन्तस्य च ग्रहः ॥

य उद्ग्राहादिधातूनां समाप्तिं ज्ञापयेदथ ।
तालताडनभेदोऽसौ ताल इत्यभिधीयते ॥

गीतादौ तु भवेत्कल्यं तालः कल्यसमापने ।
मध्ये कलासो विज्ञेयः कैश्चिदेष विधिः स्मृतः ॥

कुम्भः

सिंहनादः—तालः

यगणो लगुस्सिंहनादताले प्रकीर्तितौ ।
।ऽ।ऽ

कुम्भः

सिंहविक्रीडितम्

आलाताङ्घ्रिपुटः कुर्यादूर्णनाभमपि द्रुतम् ।
यथाऽङ्गान्तरमप्येवं सिंहविक्रीडितं तदा ॥
विषयोऽस्य विनिर्दिष्टो रौद्रप्रायः परिश्रमः ।
कुञ्चितं तत्परानन्दनिर्भराभिनये भवेत् ॥

नृत्तरत्नावली

सिंहविक्रीडितताललक्षणम्

सिंहविक्रीडिते द्विस्थुर्लपगालपगालगौ ।
।ऽऽ।ऽऽ।ऽऽ।ऽऽ।ऽ

सोमराजदेवः

सिंहास्यः

कनिष्ठाङ्गुष्ठकौ लग्नावधोमुखमुपागतौ ।
तर्जनीमध्यमानामा तिस्रोऽङ्गल्योतिसंहताः ॥
यत्रादौ सिंहवदनाकारः सिंहस्य उच्यते ।
एष सिंहास्याभिनये मेलने द्रवचूर्णयोः ॥

विप्रदासः

—हस्तः

अधो मुखाङ्गुष्ठकोष्ठौ लग्नाग्रा चेत्कनिष्ठिका ।
मध्यस्तिस्रोऽधसंयुक्ताः स सिंहस्यादुदीर्यते ।
सिंहास्याभिनये त्वेष मेलने द्रवचूर्णयोः ॥

सङ्गीतनारायणे

सीत्कारः— गायकः

गाने मुहुर्मुहुश्चैव सत्कृतिं च करोति यः ।

भरतकल्पलता

सुकराभासः, दुष्कराभासश्च

यो दुष्करोऽपि सुकरवदाभाति च ध्वनिः सदा ।
विज्ञेयः सुकराभासः सुकरो दुष्करो यथा ।
भासते दुष्कराभासः विज्ञेयः स्थायवेदिभिः ॥

कुम्भः

सुकुमारम्

प्रयोगेष्वपि सम्पूर्णं सुकुमारमथोच्यते ।
लावण्यं गुणसंपूर्णं लघुप्रायाक्षराञ्चितम् ॥

कुम्भः

सुगीतलक्षणम्

स्वरेण पदसंयुक्तछन्दसा वर्गसंयुतम् ।
सुमानं च सुतालं च सुगीतं तेन भण्यते ॥

गान्धर्ववेदे

सुघटः

स्वरो वर्णश्च तालश्च स्पष्टं घटयति त्रयम् ।
सुन्दरध्वनिसंयुक्तः सुघटं तं प्रचक्षते ॥

कुम्भः

सुघोषः

महान् यः स्निग्धमधुरो वहन्यापि च ते वहौ ।
एष ध्वनिः सुघोषा स्यान्मन्द्रे ते घोषजा मताः ॥

कुम्भः

सुतीक्ष्णः

सुतीक्ष्ण इव यस्तारे स्वरः पूर्णश्रुतिर्भवेत् ।
सुतीक्ष्णः प्रोच्यते स्वायः स्वरमर्मविशारदैः ॥

कुम्भः

सुदेशिकः

यत्रौज्वल्यं भवेद्रागे कथ्यते स सुदेशिकः ।
यो वल्लभो विदग्धानां .... ॥

कुम्भः

सुन्दरः—मण्ठकः

गुरुद्वन्द्वं लघुद्वन्द्वं ताले त्रिपुटसंज्ञके ।
सुन्दरो गीयते तेन वीरे वाऽप्यद्भुते रसे ॥
त्रिपुटतालः ऽ ऽ ।।

गान्धर्ववेदे

सुप्तम्—व्यभिचारिभावः

सर्वेन्द्रियसंमोहजनित निद्राधिकरण किञ्चित्पदार्थविलोकनज्ञानं सुप्तम् ।

शुभङ्करः

सुरत्नगुणलक्षणम्

सुरत्ने वल्लकीवंशकण्ठध्वन्येकतां गतम् ।

भरतकल्पलता

सुला

मन्दानिलवलद्दीपशिखेवाङ्गस्य चालनम् ।
सुलाशब्देन तद्ज्ञेयं

सङ्गीतमुक्तावली देवेन्द्रकृता

सुषिरभेदाः

वंशो धपारिमधुरीतित्तिरीशङ्खकाहलाः ।
डोडही मुरली बुक्काश्चङ्किकास्वरनादयः ॥
शृङ्गला पिकवंशश्च चर्मवंशस्तथाऽपरः ।
एते सुषिरभेदाः स्युः कथिता पूर्वसूरिभिः ॥

सङ्गीतनारायणे

सुषिरवाद्यभेदाः

तत्र वंशश्च पाठी च धपाश्चमुहरी तथा ।
शङ्खशृङ्गं काहला च प्रोक्ता बुक्का च तित्तिरी ॥

सोमराजदेवः

सूकरः

.... सूकरः कोमलो ध्वनिः ।

कुम्भः

सूचाङ्कुरः

ससूचा स्यात्पिण्डिका बन्धादङ्कुरः शृङ्खलादिभिः ।
उभयं स्मृतमारोहोऽवरोहोऽङ्कुर ईरितः ॥

कुम्भः

सूचाभिनयः

भविष्यदर्थानुगमाद्वाक्यार्थो वाक्यमेव वा ।
यस्त्वाङ्गैः सूच्यते पूर्वं वचनाभिनयस्ततः ।
सूचाभिनयनो नाट्ये वेदिभिः प्रतिपादितः ॥

वेमभूपालः

सूचिका

न साक्षान्मरणं तस्य सूचिकां दर्शयेद्दशाम् ।
तदनन्तरसम्भूतां दर्शयेत्सुग्विनीं दशाम् ॥

मोक्षदेवः

सूची

यस्यां विन्यस्य चरणं क्षितौ पार्श्वेन तं पुनः ।
प्रसारयेत्तु तीक्ष्णाग्रं सा सूची गदिता बुधैः ॥

कुम्भः

सूच्यन्तम्

सूचीनां त्रितयं प्रोक्तं तद्द्विधा परिकीर्तितुम् ।
भौमाकाशविभेदेन स माद्यत्परमं यदि ॥
कारणानि दधात्वन्ते सूचीं प्राक्कथितानि तु ।
सूच्यन्तानि तथा तानि जायन्ते इति सूरयः ॥

कुम्भः

सूच्यास्थलक्षणम्

मध्यमासङ्गताङ्गुष्ठौ चतुरस्रप्रदेशगौ ।
सर्पशीर्षौ क्रमात्तिर्यक् प्रसरन्तौ प्रदेशिनीम् ॥
बहिः प्रसारितं धत्तो यदि सूचीमुखौ तदा ।
पताकौ प्रथमं कार्यौ व्यावृत्तपरिवर्तितौ ॥
भ्रान्त्वा प्रसारणं चात्र विशेषं केचिदूचिरे ।
मध्यप्रसारिताङ्गुष्ठौ सर्पशीर्षाकृता करौ ।
रचितस्वस्तिकौ केचिदूचुः सूच्यास्थलक्षणम् ॥

हम्मीरः

सूडः

सूडशब्दोऽत्र देशी मा गीतालयर्थः प्रकीर्तितः ।
छायालगेतिशब्दापभ्रंशः सालग इत्ययम् ।
एष सालगसूडाख्यः सप्तधा कथितो बुधैः ॥
तथा चोक्तं भारतीये तत्रैव—
शुद्धश्छायालगश्चेति द्विविधः सूड उच्यते ।
एलादिः शुद्ध इत्युक्तो ध्रुवादिः सालगो मतः ॥ इति
तत्रोक्तः शुद्धसूडः प्राक् सालगस्त्वधुनोच्यते ।
आद्यो ध्रुवस्ततो मठ्ठः प्रतिमठ्ठो निसारुकः ।
अड्डुतालस्ततो रास एकतालीत्यसौ मतः ॥ इति

तुलजः

सूडप्रबन्धलक्षणम्

एलाकरणढेङ्कीभिर्वर्तिन्यां झोम्बडेन च ।
लम्भरासैकातालीभिरष्टाभिः सूड उच्यते ॥

हम्मीरः

सूडालिक्रमे विप्रकीर्णाः

सूडक्रमस्य मध्ये चेदसावालिक्रमो भवेत् ।
सूडालिक्रमसंबन्धाद् द्वात्रिंशदिति कीर्तिताः ॥
ततोऽन्यान्विप्रकीर्णास्तान् प्रसिद्धान् कतिचिद्ब्रुवे ।
श्रीरङ्गः श्रीविलासः स्यात्पञ्चभङ्गिरतः परम् ।
पञ्चाननो मातलिको त्रिपदी च चतुष्पदी ॥

हम्मीरः

सूत्रधारः

सोपोहनास्तद्विना वा ध्रुवा सधपनीमुखाः ।
सूत्रधारप्रवेशार्थमुक्तोऽस्मिन् पूर्वमेव हि ॥

कुम्भः

सूत्रधारः स्मृतो नाट्ये सूत्रं धारयतीत्यतः ।
विद्वान्वाग्मी कविर्दक्षस्तौर्यत्रयविचक्षणः ॥
नाट्यप्रयोगकुशलो रसभावविवेचकः ।
नानादेशसमुद्भूतवेषभूषाविशारदः ॥
कामशास्त्ररहस्यज्ञो नानाशिल्पविचक्षणः ।
ऊहापोहान्वितः शक्तो धारणे चोपदेशने ।
उत्तमप्रकृतिर्नाट्याचार्यः स सूत्रधारकः ॥

वेमभूपालः

सूत्रधारपठिता आर्या

सूत्रधारः पठेदार्यामथ शृङ्गारमङ्गलाम्—
रतिकेलिभग्नवलयस्फुटमुण्डितगण्डमाननं मुकुरे ।
सनखक्षरितधिया स्थगयन्ती जयति वल्लभा शम्भोः ॥

विप्रदासः

सूत्रधारविभागः

चतुरश्रत्र्यश्रभेदाद्विविधः स पुनर्द्विधा ।
शुद्धचित्रविभेदेन पृथगेवं चतुर्विधः ॥
करणाङ्गहारराहित्यं शुद्धता चित्रता पुनः ।
तत्सद्भावोऽथ चित्राद्यैर्मार्गैर्भिन्नध्रुवायुतः ॥
चतुरश्रस्तथा त्र्यश्रः षड्विधः कैश्चिदिष्यते ।
केषांचन मते मिश्रो द्वयं संमिश्रणान्मिथः ॥

कुम्भः

सूत्रधारस्य गतिप्रचाराः

सूत्रधारः सललितैः पार्श्वाक्रान्तक्रमोद्यतैः ।
तालवाद्यलयोपेतैः पादैः प्रकृतिकोमलैः ॥
रङ्गकोणं समुद्दिश्य सम्यक् पञ्चपदीं व्रजेत् ।
गमने पञ्चपाद्यास्तु वेपमानाङ्घ्रिणा भवेत् ॥
विक्षेपो दक्षिणे च स्यादेवं सर्वासु दिक्ष्वपि ।
परिवृत्तिरतश्चैव कोणेष्वन्येष्वपि क्रमात् ॥
पृथक् पृथक् पञ्चपदीं विदधानो नटापणीः ।
सह मध्यपदे नाट्यपदानामेकविंशतिम् ॥

गतागतैर्भवेदेवं विकृष्टे रङ्गमण्डपे।
त्र्यश्ररङ्गे सूत्रधारस्त्र्यश्रां पञ्चपदीं व्रजेत्।
चतुरश्राभिधे रङ्गे चतुरश्रं गतिं भजेत् ॥

वेमभूपालः

सूनुशब्दः

हस्तोपरि न्यसेद् दृष्टिं यत्र दृष्टिस्ततो मनः।
मनसि स्थापयेद्भावं यत्र भावो रसस्ततः।
गीतमालम्बयेदङ्गैरर्थं हस्तेन दर्शयेत् ॥
नानाभावं तु नेत्राभ्यामङ्घ्रिभ्यां तालदर्शनम्।
मन्दमन्दचलद्दीपशिखारेखाङ्गचालनम्।
नृत्ये तत्त्वविचारज्ञैः सूनुशब्द इति स्मृतः ॥

कुम्भः

सूरिः

लक्ष्यप्रवीणे स हि शास्त्रवेत्ता शास्त्रप्रवीणे स हि दक्षलक्ष्यः।
यो वेत्ति लक्ष्यं सकलं च शास्त्रं वाग्गेयकारश्च स एव सूरिः ॥

कुम्भः

सूलाद्यम्

ध्रुवादिसप्ततालश्च स्वरभाषापदान्यपि।
स्वररागैः प्रगायन्ते सूलाद्यमिति कथ्यते ॥

भरतकल्पलता

सैन्धवलक्षणम्—लास्यः

पात्रं वञ्चितसंकेतं पाठ्यं नाट्येन चोज्झितम्।
भाषा च सैन्धवी यत्र तज्ज्ञास्तत्सैन्धवं विदुः ॥

नृत्तरत्नावली

सैन्धविकम्

नर्कुटं खड्गकं चैव त्रिविधं संप्रयोजयेत्।
सैन्धवीमाश्रितां भाषां ज्ञेयं सैन्धविकं बुधैः ॥
रूपत्र्याद्यादिसंयुक्तं युग्मतालकृतं तथा।
वितस्तालिप्तमार्गेण सैन्धवं वाद्यमिष्यते।
सपाठ्यं स्वल्पमप्यत्र प्रकुर्वीत विचक्षणः ॥

नाट्यशास्त्रे

सैन्धवीलक्षणम्

सैन्धवी भूरिगान्धारा षड्जधैवतकम्पिता।
सन्न्यासांशेत्युपाङ्गानि वराट्याः कथितानि षट् ॥

मोक्षदेवः

सोपोहनाः उत्थापिन्यादयः ध्रुवाः

उत्थापिन्या ध्रुवाया स्यात्कलाष्टकमुपोहनम्।
षट्कलं परिवर्त्ताया ध्रुवायाः स्यादुपोहनम् ॥
कलाभिरपकृष्टायाश्चतुर्भिः स्यादुपोहनं।
अर्चिताया ध्रुवायाः स्याद्द्विकलं स्यादुपोहनम्।
उपोहनं स्यात्त्रिकलं विक्षिप्ताया उपोहनम् ॥

विप्रदासः

सोमवल्लभलक्षणम्

स्वराः सप्ताङ्गपाटाश्च मालिनीच्छन्दसा पदम्।
सोमवल्लभतालश्च त्रितालस्तोभका अपि ॥
गातृनेतृप्रबन्धानामाभोगे नाम सूत्रिणी।
सोमवल्लभसंज्ञे स्यात्प्रबन्धे बन्धहारिणी ॥

सोमराजदेवः

सोमराजदेवः

आसीद्गम्भीरलक्ष्मीहठतरुणदृढप्रौढवल्गत्कृपाणः
सङ्ग्रामोद्दापचापोत्कटकुलनलिनीषण्डचण्डांशुरूपी।
द्वास्थः श्रीभीमभर्त्तुर्नृपमुकुटमणेः श्रीजगद्देवनामा
तस्य श्रीसोमराजः समजनि तनयः काश्यपीकल्पवृक्षः ॥

सोमराजदेवः

सोमेश्वरमतम्

श्रीरागो रागिणीयुक्तः शिशिरे गीयते बुधैः।
वसन्तः स्वसहायैस्तु वसन्तार्थे प्रगीयते।
भैरवस्स्वसहायैस्तु ऋतौ ग्रीष्मे प्रगीयते ॥
पञ्चमस्तु तथा गेयो रागिण्या सह शारदे।
मेघरागो रागिणीभिर्युक्तो वर्षासु गीयते ॥
नट्टनारायणो रागो रागिण्या सह हेमके।
यथेच्छयाऽवगातव्यः सर्वर्तुषु सुखप्रदः ॥

सङ्गीतदर्पणः

संयुतहस्तेषु योगप्रदस्य लक्षणम्

पताकावग्रसंयुक्तौ हस्तौ योगप्रदो भवेत्।
अन्योन्यप्रीतिकरणे मेलनेऽपि विधीयते ॥

विप्रदासः

स्कन्धभ्रान्तम्

पृथ्व्यां स्थित्वांसयुग्मेन कृत्वा चैवोत्कटासनम्।
करणञ्चाञ्चितं कृत्वा धृत्वाऽङ्गान्तरमञ्जरे ॥

बाहुभ्यां भुवमाक्रम्य भ्रामं भ्रामं च पूर्ववत् ।
तिष्ठेत्प्रतिदिशं यत्र तत्स्कन्धभ्रान्तमुच्यते ॥

कुम्भः

स्कन्धवाद्यम्

ईदृशः पटहो यस्तु करलाप्रमुखद्वयम् ।
नाटके घटिते तत्रोर्ध्वमुखस्तु वाद्यते ॥
चतुर्विंशाङ्गुलायामास्त्वष्टाविंशति वेदनाः ।
पिण्डेऽङ्गुलमिता सा स्यादष्टाङ्गुलमितान्तरा ॥
एकादशाङ्गुले कार्ये वलीमण्डलिके शुभे ।
वल्लीपिहिते कार्ये षड्रन्ध्रे सूत्रगुम्फिते ॥
अर्गळानि पुरस्त्रीणि द्विपार्श्वकलशानि च ।
पश्चाद् द्वेधा विधातव्ये तद्वत्कलशसंयुते ॥
मध्ये सूत्रान्तराले च भवेदुदरपट्टिका ।
तदन्तवद्विकाले तु वामहस्तं विनिक्षिपेत् ॥
रज्वासम विनिपत्य द्वयेप्युत्कस्तकौ तयोः ।
तद्योजनाय द्विगुणा कर्तव्या स्कन्धपट्टिका ॥
अङ्गुलस्य चतुर्भागं छिद्रमेकं प्रकल्पयेत् ।
कृतं भूलोकमल्लेन स्कन्धवाद्यस्य लक्षणम् ॥

सोमेश्वरः

स्खलितः

यो निर्गच्छति दुःखेन स्खलितः सोऽभिधीयते ।
अव्यवस्थासु सव्याधेः प्रसूतिसमयेऽपि च ॥

कुम्भः

स्तब्धः

बद्धः स्तब्धस्तु विज्ञेयः ... ... ।

कुम्भः

स्तम्भक्रीडनका

स्तम्भक्रीडनका तदा ।
तिर्यक् प्रसृतपादस्य यदा पार्श्वं स्पृशेन्मुहुः ।
तालेन चान्यपादस्य ।

कुम्भः

स्तम्भस्थापनम्

प्रागादिदिक्पतिभ्योऽन्नं कल्पयेत्प्रयतात्मवान् ।
मुहूर्तेनानुकूलेन मूलेन श्रवणेन वा ॥
रोहिण्यां वोपोषितस्सन्नुपाध्यायस्समाहितः ।
स्तम्भानां स्थापनं कुर्याल्लग्ने सुमहवीक्षिते ॥

कुम्भः

स्तम्भस्थापनमन्त्रः

परचक्रभयं तस्मात्तत्र यत्नो विधीयते ।
स्तम्भस्थापनमन्त्रोऽयं प्रणवादिनमोऽन्तकः ॥
यथाऽचलो गिरिर्मेरुर्हिमवांश्च महाचलः ।
जयावहो नरेन्द्रश्च तथा त्वमचलो भव ॥

कुम्भः

स्तम्भपूजनम्

स्तम्भान् संपूजयेत्पश्चाद्वस्त्रमाल्यानुलेपनैः ।
सितै रक्तैस्तथा श्वेतैर्नीलैश्चैव यथाक्रमात् ॥
पायसं गुडोदनं च कृतान्नं कृशरां तथा ।
द्विजेभ्यो पूजनं दद्यात्स्तम्भानुक्रमतः सुधीः ॥

कुम्भः

स्तम्भाः

सुशिल्पिघटिता स्थाप्याः कुम्भिन्यः पूर्वमेव तु ।
अन्तर्बहिर्मानसूत्रार्धेन स्यु स्थिरं स्थिताः ॥
अग्निकोणं पुरस्कृत्य स्तम्भाः स्युर्ब्राह्मणादयः ।
स्वर्णताम्ररूप्यलोहस्तम्मूलेऽनुक्रमात् क्षिपेत् ॥

कुम्भः

स्तुतिः

श्रीफलोपमकुचाधरलीलाभृत्कपोलजघनोरुविभ्रमम् ।
प्रीतिपूर्वसुरतं प्रतितोत्साहमत्रगदितं मया ॥

कुम्भः

स्त्रीणां स्थानानि

वामस्तालान्तरत्र्यस्रो दक्षिणश्चरणः समः ।
प्रसन्नं वदनं वक्षः समुन्नतमनुन्नता ॥
कटिर्नितम्बगो हस्तो दक्षिणोऽन्यो लताकरः ।
यत्रायतं तदाख्यातं कमला चात्र देवता
अवहित्थं तदेव स्यात् विपर्यासेन पादयोः ॥

हम्मीरः

स्त्रीणां भूषणानि

अथ स्त्रीणां भूषणं तु कथ्यते नात्र संशयः ।
चूडामणिः शिखापाशसुवर्णस्थासकास्तथा ॥
गवाक्षाकाररचना चारुमौक्तिकजालकम् ।
ततश्चैव भ्रमरकं तथा मौक्तिककुड्मकम् ॥
शिरोभूषणमित्यादि धार्यं देशानुसारतः ।
कीलितं विविधै रत्नैर्ललाटतिलकं तथा ॥

कर्णिका कर्णपत्रं च कर्णवेष्टनमेव च।
कर्णमुद्रा तथा कर्णकीलकप्रभृतीनि च ॥

कर्णयोर्भूषणानि स्युः कपोले पत्रवल्लरी।
नासिकाभरणं चैव तथा पादाङ्गुलीयकम् ॥

... ... नेत्रयोरञ्जनं तथा।
मनोहरेण ताम्बूलरागेणाधररञ्जनम् ॥

मुक्तावली रत्नमाला ग्रीवायां पदकादि च।
कण्ठस्य भूषणं बाह्वाः पुनर्भूषणमङ्गदम् ॥

कटकानि च चित्राणि तथा रत्नाङ्गुलीयकम्।
काञ्ची कलापा विविधाः किङ्किणीजालमञ्जुलाः ॥
नूपुरौ हंसकश्चैव तथा पादाङ्गुलीयकम्।
अलक्तकादिना पादनखरञ्जनमित्यपि ॥
भूषणान्येवमादीनि स्त्रीणां नाट्ये यथोचितम्।
तत्तद्देशानुसारेण कल्पयेन्नाट्यकोविदः ॥

वेमभूपालः

स्त्रीनृत्यम्

स्त्रीनृत्यं लास्यमुच्यते।

सङ्गीतनारायणे

स्त्रीरागाः

एतेषां कामिनीर्वक्ष्ये सङ्गीतक्रमयोजिताः।
वेलावुली मलहरी भौलिर्भूपालयोषितः ॥
देवक्रिया मेघरञ्जी करञ्जी भैरवस्त्रियः।
हिन्दोली माहुरी चैव बाला श्रीरागवल्लभाः ॥
शङ्कराभरणं चैव देशी च ललिता मता।
योषितः पञ्चरस्यैव कीर्तिता गीतवेदिभिः ॥
रामक्रिया वराली वा कौळिका मधुयोषितः।
गुण्डक्रिया गुर्जरी च गौळमाळवयोषितः ॥
धन्यासिका च काम्भोजी तथा कर्णाटगौळिका।
बङ्गालस्य स्त्रियः ख्याताः सङ्गीतक्रमवेदिभिः ॥
नारायणाख्यो गौळाख्यो देशाक्षी चाहरी मता।
नाटकं नटभाख्याता रागमर्मविशारदैः ॥

शृङ्गारशेखरः

स्थानकलक्षणम्

पादौ पक्षस्थितौ पादौ स्थानकं मण्डलाह्वये।
अस्यैव दक्षिणे पादे पञ्चतालप्रसारिते ॥

स्यादालीढमल्पप्रत्यालीढमङ्घ्रिविपर्ययात्।
एकतालान्तरस्त्र्यस्रो वामोऽङ्घ्रिर्दक्षिणः समः ॥

नितम्बस्थौ लतासंज्ञौ हस्तौ स्यात्कटिरुन्नता।
समं समुन्नतं वक्षः प्रसन्नमुखमायतम् ॥

आयतास्यैव हस्ताङ्घ्रिविपर्यासेऽवहित्थकम्।

एको यत्र समोऽङ्घ्रिः स्यादन्यस्त्वर्गलसंस्थितः।

सूच्या विद्धे न विद्धे वा तदश्वक्रान्तमुच्यते ॥

सोमराजदेवः

स्थानभ्रष्टः

तारकामन्द्रमध्येषु अशक्तो यस्तु गायति।

भरतकल्पलता

स्थानमाधुर्यम्

त्रिषु स्थानेषु कठिनं करालं तद्विदुर्बुधाः।
माधुर्यं मन्द्रमध्ये च शारीरं मधुरं स्मृतम् ॥

रागप्रकाशकं तारे सौबलं परिकीर्तितम्।
बहुभङ्गी तदेव स्यादेतत्त्रितयमिश्रितम् ॥

कुम्भः

स्थानानि

वैष्णवं समपादं च वैशाखं मण्डलं तथा।
प्रत्यालीढमथालीढं स्थानान्येतानि षट् नृणां ॥
स्थानकानि पुनस्त्रीणि स्त्रीणामाहुर्मनीषिणः।
आयतं चावहित्थं च स्यादश्वक्रान्तमेव च ॥
एकः समो हि यत्रान्यो सार्धतालद्वयान्तरः।
भवेत्पक्षस्थिते अस्रे जङ्घायां किञ्चिदुन्नतः ॥
सावष्टम्भं वपुः शेषं स्थानकं चेति वैष्णवम्।
समपादे सशेषादौ तालमात्रकृतान्तरौ ॥
सार्धतालद्वयस्थारु सार्धतालद्वयान्तरौ।
त्र्यस्रौ पक्षस्थितौ पादौ वैशाखस्थानके मतौ।
कटिरावसनौ स्यातां चतुस्तालान्तरस्थिती ॥

सोमराजदेवः

स्थानानां विनियोगः

पदार्थानुनयेऽस्यैव वाक्यार्थानुप्रवेशतः।
आदौ मध्येऽवसाने वा कुर्यात्तानि यथोचितम् ॥
प्राधान्यख्यापनायेति रहस्यमिदमीरितम्।
यत्राभिनयहस्तानां प्राधान्यं करणे भवेत् ॥

वाक्यार्थाभिनयस्तत्र कार्यो नृत्तेन केवले ।
नृत्ते हस्तप्रधाने तु करणं तत्र शस्यते ॥

नृत्तरत्नावली

स्थाप्याः

अंशा जीवस्वरस्तत्र तत्प्राधान्येन वर्तिताः ।
ये ते जीवस्वरस्य तु तथा वेदध्वनेरपि ।
वेदध्वनिन मध्यानां स्थाप्या ये ते प्रकीर्तिता ॥
अन्यायताः प्रयोगा ये स्थाप्यास्ते स्युरिहाध्वनः ।

कुम्भः

स्थायगतिः

मत्तमतङ्गवच्चत्र सविलासा भवेद्यदि ।
गीतस्य तद्युता स्थायागतेरुक्ता मनीषिभिः ॥

कुम्भः

स्थायगुणः

स्थापनायास्तु ये ज्ञेया स्थाया गुणभिधावशात् ।
पुनः पुनः स्थापयित्वा येषां प्रतिपदं कृतिः ॥

कुम्भः

स्थायाः

स्थाया गीतेषु ते ज्ञेयाः घटनाया मनीषिभिः ।

कुम्भ

रागस्य भजते रक्तिः प्रयत्नाद्भजनं मतम् ।
तद्युजो भजनस्योक्ताः स्थापनायाश्च तान् जगुः ॥
येषां संस्थाप्य संस्थाप्य कृतिः प्रतिपदं भवेत् ।
शक्तेरतिशयाधानाद्रक्तेश्छायाः प्रकीर्तिताः ॥

मोक्षदेवः

स्थायिदृष्टिलक्षणम्

साभिलाषा महर्षात्र विकासा समतारका ।
मधुरा च भवेद्दृष्टिः स्निग्धेति रतिभावजा ॥
रूक्षतारा च लोला च स्मरगर्भा निमेषभाक् ।
किञ्चिदाकुञ्चिता दृष्टिः क्रुद्धा क्रुद्धे प्रशस्यते ॥
निश्चले तारके यस्याः स विलासा स्थिरा च या ।
सत्त्वोद्गारपरा दृष्टिः सा दृप्तोत्साहसम्भवा ॥
स्फारोभयपुटा तारा तरलीकृततारका ।
निष्कम्पमध्या निर्दिष्टा भावदृष्टिर्भयानका ॥
लक्ष्यं वीक्षितुमुद्विग्ना ध्यानोन्मीलिततारका ।
ससङ्कोचपुटा दृष्टिः जुगुप्सायां जुगुप्सिता ॥
अतिस्पष्टपुटद्वन्द्वा भृशमुद्धततारका ।
सविकासा समा दृष्टिर्विस्मये विस्मृता स्मृता ॥

सोमराजदेवः

स्थायिनो मुख्यता

एवं विभावादिवर्गे भावाः स्थायिन एव हि ।
रसत्वव्यपदेशस्य योजनं नान्यदिष्यते ॥

कुम्भः

स्थायिलक्षणम्

रसचर्वणपर्यन्तं यस्य स्याद्व्यभिचारिणः ।
व्याप्तिः स एव भावः स्यात्स्थायी संचारिणः परे ॥

विप्रदासः

स्थायिभावः

या रसकारणताप्रोक्तानुभावानां तु साऽन्यथा ।
तीव्रसंवेदनगताभिनयप्रतिपादिता ॥
भावस्य रसता तस्माद्भावावस्थाजुषोऽस्य च ।
हेतुत्वमनुभावानां सामाजिकधियं प्रति ॥
अर्थोर्धे भरताचार्यसंमतिः सम्यगीर्यते ।
यथा बहुद्रव्ययुतैर्व्यञ्जनैर्बहुभिर्युतम् ॥
आस्वादयन्ति भुञ्जानां भुक्तं भक्तविदो जनाः ।
भावाभिनयसंबन्धान् तान्तान् भावांस्तदा बुधाः ॥
आस्वादयन्ति मनसा तस्मान्नाट्ये रसाः स्मृताः ।
यथा गुडादिभिर्द्रव्यैः व्यञ्जनौषधिसंयुतैः ॥
निर्वर्तन्ते षाडवाद्या नानाभावोपसङ्गताः ।
स्थायिनो रसतां भावास्तथैव प्राप्नुवन्ति हि ॥

कुम्भः

रतिर्हासः शुचः क्रोधोत्साहौ भयजुगुप्सने ।
विषादश्चाथ निर्वेदः स्थायिभावाः नवेत्यमी ॥

हम्मीरः

स्थायिभावदृष्टयः

स्निग्धदृष्टा च लीना च क्रुद्धा दृप्ता भयान्विता ।
जुगुप्सिता विस्मितेति दृष्टयः स्थायिभावजाः ॥

सङ्गीतनारायणे

स्थायिस्वरूपः

सत्यसंस्काररूपेण स तु स्थायी सभागतः ।
न तिरस्कृतसंस्कारास्त्वङ्गे गच्छन्ति नापरे ॥

मोक्षदेवः

स्थायिभावलक्षणम्

प्रथमे यः समुद्भूतस्तथाऽन्तेऽप्यवतिष्ठते ।
स्थायी भावः स विज्ञेयो .... ॥

शुभङ्करः

स्थायी

आदौ मन्द्रस्वरासक्तं स्थायी चेत्यभिधीयते ।

भरतकल्पलता

सर्वेषां समवेतानां रूपं यस्य भवेद्बहु ।
स मन्तव्यो रसः स्थायी शेषाः सञ्चारिणो मताः ॥

कुम्भः

स्थितपाठ्यलक्षणम्—लासः

आसनस्था वदेद्यत्र प्राकृतं विरहे वधूः ।
मन्मथानलतप्ताङ्गी स्थितपाठ्यं तदुच्यते ॥

नृत्तरत्नावली

स्थितपाठ्यविधिः

स्थितपाठ्यस्य वक्ष्यामि विधानं चाप्यतः परम् ।
वृत्तमेकमथ द्वे वा योजयेत्पञ्चपाणिना ॥
ततःपरं ते भूयोऽपि युग्मतालेन वा स्मृते ।
अवसानं च कर्तव्यं त्वरितं पञ्चपाणिना ॥
द्विकलेनेति विज्ञेयं स्थितं पाठ्यं प्रयोक्तृभिः ।
उपोह्य ताले त्र्यश्रे तु वृत्त्या तैस्तैः समैस्तथा ॥
आसीनपाठ्यं युञ्जीत सर्वैर्भूपैस्तु पौरुषैः ।
गेयं चतुर्भिः पादैस्तु समैरर्थवशानुगैः ।
आसीनपाठ्ये कर्तव्यं विधिवत्पञ्चपाणिना ॥

नाट्यशास्त्रे

स्थिरकम्पः

स स्थिरो यत्र कम्पः स्यात्स्वराणां छायवर्णगः ।

कुम्भः

स्थूलहस्तः—हस्तपाटः

स्थूलहस्तस्तदा ज्ञेयो यदा वाद्यपुटं द्वयम् ।
ऊर्ध्वघातद्वयं त्यक्त्वा तलहस्तेन हन्यते ॥
खुं ड दां

कुम्भः

स्निग्धमधुसूदनरासावलयप्रबन्धः

मालवश्रीस्मृतो रागस्तालो निस्सारुसंज्ञकः ।
वाग्गेयकारनामांकात् पदतस्तेन सन्ततिः ॥
ततपाटपदानि स्युः पञ्चषानि रसोऽत्र च ।
शृङ्गारो वासुदेवस्य क्रीडनं रासकादिभिः ॥
छन्दोऽपि रासको ज्ञेयं स्वेच्छया वा कृतं भवेत् ।
स्निग्धमधुसूदनोदयरासावलयनामकः ।
प्रबन्धः पृथिवीभर्त्रा प्रबन्धप्रीतये हरेः ॥

कुम्भः

स्नुपाहस्तः

पताकेन भुवं दर्शयन् वामहस्तेऽर्धचन्द्रकम् ।
स्नुषायां च प्रयोक्तव्यं कोहलेन प्रकीर्तितम् ॥

भरतकल्पलता

स्फुरितम्

स्फुरितं कम्पितं प्रोक्तं शीते शीतज्वरे बुधैः ।

शुभङ्करः

स्यन्दिता

वक्षोजप्रणयीमुष्टिः अन्योन्यावर्जिताः कराः ।
यस्यां सा जनिता ज्ञेया पादस्तु तलसंचरः ॥
एता देशीविदः केचिदूचुर्मुसलघाटिका ।
जनी विषण्णोरुसमे वामेतिर्यक्प्रसारितः ॥
पञ्चताळान्तरं तस्यां स्यन्दिते यन्निगद्यते ।
ताळस्तत्तत्करांगुष्ठमध्ययोस्तु तयोर्मतम् ॥

जायनः

स्रस्तालसम्

शरीरमलसं नेत्रे मन्थराकारधारिणी ।
हस्तौ स्रस्तौ वियुक्तौ च तदा स्रस्तालसम्मतम् ।
व्याधिमूर्च्छामदग्लानिद्रानिभीतिषु तन्मतम् ॥

कुम्भः

स्वच्छाया

स्वररागानुमिश्रा च स्वच्छाया परिकीर्तिता ।

भरतकल्पलता

स्वस्तिकाश्लेषः

बिभ्रतो स्वस्तिकाकारं करयोः स्कन्धदेशतः ।
वलनं चेत्तदा प्रोक्तं स्वस्तिकाश्लेषचालयम् ॥

स्वरः

राजते यः स्वयं नादः स स्वरः सान्वयो मतः ।

सोमराजदेवः

तारकारो समासक्तः स्वरश्च परिकीर्तितः ।

भरतकल्पलता

राजृ दीप्ताविति ... स्वशब्दपूर्वकस्य च ।
स्वयं यो राजते यस्मात् तस्मादेष स्वरः स्मृतः ॥

मतङ्गः

स्वरसाधारणम्

स्वरसाधारणं काकल्यन्तरस्वरौ । तत्र–द्विश्रुतिप्रकर्षणान्निषादवान् काकलीसंज्ञो निषादः ; न षड्जः ।

कलत्वात्काकली कष्टत्वाद्वाति सौक्ष्म्यादथवा काङ्क्षितत्वात् । उभयसंबन्धात्काकलीसंज्ञा । यथा :— षण्णां रसानां मध्ये लवणः क्षारसंज्ञः, एवं निषादः काकलीसंज्ञो गान्धारश्चान्तरसंज्ञो भवति ।

नाट्यशास्त्रे

स्वरकरणम्

पदैश्च यत्र ... ध्रुवोद्ग्राहौ निरन्तरौ ।
न्यासांसौ च स्वरेऽभीष्टे रासस्तालो द्रुतो लयः ।
आभोगनामने तु स्याद्धातुश्चैव महः पुनः ॥

मोक्षदेवः

स्वरकाकुः

श्रुतिन्यूनाधिकत्वेन या स्वरान्तरसंश्रया ।
स्वरान्तरस्य रागे स्यात्स्वरकाकुरसौ भवेत् ॥

कुम्भः

स्वरकुलानि

रिधौ ऋषिकुले जातौ निषादोऽसुरवंशजः ।
देववंशास्तु समगाः पञ्चमः पितृवंशजः ॥
ब्रह्मजाती समौ ज्ञेयौ रिधौ क्षत्रियजातिकौ ।
निगौ वैश्याविति प्रोक्तौ पञ्चमः शूद्रजातिकः ॥

सङ्गीतमकरन्दे

स्वरगोत्राणि

षड्जस्य जमदग्निश्च आत्रेयो ऋषभस्य च ।
गान्धारस्य गौतमस्तु वसिष्ठो मध्यमस्य च ॥
श्रीवत्सः पञ्चमस्यैव धैवतस्य पराशरः ।
शालङ्कायो निषादस्य गोत्राणि कथितानि च ? ॥

सङ्गीतमकरन्दे

स्वरछन्दांसि

क्रमादनुष्टुब् गायत्री त्रिष्टुब् च बृहती तथा ।
पङ्क्त्युष्णिगौ च जगती छन्दांसि परिकीर्तिताः ॥

संगीतमकरन्दः

स्वरच्छाया

श्रुतिनानाधिकतया रागे स्वरस्य कस्यचित् ।
च्छायाया दृश्यते तां तु स्वरच्छायां जगुर्बुधाः ॥

कुम्भः

स्वरताराः

षड्जः शतभिषग्जश्च चित्रा च ऋषभस्य च ।
गान्धारस्य धनिष्ठा भं मध्यमस्य मखा स्मृता ॥
पञ्चमस्योत्तरा भं स्यात्पूर्वाषाढा तु धैवतम् ।
अनूराधा निषादस्य षड्जादीनां तु तारकाः ॥

सङ्गीतमकरन्दे

स्वरस्थानानि

तत्र षड्जश्चतुर्थो स्यात्सप्तमी ऋषभस्वरः ।
ततो गान्धारसंस्थाना नवमी स्यात्ततःपरम् ॥
त्रयोदशी श्रुतिस्तत्र मध्यमस्वरवादिनी ।
पञ्चमः स्यात्सप्तदशी धः स्याद् विंशतिका श्रुतिः ।
स्याद्द्वाविंशतिका तत्र निषादस्वरवादिनी ॥

सङ्गीतसूर्योदये

स्वरदेवताः

वह्निर्ब्रह्मा शारदा च शर्वश्रीनाथभास्कराः ।
गणेश्वरादयो देवाः षड्जादीनां तु देवताः ॥

सङ्गीतमकरन्दे

स्वरदोषाः

दुष्टं लोकेन शास्त्रेण श्रुतिकालविरोधि च ।
पुनरुक्ताङ्कितं बाह्यं गतक्रममपार्थकम् ।
ग्राम्यं सन्दिग्धमित्येवं दशधा स्वरदुष्टता ॥

भरतकल्पलता

स्वरद्वीपाः

जम्बुशाककुशक्रौञ्चशाल्मलीश्वेतनामसु ।
द्वीपेषु पुष्करे चैव जाताः षड्जादयः स्वराः ॥

सङ्गीतमकरन्दे

स्वरप्रबन्धाः

प्रबन्धान् संप्रवक्ष्यामि नामलक्षणसंयुतान् ।
स्वरार्थः स्वरपूर्वं च करणं वर्तिनी तथा ॥

विवर्तिनी मातृका स्यादेला ढौङ्की तु जोम्बडः ।
लम्भको जयमाला च चर्या मङ्गल एव च ॥

एकावली रासकः स्यादङ्कचारिण्यतःपरम् ।
कैवाडो नन्दनामाथ पञ्चतालेश्वराभिधः ॥

गद्यं च मङ्गलाचारो मनोरम उदीरितः ।
प्रमोदो वर्णरसको रससन्दोहकस्तथा ॥

सोमकीर्तिप्रबन्धः स्यात्ततो रागकदम्बकः ।
आर्या गाथा चचरी च वीरश्रीशुकशारिका ॥

सोमवल्लभसंज्ञः स्यादथ कन्दश्चतुर्मुखः ।
प्रतापवर्धनाख्यश्च विजयश्चक्रवालकः ॥

त्रिभङ्गिर्विक्रमश्चाथ वाच्यः क्रौञ्चपदस्तथा ।
कलहंसोऽथ मन्तव्यो नाम्ना हरिविलासकः ।
प्रबन्धानामिति प्रोक्ताश्चत्वारिंशद्द्वयाधिकाः ॥

सोमराजदेवः

स्वरप्रमेयाः

श्रुतयोऽथ स्वरा ग्रामौ मूर्छनास्तानसंयुताः ।
स्थानानि वृत्तयश्चैव शुष्कं साधारणे तथा ।
जातयश्चैव वर्णाश्च नानालङ्कारसंयुताः ॥
एष स्वरगतोद्देशः ... ।

दत्तिलः

स्वरभिन्नः

यदा वादी गृहीतः स्यात् संवादी च विमोक्ष्यते ।
विवादी चानुवादी वा स्वराभिन्नः स उच्यते ॥

मतङ्गः

स्वरभेदाः तेषां लक्षणानि च

षड्जः स्यादृषभश्चैव गान्धारो मध्यमस्तथा ।
पञ्चमो धैवतश्चाथ निषादश्चेति ते क्रमात् ॥

तेषां संज्ञा सरिगमपधनीसपरा मताः ।
नासा कण्ठ उरस्तालुर्जिह्वा दन्तस्तथैव च ॥

षड्भ्यः सञ्जायते यस्मात्ततः षड्ज इति स्मृतः ।
नाभेः समुत्थितो वायुस्तालुर्जिह्वाग्रसंहतः ॥

ऋषभो नदते यस्मात्तस्मादृषभ उच्यते ।
वायुः समुत्थितो नाभेर्जिह्वातालन्तकण्ठजः ॥

जातो मुख्यश्च गान्धर्वे गान्धारस्तेन स स्मृतः ।
वायुः समुत्थितो नाभेर्हृद्योष्ठसमाहतः ॥

स्वरमध्यस्थितो यस्मात्तेनासौ मध्यमो मतः ।
वायुः समुत्थितो नाभेरुरःकण्ठशिरोष्ठतः ॥

पञ्चमेन च सञ्जातः पञ्चमस्तेन कथ्यते ।
वायुः समुत्थितो नाभेरुरो दन्तशिरस्तथा ॥

कण्ठस्थानस्थितो यस्मात्तेनासौ धैवतो मतः ।
निषीदन्ति स्वराः सर्वे निषादस्तेन कथ्यते ॥

हम्मीरः

स्वरभेदाः

स्वरा वादी च संवादी विवादी च चतुर्विधाः ।
अनुवादी च सर्वत्र प्रयोगे बहुशः स्मृतः ॥

वादी स्वरस्तु राजा स्यान्मन्त्री संवादिरुच्यते ।
स्वरो विवादी वैरी स्यादनुवादी च भृत्यवत् ॥

सङ्गीतमकरन्दे

स्वरमहिमा

येषु स्वरेषु या प्रोक्ता बहुता चाल्पताऽपि वा ।
अनुक्ताऽपि हि सा ज्ञेया जातिष्वेषु स्वरेषु हि ॥

कुम्भः

स्वररसाः

षड्जस्याद्भुतवीरौ च ऋषभस्य तु रौद्रकः ।
गान्धारस्य च शान्तं च हास्याख्यं मध्यमस्य च ॥

पञ्चमस्य च शृङ्गारो बीभत्सो धैवतस्य च ।
करुणा च निषादस्य सप्तस्थान रसा नव ॥

सङ्गीतमकरन्दे

स्वरर्षयः

दक्षोऽत्रिः कपिलश्चैव वसिष्ठो भार्गवस्तथा ।
नारदस्तुम्बुरुश्चैव षड्जादीनां ऋषीश्वराः ॥

सङ्गीतमकरन्दे

स्वरलक्षणम्

आवृत्य प्रथमं खण्डं गीयतेऽथ द्वितीयकम् ।
तृतीयं नाम युक्तं च ततस्त्वाद्यमुदीर्यते ॥

अविच्छिन्नैः स्वरैर्यत्रारभ्यते खण्डयुग्मकम् ।
यतिः करणसंज्ञः स्यात्स्वराख्यं करणं मतम् ॥

ग्रहः कार्यो यथा काममत्र न्यासोऽशसंयुतः ।
प्रभोर्नाम स्वकीयं च देयं वाग्गेयकारकैः ॥

सोमराजदेवः

स्वयं यो राजते नादः स स्वरः परिकीर्तितः ।
सोऽपि सप्तविधस्तज्ज्ञैः प्रोक्तः षड्जादिभेदतः ॥

हम्मीरः

स्वरलङ्घितः

उल्लङ्घयन् स्वरान् भूरीन् लाघवादन्तरान्तरान् ।
स्वरलङ्घितनामा स्यात्स्थायः सङ्कीर्णलक्षणः ॥

कुम्भः

स्वरस्वरूपः

स्वरः स्यात् हृदयानन्दकरः श्रवणगोचरः ।
द्वाविंशतिश्च श्रुतयः स्वराश्च श्रुतियोनयः ॥

षड्जऋषभगान्धारो मध्यमः पञ्चमस्तथा ।
धैवतश्च निषादश्च सप्तैते परिकीर्तिताः ॥

भवन्ति षाड्जीप्रमुखाः सप्तैकादशजातयः ।
न जातिरहितं किञ्चिद्गानं स्याद्भुवनत्रये ॥

सोमराजदेवः

स्वराः

स्वर्युते देशभाषायामादिक्षान्तं यथाविधि ।
तेन स्वराः समाख्याता अन्ये षड्जादयः स्वराः ॥

मतङ्गः

स्वरादिलक्षणम्

ग्रामान् जातीः स्वरान् वर्णान् पञ्चगीतीरलङ्कृतीः ।
अनिबद्धस्वरज्ञेयो स स्वरादिरिहोच्यते ॥

मोक्षदेवः

स्वराभ्यासः

यस्यामभ्यासवेगेन निर्यान्तीवोपरि स्वराः ।

कुम्भः

स्वस्तिकः

पादोऽथ स्वस्तिकाकारकारितः ।

कुम्भः

तालेनैकतः केचित्तु स्वस्तिको द्विगुणस्ततः ।
अब्जपत्रान्तगर्भश्च भ्रमराम्रेडिते मते ।
केषांचित् पूर्वपूर्वस्माद्द्विगुणः स्यात्परः परः ॥

हम्मीरः

—हस्तपाटः

स्वस्तिकौ चेत्करौ भूत्वा पुटमेकं प्रयत्नतः ।
निहन्यतां स्वस्तिकं तं स्वस्तिकोऽत्र गतोऽवदत् ॥
तकट तकट तक·

कुम्भः

स्वस्तिकं, मध्यनन्द्यावर्तित च

मिथः श्लिष्टकनिष्ठौ च चरणौ कुञ्चितौ यदा ।
स्वस्तिको संहितास्थाने स्वस्तिकं कीर्तितं तदा ॥

तिर्यञ्चौ चरणौ पार्श्वसङ्गतौ वर्धमानकौ ।
चरणौ वर्धमानस्थावितस्त्यन्तरितौ यदा ।
षडङ्गुलान्तरौ मध्यनन्द्यावर्तं तदोदितम् ॥

कुम्भः

स्वस्तिकलक्षणम्

उत्श्लिष्टहंसपक्षाभ्यां गदितौ स्वस्तिकौ करौ ।

हम्मीरः

स्वस्थौ

स्वस्थौ स्वभावजौ प्रोक्तौ वायुस्वस्तिक्रियासु तौ ।

कुम्भः

स्वस्थम्

हस्तावूरू कटी न्यस्तौ हृदयं किञ्चिदुन्नतम् ।
विस्तारिताञ्चितौ पादौ स्थानं तत्स्वस्थमुच्यते ॥

कुम्भः

स्वाधीनभर्तृका—नायिका

आश्लेषचुम्बनशतैः कुसुमादिदानैः
प्रेमोत्तरप्रणयकोमलचाटुवाग्भिः ।
संस्तूयते प्रियतमेन च यानुरागात्
स्वाधीनभर्तृकपदप्रकटीकृता सा ॥

शुभङ्करः

स्वाभाविकः

स्वभाविको यथार्थस्तु भावेनाश्लिष्ट उच्यते ।

कुम्भः

ह

हतस्वरालक्षणम्

हतस्वरा वराटी स्यात्पञ्चमा हतकम्पिता ।
षड्जांशन्याससंयुक्ता मन्द्रधैवतभूषिता ॥

मोक्षदेवः

हरिणत्रासिका

तलेऽङ्घ्र्योः स्वस्तिकीकृत्य कुञ्चिते वलितान्तके ।
उत्प्लुत्य निपतेताङ्घ्रेद्धरिणत्रासिका तदा ॥

कुम्भः

हरिणप्लुता

निपतेतां समुत्क्षिप्य यत्राङ्घ्री संहतौ भुवि ।
हरिणीव तदा चारी विज्ञेया हरिणप्लुता ॥

कुम्भः

हरितालः

हरितालो देवमयः तं विना स्यान्मसी वृथा ।
तदेवं मन्त्रमुच्चार्य मन्त्रयेद्धरितालकम् ॥

वर्णिकाग्रहनाथ त्वं निर्मितोऽसि स्वयं भुवा ।
सर्वसिद्धिप्रदो नाट्ये सर्वदेवैश्च वन्दितः ॥

सर्वपापहरः साक्षात् हरिताल नमोऽस्तु ते ।
तस्मात्प्रयच्छ मे सिद्धिं सर्वदेवमय प्रभो ॥

ततः स्निग्धे शिलापट्टे हरितालं च चूर्णयेत् ।
विशोषितां मृदं कृत्वा कराभ्यां मर्दयेन्मुखम् ॥

समाश्लेषा यथा वक्त्रे समस्ते मृत्तिका भवेत् ।
नवनीतेन लिप्त्वाऽथ धूपं सर्वरसोदितम् ।
कृत्वा वक्त्रे लिपेत्तत्र हरितालं ततः समम् ॥

सङ्गीतनारायणे

हर्षपुरी भाषा

षड्जांशग्रहणन्यासा तारपञ्चमभूषिता ।
मन्द्रमध्यमभूयिष्ठा धैवतेन विना कृता ॥

भाषा हर्षपुरी नाम हर्षादौ विनियोजिता ।
आचष्ट याष्टिकस्त्वेनां पूर्णां मालवकैशिके ॥

कुम्भः

हसितः

नीनींनी । नीनीनीनी । धाधाधाधाधाधा । पापापापापा ।
मामामामा गागागारी रीस । इति हसितः ।

हस्तक्षेत्राणि

पार्श्वद्वयपुरस्ताच्च पश्चादूर्ध्वमधःशिरः ।
ललाटकर्णस्कन्धोरोनाभयः कटिशीर्षकौ ।
ऊरुद्वयं च हस्तानां क्षेत्राणीति त्रयोदश ॥

कुम्भः

हस्तः—भेदाश्च

गजवाजिविमानाद्रि धूमं वर्णध्वजादि यत् ।
नाट्ये विधीयते सोऽयं हस्त इत्यभिधीयते ॥

स पुनस्त्रिविधो ज्ञेयः सन्धिमो व्याजिमस्तथा ।
वेष्टिमश्चेति यत्कीलवस्तुचर्मादिभिः कृतः ॥

सुसन्धिरूपं नाट्ये तु स सन्धिम इतीरितः ।
कृत यन्त्रादिभिर्व्याजे रूपं व्याजिम उच्यते ।
वेष्ट्यते जतुसिक्थाद्यैर्यद्रूपं वेष्टिमो मतः ॥

वेमभूपालः

—वाद्यम्

चतुरश्रत्र्यश्रमिश्रखण्डतालैश्चतुर्विधः ।
हस्तोऽसौ यत्र खण्डानि देंकारादीनि षोडश ।
यद्वाऽष्टौ वाऽथ चत्वारि द्वे वा खण्डे यथाविधि ॥

कुम्भः

हस्तकरणम्

निष्पत्तौ निरपेक्षायां करस्याभिनयाय यः ।
क्रियाविशेषः क्रियते तद्धस्तकरणं मतम् ॥

सङ्गीतनारायणे

हस्तकरणलक्षणम्

निष्पत्तौ निरपेक्षायां करस्याभिनयो हि यः ।
क्रियाविशेषः क्रियते तद्धस्तकरणं मतम् ॥

हम्मीरः

हस्तकाः

योगप्रदालिङ्गनाख्यौ करौ द्विशिखरस्तथा ।
कलापकः किरीटश्च चषकश्चाथ लेखनः ॥
सप्तैते हस्तकास्सन्ति बृहद्देशीविदां मते ।
अष्टचत्वारिंशदेते भवन्त्यभिनये कराः ॥

कुम्भः

उपधानः सिंहमुखः कदम्बश्च निकुञ्चकः ।
असंयुतेषु चत्वारो भवन्त्यन्ये च हस्तकाः ॥

विप्रदासः

हस्तकानामशीतित्वम्

सम्प्रदायाद्युक्तिबलाल्लोकाद्वात्र विशेषधीः ।
क्रमादशीतिरेवं स्युः सर्वे सम्भूय हस्तकाः ॥

कुम्भः

हस्तप्राणाः

प्रसारितं कुञ्चितं च रेचितं चोचितं तथा ।
अपवेष्टितकं चापि प्रेरितोद्वेष्टिते तथा ॥

व्यावृत्तपरिवृत्ते च सङ्केतस्तदनन्तरम् ।
चिह्नं पदार्थटीकेति प्राणा द्वादश हस्तगाः ॥

भरतकल्पलता

हस्तपाटः

हस्तपाटत्वमप्येषां हस्तेनोन्नमतो मतम् ।
त एव तलपाटाः स्युस्तलसंयोगसंभवाः ॥

तानुत्प्रेक्ष्य यथा वर्णं चत्वारो नन्दिनोदिताः ।
स्युरेकविंशतिर्हस्तपाटा वाद्यसमाश्रयात् ॥

षोडशान्ये हुडुक्कायां प्रायिकत्वे व्यवस्थिताः ।
हस्तपाटा अपाटाख्या अष्टौ विषमसंज्ञिनः ॥

कुम्भः

हस्तपाटभेदाः

वल्कुलः खलकश्चैव पाण्यन्तरनिकुट्टकः ।
दण्डहस्तः पिण्डहस्तो युगहस्तोऽर्धहस्तकौ ॥

स्थूलहस्तोऽर्धार्धपाणिः पार्श्वपाण्यर्धपाणिकौ ।
कर्तरीसमकर्तर्यौ तथा विषमकर्तरी ॥

समपाणिश्च विषमपाणिः स्यात्पाणिहस्तकः ।
नागबन्धावघटकौ स्वस्तिकश्च समग्रहः ।
इत्येकविंशतिर्हस्तपाटाः स्युर्मुरजादिषु ॥

तलप्रहारः प्रथमः प्रहारो वलितस्तथा ।
गुरुगुम्फितसंज्ञश्चार्धसञ्चस्त्रिसञ्चकः ।
त्रिषम भ्यरत इत्यष्टौ .... ॥

कुम्भः

हस्तप्रचारः

अल्पो हस्तप्रचारः स्यात्प्रत्यक्षे भूरि सात्त्विके ।
परोक्षे प्रचुरः स स्यान्मध्यमे मध्यमो मतः ॥

कार्याः सुव्यक्तलक्ष्माणः पात्रैरुत्तममध्यमैः ।
स सौष्ठवा सुनीचैस्तु पाणयस्तद्विलक्षणाः ॥

हम्मीरः

हस्तप्राणाः

प्रसारणं कुञ्चितं च रेचितं चापि पुंखितम् ।
अपवेष्टितकं चापि प्रेरितोद्वेष्टिते अपि ॥

व्यावृत्तपरिवृत्तश्च सङ्केतस्तदनन्तरम् ।
चिह्नं पदार्थटीकेति प्राणा द्वादश हस्तजाः ॥

शृङ्गारशेखरः

हस्तप्राणविधिः

मणिबन्धाभिधायां तौ करौ सम्यक्प्रसारितौ ।
रेचिताख्यमिति ख्यातौ सर्वहस्तेष्वयं विधिः ॥

शृङ्गारशेखरः

हस्तभेदाः

उत्तानः पार्श्वगश्चैव तथाऽधोमुख एव च ।
हस्तप्रचारस्त्रिविधो भरतेन प्रकीर्तिताः ॥ कचित्तु

उत्तानोधःस्थलः पार्श्वतलो हस्तोऽग्रतस्तलः ।
स्वयंमुखतलश्चोर्ध्वमुखोऽधोवदनस्तथा ॥

पराङ्मुखः सम्मुखश्च हस्तोऽन्यपार्श्वतो मुखः ।
ऊर्ध्वगोऽधोगतः पार्श्वगतो हस्तस्तिरोगतः ।
सम्मुखगत इत्याहुः हस्तान् पञ्चदशापरे ॥

सङ्गीतनारायणे

हस्तरेचकलक्षणम्

हस्तयोर्भ्रमणं तूर्णं समं तद्धस्तपक्षयोः ।
पर्यायाः क्रियते यत्र स भवेद्धस्तरेचकः ॥

मोक्षदेवः

हस्तलक्षणम्

प्रोक्तं हस्तद्वयं कैश्चिदसंयुक्तो निकुञ्चकः ।
युक्तो द्विशिखरे नृत्यहस्तकौ वरदाभयोः ॥

अनामापार्श्वसंलग्ना चतुरस्य कनीयसी ।
यस्मिन्निकुञ्चको वेदभाषणे स्वल्पदर्शने ॥

समं शिखरयोर्योगात् भवेद्विशिखराभिधः ।
शापार्थमङ्गुलीस्फोटे भामिनीकोपकर्मणि ॥

अस्य विश्लेषणादिष्टौ नास्तीत्यभिनयो बुधैः ।
पराङ्मुखतलौ भिन्नौ पताकौ कटिपार्श्वगौ ।
अतः स्खलतगौ स्यातां क्रमेण वरदाभवेत् ॥

जायनः

हस्तलक्षणविस्तारः

स्थानादिन्यासभेदेन संभवन्तोऽप्यनेकधा ।
कियन्तोऽपि मया प्रोक्ता करा विस्तरभीरुणा ॥

दृष्टिभ्रूमुखरागाद्यैरुपाङ्गैरपि पोषिताः ।
व्यक्ताङ्गैश्च करा योज्या रसभावप्रकाशकाः ॥

अभिनेयेषूत्तमेषु फालस्था मध्यमेषु च ।
उत्तमे निकटस्थाः स्युः मध्यस्थाः मध्यमेषु च ॥

मध्यमे सात्त्विके प्रोक्तो मध्यमोऽल्पसात्विके ।
प्रचुरः सबुधैरेवं प्रचारस्त्रिविधस्मृतः ॥

नियोज्यास्तूत्तमैः पात्रैः प्रत्यङ्गाद्युपबृंहिताः ।
ससौष्ठवाः सुलक्ष्माणः करास्थैर्मध्यमैः पुनः ? ॥

सुव्यक्तलक्ष्मगाः कार्यं सैष्ठवाधिष्ठितास्तथा ।
नीचैस्तैस्ते प्रयोक्तव्याः लोकवृत्तसमाश्रयाः ॥

मूर्छिते तन्द्रिते भीते व्याकुले च जुगुप्सिते ।
ग्लाने जरार्दिते सुप्ते ज्वरिते शोकपीडिते ॥

शीतार्ते व्याधिते मत्ते विषण्णोन्मत्तयोरपि ।
चिन्तान्विते प्रमत्तेऽपि निश्चेष्टे तापसेऽपि च ॥

न कराभिनयः कार्यं इत्युक्तं पूर्वसूरिभिः ।
ये करास्त्वन्तरं भावं सूचयन्तीह ते मताः ।
मूर्छितादिष्वपि प्रायः कराः कर्कटकादयः ॥

अशोकः

हस्तसंख्या

सर्वेऽपि मिलिता हस्तास्त्रिषष्टिः सूरिभिर्मताः ।

कुम्भः

हस्ता——नक्षत्रहस्तः

हस्ता रिक्षेः पताका स्यादूर्ध्वं चलितरूपकः ।

शृङ्गारशेखरः

हारदामविलासकम्

भुजाकुंसांतरं गत्वा युगपत्पार्श्वयोर्द्वयोः ।
एते ता यत्र तत्प्रोक्तं हारदामविलासकम् ॥

हावलक्षणम्

भाव एव प्रकृष्टः सन् शृङ्गाररससूचकः ।
नानावस्थान्तरकृतो हाव इत्यभिधीयते ॥

वेमभूपालः

हावभावादिलक्षणम्

भावात्समुत्थितो हावो हावाद्धेला समुत्थिता ।
शृङ्गारप्रौढिमा हेला कार्या वने हि यः ? ॥

हम्मीरः

हासः

बालकादिवचोवेषवैषम्ये जनिता हि या ।
चेतसो विकृतिः स्वल्पा स हासः कथितः खलु ॥

हास्यः

दीर्घस्वरहितो हास्यः ।

कुम्भः

हास्यभेदाः

स्मितं च हसितं चैव विहसितं साहसितम् ।
भवेत्प्रहसितं चापि तथाऽतिहसितं भवेत् ।
षड्भावसंश्रितं हास्यमेवं षड्विधमुच्यते ॥

जगद्धरः

हास्यरसः

हास्यं नाम रसः शिवप्रियतमो हासाविधावप्रतो
हर्षादप्यनुभावतः सुखमयः सम्पद्यते पञ्चधा ।
स्त्रीनीचप्रकृतिर्निगूढविषयः सग्रामकाणां प्रियः
शृङ्गारानुगतः स्वयं निगदितो देवेन कामद्विषा ॥

जगद्धरः

हास्ये प्रयोक्तव्यानि पात्राणि

स्त्रीनीचबालमूर्खादि विषयो हास्य इष्यते ।
प्रहासश्चातिहासश्च धीराणां नैव दृश्यते ॥

स्मितं विहसितं चैषां प्रबलेष्वपि हेतुषु ।
विपर्यासेन वैषम्यं नाटकादौ विशेषतः ॥

स्मितं च हसितं चापि विशिष्टानां प्रकीर्तिताम् ।
मध्यमानां विहासश्चावहासश्चैव दृश्यते ॥

प्रहासोऽप्यतिहासश्च मन्दानामिह जायते ।
विरुद्धश्चेष्टिनैस्तैस्तैर्विकृतैरुपभूषणैः ॥

विकृतैरेव वचनैरन्यैर्हास्यरसोदयः ।
शङ्काऽसूयाऽवहित्थं च निद्रा चपलता मतिः ॥

ग्लानिकामश्च लज्जा च हास्यभावा भवन्त्यमी ।
स्थायी भावोऽस्य हासश्च कथितो भरतादिभिः ॥

अङ्गनेपथ्यवाक्येन त्रिधैव परिकीर्तितः ।
प्रसिद्ध आश्रयश्चास्य चेटचेटीविटादयः ॥

जगद्धरः

हिन्दोलकलक्षणम्

हिन्दोलकस्य छायाटी वल्लतातसमुद्भवा ?।
षड्जांशार्षभहीना स्यात् शृङ्गारे मन्द्रधैवता ॥

मोक्षदेवः

हुडुका

अथोच्यते हुडुकाया लक्ष्मोद्देशं क्रमागतम् ।
वितस्तिद्वितयं दैर्घ्ये वितस्तिद्वितयं पुनः ॥
चतुर्भिरङ्गुलैर्युक्तैः परिधावङ्गुलोन्मिता ।
पिण्डे सप्ताङ्गुले वक्त्रे मण्डलये वक्त्रयोः पुनः ॥
एकादशाङ्गुले वल्ली संभवे स्थौल्यतः पुनः ।
सपादाङ्गुलके स्यातां मुद्गली कृतबन्धने ॥
स वक्त्रे चैतयोः कार्यं रन्ध्रषट्कं तथाऽग्रतः ।
वध्ररज्जुनिवेशार्थं विदधीतार्गलात्रयम् ॥
पश्चाद्भागेऽर्गलाद्वन्द्वमन्तरे कलशान्वितम् ।
ततो निधीयते मध्ये वध्ररज्ज्वन्तरे तथा ॥
अङ्गुलत्रयविस्तीर्णा मनोज्ञाधरपट्टिका ।
द्वात्रिंशतंतुग्रथितरज्ज्वा कक्षाद्वयं दृढम् ॥
बध्वा निवेश्यते तद्वत्त्रिगुणा स्कन्धपट्टिका ।
तत्रोत्पेक्षणसंस्था च कुर्यात्पादाङ्गुलोन्मितम् ॥
रन्ध्रं तस्याश्चतुर्थांशे नादनिर्मुक्तिहेतवे ।
हुडुकैषा स्मृता अस्यां देवता सप्तमातरः ॥
निधायस्कन्धदेशे च वादकः स्कन्धपट्टिकाम् ।
धृत्वा वामेन हस्तेन रम्यामुदरपट्टिकाम् ॥
हुडुका वादनं कुर्यात् मञ्जादक्षिणपाणिना ।
देंकारवर्जितास्तत्र मञ्जाकारसमन्वितान् ॥
कुर्वीत व्यापकान् वर्णान् कादिकान् पाटकोविदः ।
लोके स्कन्धावजमिमामावजं च प्रचक्षिरे ॥
हौडुक्किकस्यानुगताः श्रेष्ठा मार्दलिका स्मृताः ।
खदिरानौकहोद्भूतो मितास्यो मध्यमो महान् ॥
त्रिवितस्तिर्भवेद्दैर्घ्यां षष्ट्यङ्गुलसुविस्तृतः ।
पञ्चाङ्गुलं भवेत्तस्य मुखं सव्यापसव्यकम् ॥
चतुर्विंशाङ्गुलं लोहं दक्षिणं वलयं भवेत् ।
वामास्यवलयं वल्ल्यो कुर्यात्किंचित्ततोऽधिकम् ॥
चतुरङ्गुलमुत्सृज्य वामास्ये लोहपत्रिकाम् ।
अङ्गुलत्रयविस्तारां दृढाकम्पे विवेष्टयेत् ॥
कलशाश्च भवेत्सप्त रीतिकोरि विनिर्मिताः ?।
परितः कीलितास्तेषां चतुरङ्गुलमन्तरम् ॥
रन्ध्राणि तेन मानेन कुर्यात्सव्यास्यचर्मणि ।
आवेष्ट्य कलशांस्तांश्च वलयं लोहनिर्मितम् ॥
आकृष्य सुदृढां कुर्यात्सप्तरन्ध्रनिबन्धनैः ।
षाण्मासिकस्य वत्सस्य मृतस्यादाय पारिकाम् ॥
अङ्गुल्य वल्लीवलयं तया सुश्लक्ष्णभूतया ।
हौडुक्का हस्तपाटा चित्रपाटावपाटकौ ॥
हुडुका एव संमण्डिढक्काभेरीसमुद्भवा ।
कंसारघर्घरीकम्राभार्गलीसंभवास्तथा ॥
क्रमादष्टादशपदेष्वेते पाटाः प्रतिष्ठिताः ।
द्वादशादिपदेष्वस्ति विशेषः सोऽभिधीयते ॥
ढक्काकुडुक्ककरटा प्रोद्भवा द्वादशेऽधिकाः ।
त्रयोदशे सेलुकाजानिस्सानोत्थाश्चतुर्दशे ॥
घण्टोद्भवाः पञ्चदशे पदे सप्तदशेऽपि च ।
किरिकिट्टभवा अष्टादशे पाटा अमी स्थिताः ॥
वीरदण्डयां वनिभवा अधिकाः संप्रकीर्तिताः ?।
रागाणां षाडवाद्यां च ग्रामसंभवतापि च ॥
वर्ण्यो वाग्गेयकारेण तालरागार्णवः स च ।
प्रबन्धः पृथिवीभर्ता मुरारिप्रीतये कृतः ॥

कुम्भः

हुडुकाहस्तपाटाः

उल्लोलः पाण्यन्तरश्च निर्घोषः खण्डकर्तरी ।
दण्डहस्तः समनखो बिंदुरन्मूलहस्तकः ॥
रेचको भ्रमरो विद्युद्विलासश्चार्धकर्तरी ।
अलग्नको रेफसप्तपाणिस्तु परिव्यस्तकः ॥
इति षोडशपाटाः स्युः सर्ववाद्योपयोगिनः ।
प्रायेणैतान् प्रयुञ्जन्ते हुडुक्कायां मुनीश्वराः ।
अथोदाहरणं तेषां वक्ष्ये लक्ष्यपुरःसरम् ॥

कुम्भः

हुरमयी

आलातं परिवर्त्यांगं पार्दं पृष्ठगतं यथा ।
अलातांघ्रौ पृष्ठगते शीघ्रमन्यांघ्रिलङ्घने ।
लङ्घयेदङ्घ्रिणयन्येन प्रोक्ता हुरमयी नटैः ॥

हृदयङ्गमः

ताभ्यः कियत्यो वक्ष्यन्ते कामसञ्जीविकास्तु याः ।
पताकं हृदये न्यस्य करे न्यासोऽपसारिते ॥

तदेवाङ्गं बहिः क्षिप्त्वा भ्रमणाद्धृदयङ्गमाः ।
भ्रामे यत्र स्मृतोऽभ्यासस्तद्वसुत्रिपुरःसरम् ॥

कुम्भः

हेतवः पञ्च

अत ऊर्ध्वं प्रवक्ष्यामि विकल्पान् पञ्चहेतुकान् ।
जातिः स्थानं प्रकारश्च प्रमाणं नाम चैव च ॥
ज्ञेयो ध्रुवाणां गानज्ञैर्विकल्पः पञ्चहेतुकः ।
वृत्ताक्षरप्रमाणं हि जातिरित्यभिसंज्ञिता ॥
समार्धविषमाभिश्च प्रकारः परिकीर्तितः ।
षट्कलाष्टकले चैव प्रमाणे द्विविधे स्मृते ॥
यथा गोत्रकुलाचारैर्नृणां नामाभिधीयते ।
एवं नामाश्रयोपेतं ध्रुवाणामपि चेष्यते ॥

नाट्यशास्त्रे

हेमन्तकालाभिनयः

सङ्कोचनाच्च गात्राणामभिलाषाच्च पावके ।
हेमन्तसमयो नाट्यचतुरैरभिनीयते ॥

वेमभूपालः

हेला—सात्त्विकभावः

प्रौढेच्छयाऽतिरूढानां नारीणां सुरतोत्सवे ।
मधुविस्तारमालम्ब्य हेला सा परिकीर्तिता ॥

शुभङ्करः

हेलालक्षणम्

सग्रीवा रेचको नेत्रभ्रूविकारोपबृंहितम् ।
शृङ्गारनिर्भरो हाव एव हेलेत्युदाहृता ॥

वेमभूपालः

हौडुक्किकवाद्यानि

वल्लिश्च वल्लिपाटश्च घत्ताभेदो गडप्पणी ।
अनुश्रवणिका हस्तो जोडणी त्रिगुणा ततः ॥
पञ्चहस्तः पञ्चपाणिर्वाद्यं स्यात्पञ्चकर्त्तरी ।
ततश्चन्द्रकलामेतान्याहुराद्यास्त्रयोदश ।
प्रायेणैतानि दृश्यन्ते हुडुक्कायां परेष्वपि ॥

कुम्भः

हंसकः—ध्रुवः

द्वादशाक्षरपादोऽन्यो भोगिकफलभाक्प्रभोः ।
हंसके च रसे वीरे गीयदेशे खराह्वये ।
लघुर्गुरुर्लघुर्यत्र स तालो हंसकः स्मृतः ॥

गान्धर्ववेदे

हंसकलासः

हस्तौ विधाय हंसास्यौ यत्र हंसीव नर्तकी ।
अतिरम्याङ्घ्रिविन्यासैर्नानागतिमनोहरम् ॥
यदा नृत्यति हंसाद्यः कलासस्तदोदितः ।
नर्तकी दक्षिणे पार्श्वे विधाय मकरं करम् ॥

अशोकः

हंसपक्षः

स्त्रीणां विभ्रमभेदेषु स्थापनीयः स्तनान्तरे ।
निर्वेदादिषु भावेषु शृङ्गारादिरसेष्वपि ।
रोमाञ्चाद्यनुभावेषु प्रयोज्योऽयं यथोचितम् ॥

विप्रदासः

हंसप्लुतम्

चार्या तदाख्यया ज्ञेयं करणं हंसकप्लुतम् ।
करौ सामान्यतः प्रोक्तौ वक्षःपादानुगाविह ।
चार्या एव द्विरावृत्त्या भट्टतण्डुरिदं जगौ ॥

नृत्तरत्नावली

हंसावतीलक्षणम्

रागो वसन्तनामा स्याद्यस्यां तालो द्वितीयकः ।
वृत्तिरारभटी रीतिर्लाटी रौद्ररसः पुनः ॥
वर्णो रक्तश्च देवी तु चामुण्डा क्षत्रजं कुलम् ।
सप्रासाङ्घ्रिन्यासः प्रोक्ता हंसावती तु सा ॥
विभावसुगणाः पञ्च समीरणगणोऽग्रतः ।
इत्येला लक्षणयुतामुवाच कुलशेखरः ॥
ऽ। ऽऽ। ऽऽ। ऽऽ। ऽऽ। ऽ॥ ऽ

सोमराजदेवः

हंसावत्यां कामगणाः

आदौ मध्ये तथा प्रान्तेऽनुप्रासैः संयुतो भवेत् ।
हंसावती कामलेखा कर्णाटः परिगीयते ।
साम्नः पश्चिमवक्त्रेच्छा गायत्री ब्रह्मविप्रपः ॥
स देवता वैश्यजातिः प्रत्येकं करणत्रये ।
आद्यमध्यभवाः प्रासाः चत्वारो मान्मथा गणाः ॥

मोक्षदेवः

हंसी—गतिः

हंसस्येव गतिर्मन्दा मन्दव्यावर्तनान्तरा ।
या कौशलाहंसलीलागतिः सा प्रोच्यते नटैः ॥

सङ्गीतमुक्तावली देवेन्द्रकृता

प्रस्तारलक्षणम्





इति संख्या १८	१	२	३	६	१०	२९	३३	६०	२६	१०९१	३४०	६२०	१०८९	१९५०	३४८४

१	२	३	६	१०	१९	३३	५०	१०५	इति पातालः
१	२	५	१७	२२	४४	६०	२८९	३५८	

द्रुतमेरुः

													१
											१	१	१३
									१०	११	११	१२	७७
							१	१	९	१०	५४	६५	२५४
					१	१	७	८	३४	४४	१४७	२००	५४६
			१	१	५	६	२०	२०	७०	१४	२००	३५७	६४६
	१	१	३	४	९	१४	२५	४४	५३	१२५	१५३	३३६	३४९
१	१	२	२	५	४	१२	७	२६	१३	५६	२४	११८	४४

NATAK
NEW DELHI